

एकविंशोऽध्यायः ।

इमं मे वरुण श्रुधी हवमुद्या च मृडय । त्वामवस्युराचके ॥ १ ॥

इमम्मे । इमम्मेनानुवाकमैष्टिकं हौत्रम् । प्रथमे वारुण्यौ गायत्रीत्रिष्टुभौ वारुणस्य हविषो याज्यानुवाक्ये । हे वरुण त्वं मे मम इमं हवमाह्वानं श्रुधि शृणु च अपरम् अद्य मृडय सुखय कालविलम्बनं मा कृथाः यतः अहम् अवस्युः आत्मनोऽवनं पालनमिच्छन् त्वाम् आचके । आचक इति कान्तिकर्मा । कामये ॥ १ ॥

प्रणम्य शिरसा देवं लक्ष्मीकान्तमुमापतिम् ।
एकविंशेऽधुनाध्याये वेददीपो वितन्यते ॥

का० (१९, ७, १३) इमे मे तत्त्वेत्येककपालस्य । अवभृथेष्टौ वारुणस्यैककपालस्य पुरोडाशस्य द्वे पुरोऽनुवाक्यायाज्ये इत्यर्थः ॥ वरुणदेवत्ये गायत्रीत्रिष्टुभौ शुनःशेपदृष्टे । हे वरुण ! त्वं मे मम इमं हवमाह्वानं श्रुधि शृणु शुशृण्विति हेर्धिः संहितायां दीर्घः । च पुनः अद्य दिने मृडयास्मान् सुखय यतोऽहं त्वामाचके कामये आचक इति (निघ० २, ६) कान्तिकर्मा । कीदृशोऽहम् अवस्युः अवनमवः पालनमवतेरसुन् तदिच्छति अवस्युः सुपः आत्मनः क्यच् (पा० ३, १, ८,) क्याच्छन्दसीति उप्रत्ययः आत्मनो रक्षणमिच्छन् त्वामिच्छामीत्यर्थः ॥ १ ॥

तत् त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ २ ॥

तत्त्वा यामि ॥ २ ॥

व्याख्याता (१९, ४९) ॥ २ ॥

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव-

यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांᳪसि प्रमुमुग्ध्यस्मत् ॥ ३ ॥

त्वन्नः। अग्निवारुण्यौ त्रिष्टुभौ अग्निवरुणयोः स्विष्टकृतो याज्यानुवाक्ये। हे अग्ने त्वं नोऽस्मान्प्रति वरुणस्य देवस्य हेडः क्रोधम् अवयासिसीष्ठाः यसु उपक्षये। अस्यावपूर्वस्य ण्यन्तस्य लिङि रूपम् अवगमय। यजिष्ठः यष्टृतमः। वह्नितमः वोढृतमो हविषाम्। शोशुचानः देदीप्यमानः। किञ्च अस्मत् अस्मत्तः विश्वा विश्वानि सर्वाणि द्वेषांसि दौर्भाग्यानि प्रमुमुग्धि मुञ्च ॥ ३ ॥

का० (१८, ७, १४) अग्नीवरुणयोस्त्वं नः स त्वं न इति। अवभृथेष्टावेवाग्निवरुणयागे पुरोऽनुवाक्यायाज्ये। अग्निवरुणदेवत्ये त्रिष्टुभौ वामदेवदृष्टे। हे अग्ने! त्वं नोऽस्मान् प्रति वरुणस्य देवस्य हेडः क्रोधमवयासिसीष्ठाः निवर्त्तय यसु उपक्षये अवपूर्वस्य णिजन्तस्यास्याशीर्लिङि रूपम्। किञ्च विश्वा विश्वानि सर्वाणि द्वेषांसि दौर्भाग्यानि अस्मत् अस्मत्तः सकाशात् प्रमुमुग्धि प्रमुञ्च दूरीकुरु मुचेर्व्यत्ययेन शपः श्लुः। कीदृशस्त्वम् विद्वान् स्वाधिकारं जानन् यजिष्ठः अतिशयेन यष्टा यजिष्ठः तुरिष्ठेमेयःस्विति तृचो लोपः। वह्नितमः वहतीति वह्निः अत्यन्तं वह्निर्वह्नितमः हविषां वोढा। शोशुचानः अत्यन्तं शोचते दीप्यते शोशुचानः शोचतेर्यङ्लुगन्ताच्छानच्प्रत्ययः ॥ ३ ॥

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणᳪ रराणो वीहि मृडीकᳪ सुहवो न एधि ॥ ४ ॥

स त्वन्नः। हे अग्ने स त्वम् ऊती ऊत्या अवनेन नः अस्माकम् अवमः अवितृतमः पालयितृतमः भव। अस्या उषसः व्युष्टौ व्युष्टिकाले अविपमेवाहनीति भावः। नेदिष्ठः अन्तिक-

तमश्च भव । रराणः रममाणः रा दाने । हविर्ददद्ध । नोऽस्माकं वरुणम् अवयक्ष्व अवगत्य यज । अवपूर्वो यजतिर्नाशनार्थः इह तु धात्वन्तरयोगात्स्वार्थमेव वक्ति । ततः सुमृडीकं सुखकरं हविः वीहि भक्षय । नः अस्माकं सुहवः स्वाह्वानः एधि ॥ ४ ॥

हे अग्ने ! स त्वमस्या उषसो व्युष्टौ व्युष्टिकालेऽस्मिन्नहनि ऊती ऊत्या अवनेन नोऽस्माकमवमः रक्षकः नेदिष्ठोऽन्तिकतमः समीपतमश्च भव । अवतीत्यवमः अवतेरमप्रत्ययः । यद्वा अवतीत्यवः पचाद्यच् अत्यन्तमवोऽवतमः तलोपश्छान्दसः । अत्यन्तमन्तिको नेदिष्ठः अन्तिकवाढयोर्नेदसाधाविति इष्ठे परे नेदादेशः । किञ्च रराणो हविर्ददत् सन् नोऽस्माकं वरुणमवयक्ष्व अवयज अवपूर्वाद् यजतेर्लोटि शपो लुक् ततो मृडीकं सुखकरं हविः वीहि भक्षय वी कान्तिव्याप्तिक्षेपप्रजनखादनेषु । किञ्च नोऽस्माकं सुहवः स्वाह्वान एधि भव घ्वसोरेद्धावभ्यासलोपश्चेति एकारः ॥ ४ ॥

महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम । तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥ ५ ॥

महीमूषु । आदित्यचरोर्याज्यानुवाक्ये त्रिष्टुभौ महीम्महतीम् । ऊसू निपातोपसर्गौ छन्दःपरिपूर्तिफलौ । मातरं निर्मात्रीं साधुव्रतानाम् । ऋतस्य यज्ञस्य पत्नीं जायां पालयित्रीं वा । अवसे अवनाय तर्पणाय वा हुवेम आह्वयाम । तुविक्षत्राम् । बहुक्षरणां वा बहुक्षतत्राणां वा । अजरन्तीं जरारहिताम् उरूचीं बह्वञ्चनां सुशर्माणं कल्याणाश्रयां साधुसख्याम् अदितिमदीनाम् । सुप्रणीतिं सुप्रणेत्रीम् ॥ ५ ॥

का० (१९, ७, १५) आदित्यस्य सुत्रामाणम महीमूषु मातरमिति । आदित्यं चरुं यक्ष्यमाणो निर्वपत्यादित्यमीजान इत्यादावन्तो

चादित्यश्चदरुकस्तस्य सुत्रामाणमिति (६) पुरोऽनुवाक्या महीमू षितिति याज्या। अदितिर्देवतया त्रिष्टुप्। उ सु निपातौ पादपूरणौ संहितायामाद्यस्य दीर्घोऽन्त्यस्य पत्वम्। वयमवसे अवितुं रक्षितुं मदितिं हुवेम आह्वयामः तुमर्थे असेप्रत्ययः। कीदृशीमदितिं महीं महतीम्। सुव्रतानां शोभनकर्मणां मातरं निर्मात्रीम् व्रतमिति(निघ० २, १) कर्मनाम। ऋतस्य यज्ञस्य पत्नीं पालयित्रीम्। तुविक्षत्रां तुवीति (निघ० ३, १) बहुनाम बहुक्षतात् त्राणशीलाम्। अजरन्तीं न जीर्यति अजरन्ती तां जरारहिताम्। उरु अञ्चतीति उरूचीं बहुगमनशीलाम्। सुशर्माणं शोभनं शर्माश्रयः सुखं वा यस्यास्ताम्। सुप्रणीतिं शोभना प्रणीतिः प्रणयनं भजनं यस्यास्ताम्। अदितिरदीना देवमाता (निरु० ४, २२) ॥ ५ ॥

सुत्रामाणं पृथिवीं द्यामनेहसᳬं सुशर्माणमदितिᳬं सुप्रणीतिम्। दैवीं नावᳬं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ ६ ॥

सुत्रामाणम्। साधु पालयित्रीम् पृथिवीम् पृथिवीमिव लुप्तोपमानमेतत्। द्यामनेहसम् द्यामिव वाहयित्रीं जीवनहेतुभूताम् सुशर्माणं शोभनाश्रयां वा। अदितिमदीनाम्। सुप्रणीतिं सुप्रणेत्रीम्। दैवीं यज्ञमयां नावम्। स्वरित्रां साधुकेन्दुवालाम् अरित्रशब्दः केन्दुवालवचनः। अनागसमनपराधाम् अस्रवन्तीम् अपूर्यमाणामुदकेन। अनवच्छिन्नसाधुकर्मदायिनीमित्यर्थः। आरुहेम। स्वस्तये अविनाशाय ॥ ६ ॥

अदितिर्देवत्या त्रिष्टुप् गयप्लातदृष्टा। दैवीं देवसम्बन्धिनीं नावं यज्ञरूपां स्वस्तये कल्याणायाविनाशाय वयमारुहेम यज्ञं कृत्वा स्वर्गं गच्छेमेत्यर्थः। कीदृशीं नावं सुत्रामाणं सुष्ठु त्रायते रक्षति सुत्रामा ताम्। पृथिवीं विशालाम्। द्यां स्वर्गरूपां स्वर्गसेतुभूतामित्यर्थः। अनेहसमेह इति (निघ० २, १३) क्रोधनाम नास्ति एहो यत्र क्रोधरहिताम्। यद्वा लुप्तोपमानम् पृथिवीमिव सुत्रामाणं पालयित्रीं, द्यामिवानेहसमक्रोधाम्। सुशर्माणं साधुशरणभूताम्।

आदितिमखण्डितामदीनां वा । सुप्रणीतिं सुष्ठु प्रणयतीति सुप्रणीतिः साधुप्रणेत्री । स्वरित्रां साधुकेन्दुवालाम् अरित्रशब्दः केन्दुवालवाचकः अरित्रं केनिपातक इत्यभिधानात् (अमर० १, २, २७) प्रयाजानुयाजादयोऽरित्रस्थानीयाः । अनागसमनपराधम् । अस्रवन्तीमच्छिद्रां निर्दोषामित्यर्थः । ईदृशीं नावमारुहेम संहितायां दीर्घः ॥ ६ ॥

सुनावमारुहेयमस्रवन्तीमनागसम् । शतारित्राᳪं स्वस्तये ॥ ७ ॥

सुनावम् । गायत्री । तद्वै सर्व एव यज्ञो नौः स्वर्ग्येति श्रुतेरुपकल्पना । कल्याणीं नावम् आरुहेयम् अस्रवन्तीम् अच्छिद्राम् निर्दोषामित्यर्थः अनागसमपापाम् अभीप्सितार्थसाधनतत्परामित्यर्थः । शतारित्रां बहुकेन्दुवालाम् ऋग्यजुःसामाभिप्रायम् । स्वस्तये अविनाशाय । संसारसागरोत्तरणाय वा ॥७॥

स्वर्गसम्बन्धिनी देवत्या गायत्री । तद्वै सर्व एव यज्ञो नौः स्वर्ग्येति श्रुतेः स्वर्ग्या नौर्यज्ञ एव । सुनावं शोभनां नावं यज्ञरूपां स्वस्तयेऽविनाशाय संसारसागरोत्तरणायाहमारुहेयमारोहेयं यज्ञं कुर्यामित्यर्थः । कीदृशीमस्रवन्तीमच्छिद्राम् । अनागसं निरपराधां सर्वैष्टदामित्यर्थः । शतारित्रां बहुकेन्दुवालाम् ऋग्यजुःसामभिरित्यर्थः । स्मार्ते नावारोहणे विनियोगोऽस्या ऋचः ॥ ७ ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाᳪंसि सुक्रतू ॥ ८ ॥

आनः । मैत्रावरुण्याः पयस्यायाज्यानुवाक्ये गायत्रीत्रिष्टुभौ । आउक्षतम् आसिञ्चतम् नः अस्माकम् हे मित्रावरुणौ । घृतैः अक्षारोदकैः गव्यूतिम् गवि पृथिव्यामवनहेतुभूतं क्षेत्रं गोप्रचारं वा । किञ्च मध्वा रजांसि । मधुस्वादोदकेन रजांसि । लोका रजांस्युच्यन्ते । तान् आ उक्षतम् । हे सुक्रतू । सुकर्माणौ ॥ ८ ॥

का० (१९, ७, १६) आ नः प्र बाहवेति परस्यायाः । अवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतीति या पयस्या तस्या आ नो मित्रावरुणेति पुरोऽनुवाक्या प्रबाहवेति याज्या । मित्रावरुणदेवत्या गायत्री विश्वामित्रदृष्टा। हे मित्रावरुणा ! मित्रावरुणौ देवौ ! नोऽस्माकं गव्यूतिं यज्ञमार्गं घृतैर्युवामा उक्षतम् सर्वतः सिञ्चतम् । यद्वा गावि पृथिव्यामूतिमवनहेतुभूतं क्षेत्रं घृतैः शुद्धोदकैः सिञ्चतम् । किञ्च हे सुक्रतू ! शोभनः क्रतुः कर्म ययोस्तौ हे सुकर्माणौ ! मध्वा मधुना रजांसि लोकानाम् उक्षतम् अनित्यमागमशासनमिति नुमभावः ॥ ८ ॥

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन । आ मा जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ ९ ॥

प्रवाहवा। प्रसिसृतम् अन्तर्भावितण्यर्थः । प्रसारयतम् । बाहवा बाहू । किमर्थमिति चेत् । जीवसे नः । जीवनायास्माकम् । बाहुप्रसारणं जीवनहेतुप्रतिपक्षनिराकरणायेत्यर्थः । तत आ उक्षतम् आभिमुख्येन सिञ्चतम् नः अस्माकम् गव्यूतिम् । गवि पृथिव्यामूतिमवनम् जीवनहेतुभूतानि क्षेत्राण्यत्राभिमेतानि। तदर्थं हि वृष्टिः प्रार्थ्यमाना दृष्टार्था भवति । गोजातिविषयभूतां वा ऊतिम् अवनमार्गम् भक्षणमार्गाभिप्रायतो गोप्रवाटमिति यावत् । घृतेनाक्षारोदकेन । आ मा जने श्रवयतं युवाना। एवं मक्षारोदकेन सिक्तधान्यनिष्पत्तिहेतुना यज्ञं कुर्वाणम् मा माम् जने पदे आश्रवयतं प्रकथयतम् इत्थमदादित्थमयाक्षीदिति । हे युवानौ उच्छिन्नजरसौ । श्रुतम् आशृणुतं मम हे मित्रावरुणौ । हवेमा हवान् आह्वानानि इमानि। श्रुत्वा चातिष्ठतमित्यभिप्रायः॥९॥

मित्रावरुणदेवत्या त्रिष्टुप् वसिष्ठदृष्टा । हे मित्रवरुणौ ! हे युवानः ! युवानौ ! तरुणौ छिन्नजरसौ ! नोऽस्माकं जीवसे चिरं जीवनाय बाहवा बाहू प्रसिसृतमन्तर्भूतण्यर्थः प्रसारयतं जीवनविघ्न-

निवारणाय बाहुप्रसारणं कुरुतमित्यर्थः । किञ्च नोऽस्माकं गव्यूतिं क्षत्रं घृतेन जलेन वा उक्षतं सिञ्चतम् । भवत्सिक्तक्षेत्रनिष्पन्नधान्यैः यज्विनं मा मां जने जनपदे युयामाश्रवयतम् आश्रावयतम् इत्थमदात् इत्थमयाक्षीदिति लोके मां कथयतमित्यर्थः वृद्ध्यभाव आर्षः किञ्च युवां मे मम इमा इमानि हवा हवानि आह्वानानि श्रुतं शृणुतम् श्रुत्वा पूर्वोक्तं कुरुतमित्यर्थः शृणोतेः शपो लुक् ॥ ९ ॥

शं नो॑ भवन्तु वा॒जिनो॒ हवे॑षु दे॒वता॑ता मि॒तद्र॑वः स्व॒र्काः । ज॒म्भय॒न्तोऽहिं॒ वृकं॒ रक्षा॑ᳪसि॒ सने॑म्य॒स्मद्यु॑यव॒न्नमी॑वाः ॥ १० ॥

वाजे॑वाजेऽवत वाजिनो नो॒ धने॑षु विप्रा अमृता ऋतज्ञाः । अ॒स्य मध्वः॑ पिबत मा॒दय॑ध्वं तृ॒प्ता या॑त प॒थिभि॑र्देव॒यानैः॑ ॥ ११ ॥

शन्नः ॥ वाजे वाजेऽवत वाजिनस्य याज्यानुवाक्ये व्याख्याते ॥ १० ॥ ११ ॥

का० (१९, ७, १७) वाजिनस्य शं नो वाजे-वाज इति । पयस्यायां वाजिनयागोऽस्ति तत्र शं न इति पुरोऽनुवाक्या वाजे वाज इति याज्या ॥ व्याख्याते (९, १६, १८) ॥ १० ॥ ११ ॥

समि॑द्धो अ॒ग्निः स॒मिधा॒ सुस॑मिद्धो॒ वरे॑ण्यः । गा॒य॒त्री छन्द॑ इन्द्रि॒यं त्र्य॑वि॒र्गौर्वयो॑ दधुः ॥ १२ ॥

समिद्धो अग्निः । एकादश आप्रियः । अनराशंसा ऐन्द्रायावयोधसेऽनुष्टुभः समिद्धः सन्दीप्तः । अग्निः समिधा प्रयाजदेवतया । सुसमिद्धः प्रयाजघृतेन । वरेण्यः वरणीयः सम्भजनीयः । गायत्रीछन्दः त्र्यविश्च गौः वयः अवयः अनुचरत्वेन यस्य स तथोक्तः । इन्द्रियं वीर्यं च । वयः सत्त्वमन्नं वा आयुर्वा इन्द्रे दधुः निदध्युः ॥ १२ ॥

का० (१९, ७, १९) वायोधस आप्रियः समिद्धो अग्निः समि॰ धेति । वायोधसे पशौ समिद्धो अग्निरित्याद्या एकादश ऋच आप्रियः प्रयाजानां याज्या इति सूत्रार्थः ॥ एकादश आप्रीदेवत्या अनुष्टुभः स्वस्त्यात्रेयदृष्टाः । अग्निः गायत्री छन्दो गौश्च एते त्रय इन्द्रे इन्द्रियः वीर्यं वयः सत्त्वमन्नमायुर्वा दधुः दधतु प्रयच्छन्तु । कीदृशोऽग्निः समिधा प्रयाजदेवतया समिद्धः दीप्तः सुसमिद्धश्च अतिदीप्तः प्रयाजघृतेनेति शेषः वरेण्यः वरणीयः सम्भजनीयः । कीदृशो गौः ऽयविः अयोऽवयोऽनुचरत्वेन यस्य स ऽयविः यद्वा षण्मासावधिः कालोऽविः अयोऽवयो यस्य सार्धवत्सरो गौरित्यर्थः ॥ १२ ॥

तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती । उष्णिहा छन्द इन्द्रियं दित्यवाड् गौर्वयो दधुः ॥ १३ ॥

तनूनपात् । तनूनामपान्नपान्नप्ता अग्निः । गौर्वा तनूः तस्य नप्ता घृतम् । शुचिव्रतः उज्ज्वलकर्मा । तनूपाः सरस्वती च उष्णिहा विभक्तिव्यत्ययः उष्णिक् छन्दः दित्यवाट्. गौः एते चत्वारः इन्द्रियं वयश्च इन्द्रे दधुः ॥ १३ ॥

तनूनामपां नपात् पौत्रोऽग्निः तनूनां गवां नपात् घृतं वा प्रयाजदेवता सरस्वती उष्णिहा छन्दः हलन्तत्वादाप् उष्णिक् छन्दः गौश्च एते चत्वार इन्द्रे इन्द्रियं वयश्च दधुः दधतु । कीदृशस्तनूनपात् शुचिव्रतः शुचि शुद्धं व्रतं कर्म यस्य सः । कीदृशी सरस्वती तनूपाः तनूं शरीरं पाति रक्षतीति । कीदृशो गौः दित्यवाट् दित्यं हविर्वहतीति ॥ १३ ॥

इडाभिरग्निरीड्यः सोमो देवो अमर्त्यः । अनुष्टुप्छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥ १४ ॥

इडाभिरग्निः । इडाभिः प्रयाजदेवतया सह अग्निः ईड्यः स्तोतव्यः । सोमश्च देवः अमर्त्यः अमरणधर्मा अनुष्टुप्छन्दः पञ्चाविश्च गौः इन्द्रियं वयश्च इन्द्रे दधुः ॥ १४ ॥

इडाभिः प्रयाजदेवताभिः सहाग्निः सोमो देवः अनुष्टुप्छन्दः

गौः पते पञ्च इन्द्रियं वयश्चेन्द्रे दधुः। कीदृशोऽग्निः ईड्यः स्तुत्यः कीदृशः सोमः अमर्त्यः अमरणधर्मा कीदृशो गौः पञ्चाविः पञ्चावयोऽनुचराः कालावशेषा वा यस्य सार्धद्विवर्षः ॥ १४ ॥

सु॒ब॒र्हिर॒ग्निः पू॑ष॒ण्वान्त्स्ती॒र्णब॑र्हि॒रम॑र्त्यः । बृ॒ह॒तीछन्द॑ इन्द्रि॒यं त्रि॑व॒त्सो गौर्वयो॑ दधुः ॥ १५ ॥

सुबर्हिरग्निः । शोभनबर्हिः प्रयाजदेवतयाग्निः । पूषण्वान् पूष्णा संयुक्तः । स्तीर्णबर्हिस्तीर्णं बर्हिर्यस्य स तथोक्तः । अमर्त्यः अमरणधर्मा । बृहतीच्छन्दः त्रिवत्सश्च गौः पते इन्द्रियं वयश्च इन्द्रे दधुः ॥ १५ ॥

शोभनं बर्हिः प्रयाजदेवता अग्निः बृहती छन्दः गौः पते चत्वार इन्द्रियं वयश्चेन्द्रे दधुः । कीदृशोऽग्निः पूषण्वान् पूषास्यास्तीति पूष्णा युक्तः स्तीर्णबर्हिः स्तीर्णं बर्हिर्यस्य सः अमर्त्यः अनश्वरः कीदृशो गौः त्रिवत्सः त्रयो वत्सा अनुचरा वत्सरा वा यस्य सत्रिवत्सः ॥ १५ ॥

दुरो॑ दे॒वीर्दिशो॑ म॒हीर्ब्र॒ह्मा दे॒वो बृह॒स्पतिः॑ । प॒ङ्क्तिश्छन्द॑ इ॒हेन्द्रि॒यं तु॑र्य॒वाड् गौर्वयो॑ दधुः ॥ १६ ॥

दुरो देवीः । दुरः द्वारः प्रयाजदेवताः छान्दसं संप्रसारणम् । देवीः देव्यः दिशश्च महीः महत्यः । ब्रह्मा च देवः बृहस्पतिश्च । पङ्क्तिश्च छन्दः । इहेत्यभिनयनिर्देशः । इह यज्ञावयवे इह इन्द्रशरीरावयवे । तुर्यवाट् गौश्च इन्द्रियं वयश्च दधुः ॥१६॥

दुरो द्वारो देव्यः प्रयाजदेवताः छान्दसं सम्प्रसारणम् महीर्महत्यो दिशः ब्रह्मा देवो बृहस्पतिः पङ्क्तिश्छन्दः तुर्यं चतुर्थं वर्षं वहतीति तुर्यवाट् गौः पते षड् देवा इह इन्द्रं इन्द्रियं वयश्च दधुः ॥ १६॥

उ॒षे य॒ह्वी सु॒पेश॑सा॒ विश्वे॑ दे॒वा अम॑र्त्याः । त्रि॒ष्टुप्छन्द॑ इ॒हेन्द्रि॒यं प॑ष्ठ॒वाड् गौर्वयो॑ दधुः ॥ १७ ॥

उषे यह्वी । उषे इति द्विवचनसामर्थ्यात्सहचरितत्वाच्च द्वि-

तीया रात्रिर्गृह्यते । उषाश्च रात्रिश्च । किदृश्यौ यह्वी महत्यौ । सुपेशसा साधुरूपे । विश्वे च देवाः अमर्त्याः अमरणधर्माणः । त्रिष्टुप्छन्दः । इह इन्द्रपशयोः । पष्ठवाद् च गौः पष्ठं भारं वहतीति पष्ठवाद् । इन्द्रियं वयश्च दधुः ॥ १७ ॥

उषे-द्विवचनादिनं रात्रिश्च अमर्त्याः विश्वे देवाः त्रिष्टुप्छन्दः पष्ठं भारं वहतीति पष्ठवाड् गौः एते पञ्चेहेन्द्रियं वयश्च दधुः कीदृश्यौ उषे यह्वी यह्वौ महत्यौ । यह्व इति (निघ० ३, ३) महन्नाम। सुपेशसा शोभनं पेशो रूपं ययोस्ते सुपेशसौ सुरूपे विभक्तेराकारः ॥ १७ ॥

दैव्या होतारा भिषजेन्द्रेण सयुजा युजा । जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः ॥ १८ ॥

दैव्या होतारा अयं चाग्निः असौ च मध्यमः । भिषजौ इन्द्रेण संयुजौ संयुक्तौ समानकार्यौ । युजा परस्परेण युक्तौ । जगतीछन्दः अनड्वांश्च गौः एते इन्द्रियं वयश्च दधुः ॥ १८ ॥

दैव्यौ होतारौ प्रयाजदेवौ अयं चाग्निरसौ च मध्यमो वायुः । जगती छन्दः अनः शकटं वहतीत्यनड्वान् गौः एते चत्वार इन्द्रे इन्द्रियं वयश्च दधुः । कीदृशौ होतारौ भिषजा भिषजौ वैद्यौ इन्द्रेण सह युज्येते सयुजौ संयुक्तौ युजौ परस्परं संयुक्तौ ॥ १८ ॥

तिस्र इडा सरस्वती भारती मरुतो विशः । विराड् छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः ॥ १९ ॥

तिस्र इडा । तिस्रो देव्यः इडा सरस्वती । भारती । मरुतश्च विशः इन्द्रस्य प्रजाः । विराट्छन्दः धेनुर्दोग्ध्री गौश्च । नकारश्चार्थे । एते इन्द्रियं वयश्च इन्द्रे दधुः ॥ १९ ॥

इडा सरस्वती भारतीति तिस्रः प्रयाजदेव्यः मरुतो विशः इन्द्रप्रजाः विराट् छन्दः धेनुः दोग्ध्री गौश्च नकारश्चार्थे एते षट् इहेन्द्रे इन्द्रियं वयश्च दधुः ॥ १९ ॥

त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥ २० ॥

त्वष्टा तुरीपः तूर्णमापन्नः अद्भुतः अद्भुत इव महानिस्यर्थः । इन्द्राग्नी च पुष्टिवर्द्धनौ । द्विपदा च छन्दः । उक्षा गौर्न । नकारश्चार्थे । उक्षा सेक्ता च गौः । एते इन्द्रे इन्द्रियं वयश्च दधुः ॥ २० ॥

त्वष्टा प्रयाजदेवः इन्द्राग्नी द्विपदा छन्दः उक्षा सेक्ता गौश्च एते इन्द्रे इन्द्रियं वयश्च दधुः । कीदृशः त्वष्टा तुरीपः तूर्णमाप्नोति व्याप्नोति तुरीपः अद्भुतो महान् कीदृशाविन्द्राग्नी पुष्टिवर्धना पुष्टिं धनादिपोषं वर्धयतस्तौ पुष्टिवर्धनौ । नश्चार्थः ॥ २० ॥

शमिता नो वनस्पतिः सविता प्रसुवन् भगम् । ककुप्छन्द इहेन्द्रियं वशा वेहद्वयो दधुः ॥ २१ ॥

शमिता नः शमयिता इति प्राप्ते शमिता मन्त्र इति छान्दसः प्रयोगः शमिता नः अस्माकं वनस्पतिः सविता च प्रसुवन् भगं धनम् । ककुप् च छन्दः इहेत्यभिनयः इह इन्द्रे वशा वन्ध्या गौः वेहच्च विहन्ति त्यजति गर्भं या गौः सा तथोक्ता । इन्द्रियं वयश्च दधुः ॥ २१ ॥

वनस्पतिः प्रयाजदेवः सविता सूर्यः ककुप्छन्दः वशा वन्ध्या गौः वेहत् गर्भघ्नी गौः एते पञ्च इहेन्द्रे इन्द्रियं वयश्च दधुः । कीदृशो वनस्पतिः नोऽस्माकं शमिता शमयति सुखयति शमिता शमिता मन्त्र इति छान्दसो णिचो लोपः । कीदृशः सविता भगं प्रसुवन् धनं प्रेरयन् ददत् ॥ २१ ॥

स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् । अतिच्छन्दा इन्द्रियं बृहदृषभो गौर्वयो दधुः ॥ २२ ॥

स्वाहा यज्ञम् । स्वाहाकृतिभिः यज्ञं भेषजं करत् करोतु ।

कः करोतु । वरुणः सुक्षत्रः । अतिच्छन्दाश्च छन्दः बृहदृष-भश्च गौः इन्द्रे इन्द्रियं वयश्च दधुः ॥ २२ ॥

शोभनं क्षत्रं क्षतत्राणं यस्य स सुक्षत्रः शोभनक्षतत्राता वरुणः स्वाहा नामैकदेशे नामग्रहणं स्वाहाकृतिभिः प्रयाजदेवैः सह यज्ञं भेषजं यज्ञलक्षणमौषधमिन्द्राय करत् करोतु । किञ्च अतिच्छन्दाः छन्दः बृहत् महान् ऋषभः समर्थो गौः वरुणश्च स्वाहाकृतयोऽपि एते चत्वार इन्द्रियं वयश्च इन्द्रे दधुः दधतु ददतु ॥ २२ ॥

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः । रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥ २३ ॥

वसन्तेन ऋतुना । वपापुरोडाशपशूनां याज्यानुवाक्या अनुष्टुभः । वयोधसस्य पशोः । इन्द्रश्च वयोधा देवता । वसन्तेन ऋतुना सहायेन देवाः वसवः त्रिवृतास्तोमेन स्तुताः सन्तः रथन्तरेण च पृष्ठेन च सहायेन इन्द्रे तेजसा सह हविर्वपाख्यं वयश्च दधुः । यद्वा वसन्तेन ऋतुना स्तुताः त्रिवृतास्तोमेन च स्तुताः रथन्तरेण च पृष्ठेन स्तुताः सन्तो वसवो देवाः स्वकीयेन तेजसा इन्द्रे हविर्वयश्च दधुः । एवमुत्तरेष्वपि योज्यम् ॥२३॥

का० (१९, ७, २०) याज्यापुरोऽनुवाक्याश्च वपापुरोडाशपशूनां वसन्तेन ऋतुनेति । चकाराद्वयोधसे पशावेव षडृचो यथाक्रमं वपादीनां याज्यानुवाक्याः वपायागे वसन्तेनेति (२३) पुरोऽनुवाक्या ग्रीष्मेणेति (२४) याज्या पशुपुरोडाशयागे वर्षाभिरिति (२५) पुरोऽनुवाक्या शारदेनेति (२६) याज्या हृदयादियागे हेमन्तेनेति (२७) पुरोऽनुवाक्या शैशिरेणेति (२८) याज्येति सूत्रार्थः । अनुष्टुभः षट् लिङ्गोक्तदेवता वयोधा इन्द्रो देवतेत्यर्थः । वसवो देवा इन्द्रे तेजसा सह हविर्वपाख्यं वयः शक्तिं च दधुः दधतु स्थापयन्तु कीदृशा वसवः वसन्तेन ऋतुना त्रिवृता स्तोमेन रथन्तरेण पृष्ठेन च स्तुताः ॥ २३ ॥

ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुता । बृहता

यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥ २४ ॥

ग्रीष्मेण ऋतुना । सहदेवाः रुद्राः पञ्चदशे पञ्चदशेनेति विभक्तिव्यत्ययः पञ्चदशेन स्तोमेन स्तुताः सन्तः बृहता पृष्ठेन च सह । यशसा सह बलं हविः इन्द्रे वयश्च दधुः ॥ २४ ॥

रुद्रा देवा इन्द्रे यशसा सह बलं हविर्वयश्च दधुः । कीदृशा रुद्राः ग्रीष्मेण ऋतुना पञ्चदशाः पञ्चदशेन स्तोमेन विभक्तिव्यत्ययः बृहता पृष्ठेन च स्तुताः ॥ २४ ॥

वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुताः वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ २५ ॥

वर्षाभिर्ऋतुना । सह आदित्याः । स्तोमे सप्तदशे स्तोमेन सप्तदशेनेति विभक्तिव्यत्ययः । स्तुताः सन्तः वैरूपेण पृष्ठेन सह विशा च । ओजसा च हविरिन्द्रे वयश्च दधुः ॥ २५ ॥

आदित्या देवाः इन्द्रे विशा प्रजया ओजसा च सह हविर्वयश्च दधुः । कीदृशाः वर्षाभिर्ऋतुना सप्तदशेन स्तोमेन तृतीयार्थे सप्तम्यौ वैरूपेण पृष्ठेन च स्तुताः ॥ २५ ॥

शारदेन ऋतुना देवा एकविꣳश ऋभवं स्तुताः । वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥ २६ ॥

शारदेन ऋतुना सह ऋभवो देवाः एकविꣳशे । एकविंशेनेति विभक्तिव्यत्ययः । एकविंशेन स्तोमेन स्तुताः सन्तः विराजेन च पृष्ठेन सह श्रिया च श्रियं च हविरिन्द्रे वयश्च दधुः ॥ २६ ॥

ऋभवः ऋतुसंज्ञा देवाः इन्द्रे श्रियं हविर्वयश्च दधुः । कीदृशाः शारदेन ऋतुना एकविंशेन स्तोमेन वैराजेन पृष्ठेन श्रिया लक्ष्म्या च स्तुताः । सप्तमी तृतीयार्थे ॥ २६ ॥

हैमन्तेन ऋतुना देवास्त्रिणवे मरुतं स्तुताः । बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥ २७ ॥

हेमन्तेन ऋतुना सह देवाः मरुतः त्रिणवे। त्रिणवेनेति विभक्तिव्यत्ययः। त्रिणवेन स्तोमेन स्तुताः सन्तः। बलेन शक्करीः सह। क्करीरिति योनिनिर्देशः शाक्करस्य। शाक्करेणेति विभक्तिव्यत्ययः। शाक्करेण च पृष्ठेन सह। बलेन च सह। सहः हविः इन्द्रे वयश्च दधुः ॥ २७ ॥

मरुतो देवाः इन्द्रे बलेन सह सहः इन्द्रियसामर्थ्यं हविर्वयश्च दधुः। कीदृशा मरुतः हेमन्तेन ऋतुना त्रिणवेन स्तोमेन स्तुताः शक्करीरिति शाक्करस्य योनिनिर्देशः शाक्करेण पृष्ठेन स्तुता इत्यर्थः ॥ २७ ॥

शैशिरेण ऋतुना देवास्त्रयस्त्रिंशेऽमृता स्तुताः। सत्येन रेवतीः क्षत्रं हविरिन्द्रे वयो दधुः ॥ २८ ॥

शैशिरेण ऋतुना सह देवाः अमृताः त्रयस्त्रिंशे। त्रयस्त्रिंशेनेति विभक्तिव्यत्ययः। त्रयस्त्रिंशेन स्तोमेन स्तुताः सन्तः। सत्येन रेवतीः रेवतीरिति रैवतस्य योनिनिर्देशः। रैवतेन च पृष्ठेन सह सत्येन च क्षत्रं हविश्च इन्द्रे वयश्च दधुः ॥ २८ ॥

अमृता देवाः सत्येन सह क्षत्रं क्षतत्राणं हविर्वयः शक्तिं च इन्द्रे दधुः दधतु। कीदृशा अमृताः शारदेन ऋतुना त्रयस्त्रिंशेन स्तोमेन स्तुताः रेवतीरिति रैवतस्य योनिः रैवतेन पृष्ठेन स्तुता इत्यर्थः ॥ २८ ॥

होता यक्षत् समिधाग्निमिडस्पदेऽश्विनेन्द्रं सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं मधु शष्पैर्न तेजं इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥ २९ ॥

होता यक्षत्। द्वादशाप्रियस्तनूनपान्नराशंसयुक्ताः। मैपिकमश्विसरस्वतीन्द्रदेवत्यम्। दैव्यो होता यक्षत् यजतु। समिधा [illegible]। इडस्पदे। इडा गौरुच्यते तस्याः

पद आहवनीये स्थाप्यते तदाभिप्रायमेतत् । गोः पदे । अवस्थितमाहवनीयमग्निम् । एताश्च । देवताविशेषाः यजतु । अश्विनौ इन्द्रं सरस्वतीम् । अजो धूम्रो न नकारः समुच्चयार्थः प्रायः । अजो धूम्रो मेषश्च । गोधूमैः कुवलैश्च सहितः भेषजमन्नं संपद्यते । मधुशष्पैः न मधु च संपद्यते शष्पैरङ्कुरितव्रीहिभिः सहितः । तेजः इन्द्रियञ्च इन्द्रस्य यजमानस्य वा संपद्यते । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा इज्यमानाः सन्तः पयः सोमश्च सोममिति विभक्तिव्यत्ययः परिस्रुता सह घृतं मधु च व्यन्तु पिबन्तु । त्वमपि हेमनुष्यहोतः आज्यस्य यज आज्यं देहि ॥ २९ ॥

का० (१९, ६, १४) होता यक्षत् समिधाग्निमिति प्रयाजप्रैषास्त्रिपशोः । होता यक्षत्समिधाग्निमिडस्पद इत्यादयो द्वादश कण्डिकास्त्रिपशोः प्रयाजप्रैषाः स्युः ॥ द्वादशानामेषां प्रयाजयाज्यानां प्रैषा अश्विसरस्वतीन्द्रदेवत्याः आद्या आग्नेः । दैव्यो होता समिधा प्रयाजदेवतया सह अग्निमश्विना अश्विनौ इन्द्रं सरस्वतीं च इडस्पदे गोपदे आहवनीये यक्षत् यजतु गोपदे स्थाप्यत इत्यभिप्रायेणेदं वचनम् । तत्र यागे अजो धूम्रो मेषश्च गोधूमैः कुवलैः बदरैः शष्पैः अङ्कुरितव्रीहिभिश्च सहितो भेषजमौषधं भवति नकारौ चार्थौ इन्द्रायेति शेषः । कीदृशं भेषजम् मधु मधुरं तेजः तेजःप्रदमिन्द्रियमिन्द्रियसामर्थ्यप्रदम् । किञ्च ते अश्विसरस्वतीन्द्रा दैव्येन होत्रेज्यमानाः सन्तः पयः परिस्रुता मदिरया सह सोमः सोमं घृतं मधु च व्यन्तु पिबन्तु सोम इति विभक्तिव्यत्ययः सर्वत्र हे होतर्मनुष्यहोतः । त्वमपि आज्यस्य यज कर्माणि षष्ठी यजतिर्दानार्थः अश्व्यादिभ्य आज्यं देहीत्यर्थः ॥ २९ ॥

होता॑ यक्ष॒त्तनू॒नपा॑त् सर॑स्वती॒मवि॑र्मे॒षो न भे॑ष॒जं प॒था मधु॑मता॒ भर॑न्न॒श्विनेन्द्रा॑य वी॒र्यं॑ बद॑रैरुप॒वाका॑भिर्भेष॒जं तोक्म॑भिः॒ पयः॒ सोमः॒ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ॥ ३० ॥

होता यक्षत्तनूनपात्सरस्वतीम् । तनूनपातमिति विभक्तिव्यत्ययः । सरस्वती च । अश्विनेन्द्रायेत्युपरिष्टाद्व्यवहितं यत्पठ्यते तदिह कृतविभक्तिव्यत्ययं योज्यतेऽर्थसंबन्धात् । अश्विनौ इन्द्रश्च अविर्मेषो न भेषजम् । नकारः समुच्चयार्थीयो भिन्नक्रमः अविश्च मेषश्च भेषजम् इन्द्राय यजमानाय वा करोति । पथा मधुमता भरन् । पथा यज्ञमार्गेण मधुमता रसवता आत्मानम्भरन् हरन् हवींषि च देवान्प्रति हृग्रहोर्भश्छन्दसि हस्येति हकारस्य भकारः । वीर्यं बदरैरुपवाकाभिर्भेषजन्तोक्मभिः । उपवाकाभिः इन्द्रयवैः तोक्मभिरङ्कुरितयवैः । वीर्यम्भेषजं करोति मेष एव । इन्द्राय यजमानाय वा अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा इज्यमानाः पयःप्रभृतीनि पिबन्तु त्वमपि हे मनुष्यहोतः आज्यस्य यज ॥ ३० ॥

एकाधिका अत्यष्टिः । तनूनपादिति प्रथमा द्वितीयार्थे इन्द्रायेति चतुर्थी द्वितीयार्थे नकारश्चार्थः । दैव्यो होता तनूनपातं प्रयाजदेवं सरस्वतीमश्विनौ इन्द्रञ्च यजतु । तत्र यागे अविः अजः मेषश्च नश्चार्थे मधुमता रसवता पथा यज्ञमार्गेण भरन् आत्मानं हरन् सन् बदरैर्बदरीफलैः उपवाकाभिरिन्द्रयवैः तोक्मभिरङ्कुरितव्रीहिभिर्यवैर्वा सहितो वीर्य्यं शौर्य्यकरं भेषजं भवति । अश्विसरस्वतीन्द्रा दैव्येन होत्रेज्यमानाः पयआदीनि व्यन्तु हे होतः । त्वमपि आज्यस्य यज आज्यं देहि ॥ ३० ॥

होता॑ यक्ष॒न्नरा॒शꣳसं॒ न न॒ग्नहुं॒ पति॒ꣳ सुर॑या भेष॒जं मे॒षः सर॑स्वती भि॒षग्र॒थो न च॒न्द्र्य॒श्विनो॑र्व॒पा इ॒न्द्र॑स्य वी॒र्य्य॑ꣳ बद॑रैरुप॒वाका॑भिर्भेष॒जं तोक्म॑भिः॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ॥ ३१ ॥

होतायक्षन्नराशꣳसन्न । दैव्यो होता यजतु । नराशंसं न नग्नहुम्पतिम् । व्यवहितपदकल्पना । नराशंसश्च । पतिमधिप-

होता॑ यक्षदि॒डेडि॒त आ॒जुह्वा॑नः॒ सर॑स्वती॒मिन्द्रं॒ ब॒लेन॑ व॒र्धय॑न्नृष॒भेण॒ गवे॑न्द्रि॒यम॒श्विनेन्द्रा॑य भेष॒जं यवैः॑ क॒र्कन्धु॑भि॒र्मधु॑ ला॒जैर्न मास॑रं॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ॥ ३२ ॥

होता यक्षदिडेडितः । होता यजतु । इडा प्रयाजदेवतया ईडितः स्तुतः सन् । किं कुर्वन् । आजुह्वानः सरस्वतीम् । सरस्वतीमाह्वयन् । अश्विनेन्द्रायेत्युपरिष्टात्पैपस्य पठ्यते तदेतत्पदद्वयमिह कृतविभक्तिव्यत्ययं संबध्यते । उक्तश्च ।

यस्य येनार्थसंबन्धो दूरस्थस्यापि तस्य तत् ।
अर्थतो ह्यसमानानामानन्तर्य्यस्य कारणमिति ॥

अश्विनौ इन्द्रश्च । किञ्च । इन्द्रं बलेन वर्द्धयन् । ऋषभेण गवा च इन्द्रियमिन्द्रस्य वर्द्धयन् । मधु मासरं च उपाद्दायेति शेषः । यवैः कर्कन्धुभिर्लाजैश्च भेषजमिन्द्रस्य वर्द्धयन् । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतराज्य यज ॥ ३२ ॥

दैव्यो होता इडा इडां प्रयाजदेवतां सरस्वतीमिन्द्रमाश्विना अश्विनौ च यक्षत् यजतु किं कुर्वन् ऋषभेण गवा च धेन्वा च बलेन वर्धयन् इडादीन् संवर्धयन् यजतु । कीदृशो होता ईडितः ऋत्विग्भिः स्तुतः आजुह्वानः इडादीनाह्वयन् । तत्र यवैः लाजैश्च सहितं मधु मासरमोदनं निग्धार्य च इन्द्राय इन्द्रियं वीर्य्यकरं भेषजं भवति । अश्विसरस्वतीन्द्रा होत्रेज्यमानाः पयआदीनि पिबन्तु हे होतः । त्वञ्च यज ॥ ३२ ॥

होता॑ यक्षद्ब॒र्हिरूर्ण॑म्रदा भि॒षङ्नास॑त्या भि॒षजा॒श्विनाश्वा॒ शिशु॑मती भि॒षग्धे॒नुः सर॑स्वती भि॒षग्दु॒ह इन्द्रा॑य भेष॒जं पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ॥ ३३ ॥

होता यक्षद् बर्हिरूर्णम्रदाः होता यजतु अकृता देवताः । बर्हिश्च प्रयाजदेवता ऊर्णम्रदाः ऊर्णाम्रद् इति प्राप्ते ऊर्णं म्रदा इति छान्दसो लिङ्गविपर्ययः । ऊर्णेव मृदुर्भिषग्भवतु इन्द्राय । भिषग्वैद्य उक्तः । नासत्या भिषजाश्विना । नासत्या नासिकाप्रभवावश्विनौ भिषजौ भवतामिन्द्रस्य । अश्वा वडवा शिशुमती धेनुश्च भिषगिन्द्रस्य भवतु । इत्थम्भूता हि सा दक्षिणापद्यते । कस्मात्पुनरेवमाशास्यत इत्यत आह । यतः सरस्वती भिषक् स्वयमेव दुहे दोग्धि इन्द्राय भेषजम् । अतो यूयमपि भिषजौ भवथेति । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतराज्यस्य यज ॥ ३३ ॥

दैव्यो होता ऊर्णम्रदाः ऊर्णमिव म्रदीयः बर्हिः प्रयाजदेवं भिषजा भिषजौ वैद्यौ नासत्या न असत्यौ सत्यरूपौ अश्विना अश्विनौ सरस्वती सरस्वतीश्च यक्षत् यजतु । तत्र शिशुमती बालकोपेता अश्वा वडवा भिषक् धेनुः भिषक् च इन्द्राय भेषजमौषधं दुहे दुग्धे पूरयति । अश्वादयो दक्षिणा दीयन्ते । लोपस्त आत्मनेपदेष्विति तलोपः । ते पयआदीनि व्यन्तु होतर्यज ॥ ३३ ॥

होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिश इन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजꣳ शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥ ३४ ॥

होताय क्षद्दुरोदिशः । होता यजतु । दुरः द्वार इति प्राप्ते छान्दसं संप्रसारणम् । द्वाराणीति लिङ्गव्यत्ययेन पर्यायः । कथंभूता यज्ञगृहद्वारः । दिशः कवष्यो न व्यचस्वतीः । लुप्तोपमानमेतत् । दिश इव याः कवष्यः सुसुषिराः । व्यचस्वतीः

व्यञ्चनवत्यः गमनवत्यश्च याः । अश्विभ्यां न दुरो दिशः । अ-
श्विभ्याञ्च वा अधिष्ठिताः यज्ञगृहद्वारो दिश इव बभूवुः । इन्द्रो
न रोदसी दुघे । इन्द्रश्च या अधिष्ठाय रोदसी द्यावापृथिव्यौ
दुहे । हकारस्य घकारः । दुग्धवान् । याश्चाधिष्ठाय दुहे धेनुर्भू-
त्वा सरस्वती अश्विनौ च । कस्मै दुहे किञ्च दुह इत्यत आह ।
इन्द्राय भेषजं शुक्रं ज्योतिश्च इन्द्रियञ्च दुहे । अश्विसरस्व-
तीन्द्राश्च पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्य होतराज्यस्य
यज ॥ ३४ ॥

दैव्यो होता दुरो द्वारः प्रयाजदेवीः इन्द्रः इन्द्रं सरस्वती सरस्व-
तीमाश्विना अश्विनौ च यक्षत् यजतु नकाराश्चार्थाः द्वारशब्दस्य
सम्प्रसारणम् । कीदृशीः द्वारः दिशः दिश इव सावकाशः कवष्यः
ससुषिराः अत एव व्यचस्वतीः व्यचो व्यचनं गमनं विद्यते यासु
ताः गमनवत्यः । दिशो दिक्तुल्या दुरो द्वार अश्विभ्यां सहिताः
सत्यो रोदसी द्यावापृथिव्यौ इन्द्राय भेषजमौषधं दुहे दुग्धे । की-
दृश्यौ रोदसी दुघे दुहः कव्घश्चेति हकारस्य घकारः । दुहे इत्यत्र
तलोपश्च वचनव्यत्ययः दुहते रोदसीभ्यां सकाशादिन्द्रायौषधं दु-
हते इत्यर्थः । अकथितं चेति द्विकर्मकत्वम् । सरस्वती च धेनु-
र्भूत्वा इन्द्राय शुक्रं शुक्लं शुद्धं ज्योतिरिन्द्रियं वीर्य्यञ्च दुहे दुग्धे ।
अन्यद् व्याख्यातम् ॥ ३४ ॥

होता॑ यक्षत् सु॒पेश॑सो॒पे नक्तं॒ दिवा॒श्विना॒ सम॑-
ञ्जा॒ते॒ सर॑स्वत्या॒ त्विषि॒मिन्द्रे॒ न भे॑षजᳫं श्ये॒नो न रज॑-
सा हृ॒दा श्रि॒या न मास॑रं॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं
मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ॥ ३५ ॥

होता यक्षत्सुपेशसोपे । होता यजतु सुपेशसासुरूपे । उपे
इति द्विवचनोपदेशाद्रात्रिश्च उषाश्च गृह्येते । नक्तन्दिवा रात्रौ च
अहनि च । यौ चाश्विनौ समञ्जातः संश्लेषयतः सरस्वत्या
सहितौ । त्विषिन्दीप्तिम् इन्द्रे । इन्द्रभेषजञ्च संश्लेषयतः तौ च

होता यजतु । यश्च श्येनः रजसा । रजःशब्दो ज्योतिर्वचनः । ज्योतिषा हृदा हृदयेन । श्रिया न नकाराः सर्वे समुच्चयार्थीयाः । इहानुवाके मायसः । श्रिया च सह मासरमुपादाय इन्द्रे समनक्ति । तञ्च होता यजतु ॥ अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा ईज्यमानाः पयः प्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतराज्यस्य यज ॥ ३५ ॥

होता सुपेशसा सुरूपे उषे द्विवचनाद्रात्रिश्च नक्तोषे प्रयाजदेवौ सरस्वत्या सहितौ अश्विनौ च यक्षत् । तौ चाश्विनौ नक्तं दिवा दिने च रजसा ज्योतिषा रजःशब्दो ज्योतिर्वचनः हृदा चित्तेन श्रिया च सह मासरं भेषजं मासररूपमौषधं श्येनः श्येनपत्रं त्विषि कान्तिश्च इन्द्रे समञ्जाते संश्लेषयतः नकाराश्चार्थाः । ते पयआदीनि व्यन्तु हे होतः । त्वं यज ॥ ३५ ॥

होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः शूषᳪ सरस्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥ ३६ ॥

होता यक्षद्दैव्या होतारा । होतारौ अयश्चाश्विरसौ च मध्यमः । भिषजौ अश्विनौ इन्द्रञ्च इन्द्रश्च होता यजतु । जागृवि दिवा नक्तं न भेषजैः शूषᳪसरस्वती भिषक्सीसेन दुह इन्द्रियम् । या चैषा सरस्वती भिषक् जागृवि । स्वकार्यसिद्धावप्रमत्ता जागरणशीला विभक्तिलोपः । दिवा नक्तञ्च भेषजैरोषधैः शूषम्बलम् सीसेन च दुहे दोग्धि । इन्द्रियञ्च इन्द्रार्थम् । ताञ्च दैव्या होता यजतु । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्य होतराज्यस्य यज ॥३६॥

दैव्यो होता दैव्या होतारा दैव्यौ होतारौ अयं अग्निरसौ च सीसेन कृत्वा दुहे दुग्धे दुहेर्लट् लोपस्त आत्मनेपदेष्विति तलोपः

इन्द्रियार्थम्। कीदृशी सरस्वती दिवा नक्तमहोरात्रं जागृवि जागरणशीला स्वकार्य्यसिद्धावप्रमत्ता सुपां सुलुगिति सेर्लुक् तां च दैव्यो होता यजतु। अदन्त्यादयः पयआदीनि व्यन्तु हे होतः! त्वमपि यज॥ ३६॥

होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा सरस्वती मह इन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥ ३७॥

होता यक्षत्तिस्रो देवीः। होता यजतु तिस्रो देवीः वक्ष्यमाणः। न भेषजम् त्रयस्त्रिधातवोऽपसः। नकारस्समुच्चयार्थीयो भिन्नक्रमः। भेषजञ्च या इन्द्रे कुर्वन्ति, ताश्च होता यजतु। त्रयः। पशवः त्रिधातवः। आश्विनो धूम्रः। सारस्वतो मेषः ऐन्द्र ऋषभः। इति त्रयः पशवः। प्रधानाङ्गोपायङ्गैस्त्रिधातुपशुः। अपसः अपस्विन इति प्राप्ते छान्दसो मतुपो लोपः। कर्मवन्तः। अग्नयो वा त्रयस्त्रिधातवः। रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती। ये च। इन्द्रे रूपं हिरण्मयं। कुर्वन्ति ताश्च होता यजतु। के ते इत्यत आह। अश्विनौ इडा च भारती च। वाचा सरस्वतीमह इन्द्राय दुह इन्द्रियम्। या च वाचा त्रयीलक्षणया सरस्वती महः महत्त्वम्पूजामिन्द्राय दुहे दोग्धि इन्द्रियञ्च। ताश्च होता यजतु अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्य होतराज्यस्य यज॥ ३७॥

तौ चार्थौ दैव्यो होता इडा भारती सरस्वती चेति तिस्रो देवीः प्रयाजदेवीः इन्द्रे इन्द्रमश्विना अश्विनौ च यक्षत् यजतु। या सरस्वती वाचा त्रयीलक्षणया भेषजमौषधं हिरण्ययं द्योतमानं रूपं च महस्तेजश्च इन्द्रियं चेन्द्राय इन्द्रार्थं दुहे दुग्धे। कैः कृत्वा त्रयस्त्रिधातवः त्रिभिः पशुभिः तृतीयार्थे प्रथमा त्रयो धातवः प्रधानाङ्गोप-

षड्लक्षणाः प्रकारा येषां ते त्रिधातवः पशवः ते च त्रयः आश्विनो धूम्रः सारस्वतो मेषः ऐन्द्र ऋषभः । कीदृशाः पशवः अपसः अप इति कर्मनाम (निघ० २, १, १) विनो लोपः अपस्विनः कर्मवन्तः । त्रिभिः पशुभिर्भेषजरूपेन्द्रियमहांसि इन्द्राय दुग्धे । तेऽश्व्यादयः पयआदीनि पिबन्तु हे होतः ! त्वमप्याज्यस्य यज घृतं देहि ॥ ३७ ॥

होता॑ यक्षत् सु॒रेत॑समृष॒भं नर्या॑पसं॒ त्वष्टा॑र॒मिन्द्र॑म॒श्विना॑ भि॒षजं॒ न सर॑स्वती॒मोजो॒ न जू॒तिरि॑न्द्रि॒यं वृको॒ न र॑भ॒सो भि॒षग्यशः॒ सुर॑या भेष॒जꣳ श्रि॒या न मास॑रं॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्यज॑ ॥ ३८ ॥

होता यक्षत्सुरेतसम् । होता यजतु । सुरेतसं शोभनं रेतः उदकलक्षणं यस्य शोभनं होतस्य रेतः यदुदकम् यद्वा सुष्ठु रेतो यस्मात्तं पुंसो रेतः कारणभूतम् । ऋषभं वर्षितारम् । नर्यापसम् नरेभ्यो हितन्नर्यं तद्यस्य अपः कर्म स नर्यापसः तन्नर्यापसन्त्वष्टारम् दैव्यो होता यजतु । किञ्च । इन्द्रमश्विना भिषजन्न सरस्वतीम् । इन्द्रम् अश्विनौ भिषजञ्च सरस्वतीं दैव्यो होता यजतु । केन यजतु । ओजो न जूतिरिन्द्रियं वृको न रभसो भिषक् । नकारः समुच्चयार्थीयः । ओजश्च जूतिर्जवः इन्द्रियञ्च यो वृकः सरभस सोद्यमो दक्षः भिषक् तेन यजतु । सुरायां वृकलोमानि क्षिप्यन्ति इत्यत एवमुच्यते । यशः सुरया भेषजं श्रिया न मासरम् । तथा मासरमुपादाय सुरया च यजतु । यशो भेषजं श्रिया सह इन्द्रे यजमाने वा । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा ईज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतः आज्यस्य यज ॥ ३८ ॥

नकाराश्चार्थाः होता त्वष्टारं प्रयाजदेवमिन्द्रमश्विना अश्विनौ

सरस्वतीं भिषजश्च यक्षत् यजतु कीदृशं त्वष्टारं सुरेतसं शोभनं रेतो वीर्य्यं वृष्टिलक्षणं यस्य स सुरेताः तं यद्वा सुष्ठु रेतो यस्मात्तं पुंसो रेतःकारणभूतम् ऋषभं वर्षितारम् नर्यापसं नरेभ्यो हितं नर्य्यमपः कर्म यस्य स नर्य्यापाः तम् । केन यजतु तदाह रभसः सोयमो भिषग्वैद्यभूतो यो वृकः तेन प्रथमा तृतीयार्थे सुरायां वृकलोमानि क्षिप्यन्तेऽतो वृकेन यजतु सुरया च यजतु भेषजं यन्मास्रं तेन च यजतु । एवञ्च यागे ओजस्तेजः जूतिर्वेगः इन्द्रियं वीर्य्यं श्रिया सह यज्ञश्चेन्द्रे भवन्त्विति शेषः अदव्यादयः पयआदीनि व्यन्तु हे होतः ! त्वमप्याज्यस्य यज ॥ ३८ ॥

होता यक्षुद्वनस्पतिँ शमितारँ शतक्रतुं भीमं न मन्युँ राजानं व्याघ्रं नमसाश्विना भामँ सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥ ३९ ॥

होता यक्षद्वनस्पतिम् । होता यजतु । वनस्पतिं शमितारं शतक्रतुम् बहुकर्माणम् । भीमं न मन्युं राजानं व्याघ्रम् । भीमं भयानकम् मन्युं क्रोधात्मानम् । राजानमरण्यानाम् पशूनां व्याघ्रश्च होता यजतु । नमसाश्विना नमसा हविषा । अश्विनौ च होता यजतु । भामं सरस्वती भिषगिन्द्राय दुह इन्द्रियम् । या च भामं क्रोधम् । सरस्वती भिषक् इन्द्राय दुहे दोग्धि इन्द्रियञ्च ताश्च दैव्यो होता यजतु । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतराज्यस्य यज ॥ ३९ ॥

दैव्यो होता वनस्पतिं प्रयाजदेवं व्याघ्रं विशेषेणाजिघ्रतीति व्याघ्रः व्याघ्रमिव राजानं शतक्रतुमिन्द्रमश्विना अश्विनौ सरस्वती सरस्वतीञ्च नमसा अन्नेन यक्षत् यजतु । कीदृशं वनस्पतिं शमितारं पशूनां संस्कर्त्तारं यूपरूपेण भीम भयङ्करं मन्युं क्रोधात्मानम् । भिषक् वैद्यरूपा या सरस्वती इन्द्राय भाम क्रोधमिन्द्रियं वीर्य्यञ्च दुहे दो-

गिध । ते वनस्पत्यादयः इज्यमानाः पयआदीनि पिबन्तु हे होतर्यज ॥ ३९ ॥

होता यक्षदग्निᳪं स्वाहाज्यस्य स्तोकानाᳪं स्वाहा मेदसां पृथक् स्वाहा छागमश्विभ्याᳪं स्वाहा मेषᳪं सरस्वत्यै स्वाहऽऋषभमिन्द्राय सिᳪंहाय सहसऽ इन्द्रियᳪं स्वाहाग्निं न भेषजᳪं स्वाहा सोममिन्द्रियᳪं स्वाहेन्द्रᳪं सुत्रामाणᳪं सवितारं वरुणं भिषजां पतिᳪं स्वाहा वनस्पतिं प्रियं पाथो न भेषजᳪं स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥ ४० ॥

होता यक्षदग्निं स्वाहा । देव्यो होता यजतु । अग्निं प्रयाजदेवतां वा आहवनीयं वा । स्वाहाज्यस्य स्तोकानां सुष्ठु आह शोभनमाह यजमानः आज्यस्य स्तोकानां स्तोका विप्रुषः । स्वाहा मेदसां पृथक् । शोभनमाह यजमानः मेदसां वपासम्बद्धानाम् पृथक्पृथक् । वपाःश्रप्यमाण आज्येनाभिघार्यन्ते तदभिप्रायमेतत् । स्वाहा छागमश्विभ्याम् । छागमेषर्षभशब्दाः पशुवचनाः शोभममाह यजमानः छागपशुमश्विभ्याम् । शोभनमाह मेषं सरस्वत्यै च स्वाहा ऋषभमिन्द्राय । शोभनमाह यजमानः ऋषभम् इन्द्राय । कथम्भूताय इन्द्राय । सिंहाय अभिभवित्रे । सहसे बलात्मकाय च । किं भूतमृषभम् इन्द्रियम् इन्द्रियात्मकमिति सामानाधिकरण्यात्सम्बन्धः । स्वाहाग्निंभेषजम् आज्यभागौ सुआह यजमानः अग्निं भेषजम् । स्वाहा सोममिन्द्रियम् । सोभनमाह यजमानः सोममिन्द्रियात्मकम् । स्वाहेन्द्रं सुत्रामाणं सवितारं वरुणम् भिजषाम्पतिम् । पशुपुरोडाशदेवताः । सुआह यजमानः । इन्द्रं सुत्रामाणम् सवितार-

श्च । वरुणम्वैद्यानाम्पतिश्च । स्वाहा वनस्पतिम् प्रियम्पाथो न भेषजम् । सुआह यजमानः वनस्पतिम् प्रियम्पाथश्चान्नम् भेषजञ्च । पशुदेवतानां वनस्पतिम् । स्वा देवा आज्यपाः । प्रयाजानुयाजा वै देवा आज्यपाः शोभनमाह यजमानः देवा आज्यपाः ईज्यमाना वै देवा उत्तमे प्रयाजे स्मर्यन्त इत्यतो विभक्तिव्यत्ययोऽत्र न कृतः । श्रुतिस्तु । देवा ह वा ऊचुर्हन्त विजितमेवानुसर्वं यज्ञᳬ सᳬ स्थापयेत्युपक्रम्य त उत्तमे प्रयाजे स्वाहाकारेणैव सर्वं यज्ञᳬ सᳬ स्थापयन्नित्याह । अतः स्वाहाकाराः समाप्तिवचनाः समाप्तिवचनत्वाच्च स्वाहाकाराणां देवतापदस्य चतुर्थ्या भवितव्यम् । स्वाहा देवेभ्य इत्ययं प्रकारः । जुषाणो अग्निर्भेषजम् । जुषाणः सेवमानः अग्निः भेषजमोषधम् इन्द्रस्य यजमानस्य वा करोतु । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्य होतराज्यस्य यजः ॥ ४० ॥

होता अग्निं प्रयाजदेवमाहवनीयं वा यक्षत् यजतु । किञ्च आज्यस्य घृतस्य स्तोकानां विप्रुषां स्वाहा सुष्ठु आह शोभनं वदति द्व्यचोऽतस्तिङ इति (पा० ६, ३, १३५) दीर्घः सुवो रूपम् यजमान इति शेषः यजमानो घृतबिन्दून् शोभनान् वदतीत्यर्थः कर्मणि षष्ठी । मेदसां वपासम्बन्धिनां पृथक् स्वाहा वपासम्बन्धिमेदांसि समीचीनानीति पृथग्वदति । अश्विभ्यामश्विनोरर्थे छागं शोभनमाह । सरस्वत्यै मेषं शोभनमाह । इन्द्राय इन्द्रियं वीर्य्यप्रदमृषभं सु आह कीदृशायेन्द्राय सिंहाय सिंहतुल्याय हिनस्तीति सिंहस्तस्मै शत्रूणामभिभावित्रे तथा सहसे बलात्मकाय । भेषजं हितकारिणमग्निञ्च सु आह तथार्थः इन्द्रियं वीर्य्यप्रदञ्च सोमं सु आह एतावग्नीषोमावाज्यभागौ सु आहेत्यर्थः । सुष्ठु त्रायते सुत्रामा तं सुत्रामाणमिन्द्रं सवितारं भिषजां वैद्यानां पतिं वरुणञ्च सु आह पशुपुरोडाशदेवताः सु आहेत्यर्थः । प्रियमिष्टं पाथोऽन्नमन्नभूतं भेषजञ्च पशु-

देवतानां वनस्पतिं प्रयाजदेवं सु आह नकारश्चार्थः । आज्यपा देवा आज्यपान् देवान् सु आह प्रयाजानुयाजा वै देवा आज्यपाः । स्वाहेति क्रियाया यजमानः कर्त्ता देवा ह वा ऊचुर्हन्त विजितमेवानु सर्वं यज्ञं सᳬस्थापयेत्युपक्रम्य तत उत्तमे प्रयाजे स्वाहाकारेणैव यज्ञᳬ समस्थापयन्निस्वाहेति श्रुतेः समाप्तिवचनाः स्वाहाकाराः । भेषजमौषधभूतं जुषाणः सेवमानोऽग्निरश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयआदीनि व्यन्तु । हे मनुष्यहोतः ! त्वमपि यज ॥४०॥

होता॑ यक्षद॒श्विनौ॑ छाग॑स्य व॒पाया॒ मेद॑सो जु॒षेता॒ᳬ ह॒विर्हो॑त॒र्यज॑ । होता॑ यक्ष॒त्सर॑स्वतीं मे॒षस्य॑ व॒पाया॒ मेद॑सो जुषता॒ᳬ ह॒विर्हो॑त॒र्यज॑ । होता॑ यक्ष॒दिन्द्र॑मृष॒भस्य॑ व॒पाया॒ मेद॑सो जुषता॒ᳬ ह॒विर्हो॑त॒र्यज॑ ॥४१॥

होता यक्षदश्विनौ छागस्य त्रयो वपानां प्रैषा यथालिङ्गम् । दैव्यो होता यजतु । अश्विनौ छागस्य वपाया मेदसः । स्नेहप्रकृतिर्मेदः । तौ चेज्यमानौ जुषेतां हविः त्वं च हे मनुष्य होतर्यज । होता यक्षत्सरस्वतीं मेषस्य । जुषतामित्येकवचनविशेषः । होता यक्षदिन्द्रमृषभस्य । सममन्यत् ॥ ४१ ॥

का० (१९, ६, २२) होता यक्षदश्विनाविति त्रयो वपानां प्रैषा यथालिङ्गम् । होता यक्षदश्विनौ छागस्य होता यक्षत्सरस्वतीम् होता यक्षदिन्द्रमृषभस्येति त्रयो वपात्रयस्य क्रमात् प्रैषा एककण्डिकायामिति सूत्रार्थः ॥ सप्त लिङ्गोक्तदेवताः तत्राद्यास्त्रयो वपानां प्रैषाः त्रयाणां प्राजापत्या पङ्क्तिश्छन्दः द्वितीयस्य द्व्यधिका प्रथमतृतीययोरेकाधिका । दैव्यो होता अश्विनौ यक्षत् यजतु इज्यमानौ तावश्विनौ छागस्य वपाया मेदसः सम्बन्धि हविर्जुषेतां सेवेताम् मेदः स्निग्धभागः । हे होतर्यज ॥ होता सरस्वतीं यक्षत् सा मेषस्य वपाया मेदसो हविर्जुषताम् । हे होतः ! त्वं यज ॥ होता इन्द्रं यक्षत् स इन्द्रः ऋषभस्य वपाया मेदसो हविर्जुषताम् । हे मनुष्यहोतस्त्वमपि यज ॥ ४१ ॥

होता॑ यक्षद॒श्विनौ॒ सर॑स्वती॒मिन्द्र॑ᳬ सु॒त्रामा॑णमि॒-

मे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पै-
र्न तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः
शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तान-
श्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं
मधु पिबन्तु मदन्तु व्यन्तु होतर्यज ॥ ४२ ॥

होता यक्षदश्विनौ सरस्वतीम् । ग्रहाणां प्रैषः । दैव्यो होता यजतु अश्विनौ च सरस्वतीश्च इन्द्रश्च सुत्रामाणम् एवं होतारमुक्त्वा अथेदानीमध्वर्यूनाह । हे अध्वर्यवः इमे सोमाः सुरामाणः सुरमणीयाः सुरावन्तो वा सुरामया वा । छागैर्न मेषैः ऋषभैः सुताः । नकाराः सर्वे समुच्चयार्थीयाः । छागैश्च मेषैश्च ऋषभैश्च सुता अभिषुताः समर्थकृताः । शष्पैश्च तोक्मभिश्च लाजैश्च महस्वन्तः महाभाग्ययुक्ताः महातर्पणीयाः । मासरेण परिष्कृताः । सम्पर्युपेभ्यः करोतौ भूषणे सुट् । मासरेण अलङ्कृताः । शुक्राः शोचिष्मन्तः पयस्वन्तः पयसा सत्युक्ताः अमृताः अमृतकल्पाः प्रस्थिताः होमाभिमुखीभूताः वः युष्मत्सम्बन्धेन । इत्यध्वर्युविषयम् । मधुश्चुतः मधुस्रवाः मधुक्षरणाः तानेतान्सोमान् अश्विनौ च सारस्वती च इन्द्रश्च सुत्रामा । साधुत्राणः वृत्रहा जुषताम् जुषित्वा च । सोम्यं सोममयम्मधु पिबन्तु च मदन्तु च व्यन्तु च । त्वमपि हे मनुष्यहोतर्यज ॥४२॥

का० (१९, ६, २३) ग्रहाणां चतुर्थः । होता यक्षदश्विनौ सरस्वतीमिन्द्रमिति चतुर्थो ग्रहाणां प्रैषः ॥ होता यक्षदश्विनौ सरस्वतो सुष्ठु रक्षितारमिन्द्रश्च यक्षत् यजतु । एवं होतारमुक्त्वाध्वर्यूनाह हे अध्वर्यवः । इमे सोमाः यो युष्माकं युष्माभिः सुताः अभिषुताः । सोमाः छागैर्मेषैर्ऋषभैश्च सुरामाणः सुष्ठु रमयन्ति ते सुरमणीयाः रमतेरनण्प्रत्ययः पशुभिः कृत्वा रमणीयाः नो

स्वार्थे सुरावन्तः सुरामया वा । तथा शष्पैः तोक्मभिर्यवाङ्कुरैर्लाजैश्च महस्वन्तः तेजोयुताः । मदाः मदयन्ति तर्पयन्तीति मदाः । मासरेण पूर्वोक्तेन परिष्कृताः अलङ्कृताः सम्पर्य्युपेभ्य इति (पा० ६, १, १३७) सुट् । शुक्राः शोचिष्मन्तः । पयस्वन्तः पयसा युक्ताः अमृताः अमृतकल्पाः । प्रस्थिताः होमाभिमुखं चलिताः । मधुश्चुतः मधु श्चोतन्ते ते मधुस्राविणः । अश्विनौ सरस्वती सुत्रामा वृत्रहा वृत्रासुरहन्ता इन्द्रश्च तान् सोमान् जुषन्तां सेवन्तां सोम्यं मधु पिबन्तु मदन्तु तृप्यन्तु व्यन्तु राजन्तां हविर्भक्षयन्तु.वा । हे होतः ! त्वमपि यज ॥ ४२ ॥

होता यक्षदश्विनौ छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासे अज्राणां यवसप्रथमानाᳬं सुमत्क्षराणाᳬं शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवाश्विना जुषेतांᳬ हविर्होतर्यज ॥४३॥

होता यक्षदश्विनौ छागस्य । प्रैषः । होता यजतु । अश्विनौ छागस्य छागाङ्गस्य तावश्विनौ छागसम्बन्धिनः हविषः आत्ताम् । अद् भक्षणे । अभक्षयताम् भक्षितवन्तौ । अद्य अस्मिन्यज्ञे । मध्यतो मेद उद्भृतम् उदरमध्यतो वपालक्षणम्मेदः उद्धृतम् हृग्रहोर्भः छन्दसि हस्येति भकारः । पुरा द्वेषोभ्यः पूर्वमसुररक्षोभ्यः यज्ञद्वेष्टृभ्यो वा । पुरा च पौरुषेय्यागृभः पुरुषार्थम् गृह्यते इति पौरुषेयी गृप् तस्याः पौरुषेय्यागृभः इडाया इत्यर्थः । नहि वपायागे इडा विद्यते । यावेवं वपाहविष आत्तान्ताविदानीं घस्ताम्भक्षयताम् अङ्गानां स्वमंशभूतमिति शेषः विशेषणैर्विशेष्यस्याध्याहारः । नूनं निश्चयेन । किम्भूतानामङ्गानाम् घासे ग्रासे अज्राणाम् अवदात्तानाम् घासैरजित्तं

स्वेच्छया घासे वा यान्यजराणि स्युः। यवसप्रथमानां यवसानामन्नानां यानि प्रथमानि संस्कृतत्वात्। एतद्वै परममन्नाद्यं यन्मांसमिति श्रुतिः। सुमत्क्षराणाम्। सुमत्स्वयमित्यर्थः। स्वयमेव यानि क्षरन्ति अदितानि। शतरुद्रियाणाम् बहुस्तुतीनाम् रुद्र इति हि स्तोतृनामसु पठितम् रुद्रस्य स्तोतुरिमा रुद्रिया स्तुतयः। बहुशो वा रुद्राणाम् अग्निष्वात्तानाम् अग्निना साधुपाकार्थमासादितानाम् अग्निना सुस्नातानामित्यर्थः। पीवोपवसनानाम् पीवशब्दः स्थूलवचनः। पीवाभिः स्थूलैरुपोषितं यैरवदानैः स्थूलानामुपवसनम् समीपस्थितिर्येषामिति वा। किञ्च। पार्श्वतः श्रोणितः शितामत उत्सादतः। अङ्गादङ्गादवत्तानाम् पार्श्वतोऽवत्तानां पार्श्वं परशुमयमङ्गं भवति। श्रोणितोऽवत्तानाम् शितामतोऽवत्तानाम्। शितामशब्देन यकृद्वाशिताम्। योनिर्वाशिताम् मेदो वा शिताम् इति व्याख्याभेदाः। उत्सादनप्रदेशात् छेदनप्रदेशात्। अवत्तानाम्। एवमङ्गादङ्गादवत्तानाम्। करत एवाश्विनौ तृप्तिमिति शेषः। जुषेताञ्च पुनर्वचनमादरार्थम् त्वमपि हे मनुष्यहोतर्यज ॥ ४३ ॥

का० (१९, ६, २४) हविषामुत्तरे यथालिङ्गम्। चतुर्थात् प्रैषादग्रे पठ्यमाना होता यक्षदश्विनौ छागस्य हविष इत्याद्यास्त्रयो यथालिङ्गमाश्विनादिहविर्यागानां प्रैषा इत्यर्थः॥ दैव्यो होता अश्विनौ यक्षत् यजतु। ताविज्यमानावश्विनौ छागस्य हविषः छागसम्बन्धि हविः आत्तामभक्षयताम् कर्मणि षष्ठी। किञ्च अद्य अस्मिन् दिने मध्यतः उदरमध्यादुद्भृतमुद्धृतं मेदो यथारूपं घात्ताम् इत्यहोभेदश्छन्दांसि कथमुद्धृतम् तत्राह द्वेषोभ्यः द्विषन्तीति द्वेषांसि क्विपसुन्प्रत्ययः यज्ञद्वेष्टृणि असुररक्षांसि तेभ्यः उद्धृतम् यावत्तानि पराभवार्थं गच्छन्ति ततः पुरैवोद्धृतमित्यर्थः तथा गृभः गृह्यते मत्यार्थमिति गृप् तस्या गृभ इडायाः पुरा प्रथममुद्धृतम् यथाया-मिडाप्रयोजनाभावात्। कीदृश्या गृभः पौरुषेय्याः पुरुषार्थमियं पौ-

रूपेणां ऋत्विगर्थां तस्याः ॥ तावश्विनौ नूनं निश्चितमङ्गानां घ-स्तामङ्गानि भक्षयताम् घस्लृ अदने विशेषणैर्विशेष्यस्याध्याहारः ॥ कीदृशानामङ्गानाम् ग्रासे अग्राणाम् एकपदम् ग्रासे ग्रासे अग्रराणां नवानां रुचिजनकानाम् अन्यानि ग्रासेपूत्तरोत्तरमरुचिं जनयन्ति नेमानि । तथा यवसप्रथमानां यवसानां मध्ये प्रथमानां मुख्यानाम् मांसत्वात् । एतद्वै परममन्नाद्यं यन्मांऽसमिति श्रुतेः । सुमत्क्षरा-णां सुमत् स्वयं क्षरन्ति तानि सुमत्क्षराणि तेषाम् सुमदिति स्व-यमित्यस्य पर्य्यायः शतरुद्रियाणाम् रुद्र इति स्तोतृनामसु (निघ० ३, १६, १२) पठितं रुद्रस्य स्तोतुरिमा रुद्रियाः स्तुतयः शतमसं-ख्या रुद्रिया येषां तेषाम् बहुमन्त्रैः स्तुतानामित्यर्थः । अग्निष्वात्ता-नाम् अग्निना स्वात्तानामास्वादितानां पाककाले पूर्वमग्निना सुशृ-तानामित्यर्थः । पीवोपवसनानाम् पीवस् शब्दोऽसुप्रन्तः स्थूलवा-ची पीवसां स्थूलानामङ्गानामुपसमीपे वसनं स्थितिर्येषां तानि पी-वोपवसनानि तेषाम् स्थूलाङ्गसमीपस्थितानां सूक्ष्माणामित्यर्थः उपवसने पीव इति प्रातिशाख्यसूत्रेण (३, १, १३) उपवसने परे पीवसो विसर्गलोपः । किञ्च पार्श्वतः पार्श्वप्रदेशात् श्रोणितः कटिप्रदे-शात् शितामतो बाहुप्रदेशात् उत्सादतः उत्सादनमुत्सादः छे-दनप्रदेशः तस्मात् । एवमङ्गादङ्गात् एकपदम् नित्यवीप्सयोरिति (पा० ८, १, ४) द्वित्वम् प्रसङ्गात् अवत्तानामवदानधर्मेण गृही-तानामङ्गावयवानामश्विनौ घस्ताम् तान् भक्षयतामिति पूर्वेण स-म्बन्धः । एव एवमश्विना अश्विनौ हविर्जुषेतां सेवेताम् भक्षितावदानौ तौ करतः कुरुतः तृप्तिमिति शेषः विकरणव्यत्ययः पुनर्व-चनमादराय । हे मनुष्यहोतः । त्वमपि यज । शितामशब्देन बाहुयकृद्योनिमेदांस्युच्यन्ते ॥ ४३ ॥

होता यक्षत् सरस्वतीं मेषस्य हविष आवयद्द्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घसन्नूनं घासे अज्राणां यवसप्रथमानांᳫ सुमत्-क्षराणांᳫ शतरुद्रियाणामग्निष्वात्तानांᳫ पीवोपवस-नानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गाद-

श्लादवंत्तानां करंदेवमिँ सरंस्वती जुषतांᳬ हविर्हीतर्यजं ॥ ४४ ॥

होता यक्षत्सरस्वतीम्मेषस्य। होता यजतु सरस्वतीम्। या हविष आवयत्। आङ्पूर्वस्य वेतेः खादनार्थस्य लिटि भूतार्थाभिधायिन्येतद्रूपम्। घसत् लोडर्थे लेट्। जुषतामेकवचनम् अन्यदुक्तम् ॥ ४४ ॥

होता सरस्वतीं यक्षत् या सरस्वतीं मेषस्य हविषः हविः आवयत् अभक्षयत् आङ्पूर्वस्य वेतेर्लङि रूपम् यद्वा भक्षयतु लेटि वाडागमे रूपम्। अद्य मध्यतो मेद इत्यादिव्याख्या पूर्ववत्। सा अङ्गानि घसत्। एवं सरस्वती हविर्जुषतां तृप्तिं च करदित्येकवचनानि। अन्यदुक्तम् ॥ ४४ ॥

होतां यक्षदिन्द्रंमृषभस्यं हविष आवंयदद्य मंध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुंषेय्या गृभो घसंन्नूनं घासे अंज्राणां यवंसप्रथमानाᳬ सुमत्क्षंराणाᳬ शतरुद्रियाणामग्निष्वात्तानाᳬ पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवंत्तानां करंदेवमिन्द्रो जुषताᳬ हविर्हीतर्यजं ॥ ४५ ॥

होता यक्षदिन्द्रमृषभस्य। तुल्यव्याख्यानम् ॥ ४५ ॥

होता इन्द्रं यक्षत् स इन्द्र ऋषभस्य हविष आवयत् भक्षयतु एवमिन्द्रो हविर्जुषतामित्यन्तं पूर्ववत् ॥ ४५ ॥

होतां यक्षद्वनस्पतिंमभि हि पिष्टतंमया रभिंष्ठया रशनयाधित। यत्राश्विनोश्छागंस्य हविषः प्रिया धामांनि यत्र सरंस्वत्या मेषस्यं हविषः प्रिया धामांनि यत्रेन्द्रंस्य ऋषभस्यं हविषः प्रिया धामांनि यत्राग्नेः प्रिया धामांनि यत्र सोमंस्य प्रिया धामांनि यत्रेन्द्रंस्य

सुत्राम्णः प्रिया धामानि यत्र सवितुः प्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांꣳसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतान् प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयस इव कृत्वी करदेवं देवो वनस्पतिर्जुषताꣳ हविर्होतर्यज ॥ ४६ ॥

होता यक्षद्वनस्पतिम् । वनस्पतिप्रैषः । होता यजतु वनस्पतिं यूपम् । अभि हि पिष्टतमया रभिष्ठया रशनयाधित । कस्माद्वनस्पतिम् यजतु । हिशब्दो यस्मादर्थे यस्मात् अभ्यधित स्थाघ्वोरिचेति दधातेर्लुङ् इति अभिधारितवान् । केनाभिधारितवान् । पिष्टशब्दो रूपवाची । पिष्टतमया । रभिष्टया । आलब्धतमया । आतिशयेन नियमकारिण्या । रशनया जालभूतया । प्रार्थयामि वनस्पतिम् । यत्र देशे अश्विनौ छागस्य च हविषश्च प्रिया प्रियाणि धामानि स्थानानि । यत्र सरस्वत्याः यत्रेन्द्रस्य । एताः पशुदेवताः । अथाज्यभागौ । यत्राग्नेः यत्र सोमस्य । अथ पशुपुरोडाशदेवताः यत्रेन्द्रस्य सुत्राम्णः यत्र सवितुः यत्र वरुणस्य यत्र वनस्पतेः । प्रिया पाथांसि । पाथःशब्दोऽन्नवचनः । वनस्पतिः पशोरिवाङ्गम् । अथ प्रयाजानुयाजः । यत्र देवानामाज्यपानाम् अथ स्विष्टकृत् । यत्राग्नेर्होतुः प्रियाणि स्थानानि । तत्र तेषु स्थानेषु एतान् पशून् । प्रस्तुत्येव प्रस्तुत्य च उपस्तुत्येव । अतिशयार्थं पुनर्वचनम् । उपावस्रक्षत् उपावसृजतु । रभीयस इव कृत्वी रभ राभस्ये रभसाश्च पशून् कृत्वा करत् करोतु । एवं देवो वनस्पतिर्जुषताम् हविः त्वमपि हे मनुष्य होतर्यज ॥ ४६ ॥

का० (१९, ६, २५) उत्तमौ वनस्पतिस्विष्टकृतोः । अन्ते पव्य-

मानौ होता यक्षद्वनस्पतिमभि होता यक्षदग्निं स्विष्टकृतमिति क्रमेण वनस्पतियागे स्विष्टकृद्यागे च प्रैषौ ॥ यूपो देवता । दैव्यो होता वनस्पतिं यूपमभियक्षत् आभियजतु हि यस्मात् वनस्पतिः रशनया रज्ज्वा कृत्वा अधित धृतवान् पशूनिति शेषः दधातेर्लुङि स्थाघ्वो- रिच्चेतीकारः (पा० १, २, १७) कीदृशया रज्ज्वा पिष्टतमया पिष्टतमया पिष्टशब्दो रूपवाची अत्यन्तं पिष्टा सुरूपा पिष्टतमा तया । रभिष्ठया रमते पशुभियच्छतीति रभ्री तृच् ङीप् अत्यन्तं रभ्री रभिष्ठा तया तुरिष्ठन्दसीति (पा० ५, ३; ५९) इष्ठनि तृचो लोपः समर्पयेत्यर्थः ॥ इदानीं वनस्पतिः प्रार्थ्यते यत्र अश्विनोः सम्बन्धिनः छागस्य हविषः छागरूपस्य हविषः प्रिया प्रियाणि इष्टानि धामानि स्थानानि वर्त्तन्त इति शेषः । एवमग्रेऽपि । यत्र सरस्वत्या मेषरूपस्य हविषः प्रियाणि धामानि यत्र इन्द्रस्य ऋषभस्य हविषः प्रियाणि धामानि एतेषां पशुदेवानां स्थानानि । यत्राग्नेः प्रियाणि धामानि यत्र सोमस्य प्रियाणि धामानि एतावाज्यभागौ । यत्र सुत्राम्ण इन्द्रस्य प्रियाणि धामानि यत्र सवितुः प्रियाणि धामानि यत्र वरुणस्य प्रियाणि धामानि एते पशुपुरोडाशदेवाः । यत्र वनस्पतेः प्रियाणि पाथांसि अन्नानि । अथ यत्र आज्यपानां देवानां प्रयाजानुयाजानां प्रियाणि धामानि । यत्र होतुरग्नेः स्विष्टकृतः प्रियाणि धामानि । एतान् छागादीन् पशून् रभीयस इव कृत्वा रमन्ते ते रभ्धारः अत्यन्तं रभ्धारो रभीयांसः सरभसांश्च कृत्वा इवश्चार्थः प्रकर्षेण स्तुत्वा च उपस्तुत्येव उप समीपे स्तुत्वा च इवौ चार्थौ तत्र तेषु पूर्वोक्तेषु स्थानेषु वनस्पतिर्देव उपावस्रक्षत् उपावसृजतु स्थापयतु सृजेर्लुङि रूपं लेटि वा सिब्बहुलं लेटोति (पा० ३, १, ३४) सिप्प्रत्ययेऽडागमे च रूपम् वनस्पतिर्देव एवं करत् कारोतु हविश्च जुषताम् । हे मनुष्यहोतः । त्वमपि यज ॥४६॥

होता॑ यक्षद॒ग्निᳬ स्वि॑ष्ट॒कृत॑म॒याड॒ग्निर॒श्विनो॑- श्छाग॑स्य ह॒विषः॑ प्रि॒या धामा॒न्यया॒ट् सर॑स्वत्या मे॒षस्य॑ ह॒विषः॑ प्रि॒याधामा॒न्यया॒डिन्द्र॑स्य ऋ॒ष॒भस्य॑ ह॒विषः॑ प्रि॒या धामा॒न्यया॑ड॒ग्नेः प्रि॒या धामा॒न्यया॒ट् सोम॑स्य

प्रि॒या धामा॑न्यया॒डिन्द्र॑स्य सु॒त्राम्णः॑ प्रि॒या धामा॑न्य-
या॒ट् सा॑वि॒तुः प्रि॒या धामा॑न्यया॒ड् वरु॑णस्य प्रि॒या धा-
मा॑न्यया॒ड् वन॒स्पतेः॑ प्रि॒या पाथा॑ᳬंस्यया॒ड् दे॒वाना॑मा-
ज्य॒पाना॑ं प्रि॒या धामा॑नि॒ यक्ष॑द॒ग्नेर्होतुः॑ प्रि॒या धामा॑-
नि॒ यक्ष॑त् स्वं म॑हि॒मान॒माय॑जता॒मेज्या॒ इषः॑ कृ॒णोतु॒
सो अ॑ध्व॒रा जा॒तवे॑दा जु॒षता॑ᳬं ह॒विर्होत॒र्यजं॑ ॥ ४७ ॥

होता यक्षदग्निं स्विष्टकृतम् । स्विष्टकृदग्निरेपः । दैव्यो होता यजतु । अग्निं स्विष्टकृतम् । कस्माद्धेतोरित्यत आह । अयाट् अयाक्षीत् इष्टवान् एवमग्रेऽपि । योऽग्निः अश्विनोः छागस्य च हविषश्च प्रियाणि धामानि । अयाट् सरस्वत्याः अयाट् इन्द्रस्य । प्रधानदेवताः । अयाट् अग्नेः अयाट् सोमस्य । आज्यभागौ अयाट् इन्द्रस्य सुत्राम्णः अयाट् सवितुः अयाट् वरुणस्य । पशुपुरोडाशदेवताः । अयाट् वनस्पतेः प्रियाणि पाथांस्यन्नानि । वनस्पतिः प्रधानाङ्गदेवता । अयाट् देवानाम् आज्यपानाम् प्रयाजानुयाजा आज्यपाः । यक्षदग्नेर्होतुः । यक्षत् इष्टवान् अग्नेर्होतुः स्विष्टकृतः स्वयमेव प्रियाणि धामानि । यक्षत् अयाक्षीपत् । स्वं महिमानम् स्वकीयां विभूतिम् । किञ्च । आयजतामेज्या इषः । यजतामिति वचनव्यत्ययः । आ इज्या अभियष्टव्या यागार्हा इषः प्रजाः । इषान्नेन तासां स्थितिरुत्पत्तिश्चेति इषः प्रजा उक्ताः यागशीला यागार्हाः प्रजा भवन्तीत्यर्थः । कृणोतु करोतु सः अध्वरा अध्वरान् यज्ञान् जातवेदाः जुषतास्व हविः । हे मनुष्यहोतः त्वमपि यज ॥४७॥

स्विष्टकृदग्निर्देवता । होता स्विष्टकृतमग्निं यक्षत् यजतु योऽग्निः स्विष्टकृत् अश्विनोः छागस्य हविषः सम्बन्धीनि प्रियाणि धामानि अयाट् अयाक्षीत् इष्टवान् अवदानानि यजति स्मेत्यर्थः ।

एवमग्रेऽपि । सरस्वत्या मेषस्य हविषः प्रियाणि धामानि अवदानानि अयाट् इन्द्रस्य ऋषभस्य हविषः प्रियाणि धामानि अयाट् एताः प्रधानदेवताः । अग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामानि अयाट् एतावाज्यभागौ । सुष्ठु त्रायते सुत्रामण इन्द्रस्य प्रियाणि सवितुः प्रियाणि वरुणस्य प्रियाणि एताः पशुपुरोडाशदेवताः । वनस्पतेः प्रियाणि एतत्प्रधानाङ्गम् । आज्यपानां देवानां प्रियाणि एते प्रयाजानुयाजाः होतुरग्नेः स्विष्टकृतः स्वस्यैव प्रियाणि धामानि यक्षत् इष्टवान् । स्वं महिमानं स्वां विभूतिं यक्षत् । किञ्च आज्याः समन्ताद् यष्टुं योग्या यज्याः यागार्हाः इषः इच्छन्ति इषः सकामाः प्रजाः आयजतां सम्यक् यजन्तु वचनव्यत्ययः प्रजा यागशीला यागयोग्याश्च भवन्त्वित्यर्थः । स जातवेदाः स्विष्टकृदग्निः अध्वरा अध्वरान् यज्ञान् कृणोतु करोतु हविश्च जुषताम् । हे मनुष्यहोतः ! त्वं यज । विभक्तेराकारः ॥ ४७)

दे॒वं ब॒र्हिः सर॑स्वती सु॒दे॒वमिन्द्रे॑ अ॒श्विना॑ । तेजो॒ न चक्षु॑र॒क्ष्योर्ब॒र्हिषा॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ४८ ॥

देवं बर्हिः । एकादशानुयाजप्रैषाः अश्विसरस्वतीन्द्रदेवत्याः व्यवहितपदमायाः यत् देवम्बर्हिः सुदेवम् शोभना देवा अस्येति सुदेवम् । तेन बर्हिषा सरस्वती अश्विनौ च इन्द्रे । तेजो नकारः समुच्चये । तेजश्च चक्षुश्च इन्द्रियं च अक्ष्योः अक्ष्णोः दधुः । वसुवननाय धनलाभाय । वसुधेयस्य धननिधानाय च । व्यन्तु पिबन्तु अश्विसरस्वतीन्द्राः त्वमपि यज । अथ समस्तार्थः । यदेवं बर्हिः सुदेवं तेन बर्हिषा सरस्वती अश्विनौ च तेजश्च अक्ष्णोः इन्द्रियञ्च दधुः । एवमग्रेऽपि ॥ ४८ ॥

का० (१९, ७, ८-९) अनुयाजप्रैषा देवं बर्हिरिति याज्याश्च । देवं बर्हिः सरस्वतीत्याद्या एकादश कण्डिकास्त्रिपशोरनुयाजानां प्रैषा याज्याश्च भवन्तीत्यर्थः ॥ एकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याः चतस्र आर्घ्यस्त्रिष्टुभः व्यवहितपदप्रायाः । शोभ-

ना देवा यस्य तत् सुदेवं यद्वर्हिः देवमनुयाजदेवता तेन बर्हिषा सह सरस्वती अश्विना अश्विनौ च इन्द्रे तेजो दधुः दधतु अक्ष्योः इन्द्रनेत्रयोः चक्षुः इन्द्रियं च दधुः नकारश्चार्थः । पत्नमग्रेऽपि । वसुवने वसुवननाय धनलाभाय वसुधेयस्य वसुनो धेयं वसुधेयं तस्य वसुनिधानाय च अश्विसरस्वतीन्द्रा व्यन्तु हविर्भक्षयन्तु । हे मनुष्यहोतः । त्वमपि यज । सप्तमीषष्ठ्यौ चतुर्थ्यर्थे ४८॥

दे॒वीर्द्वारो॑ अ॒श्विना॑ भि॒षजेन्द्रे॒ सर॑स्वती । प्रा॒णं न वी॒र्य्यं न॒सि द्वारो॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ४९ ॥

देवीर्द्वारः । या देव्यः यज्ञगृहद्वारः ताभिः अश्विनौ भिषजौ च । सरस्वती च प्राणश्च नसि नासिकायाम् वीर्यश्च । इन्द्रियश्च । द्वारः द्वार्भिरिति विभक्तिव्यत्ययः । इन्द्रे दधुः । वसुवने इति व्याख्यातम् ॥ ४९ ॥

उत्तरार्धे द्वार इति प्रथमा तृतीयार्था । या द्वारो देवीः यज्ञगृहद्वारो देव्योऽनुयाजदेवाः ताभिर्द्वार्भिः सह भिषजा अश्विना वैद्यावश्विनौ सरस्वती च इन्द्रे वीर्य्यं बलं दधुः नसि इन्द्रस्य नासिकायां प्राणमिन्द्रियं घ्राणेन्द्रियं च दधुः । वसु० व्याख्यातम् ॥ ४९ ॥

दे॒वी उ॒षासा॑व॒श्विना॑ सु॒त्रामेन्द्रो॒ सर॑स्वती॒ बलं॒ न वाचं॑मा॒स्य उ॒षाभ्यां॑ उ॒दधुरि॑न्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ५० ॥

देवी उषासौ । नक्तोषासाविति प्राप्ते छान्दसः प्रातिपदिकलोपः । यौ देव्यौ नक्तोषासौ ताभ्याम् अश्विनौ सुत्रामा शोभनत्राणौ सरस्वती च । बलश्च वाचश्च आस्ये मुखे । इन्द्रियश्च इन्द्रे । उषाभ्यां नक्तोषाभ्यान्दधुः व्याख्यातमन्यत् ॥५०॥

नक्तोषासाविति प्राप्ते छान्दस आदिपदलोपः । उषासा देवी नक्तोषसौ अनुयाजदेव्यौ ताभ्यामुषाभ्यां नक्तोषोभ्यां सह अश्वि-

नौ सुत्रामा शोभनरक्षणकर्त्री सरस्वती च इन्द्रे बलं दधुः आस्ये इन्द्रमुखे वाचमिन्द्रियं वागिन्द्रियं च दधुः नञ्चार्थः। वस्वित्युक्तम्॥५०॥

देवी जोष्ट्री सरस्वत्युश्विनेन्द्रमवर्धयन्। श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥ ५१॥

देवी जोष्ट्री। ये देव्यौ जोषयित्र्यौ द्यावापृथिव्यौ इति वा। अहोरात्रे इति वा। शस्यञ्च समाचेति कात्थक्यः। ताभ्याञ्जोष्ट्रीभ्याम् सरस्वती चाश्विनौ च इन्द्रम् अवर्द्धयन्। कथमवर्द्धयन्। श्रोत्रञ्च कर्णयोः यशश्च इन्द्रियञ्च इन्द्रे दधुः। वसु वन इति समञ्जसम्॥ ५१॥

ये जोष्ट्री जोषयित्र्यौ देवी देव्यौ अनुयाजदेव्यौ द्यावापृथिव्यौ अहोरात्रे वा शस्यं च समा चेति कात्थक्यः (निरु० ९, ४१, ६) ताभ्यां जोष्ट्रीभ्यां सह सरस्वती अश्विना अश्विनौ च इन्द्रमवर्धयन् कथमवर्द्धयन् तत्राह इन्द्रे यशो दधुः तत्कर्णयोश्च श्रोत्रमिन्द्रियं दधुः। वसु०॥ ५१॥

देवी ऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्युश्विना भिषजावतः। शुक्रं न ज्योति स्तनयोराहुती धत्त इन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥ ५२॥

देवी ऊर्जाहुती। जोष्ट्र्यास्तुल्यदेवताविकल्पः। ये देव्यौ ऊर्जाहुती रसवती आहुतिरह्वानम्। दुघे दुग्धे सुदुघे सुदोहने। उपरितनेऽर्द्धर्चे आहुतीशब्दः श्रूयते स इह कृतविभक्तिव्यत्ययः समर्थीक्रियते। ताभ्यामाहुतीभ्यां सरस्वती च अश्विनौ च भिषजौ अवतः अवन्तीति वचनव्यत्ययः। इन्द्रमिति शेषः। कथं कृत्वा। शुक्रञ्च ज्योतिश्च पयोलक्षणं स्तनयोः इन्द्रियञ्च इन्द्रे धत्त इति विभक्तिव्यत्ययः दधुः। वसुवने इति व्याख्यातम्॥ ५२॥

उत्तरार्धे आहुतीशब्दस्तृतीयार्थः । जोष्ट्र्योरेव देवतावि कल्पः । ये देवी ऊर्जाहुती ऊर्जो रसवती आहुतिराह्वानं होमो वा ययोस्ते ऊर्जाहुती दुघे दुग्धस्ते दुघे कामपूरके सुदुघे सुदोहने ताभ्यामाहुतिभ्यां सह सरस्वती भिषजावश्विनौ च इन्द्रे इन्द्रमवतः अवन्ति रक्षन्ति वचनव्यत्ययः । कथम् तदाह ज्योतिः तेज इन्द्रे धत्तः दधति स्तनयोः शुक्रमिन्द्रियं च धत्तः वचनव्यत्ययः नम्रार्थः । व्याख्यातमन्यत् ॥ ५२ ॥

दे॒वा दे॒वानां॑ भि॒षजा॒ होता॑रा॒विन्द्र॑म॒श्विना॑ । व॒ष॒ट्का॒रैः सर॑स्वती॒ त्विषिं॒ न हृद॑ये म॒तिꣳ होतृ॑भ्यां दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ५३ ॥

देवा देवानाम् । यौ देवौ होतारौ देवानां भिषजौ ताभ्यां होतृभ्यां वषट्कारैश्च । अश्विनौ च सरस्वती च इन्द्रम् इन्द्र इति विभक्तिव्यत्ययः । इन्द्रियञ्च त्विषिन्दीप्तिश्च हृदये मतिश्च दधुः । वसुवने इति समञ्जसम् ॥ ५३ ॥

देवानां देवा देवौ यौ होतारौ अनुयाजदेवौ ताभ्यां होतृभ्यां सह वषट्कारैश्च सह भिषजौ अश्विनौ सरस्वती च इन्द्रमिन्द्रे त्विषिं कान्तिं दधुः हृदये मतिमिन्द्रियं बुद्धीन्द्रियं च दधुः नम्रार्थः । वसु० उक्तम् ॥ ५३ ॥

दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीर॒श्विनेडा॒ सर॑स्वती । शूषं॒ न मध्ये॒ नाभ्या॒मिन्द्रा॑य दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ५४ ॥

देवीस्तिस्रः । या देव्यस्तिस्रः सरस्वतीडाभारत्यः तिस्रो. देवीः अत्र विभक्तिव्यत्ययोऽध्याहारश्च वाक्यवशात् । तिसृभिर्देवीभिः सरस्वतीडाभारतीभिः । अश्विनौ च इडा च सरस्वती च । शूषं बलञ्च मध्ये नाभ्याम् इन्द्रियञ्च । इन्द्राय इन्द्रे इति विभक्तिव्यत्ययः । दधुः । वसुवने इति समानम् ॥ ५४ ॥

यास्तिस्रो देव्यो भारती इडा सरस्वती तिस्रो देवीः विभक्तिव्यत्ययः ताभिस्तिसृभिः देवीभिः सह अश्विनौ सरस्वती इडा च इन्द्राय इन्द्रे नाभ्यां मध्ये च शूषं बलमिन्द्रियं च दधुः नञर्थः । वसु० व्याख्यातम् ॥ ५४ ॥

देव इन्द्रो नराशᳬसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः । रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥ ५५ ॥

देव इन्द्रः । यो देवः इन्द्रः । इदि परमैश्वर्ये । परमैश्वर्ययुक्तः । नराशंसः नरा अस्मिन्नासीनाः शंसन्तीति नराशंसः त्रिवरूथः त्रिगृहः सदोहविर्धानाग्नीध्रैः । त्रिलोक्यावात्रिगृहः । यस्य च सरस्वत्या अश्विभ्याञ्च ईयते ऊह्यते नीयतेरर्थः । स यज्ञः । रेतो न रेतश्च अमृतञ्च रूपञ्च जानित्रञ्जन्म च । इन्द्राय इन्द्रे इन्द्रस्य वेति विभक्तिव्यत्ययः । कथम्भूतो यज्ञः । त्वष्टा त्वक्षतिः करोत्यर्थः । जगतः कर्ता । दधातु इन्द्रियाणि च । वसुवन इति व्याख्यातम् ॥ ५५ ॥

नरा अस्मिन्नासीनाः शंसन्तीति यास्कोक्तेः (निरु० ८, ६) नराशंसो देवोऽनुयाजरूपो यज्ञः रेतो वीर्य्यं रूपं सौन्दर्य्यममृतं जनित्रमुत्तमं जन्म इन्द्रियाणि च इन्द्राय दधत् दधातु नञर्थः । कीदृशो नराशंसः इन्द्रः इन्दतीतीन्द्र ऐश्वर्य्यवान् इति परमैश्वर्य्ये । त्रिवरूथः त्रीणि वरूथानि गृहाणि सदो हविर्धानाग्नीध्राणि यस्य सः । तथा त्वष्टा त्वक्षतिः करोतिकर्मा जगतः कर्त्ता यज्ञादेव जगदुत्पत्तेः । यस्य नराशंसस्य रथः सरस्वत्या अश्विभ्यां च ईयते नीयते ऊह्यते । वसु व्याख्यातम् ॥ ५५ ॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णो अश्विभ्याᳬ सरस्वत्या सुपिप्पल इन्द्राय पच्यते मधु । ओजो न जूतिर्ऋषभो न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसुवने

वसुधेर्यस्य व्यन्तु यज ॥ ५६ ॥

देवो देवैः । यो देवो वनस्पतिर्यूपः । देवैर्हिरण्यपर्णः यस्य देवा हिरण्मयानि पर्णानि । रूपकोऽत्रालङ्कारः । यश्च अश्विभ्यां सरस्वत्या च सुपिप्पलः । अश्विनौ सरस्वती च यस्य वनस्पतेः फलानीत्यर्थः । इन्द्राय इन्द्रार्थञ्च यः पच्यते फलति मधु मधुराणि फलानि । स वनस्पतिः ऋषभः ऋषभशब्दः पूजावचनः । पूज्यः । जूतिः । जूतिर्जवतेः । वेगवान् । ओजश्च भामश्च भामशब्दः क्रोधवचनः इन्द्रियाणि च नः अस्माकम् अस्मदो द्वयोश्चेति बहुवचनम् दधत् दधातु । वसुवने इति व्याख्यातम् ॥ ५६ ॥

वनस्पतिर्देवो नोऽस्माकमोजः तेजः जूतिः जूतिं जवं वेगं भामं क्रोधमिन्द्रियाणि च दधत् दधातु यो वनस्पतिर्यूपः इन्द्राय मधु मधुरं फलं पच्यते पचति फलति इन्द्राय फलं ददाति नकारौ चार्थौ । कीदृशो वनस्पतिः देवैर्हिरण्यपर्णः हिरण्यरूपाणि पर्णानि यस्य देवा यस्य हिरण्मयानि पर्णानीत्यर्थः । अश्विभ्यां सरस्वत्या च सुपिप्पलः शोभनं पिप्पलं फलं यस्य सः अश्विनौ सरस्वती च यस्य वनस्पतेः फलानीत्यर्थः । ऋषभः पूज्यः ऋषभशब्दः पूजावचनः । वसु० ॥ ५६ ॥

दे॒वं ब॒र्हिर्वारि॑तीनामध्व॒रे स्ती॒र्णम॒श्विभ्या॒मूर्ण॑म्रदाः॒ सर॑स्वत्या स्यो॒नमि॑न्द्र ते॒ सदः॑ । ई॒शायै॑ म॒न्युꣳ राजा॑नं ब॒र्हिषा॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु यज॑ ॥ ५७ ॥

देवम्बर्हिः । यस्माद्देवम्बर्हिः वारितीनाम् उदकवतीनां वा वारिभवानां वा वरतराणां वा ओषधीनां सम्बन्धि । अध्वरे स्तीर्णम् अश्विभ्यामध्वर्युभ्याम् ऊर्ण म्रदाः ऊर्णेव मृदु । सरस्वत्या च । स्तीर्णमित्यनुवर्तते । तस्मात् स्योनं सुखरूपम् हे

इन्द्र तव सदः स्थानम् । किञ्च तस्मिन्सदसि । ईशायै ईशितायै ऐश्वर्याय मन्युं क्रोधम् त्वां राजानम् इन्द्रियञ्च अश्विनौ च सरस्वती च बर्हिषा दधुः । यद्वा ईशानाय तव मन्युं राजानमिन्द्रियञ्च । अश्विनौ सरस्वती च हविषा दधुः । वसुवन इति व्याख्यातम् ॥ ५७ ॥

हे इन्द्र ! वारितीनां वारि जले इतिर्गतिर्यासां ता वारितयः तासां जलोद्भवानामोषधीनां सम्बन्धि बर्हिः ते तव सदः सदसि अध्वरे यज्ञे अश्विभ्यां सरस्वत्या च स्तीर्णमास्तृतं कीदृशं बर्हिः देवं दीप्यमानम् ऊर्णम्रदा ऊर्णमिव म्रदीयः छान्दसः ईयोलोपः अत एव स्योनं सुखरूपम् । किञ्च अश्विसरस्वत्यः बर्हिषा सह राजानं दीप्यमानं मन्युं क्रोधमिन्द्रियं च हे इन्द्र ! त्वयि दधुः किमर्थम् ईशायै ऐश्वर्याय ईशनमीशा तस्यै गुरोश्च हल इति (पा० ३, ३, १०३) स्त्र्यधिकारे ईशतेरप्रत्ययः स्त्रीत्वादाप् । वसु० उक्तम् ॥५७॥

दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद्दे॒वान्य॑क्षद्य॒था॒य॒थꣳ होता॑रा॒विन्द्र॑म॒श्विना॑ वा॒चा वाच॒ꣳ सर॑स्वती॒म॒ग्निꣳ सोम॑ꣳ स्विष्ट॒कृत् स्वि॑ष्ट॒ इन्द्रः॑ सु॒त्रामा॑ सवि॒ता वरु॑णो भि॒षगि॒ष्टो दे॒वो वन॒स्पतिः॑ स्विष्टा॑ दे॒वा आ॑ज्य॒पाः स्वि॑ष्टो अ॒ग्निर॒ग्निना॒ होता॑ हो॒त्रे स्वि॑ष्ट॒कृद्य॒शो न दध॑दिन्द्रि॒यमूर्ज॒मप॑चितिꣳ स्व॒धां व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ५८ ॥

देवो अग्निः । यो देवो अग्निः स्विष्टकृत् शोभनमिष्टं कर्तव्यमित्ययमधिकारो यस्य स तथोक्तः । देवान् यक्षत् इष्टवान् । यथायथम् । यथास्वं यथायथम् यो यथा यष्टव्यः स तथेत्यर्थः । एवं सामान्यत उक्त्वा अथेदानीं विशेषत आह । होतारौ अयञ्चाग्निरसौ च मध्यमो वायुः । होतृ मित्रावरुणौ वा । इन्द्रञ्च अश्विनौ च वाचं कृत्वा वाचञ्च सरस्वतीञ्च अ-

मिश्च सोमश्च यक्षदिति सम्बन्धः । स्विष्टकृच्च स्विष्टः शोभनमिष्टः इन्द्रः सुत्रामा च इष्टः सविता इष्टः वरुणो भिषक् इष्टश्च देवो वनस्पतिः । स्विष्टा देवा आज्यपाः प्रयाजानुयाजाः इष्टाग्निरग्निना । अथेदानीं होता स्विष्टकृत् होत्रे मानुषाय । यशो न दधत् । ददात्यर्थे दधातिः । ददातु । इन्द्रियञ्च ऊर्जञ्च अपचितिम्पूजाञ्च स्वधामन्नञ्च । वसुवने इति व्याख्यातम् ॥५८॥

शोभनमिष्टं यागं करोतीति स्विष्टकृत् अग्निर्देवो यथायथं यथास्वं यो यथा यष्टव्यस्तथा देवान् वक्ष्यमाणान् यक्षत् इष्टवान् । कान् देवानत आह होतारौ अयं चाग्निरसौ च मध्यमो वायुः होतृमैत्रावरुणौ वा इन्द्रम् अश्विना अश्विनौ च वाचा मन्त्रेण वाचं च यक्षत् सरस्वतीमग्निं सोमं च । किञ्च स्विष्टकृत् शोभनयज्ञकारी सुत्रामा शोभनरक्षकः मनिन्प्रत्ययः इन्द्रः स्विष्टः सुष्ठु इष्टः सविता वरुणो भिषगिष्टः वनस्पतिर्देवश्च इष्टः आज्यपा देवाः प्रयाजानुयाजाः स्विष्टाः अग्निरधिष्ठाता अग्निना भौमेन हविर्द्वारा सुष्ठु इष्टः । किञ्च होता दैव्यः स्विष्टकृत् होत्रे मानुषाय यशः इन्द्रियमूर्जमन्नमपचितिं पूजां स्वधां पित्रर्थमन्नं दधत् ददातु नकारश्चार्थः । वसुवननाय वसुधनाय च देवा व्यन्तु हविरदन्तु मनुष्यहोतर्यज ॥ ५८ ॥

अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशान् बध्नन्नश्विभ्यां छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभꣳ सुन्वन्नश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् ॥ ५९ ॥

अग्निमद्य । सूक्तवाकप्रैषः । अग्निम् अद्य अस्मिन्नवि होतारम् अवृणीत वृतवानयं यजमानः । किं कुर्वन् पचन् पक्तीः पक्तव्यानि वस्तूनि इति सामान्यवचनम् । अथ विशेषः पचन् पुरोडाशान् । पशुपुरोडाशान् । बध्नन् पशुं यूपे इति शेषः । अश्विभ्यां छागम् अश्विनोरर्थे छागं सरस्वत्यै मेषम् । इन्द्रा

प च ऋषभम्। अन्यच्च सुन्वन् अश्विभ्यां सरस्वत्यै च इन्द्राय च सुत्राम्णे सुरासोमान्। तानि च वस्तूनि कुतोऽन्ययजमानः। अग्निहोतारमवृणीतेति सम्बन्धः ॥ ५९ ॥

का० (२९, ७, १०) अग्निमद्येति सूक्तवाकप्रैषः। अग्निमद्य होतारमित्यादिः सूक्ता गृहीतयन्तः कण्डिकात्रयात्मकः सूक्तवाके प्रैषो भवति ॥ लिङ्गोक्तदेवतः प्रैषः। प्रथमा अष्टिः द्वितीया धृतिः तृतीया विकृतिः। अयं यजमानोऽद्य अग्निं होतारमवृणीत वृतवान् वृणातेर्लङ्। किं कुर्वन् पक्तीः पक्तव्यानि हवींषि पचन्। सामान्येनोक्त्वा विशेषमाह पुरोडाशान् पचन् अश्विभ्यामश्विनोरर्थे छागं बध्नन् यूपे इति शेषः सरस्वत्यै मेषं बध्नन् इन्द्राय ऋषभं च तथा अश्विभ्यां सरस्वत्यै सुत्राम्णे रक्षकाय इन्द्राय च सुरासोमान् सुन्वन् अग्निमवृणीत ॥ ५९ ॥

सूपस्था अद्य देवो वनस्पतिरभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऋषभेणाक्षँस्तान्मेदस्तः प्रति पचताग्रृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥ ६० ॥

सूपस्था अद्य। साधु यज्ञमुपतिष्ठति इति सूपस्थाः अद्य अस्मिन्दिवि देवः वनस्पतिः अभवत्। अश्विभ्यां छागेन सरस्वत्यै च मेषेण इन्द्राय च ऋषभेण। कथमेवमगम्यत इत्यत आह। अक्षन्तान् भक्षितवन्तः अश्विप्रभृतयः तान् छागादीन्। कुत आरभ्येत्याह। मेदस्तः वपाया आरभ्य। प्रतिपचताग्रृभीषत।प्रत्यग्रृभीषत प्रतिगृहीतवन्तः। पचता पक्वानि अग्निपक्वानि अवदानानि। अवीवृधन्त च पुरोडाशैः। किञ्च। अपुः पीतवन्तः अश्विनौ च सरस्वती च इन्द्रश्च सुत्रामा। सुरासोमान् सुरा च सोमाश्च यद्वा सुरामयान्सोमान् ॥ ६० ॥

अद्य वनस्पतिर्देवः छागेन कृत्वा अश्विभ्यां सूपस्था अभवत्.

सुष्ठु उपतिष्ठते सेव्यते सूपस्थाः छागेनाश्विनोः सेवां चकारेत्यर्थः मेषेण सरस्वत्यै सूपस्था अभवत् ऋषभेण इन्द्राय सूपस्था अभवत् यतस्पतिना छागमेषर्षभैरश्व्यादीनामुपस्थानं कृतम् । तत्कथं ज्ञायते तत्राह अश्व्यादयो मेदस्तः मेदो वपामारभ्य तान् छागादीन् अक्षन् अभक्षयन् । पुनः पचता पच्यन्ते तानि पचता पचतानि पक्वानि अवदानानि प्रत्यगृभीषत प्रत्यगृह्णन् पचतेर्मृदृशियजिपर्वि-पच्यमितमिनमिहर्यैभ्योऽतजिति (उण० ३, १०९) अतच्प्रत्ययः भूतेऽपि दृश्यन्त इति (पा० ३, ३, २) वचनाद्भूतेऽपि द्रष्टव्यः विभक्तेराकारः । पुनस्ते पुरोडाशैरवीवृधन्त ऐधन्त । किञ्च अश्विना सरस्वती सुत्रामा इन्द्रश्च सुरासोमानपुः पीतवन्तः पातेर्लुङ् पिबादेशाभावश्छान्दसः श्लुर्वा । सुराश्च सोमाश्च तान् सुरामयान् सोमान् वा ॥ ६० ॥

त्वामुद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बुहुभ्यु आ सङ्गतेभ्य एष मे देवेषु वसु वार्य्यायक्ष्यतु इति ता या देवा देव दानान्यदुस्तान्यस्मा आ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥ ६१ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायाम्
एकविंशोऽध्यायः ॥ २१ ॥

त्वामद्य । देव्यो होताभिरुच्यते । त्वाम् अद्य हे ऋषे मन्त्राणां द्रष्टः हे आर्षेय यजमान आर्षेयैर्व्रियते इत्येवं संबोध्यते । हे ऋषीणामृत्विजान्नपात् पुत्र अवृणीत वृतवान् अयं यजमानः । बहुभ्यो देवेभ्यः आसङ्गतेभ्यः त्वामेव अवृणीतेत्याभिप्रायः । किमर्थम् एषः मे मह्यम् देवेषु वसु धनम् वारि वरणीयम् आवक्ष्यते आदास्यति अयन्दातुं समर्थ इति । एवञ्च ।

ता या देव दानान्यदुः । ता तानि । या यानि । हे देव यानि अदुः दत्तवन्तः । इमानि अस्मै यजमानाय दातव्यानीति । तानि अस्मै यजमानाय । आ च शास्व च गुरस्व । अकारौ भिन्नक्रमौ । आशास्व च इच्छा । आगुरस्व च गुरी उद्यमने उद्यच्छ च । दानाय । प्रेपितश्चासि हे होतः । भद्रवाच्याय । भन्दनीयवचनाय भद्रश्च वचनम् त्वं ब्रूया इति । अथेदानीं प्रेपिता मानुपो होतो सूक्तवाकाय । कथं कृत्वा सूक्ता ब्रूहि । सूक्तानि साधुवचनानि वद इति ॥ ६१ ॥

समाप्ता सौत्रामणी ।

इति उव्वटकृतौ मन्त्रभाष्ये एकविंशतितमोऽध्यायः ॥ २१ ॥

देव्यो होता अग्निरुच्यते । हे अग्ने मन्त्राणां द्रष्टः । हे आर्षेय ! यजमानार्षेयैर्वियते इत्येवं सम्बोध्यते हे ऋषीणां नपात् । पुत्रायं यजमानः वसुभ्यः सङ्गतेभ्यः मिलितेभ्यो देवेभ्य इति हेतोरथ त्वामेव आ अवृणीत सम्यग् धृतवान् । इति किम् एपोऽग्निर्मे महां देवेषु वारि वरीतुं योग्यं वारि वरणीयं वसु धनमायक्ष्यते आदास्यते यजतेर्दानार्थाल्लृट् मया देवेभ्यो दातुं ग्रहीष्यते इत्यर्थः । किञ्च हे देव अग्ने ! या यानि ता तानि दानानि देवा अदुः दत्तवन्तः तानि दानानि अस्मै यजमानाय आशास्व च इच्छ तानि यजमानाय दातव्यानीति इच्छेत्यर्थः । आगुरस्व च उद्यच्छ च गुरी उद्यमे तुदादिः दानायोद्यमं कुरु आकारो चकारो च भिन्नक्रमौ । हे होतः । त्वमिषितः प्रेपितोऽसि प्रेरितोऽसि कथम् तदाह भद्रवाच्याय वक्तुं योग्यं वाच्यं भद्रं शुभं च तत् वाच्यं च भद्रवाच्यं तस्मै भद्रं ब्रूहीति प्रेपितोऽसीत्यर्थः । किञ्च सूक्ता सूक्तानि त्वं ब्रूहि इति सूक्तवाकाय सूक्तवचनाय सूक्तानि वक्तुं मानुषः होता च प्रेपितोऽस्ति ॥ ६१ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
एकविंशोऽयमध्यायो याज्यादिप्रेपणान्तिमः ॥

अथ द्वाविंशोऽध्यायः ।

तेजोऽसि शुक्रमुमृतमायुष्पा आयुर्मे पाहि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे ॥ १ ॥

अथाश्वमेधश्चतुर्भिरध्यायैः तं प्रजापतिरपश्यत् । तेजोऽसि । सौवर्णं निष्कं प्रतिमुञ्च वाचयति । यस्मात्तेजस्त्वमसि शुक्रश्चाग्नेः । अग्निर्ह वा अपोऽभिदध्यावित्युपक्रम्य तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवदिति श्रुतिः । अमृतश्च अग्निप्रभवत्वात् दानेनामृतत्वमदानाच्च । हिरण्यदा अमृतत्वं भजन्ते इति श्रुतिः । आयुपश्च पाता गोपायिता । अतः त्वां प्रार्थये । आयुः मे मम पाहि । यज्ञसमाप्त्यर्थमायुः प्रार्थ्यते । रशनामादत्ते । देवस्य त्वेति व्याख्यातम् ॥ १ ॥

सर्वकामस्य राज्ञोऽश्वमेधः तस्य फाल्गुनशुक्लाष्टम्यामारम्भः ॥ का० (२०, १, ९,) निष्कं प्रतिमुञ्चन् वाचयति तेजोऽसीति । चतुःसुवर्णनिर्मित आभरणविशेषो निष्कः तं यजमानकण्ठे प्रतिबध्नन्नध्वर्युस्तेजोऽसीति मन्त्रं पाहीत्यन्तं वाचयति तं च निष्कं प्रातर्होमान्ते पूर्णाहुतिं कृत्वाध्वर्यवे दद्यादिति सूत्रार्थः ॥ चत्वारोऽध्याया अश्वमेधमन्त्रास्तेषां प्रजापतिर्ऋषिः । तेजोऽसीत्यस्य सौवर्णं निष्कं देवता । प्राजापत्यानुष्टुप् । हे निष्क ! तेजोऽसि आग्नेयत्वात् । शुक्रमग्नेर्वीर्यं चासि अग्निर्ह वाऽपोऽभिदध्यावित्युपक्रम्य तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवदिति श्रुतेः । अमृतं च वह्नितापेऽनुच्छिद्यमानद्रवत्वाधिकरणत्वात् दानेनामृतत्वप्रदानाच्च हिरण्यदा अमृतत्वं भजन्त इति श्रुतेः । आयुष्पाः आयुः पातीति आयुषो गोपायिता अतो याचे मे ममायुः पाहि रक्ष यज्ञसमाप्तिपर्यन्तमायुः प्रार्थ्यते ॥ का० (२०, १, २७) देवस्य त्वेति रशनामादाय ब्रह्मन्नश्वं भन्त्स्यामीत्याह । देवस्य त्वेत्यादि-सरमारपन्तीत्यन्तेन मन्त्रेण त्रयोदशारत्निं दर्भमयीं द्विगुणामश्वबन्धनार्थां रशनां रज्जुमादाय

ग्रहाग्रस्वमित्यादि-तेन-राध्यासमित्यन्तं मन्त्रं (४) ग्रहाणां प्रत्या हेति सूत्रार्थः ॥ देवस्य त्वेति व्याख्यातम् (१, १०) ॥ १ ॥

इमामंगृभ्णन्नशुनामृतस्य पूर्वं आयुषि विदथेषु कव्या । सा नो अस्मिन् सुत आबंभूव ऋतस्य सामंन् सरमारपंन्ती ॥ २ ॥

इमामगृभ्णन् । त्रिष्टुब्रशनादेवत्या । यामिमाम् अगृह्णन् गृहीतवन्तः रशनान्दर्भमयीम् । ऋतस्य यज्ञस्य पूर्वे प्रथमे आयुषि यज्ञारम्भे इत्यर्थः । के रशनामगृह्णन्नित्यत आह । विदथेषु कव्या यज्ञेषु कवयः । विश्वसृष्टारो वा आद्ये सर्गे प्रजापतिप्रभृतयः । एते हि सृष्टिं यज्ञादसृजन्त । सा रशना नः अस्माकम् अस्मिन्सुते यज्ञे आवभूव अभूता उत्पन्ना । ऋतस्य सामन् । संमनने यज्ञमारम्भे । सरं यज्ञप्रसरम् आरपन्ती शब्दायमाना ॥ २ ॥

यज्ञपुरुषदृष्टा रशनादेवत्या त्रिष्टुप् । सवनं सुतं यज्ञः भावे क्तः नोऽस्माकमस्मिन् सुते यज्ञे सा रशना आवभूव उत्पन्ना । कीदृशी ऋतस्य यज्ञस्य सामन् साम्नि समारम्भे सरं प्रसरं यज्ञप्रसारमारपन्ती रप् उक्तौ उच्चारयन्ती यज्ञप्रसारो भवत्विति वदन्तीत्यर्थः । सा का विद्यते लभ्यते स्वर्गो यैस्ते विदथाः यज्ञाः विदथाः यज्ञाः विदथेषु यज्ञेषु विदेरथगिति अथक्प्रत्ययः कव्या कवयः विभक्तेर्व्यादेशः सुपां सुलुगित्यादिना यज्ञेषु कुशलाः प्रजापत्यादयो यामिमां रशनामृतस्य यज्ञस्य पूर्वे प्रथमे आयुषि प्रारम्भे इत्यर्थः अगृभ्णन् अगृह्णन् या पूर्वैर्गृहीता सा रशनाऽऽभवभूता इत्यर्थः ॥ २ ॥

अभिधा असि भुवनमसि यन्तासि धर्ता । स त्वमग्निं वैश्वानरं सप्रथसं गच्छ स्वाहाकृतः ॥ ३ ॥

यम्रात्यश्वम् । अभिधासि । यस्त्वम् अभिधा असि अ-

भिधातव्योऽसि । भुवनश्चासि । भुवनमाश्रयः । यन्ता नियमनकर्ता चासि । धर्ता धरयिता चासि । स त्वमेवंप्रभावः सन् । अग्निं वैश्वानरम् । कथम्भूतम् सप्रथसम् सर्वतः पृथुम् । तिर्यगूर्ध्वमधश्चैव महत्वेनरूपेण पृथुम् । गच्छ । स्वाहाकृतः साधु हुतश्च सन् ॥ ३ ॥

का० (२०, १, २८) तं बधानेति ब्रह्मानुज्ञातोऽभिधा असीति यथात्यश्वम् । तं बधान देवेभ्यः प्रजापतये तेन राध्नुहीति मन्त्रेण ब्रह्मणानुज्ञातोऽध्वर्युरभिधा असीत्यादि-स्वगात्वा-देवेभ्यः-प्रजापतय इत्यन्तेन मन्त्रेण रशनयाश्वं बध्नाति ॥ लिङ्गोक्तदेवतानि यजूंषि अश्वो देवतास्य । हे अश्व । यस्त्वमभिधा असि अभिधायते स्तूयत इत्यभिधाः क्विप् भुवनं सर्वेषामाश्रयश्चासि यन्ता नियमनकर्ता चासि धर्ता जगद्धारयिता च । स एवंविधः त्वं स्वाहाकृतः स्वाहाकारेण कृतः हुतः सन् *अग्निं गच्छ प्राप्नुहि ।* कीदृशमग्निम् वैश्वानरं विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितम् सप्रथसं प्रथतेरसुन्प्रत्ययः प्रथनं प्रथो विस्तारस्तत्सहितम् यद्वा सर्वतास्तिर्यगूर्ध्वमधश्च प्रथते सप्रथाः तम् सर्वतः शब्दस्य सादेशः ॥ ३ ॥

स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम् । तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ॥ ४ ॥

स्वगा त्वा । हे अश्व स्वगा करोमि त्वां देवेभ्यः प्रजापतये च । स्वगाशब्दो डाजन्तः स्वयङ्गामिनमित्यर्थः । ब्रह्माणमामन्त्रयते । ब्रह्मन्नश्वम्भन्त्स्यामि । बध्नातेरेतद्रूपम् अश्वस्य बन्धनं करिष्यामि । देवेभ्यः प्रजापतये च । तेन बद्धेनाहं राध्यासम् राधिं प्राप्नुयाम् । राधिः कर्मपरिसमाप्तिः । ब्रह्मा प्रसौति । तं बधान । यमिच्छसि तमश्वं बधान तस्य बन्धनङ्कुरु । किमर्थम् देवेभ्यः प्रजापतये च । तेन बन्धेन राध्नुहि । यज्ञसमाप्तिं प्राप्नुहीत्यर्थः ॥ ४ ॥

हे अश्व ! त्वा त्वां देवेभ्यः प्रजापतये च देवार्थं प्रजापत्यर्थं च स्वगा करोमीति शेषः स्वेनैव गच्छतीति स्वगा डाजन्तः विभक्तेर्डादेशो वा स्वयंगामिनमित्यर्थः ॥ ब्रह्मन्नश्वम् ब्रह्मा देवता ब्रह्माणमामन्त्रयते हे ब्रह्मन्! अश्वं भन्त्स्यामि बन्धनं करिष्यामि बध्नातेर्लृटि स्यपि एकाचो बश इति भष्त्वम्। किमर्थम् देवेभ्यः प्रजापतये च तेनाश्वबन्धेनाहं राध्यासं राध संसिद्धौ सिद्धिं कर्म्मसमाप्तिरूपां प्राप्नुयाम् आशीर्लिङ् ॥ ब्रह्मा प्रसौति तं बधान अध्वर्युर्दैवतं यजुः। हे अध्वर्यो ! यं यद्धुमिच्छसि तमश्वं बधान। किमर्थम् देवेभ्यः प्रजापतये च तेनाश्वबन्धेन राध्नुहि सिद्धिं यज्ञसमाप्तिलक्षणां प्राप्नु हि राधेः स्वादित्वाल्लोटि श्नुप्रत्ययः ॥ ४ ॥

प्रजापतये त्वा जुष्टं प्रोक्षामि। इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि। वायवे त्वा जुष्टं प्रोक्षामि। विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि। सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि। यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः परो मर्तः परः श्वा ॥ ५ ॥

प्रोक्षत्यश्वम्। प्रजापतये त्वा जुष्टं प्रोक्षामीति। ऋजवः प्रोक्षणमन्त्राः। यजमानं वाचयति। यो अर्वन्तम्। गायत्री। अर्द्धेनाश्वस्तुतिः। यः पुरुषोऽर्वन्तम् अश्ववचनोऽर्वशब्दः। अश्वजिघांसति हन्तुमिच्छति। तम् अभ्यमीति। मी हिंसायाम्। हिनस्ति वरुणः। श्वानश्चतुरक्षं हत्वाऽधस्पदमश्वस्योपप्लावयति। "यस्य शुनश्चक्षुषोः समीपे पुण्ड्रे स्तः स चतुरक्ष उच्यते" परो मर्तः। परः पराभूतः अधस्पदनीतः मृतो मनुष्यः यो अर्वन्तञ्जिघांसतीति। परः पराभूतश्च श्वा ॥ ५ ॥

का० (२०, ६, ३७) स्थावरा अपो गत्वा प्रजापतये त्वेति प्रोक्षत्यश्वं प्रतिमन्त्रम्। ततोऽध्वर्युः स्थावरास्तडागादिस्था अपो गत्वा ताभिरद्भिः पञ्चमन्त्रैः प्रतिमन्त्रमश्वं प्रोक्षति ॥ लिङ्गोक्तदेवतानि पञ्च यजूंषि। हे अश्व ! प्रजापतये जुष्टं त्वा त्वां प्रोक्षामि सि-

क्षामि अनेन प्रोक्षणेन प्रजापतेरिवाश्वे वीर्यं दधाति । तथा च श्रुतिः (१३, १, २, ५) प्रजापतिर्वै देवानां वीर्यवत्तमो वीर्यमेवास्मिन् दधाति तस्मादश्वः पशूनां वीर्यवत्तम इति । इन्द्राग्निभ्यां जुष्टं त्वां प्रोक्षामि अनेनेन्द्राग्न्योरिवाश्वे ओजो दधाति। तथाच श्रुतिः (१३, १, २, ६) इन्द्राग्नी वै देवानामोजस्वितमा ओज एवास्मिन् दधाति तस्मादश्वः पशूनामोजस्वितम इति । वायवे जुष्टं प्रीतं त्वां प्रोक्षामि अनेन वायोरिवाश्वे वेगं दधाति। तथा च श्रुतिः (१३, १, २, ७) वायुर्वै देवानामाशिष्ठो जवमेवास्मिन् दधाति तस्मादश्वः पशूनामाशिष्ठ इति आशिष्ठो वेगवत्तरः। विश्वेभ्यो देवेभ्यो जुष्टं त्वां प्रोक्षामि अनेनाश्वे यशो दधाति विश्वे वै देवा यशस्वितमा यश एवास्मिन् दधाति तस्मादश्वः पशूनां यशस्वितम इति (१३, १, २, ८) श्रुतेः। सर्वेभ्यो देवेभ्यो जुष्टं त्वां प्रोक्षामि अनेन सर्वा देवता अश्वे दधाति। सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति सर्वा एवास्मिन् देवता अश्वे अन्वायातयतीति (१३, १, २, ९) श्रुतेः॥ का० २०, २, १) यो अर्वन्तमिति वाचयति। शूद्रायां वैश्यायां जातेन पुंसा अध्वर्युप्रेरितेन चतुर्नेत्रे शुनि खादिरमुशलेन हते सति यो अर्वन्तमित्यादि वरुण-इत्यन्तं मन्त्रं यजमानं वाचयति॥ गायत्री पूर्वार्धेऽश्वस्तुतिः परेऽर्धे लिङ्गोक्तदेवता। यः अर्वन्तमश्वं जिघांसति हन्तुमिच्छति अर्वणस्त्रसावनञ इति (पा० ६,४, १२७) अन्तादेशः हन्तेः सन्नन्ताल्लट् वरुणः तमश्वं जिघांसन्तमभ्यमीति हिनस्ति अम् हिंसायाम् एतस्य लटि तुरुस्तुशम्यम इति ईप्रत्ययः॥ का० (२०, २, ४) वेतसकटेनाधोऽश्वं प्लावयति परो मर्त्त इति। वेतसतरुकृतेन कटेन मृतं श्वानमश्वाधो जले तारयति॥ अश्वं जिघांसुर्मर्तो मनुष्यः परः पराभूतः अधस्पदं नीतः श्वा च परः पराकृतः अश्वरूपेणाश्वहन्तेव पराकृत इत्यर्थः॥ ५॥

अ॒ग्नये॒ स्वाहा॑ । सोमा॑य॒ स्वाहा॑ । अ॒पां मोदा॑य॒ स्वाहा॑ । स॒वि॒त्रे स्वाहा॑ । वा॒यवे॒ स्वाहा॑ । विष्ण॑वे॒ स्वाहा॑ । इन्द्रा॑य॒ स्वाहा॑ । बृह॒स्पत॑ये॒ स्वाहा॑ । मि॒त्राय॒ स्वाहा॑ । वरु॑णाय॒ स्वाहा॑ ॥ ६ ॥

दशाश्वस्तोमीयानि जुहोति । अग्नये स्वाहेति ऋजवो मन्त्राः ॥ ६ ॥

का० (२०, २,३, ४,) अग्निसमीपमानीयाग्नये स्वाहेति जुहोत्यनुवाकेन प्रतिमन्त्रं सहस्रं वावर्त्तम् । ततः स्थावराभ्योऽश्वेभ्यः सकाशादश्वमग्निपार्श्वमानीयाग्नये स्वाहेत्येककाण्डकात्मकेनानुवाकेन प्रतिमन्त्रं सकृद्गृहीत्वा जुह्वा स्वोकीयसंज्ञा दशाज्याहुतीर्जुहोति यद्वानुवाकमपर्यायपर्यं सहस्रमाज्याहुतीर्जुहोतीति सूत्रार्थः । दश यजूंषि लिङ्गोक्तदेवतानि । अङ्गतीत्यग्निः । सुनोतीति सोमः । अपां जलानां मोदाय मोदयति हर्षयति मोदः । सूते सविता । वातीति वायुः । वेवेष्टि व्याप्नोति विष्णुः । इन्दतीन्द्रः । बृहतां वेदानां पतिर्बृहस्पतिः । मिद्यति स्निह्यति मित्रः । वृणोति भक्तं भजते वरुणः । एताभिराहुतिभिरेतेभ्यो दश देवेभ्योऽश्वं ददाति । तथा च श्रुतिः (१३, १, ३, ३) एतावन्तो वै सर्वे देवास्तेभ्य एवैनं जुहोतीति ॥ ६ ॥

हिङ्कारा॒य॒ स्वाहा॒ हिङ्कृ॑ताय॒ स्वाहा॒ क्रन्द॑ते॒ स्वाहा॑वक्र॒न्दाय॒ स्वाहा॒ प्रोथ॑ते॒ स्वाहा॑ प्र॒प्रोथाय॒ स्वाहा॑ ग॒न्धाय॒ स्वाहा॑ घ्राताय॒ स्वाहा॒ निवि॑ष्टाय॒ स्वाहोप॑विष्टाय॒ स्वाहा॒ सन्दि॑ताय॒ स्वाहा॒ वल्ग॑ते॒ स्वाहासी॑नाय॒ स्वाहा॒ शया॑नाय॒ स्वाहा॒ स्वप॑ते॒ स्वाहा॒ जाग्र॑ते स्वाहा॒ कूज॑ते॒ स्वाहा॒ प्रबु॑द्धाय॒ स्वाहा॑ विजृम्भ॑माणाय॒ स्वाहा॒ विचृ॑ताय॒ स्वाहा॒ सꣳहा॑नाय॒ स्वाहोप॑स्थिताय॒ स्वाहाय॑नाय॒ स्वाहा॒ प्राय॑णाय॒ स्वाहा॑ ॥ ७ ॥

अश्वस्य रूपाणि जुहोति । हिङ्काराय स्वाहेति । एकोनपञ्चाशत् । अश्वस्य चेष्टितानि क्रियाश्चात्राभिधीयन्ते ॥ ७ ॥

का० (२०, ३,) दक्षिणाग्नौ जुहोति हिङ्काराय स्वाहेति प्रक्रमान् । एतदर्थमेवोद्धृते दक्षिणाग्नौ प्रतिमन्त्रं प्रक्रमसंज्ञान् होमानेकोनपञ्चाशज्जुहोमीत्यर्थः ॥ अश्वस्यैकोनपञ्चाशच्चेष्टितानि व्यापाराः काण्डिकाद्वयेन। हिङ्करणं हिङ्कारस्तस्मै । हिङ्कृताय कृतं यद्धिङ्कृतं

तस्मै । कन्दतीति कन्दन् । अव नीचैः क्रन्दतीत्यवक्रन्दः । प्रोथतीति प्रोथन् प्रोथृ पर्य्याप्तौ । प्रकृष्टः प्रोथो घोणा यस्य घोणा तु प्रोथमस्त्रियाम् । गन्धोऽस्यास्ति गन्धः । घ्रातमाघ्राणमस्यास्ति घ्रातः । निविशते निविष्टः । उपविशतीत्युपविष्टः । सम्यक् दितं लूनं खण्डनं यस्य स संदितः । वल्गतीति वल्गन् । शास्तेऽसावासीनः । शेतेऽसौ शयानः । स्वपितिं स्वपन् । जाग्रतीति जाग्रत् । कूजतीति कूजन् । प्रकर्षेण बुध्यते प्रबुद्धः । विजृम्भते विजृम्भमाणः । चृती दीप्तौ विशेषेण चर्तति विचृतः । संहानाय सङ्गतशरीराय । उपतिष्ठते उपस्थितः । अयतेऽयनः । प्रकृष्टमयते प्रायणः तस्मै स्वाहा ॥ ७ ॥

यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्त्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥ ८ ॥

यते स्वाहा एतीति यन् तस्मै यते स्पष्टमन्यत् ॥ ८ ॥

एतीति यन् । धावतीति धावन् । उत् अधिको द्रावो गतिर्यस्य स उद्द्रावः । उत् अधिकं द्रुतं यस्य स उद्द्रुतः । शू इति करोतीति शूकारः । शूकृतमस्यास्ति शूकृतः । निषीदति निषीदन् । उत्तिष्ठते उत्थितः । जवते जवो वेगवान् । बलमस्यास्ति बलः । विवर्त्तते स विवर्त्तमानः । विवर्त्तते स्म विवृत्तः । विधूनुते कम्पते स विधून्वानः । विधूयतेऽसौ विधूतः । श्रोतुमिच्छति शुश्रूषमाणः शाशृस्पृदृशां सन इति शानन् । शृणोति शृण्वन् । ईक्षते स ईक्षमाणः । ईक्षते स्मेति ईक्षितः । विशेषेणेक्षितो वीक्षितः । निमिषति

निमेषः । यत् किञ्चित् अस्ति तस्मै । यत् जलादिकं पिबति तस्मै पानकर्त्रे । यन्मूत्रं करोति तस्मै मूत्रयते । करोति कुर्वन् । कृतमस्यास्ति कृतः । तस्मै स्वाहेति सर्वत्र । इत्येकोनपञ्चाशत् प्रक्रमाः ॥ ८ ॥

तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ ९ ॥

अथ सावित्रीणामिष्टीनाम् । तत्सवितुरित्यादिकाः पद् याज्यानुवाक्याः सावित्र्यः । आद्या व्याख्याता ॥ ९ ॥

षड्ऋचः सवितृदेवत्या गायत्र्यः सावित्रीणामिष्टीनां याज्यानुवाक्याः ॥ आद्या व्याख्याता (३, ३५) ॥ ९ ॥

हिर॑ण्यपाणिमू॒तये॑ सवि॒तार॒मुप॑ह्वये । स चेत्ता॑ दे॒वता॑ प॒दम् ॥ १० ॥

हिरण्यपाणिमूतये हिरण्मयौ पाणी यस्य स हिरण्यपाणिः तम् ऊतये अवनाय सवितारम् उपह्वये आह्वयामि । किमिति । यतः सः सविता चेत्ता सर्वार्थदृक् । महती च देवता पदं च स्थानं च ज्ञानकर्मसमुच्चयकारिणाम् ॥ १० ॥

मेधातिथिदृष्टा । अहं सवितारमुपह्वये आह्वयामि । किमर्थम् ऊतये अवनाय । कीदृशं सवितारं हिरण्यपाणिं हिरण्मयौ पाणी यस्य तम् । यतः स सविता चेत्ता चेतयिता सर्वज्ञः । देवता । पदं स्थानं ज्ञानिनाम् ॥ १० ॥

दे॒वस्य॒ चेत॑तो म॒हीं प्र स॑वि॒तुर्ह॑वामहे । सु॒म॒तिꣳ स॒त्यरा॑धसम् ॥ ११ ॥

देवस्य चेततः । देवस्य दानादिगुणयुक्तस्य चेततः विराजमानस्य महीम्महतीं महवामहे आह्वयामि सवितुः संबन्धिनीं सुमतिङ्कल्याणीं मतिम् । किंभूतां मतिं सत्यराधसम् अनश्वरधनां सत्यसाधयित्रीं वा ॥ ११ ॥

वयं सवितुः देवस्य सुमतिं शोभनां बुद्धिं प्रह्वामहे प्रकर्षेण प्रार्थयामहे। कीदृशस्य सवितुः चेततः चेततीति चेतन् तस्य जानतः। कीदृशीं सुमतिं महीं महतीं सत्यराधसं सत्यमनश्वरं राधो धनं यस्यास्ताम् यद्वा सत्यं राधयति साधयति सा सत्यराधास्ताम्॥११

सुष्टुतिँ सुमतीवृधो रातिँ सवितुरीमहे। प्र देवाय मतीविदे॥ १२॥

सुष्टुतिँ सुमतीवृधः। सुष्टुतिं शोभनां स्तुतिं सुमतीवृधः, शोभनां मतिं वर्द्धयतीति सुमतिवृत् तस्य सुमतीवृधः सम्बन्धिनीं रातिं दानं च, सवितुः ईमहे याचेम। प्रदेवाय मतीविदे देवस्य मतीविद इत्युभयोः पदयोः विभक्तिव्यत्ययः॥ १२॥

देवाय मतिविदे इति चतुर्थी षष्ठ्यर्थे। वयं सवितुर्देवस्य सुष्टुतिं शोभनां स्तुतिं रातिं दानञ्च प्र ईमहे प्रकर्षेण याचामहे छन्दसि परेऽपीति क्रियापदात् परः प्रशब्दः। कीदृशस्य सवितुः सुमतीवृधः शोभनां मतिं वर्धयति सुमतिवृत् तस्य संहितायामेतद्दीर्घः। तथा मतीविदे सर्वेषां मतिं वेत्ति मतिवित् तस्य पूर्ववद् दीर्घः॥१२॥

रातिँ सत्पतिं महे सवितारमुपह्वये। आसवं देववीतये॥ १३॥

रातिं सत्पतिम्। रा दाने। रातिनिमित्तत्वाद्रातिशब्देन सवितैवोक्तः। रातिदानरूपम् यद्वा राति ददातीति रातिम्। सत्पतिं सतां पालयितारम् महे पूजयामि। सवितारम् उपह्वये। आह्वयामि च। आसवम्। आभिमुख्ये प्रसौति कर्माणीत्यासवः तमासवं सवितारम्। किमर्थं पूजयाम्याह्वयामि च। देववीतये देवतर्पणाय॥ १३॥

अहं सवितारमुपह्वये आह्वयामि महे पूजयामि च मह पूजायाम्। किमर्थम् देववीतये देवानां तर्पणाय। कीदृशं सवितारं रातिं राति ददातीति रातिः तम् ऊतियूतीत्यादिना कर्त्तरि क्तिमत्ययान्तो

निपातः । सत्पतिं सतां पतिं पालकम् । आसवम् आभिमुख्येन सौति कर्म्मण्यनुजानाति आसवस्तम् पचाद्यजन्तः ॥ १३ ॥

देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भर्गं मनामहे ॥ १४ ॥

देवस्य सवितुः । मतिम् आसवम् प्रसवरूपाम् । विश्वदेव्यं सर्वेभ्यो देवेभ्यो हितम् । धिया स्वकीयया प्रज्ञया भर्गं भजनीयं धनं मनामहे याचामि । द्विकर्मा चायं धातुः तेन मतिशब्दे भगशब्दे च द्वितीया ॥ १४ ॥

सवितुर्देवस्य मतिं बुद्धिं प्रति वयं धिया बुद्ध्या भर्गं धनं मनामहे याचामहे सवितुर्देवस्य बुद्धिरस्मासु दानतत्परा भवत्वित्यर्थः। कीदृशं भगम् आसवम् आसौत्यनुजानाति येन आसवस्तम् धनेन सर्वेषामाशां दातुं शक्यत इत्यर्थः।, विश्वदेव्यं विश्वेभ्यो देवेभ्यो हितम् धनेनैव देवतर्पणादित्यर्थः ॥ १४ ॥

अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥ १५ ॥

अग्निं स्तोमेन । तिस्र आग्नेय्यो गायत्र्यः । हे अध्वर्यो अग्निं स्तोमेन स्तुतिभिः बोधय अवगतार्थङ्कुरु किं कुर्वन् समिधानः संदीपयन् । कथंभूतमग्निम् अमर्त्यम् अमरणधर्माणम् किमर्थं पुरस्कुर्त्येति चेत् । हव्या हवींषि देवेषु नः अस्मत्सम्बन्धीनि दधत् दधातु । स ह्रस्वाधिकार इति ॥ १५ ॥

तिस्रः स्विष्टकृति पुरोऽनुवाक्याः । अग्निर्देवत्या गायत्र्यो यथाक्रमं सुतम्भरविश्वामित्रविश्वरूपदृशः । हे अध्वर्यो ! त्वं स्तोमेन स्तुत्या अग्निं बोधय अवगतार्थं कुरु । किं कुर्वन् समिधानः समिन्द्धे स समिधानः सन्दीपयन् । कीदृशमग्निम् अमर्त्यं मरणधर्मरहितम् सोऽग्निर्बोधितः सन्नोऽस्माकं हव्या हवींषि देवेषु दधत् धारयतु अस्य सोऽधिकारोऽस्ति ॥ १५ ॥

स हव्यवाडमर्त्य उशिग् दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥ १६ ॥

स हव्यवाट् । यदोऽन्नाध्याहारः, तच्छब्दश्रवणात् । यः हव्यवाट् हविषो वोढा अमर्त्यः अमरणधर्मा उशिक् मेधावी । दूतः देवानाम् । चनोहितः । चन इत्यन्ननाम । हविर्भूतस्यान्नस्य भक्षणार्थं निहितः । सः अग्निः धिया प्रज्ञया समृण्वति संगच्छते देवैः सह हविषः तर्पणाय ॥ १६ ॥

सोऽग्निर्धिया बुद्ध्या समृण्वति सङ्गच्छते, देवैः सह हविर्दानाय । कीदृशोऽग्निः हव्यवाट् हव्यं वहतीति हविषां वोढा । अमर्त्यः मरणहीनः । उशिक् घष्टि उश्यते वा सर्वैरित्युशिक् कामनीयः मेधावी वा । दूतः देवानां दूत्यकर्त्ता । चनोहितः चन इत्यन्ननाम (निरु० ६, १६) चनसेऽन्नाय हितः हवीरूपान्नस्यादनाय स्थापितः॥१६॥

अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँ२॥ आसादयादिह ॥ १७ ॥

अग्निन्दूतम् । यम् अग्निं दूतं देवानां दूतम् अहं पुरोदधे अग्रतः स्थापयामि हव्यवाहम् हविषो वोढारं तम् उपगम्य ब्रुवे ब्रवीमि । किं ब्रवीमि तदाह । देवानासादयादिह । हे अग्ने देवान् आसादयात् आसादय इह अस्मिन्यज्ञे गृहे यागाय ॥१७॥

यमग्निमहं पुरो दधे पुरतः स्थापयामि तं प्रति उपब्रुवे कथयामि । किम् तदाह । हे अग्ने ! इह यज्ञे त्वं देवानासादयात् आसादय स्थापय कीदृशमग्निं दूतं देवानां हव्यवाहं हविषां वोढारम् ॥ १७॥

अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरन्ध्या ॥ १८ ॥

अजीजनो हि । पावमानी सौमी विहृतिः अनुष्टुप् । यस्मात् अजीजनः जनितवानसि जनयसि वा हे पवमान सोमसू-

येम्। यस्मात् शक्मना चर्मणा पयः अपः विधारे उपरिष्टात् विधारयसि। केन हेतुना गोजीरया जीवेरेतद्रूपम् गोजीविकया हेतुभूतया। कथं नु नाम गावो जीवेयुरिति। गोभिर्हि यज्ञस्तायते प्राणिनश्च जीवन्तीति॥ किं कुर्वन्। रंहमाणः पुरंध्या॥ रंहमाणः गच्छन् दशापवित्रा द्रोणकलशं प्रतिपुरन्ध्या बहुधारयित्र्या धारया तस्मात्त्वां स्तुम इति शेषः॥ १८॥

अरुणत्रसदस्युभ्यां दृष्टा पवमानदेवत्या पिपीलिकामध्या कृतिरनुष्टुप्। यस्या आद्यतृतीयौ पादौ द्वादशार्णौ द्वितीयोऽष्टार्णः सा पिपीलिकामध्या कृतिरनुष्टुप् जागतावष्टकश्च कृतिर्मध्ये चेदष्टकः पिपीलिकमध्येति वचनात्। पवमानस्तुतिः। हे पवमान! त्वं सूर्य्यमजीजनः उत्पादितवानसि जनेर्णिजन्ताल्लुङ् शक्मना शकनं शक्म शक्लृ शक्तौ मनिन्प्रत्ययः शक्मना, सामर्थ्येन पयः जलं विशेषेण धारयामि वृष्टये केन हेतुना गोजीरया जीवनं जीरा वस्य रेफः छान्दसः गवां जीरा गोजीरा, तथा गवां जीविकाहेतुना जलं धारयसि तासां हविषा यज्ञनिष्पत्तेः प्राणिनां जीवनाच्च। कीदृशस्त्वं पुरन्ध्या रंहमाणः पुरं बहु दधाति पुरन्धिर्धारा तया रंहमाणः रंहत इति रंहमाणो गच्छन् दशापवित्राद्द्रोणकलशमभिगच्छसीत्यर्थः। विधारे विधारये विधारयसि पुरुषव्यत्ययः धारयतेस्तङि लटि उत्तमैकवचने धारये इति प्राप्ते छन्दस्युभयथेति (पा० ३, ४, ११७) शितोऽप्यार्धधातुकत्वे सति णेरनिटीति णिलोपे धारे इति रूपम्॥ १८॥

विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि। ययुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि। देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षत। इह रन्तिः। इह रमताम्। इह धृतिः। इह स्वधृतिः स्वाहा॥ १९॥

अध्वर्युयजमानौ दक्षिणेऽश्वकर्णे जपतः । विभूर्मात्रा । अश्व उच्यते । यस्त्वं विभूरसि विभवसि मात्रा प्रभवसि च पित्रा । इयं वै माता ऽसौ ते पितेति श्रुतिः । अथाश्वं नामक्रियाभिस्तौति । अश्वो महाशनस्त्वमसि । हयोऽसि हि गतौ अस्य हयः । अत्योऽसि अत सातत्यगमने । मयोऽसि मय इति सुखनाम । सुखरूपोऽसि अर्वासि । ऋगतावस्यार्थो । सप्तिरसि सरणोऽसि । वाज्यसि वेजनवानसि । वृषा सेक्ता असि । नृमणा असि । नृणां मनुष्याणां यत्र मनः स नृमणाः । ययुर्नामासि ययुः एवं नामा त्वमसि । ययुर्यानशीलः । शिशुर्नामासि शिशुः एवंनामा त्वमसि । शंसनीयो भवसि । अपारमार्थिको वा नामशब्दः । यस्त्वमेवंप्रभावः तन्त्वां ब्रवीमि । आदित्यानां पत्वान्विहि । पत्वा पतनमार्गेण । येन पथा आदित्याः पतन्ति गच्छन्ति तमनुगच्छेत्यर्थः । रक्षिणोऽस्यादिशति । देवा आशापालाः । एतन्देवेभ्यः प्रोक्षितम् अश्वम् मेधाय यज्ञाय रक्षत । चतस्रो धृतीर्जुहोति । अश्व उच्यते इह रन्तिः रमणम् इह रमताम् इह धृतिः इह स्वधृतिः साधुधृतिः । इह यज्ञे हे अश्व तव क्रीडादय इत्यर्थः ॥ १९ ॥

का० (२०, २, १८) अध्वर्युयजमानौ दक्षिणेऽश्वकर्णे जपतो विभूर्मात्रेति । तृतीयायां सावित्र्यामिष्टौ समाप्तायामध्वर्युयजमानौ दक्षिणेऽश्वकर्णे जपतो विभूर्मात्रेति सूत्रार्थः ॥ अश्वदेवतं यजुः अतिजगतीच्छन्दस्कम् । मात्रा पित्रेति तृतीये पञ्चम्यर्थे हे अश्व । त्वं मात्रा मातुः पृथिव्याः सकाशात् विभूरसि विभवति विभूः समर्थोऽसि पित्रा पितुः सकाशाद्दिवः प्रभूः समर्थोऽसि इयं वै मातासौ पिता आभ्यामेवैनं परिददातीति (१३, १, ६, १) श्रुतेः । अथ नामभिरश्वं स्तौति त्वमश्वोऽसि अश्नुते व्याप्नोति मार्गमित्यश्वः अशूप्रुषीत्यादिना (उण० १, १५०) अशेः क्वन्प्रत्ययः अश्नाति वा अश्वः । हयोऽसि हयति याति हयः हय गतौ पचाद्यच् ।

अत्योऽसि अत सातत्यगमने अततीत्यत्यः सततगामी औणादिको यत्प्रत्ययः । मयोऽसि मयते गच्छति मयः मय गतौ पचाद्यच् यद्वा मय इति सुखनाम सुखरूपोऽसि । अर्वासि इयर्ति गच्छति अर्वा स्नामदिपद्यर्तिपॄशकिभ्यो वनिनिति (उण० ४, ११४) वनिन्प्रत्ययः यद्वा अर्वति हिनस्ति रिपूनित्यर्वा कनिन्प्रत्ययः। सप्तिरसि सपति सैन्येन समवैति सप्तिः सप सम्बन्धे क्तिन्प्रत्ययः। वाजी असि वाजति तच्छीलो वाजी वज गतौ अनेकगतिसूचना पुनःपुनर्गत्युक्तिः यद्वा वाजाः पक्षा अभूवन्नस्येति वाजी। वृषासि वर्षति सिञ्चति वृषा कनिन्युवृषीत्यादिना (उण० १, १५५) कनिन्प्रत्ययः । नृमणा असि नृषु यजमानेषु मनो यस्य स नृमणाः। नाम नाम्ना ययुरसि अत्यर्थं याति ययुः ययुरश्वोऽश्वमेधीय इत्यभिधानात् (अमर० २, ८, ४५) यो द्वे चेति (उण० १, २१) उप्रत्ययः किञ्च नाम्ना शिशुरसि श्यति कृशं करोति स्तनमिति शिशुः शः कित्सन्वच्चेति (उण० १, २०) उप्रत्ययः सन्वद्भावाद् द्वित्वमभ्यासस्येकारश्च । एवंविधनामा त्वमादित्यानामदितेरपत्यानां देवानां पत्वा मार्गमन्विहि पतन्ति गच्छन्ति यत्र स पत्वा मार्गः स्नामदीत्यादिना (उण० ४, ११४) वनिन्प्रत्ययः आदित्या येन पथा गच्छन्ति तमनुगच्छ ॥ का० (२०, २, २०) देवा आशापाला इति रक्षिणोऽस्यादिशत्यनुचरीजातीयाँस्तावतस्तावतः कवचिनिषङ्गिकलापिदण्डिनो यथासङ्ख्यम् । चतुर्विंशतिवार्षिकाद्यशतमध्यस्थस्यैशान्यामुत्सृष्टस्य रक्षकान्प्रदानादिशति कीदृशान् अनुचरीसजातीयान् तावतोऽनुचरीसङ्ख्यान् तेन शतं राजपुत्रान् शतं क्षत्रियपुत्रान् शतं सूतग्रामण्यां पुत्रान् सूता अश्वपोषकास्तेषां मध्ये ग्रामण्यो मुख्यास्तत्सुतानित्यर्थः शतं क्षात्त्रसंग्रहीतॄणां पुत्रान् क्षत्तार आयव्ययाध्यक्षास्तत्समूहः क्षात्त्रं तत्राधिकृताः क्षात्त्रसंग्रहीतारस्तत्सुतान् क्रमात्कवचिनिषङ्गिकलापिदण्डिनः तेन राजपुत्राः संनाह्यन्तः क्षत्रियपुत्रा निषङ्गिणः सखड्गाः सूतग्रामणीपुत्रा इषुधिमन्तः क्षात्त्रसंग्रहीतृपुत्राः धंशादिदण्डधरा इत्यर्थः। वडवाभ्यो जलस्नानाद्यारपरणम् पर्वमश्वरक्षणम्–तावद्यजमानो धावातोर्वोः शेते सावित्रीः कारयति वीणागानम् पारिप्लवशास्त्रपाठम् धृतिहोमं चेत्यादि ज्ञेयमिति सूत्रार्थः॥ देवदेवत्यं यजुः ऋगुष्णिक्। आशा दिशः पालय-

स्तीति आशापाला हे देवाः । यूयमेतमश्वं रक्षत । कीदृशं मेधाय यागाय प्रोक्षितं प्रोक्षणेन संस्कृतम् राजपुत्रादय एवाशापालाः तदुक्तम् शतं वै तल्प्या राजपुत्रा आशापालास्तेभ्य एवैनं परिददातीति (१३, १, ९, २) ॥ का० (२०, ३, ४) आहवनीयेऽस्तमिते चतस्रो धृतीरिह रन्तिरिति । अस्तमितेऽकेऽग्निहोत्रहोमात् प्रागग्निहोत्रार्थमुद्धृते आहवनीयेऽग्नौ चतस्रो धृतिसंज्ञा आहुतीः प्रतिमन्त्रं जुहोति वर्षपर्यन्तं प्रत्यहम् एवं चत्वारिंशदधिका चतुर्दशशती भवति । तथा च श्रुतिः (१३, १, ६, २) संवत्सरमाहुतीर्जुहोति षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नातीति ॥ चत्वारि यजूंषि अग्निदेवत्यानि । चतुर्थमन्त्रान्ते स्वाहाकारश्रवणात् त्रिष्वपि स्वाहाकारः प्रयोज्यः । अश्वं प्रत्युच्यते हे अश्व ! इह रन्तिः रमणं तेऽस्तु । इह भवान् रमताम् । इह ते धृतिः सन्तोषोऽस्तु । इह यत्रे स्वधृतिः स्वा निजा धृतिर्धरणमस्तु स्वाहा ॥ १९ ॥

काय॒ स्वाहा॒ कस्मै॒ स्वाहा॑ क॒त॒मस्मै॒ स्वाहा॒ स्वाहा॒धिमाधीताय॒ स्वाहा॒ मनः॑ प्र॒जाप॑तये॒ स्वाहा॑ चि॒त्तं वि॒ज्ञा॑ता॒यादि॑त्यै॒ स्वाहादि॑त्यै म॒ह्यै॒ स्वाहादि॑त्यै सुमृ॒डी॒का॒यै॒ स्वाहा॒ सर॑स्वत्यै॒ स्वाहा॒ सर॑स्वत्यै॒ पाव॒का॒यै॒ स्वाहा॒ सर॑स्वत्यै॒ बृ॒ह॒त्यै॒ स्वाहा॑ पू॒ष्णे स्वाहा॑ पू॒ष्णे प्र॑प॒थ्या॒य॒ स्वाहा॒ पू॒ष्णे न॒रन्धि॑षाय॒ स्वाहा॒ त्वष्ट्रे॒ स्वाहा॒ त्वष्ट्रे॑ तु॒रीपा॑य॒ स्वाहा॒ त्वष्ट्रे॑ पु॒रु॒रूपा॑य॒ स्वाहा॒ विष्ण॑वे॒ स्वाहा॒ विष्ण॑वे निभू॒य॒पाय॒ स्वाहा॒ विष्ण॑वे शिपिवि॒ष्टाय॒ स्वाहा॑ ॥ २० ॥

औद्ग्रभणानि जुहोति । काय स्वाहा । कस्मै स्वाहा । कतमस्मै स्वाहा । स्वाहाधिमाधीताय । पूर्वं स्वाहाकारान्तास्तिस्र आहुतयः प्राजापत्याः। आधिमाध्यानम् चतुर्थी चात्र कर्तव्या। आधये स्वाहेति। आधीताय स्वाहा। मनः मनसे इति विभक्ति-

व्यत्ययः । प्राजापत्याय स्वाहा । चित्तं विज्ञाताय । चित्तायेति विभक्तिव्यत्ययः। अदित्यै मह्यै । मह पूजायाम् ।पूजितायै । अदित्यै सुमृडीकायै मृड सुखने । सुखयित्र्यै ॥ सरस्वत्यै स्वाहा । सरस्वत्यै पावकायै पावयित्र्यै । सरस्वत्यै बृहत्यै महत्यै । पूष्णे स्वाहा । पूष्णे प्रपथ्याय । प्रगतः पन्थाः प्रपथः तत्र भवः प्रपथ्यः । पूष्णे नरन्धिषाय । नरान् दधाति धारयतीति नरन्धिषः त्वष्ट्रे स्वाहा । त्वष्ट्रे तुरीपाय । तूर्णं पाति रक्षतीति तुरीपः । त्वष्ट्रे पुरुरूपाय बहुरूपाय । विष्णवे स्वाहा । विष्णवे निभूयपाय । नीचैर्भूत्वा यः पाति स निभूयपः ।विष्णवे शिपिविष्टाय । शिपिं पशुं यज्ञस्य वेष्टयति साधुं करोतीति शिपिविष्टः ॥ २० ॥

का० (२०, ४, ३, ५) काय स्वाहेति चाश्वमेधिकानि त्रीणि कृष्णाजिनदीक्षातोऽध्वरदीक्षणीयायाश्चत्वारि त्रीणि त्रीणि चाश्वमेधिकानि । चत्वार्य्याध्वरिकाण्यौदुग्रभणानि हुत्वा काय स्वाहेत्याश्वमेधिकानि त्रीण्यौदुग्रभणानि जुहुयात् अत औदुग्रभणहोमानन्तरं दीक्षणीयाशेषं समाप्य कृष्णाजिनदीक्षा तत्रोपवेशनान्ता कर्त्तव्या । सप्ताहं प्रचरन्तीति (१३, १, ७, २) श्रुतेः । सप्ताहं दीक्षणीया कार्य्या तत्र प्रत्यहं कर्त्तव्यमाह अध्वरदीक्षणीयायाश्चत्वारि चत्वार्य्यौदुग्रभणानि आकूत्यै प्रयुजे इत्यादीनि (४, ७) त्रीणि त्रीणि चाश्वमेधिकानि काय स्वाहेति कण्डिकापठितानि प्रत्यहमन्यान्यन्यानि पाठक्रमेण एवं सप्त सप्त प्रत्यहं हूयन्ते । काय स्वाहेति कण्डिकायां सप्त त्रिकाणि पठितानि तन्मध्ये सप्तस्वहःसु क्रमेणैकैकं त्रिकं हूयते तत्र द्वितीयत्रिके स्वाहाकारान्तं मन्त्रत्रयं स्वाहाधिमाधीतायेत्यादिति सूत्रार्थः ॥ औदुग्रभणसंज्ञानि यजूंषि लिङ्गोक्तदेवतानि । काय प्रजापतये सुहुतमस्तु कस्मै प्रजापतये कत मस्मै प्रजापतिश्रेष्ठाय । आधिमाधानमाधीताय प्राप्ताय मनः मन सि वर्त्तमानाय प्रजापतये चित्तं विज्ञाताय सर्वेषां चित्तसाक्षिणे । अदित्यै अखण्डितायै मह्यै पूज्यायै अदित्यै सुमृडीकायै सुखयित्र्यै अदित्यै सरस्वत्यै वागधिष्ठात्र्यै पावयति पावका तस्यै

शोधायित्र्यै सरस्वत्यै बृहत्यै महत्यै सरस्वत्यै । पूष्णे प्रपथ्याय प्रगतः पन्थाः प्रपन्थाः तत्र भवः प्रपथ्यः तस्मै पूष्णे नरन्धिषाय धिष् शब्दे हादिर्वैदिकः नरं धिषेष्टि शब्दयति उद्येन स नरन्धिषः तस्मै पूष्णे इगुपधेति कः । त्वष्ट्रे त्वक्षति तनूकरोति त्वष्टा तस्मै तुरीपाय तुर वेगे तस्य रूपं तुरी वेगस्तं पाति रक्षति तुरीपस्तस्मै त्वष्ट्रे पुरुरूपाय पुरूणि बहूनि रूपाणि यस्य तस्मै त्वष्ट्रे । वेवेष्टि व्याप्नोति विष्णुस्तस्मै निभूयपाय नितरां भूत्वा मत्स्याद्यवतारं कृत्वा पाति निभूयपस्तस्मै विष्णवे शिपिषु पशुषु प्राणिषु विष्टः प्रविष्टोऽन्तर्यामिरूपेण शिपिविष्टस्तस्मै विष्णवे । एते श्रीदुग्रहणमन्त्राः ॥ २० ॥

विश्वो॑ दे॒वस्य॑ ने॒तुर्मर्तो॑ वुरीत स॒ख्यम् । विश्वो॑ रा॒य इ॑षुध्यति द्यु॒म्नं वृ॑णीत पु॒ष्यसे॒ स्वाहा॑ ॥ २१ ॥

विश्वो देवस्येति व्याख्यातम् ॥ २१ ॥

का० (२०, ४, ९, १०) षडाग्निकानि चतुःस्थाने दशमं विश्वो देवस्येति । सप्तम्यां दक्षिणीयायामयं विशेषः प्रत्ययानि चत्वार्यवभ्रमणान्याध्वरिकाणि हूयन्ते तेषां चतुर्णां स्थाने षडाग्निकानि आकूतिं प्रयुजमग्निं स्वाहेति (११, ६६) हुत्वाश्वमेधिकानि च त्रीणि विष्णवे स्वाहेत्यादीनि हुत्वा विश्वो देवस्येति दशममौदुम्भणं जुहोतीति सूत्रार्थः । व्याख्याता (४, ८) ॥ २१ ॥

आ ब्रह्म॑न् ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒मा रा॒ष्ट्रे रा॑ज॒न्यः शूर॑ इष॒व्यो॑ऽतिव्या॒धी म॑हार॒थो जा॑यतां दो॒ग्ध्री धे॒नुर्वोढा॑न॒ड्वाना॒शुः सप्तिः॒ पुर॑न्धि॒र्योषा॑ जि॒ष्णू र॑थे॒ष्ठाः स॒भेयो॒ युवा॒स्य यज॑मानस्य वी॒रो जा॑यतां निका॒मे-नि॑कामे नः प॒र्जन्यो॑ वर्षतु॒ फल॑वत्यो न॒ ओष॑धयः पच्यन्तां योगक्षे॒मो नः॑ कल्पताम् ॥ २२ ॥

जयति । आ ब्रह्मन् । आजायतां हे ब्रह्मन् ब्राह्मणः ब्रह्म-

वर्चसी । यज्ञाध्ययनशीलो ब्राह्मण आजायतामित्यर्थः । राष्ट्रे । आजायताञ्च राष्ट्रे राजन्यः शूरः इषव्यः इषुभिः विध्यति इषव्यः इषुषु वा साधुः इषव्यः । अतिव्याधी महारथः । अतिविध्यति द्विषन्तमित्यतिव्याधी। महारथश्च दोग्ध्री धेनुः। राष्ट्रे आजायतामिति सर्वत्र सम्बन्धः । वोढा अनड्वान् आशुः शीघ्रः सप्तिरश्वः । पुरन्धिर्योषा । पुरं शरीरं रूपादिगुणसमन्वितं धारयतीति पुरन्धिः ॥ जिष्णू रथेष्ठाः । जयनशीलः रथे तिष्ठतीति रथेष्ठा युयुत्सुः । सभेयो युवा । सभामर्हति विद्यागुणचरित्रैः सभेयः युवा आ अस्य यजमानस्य आजायताञ्चास्य यजमानस्य धीरः पुत्रः । किञ्च निकामे निकामे नः पर्जन्यो वर्षतु । प्रार्थनायामवश्यम्भवतीति निकामः अभ्यासो वीप्सार्थः । अस्माकं राष्ट्र इत्यर्थः । फलवत्यः अतिशयेन फलयुक्ताः नोऽस्माकं राष्ट्रे ओषधयः पच्यन्ताम् । योगक्षेमो नः कल्पताम् । योगो द्रव्यादीनां संयोगः क्षेमस्तेषामेव परिपालनम् । योगश्च क्षेमश्चास्माकं क्लृप्तो भवतु । योगश्च क्षेमश्चेति द्वन्द्वः तत्र नपुंसकलिङ्गता वा स्यात् द्विर्वचनं वा इति । तत्र छान्दसो विसर्जनीयो द्रष्टव्यः ॥ २२ ॥

का० (२०, ४, ११) कृष्णाजिनाद्या समिदाधानात् कृत्वा ब्रह्मन्निति जपत्युत्सर्गकाल एके । कृष्णाजिनदीक्षात आरभ्योखायां त्रयोदशसमिदाधानान्तं कृत्वाध्वर्युरेवा ब्रह्मन्निति जपति उत्सर्गैरुपतिष्ठत इत्युत्सर्गोपस्थानकाले एके आ ब्रह्मन्निति जपमिच्छन्ति यद्वाश्वस्योत्सर्गकाले विभूर्मात्रेति जपानन्तरमित्यर्थः । लिङ्गोक्तदेवता उत्कृतिः। हे ब्रह्मन् ! राष्ट्रेऽस्मद्देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः आजायतामुत्पद्यताम् । राजन्यः क्षत्रियश्चेदृश आजायताम् । कीदृशः शूरः पराक्रमी । शूर विक्रान्तौ शूरयति शूरः। इषव्यः इषुभिर्विध्यतीति इषव्यः यद्वा इषौ कुशलः इषव्यः । अतिव्याधी अत्यन्तं विध्यतीत्यतिव्याधी शत्रुभेदनशीलः । महारथः

एकः सहस्रं जयति स महारथः । दोग्ध्री दुग्धपूरयित्री धेनुः आजायतां राष्ट्रे इति सर्वत्र सम्बन्धः । अनड्वान् वृषभो वोढा वहनशीलो जायताम् । सप्तिरश्व आशुः शीघ्रगामी जायताम् । योषा स्त्री पुरन्धिः पुरं शरीरं सर्वगुणसम्पन्नं दधाति पुरन्धिः । रथे तिष्ठति रथेष्ठा क्विप् सप्तम्या अलुक् रथे स्थितो युयुत्सुर्नरो जिष्णुः जयनशीलो जायताम् । युवा आ अस्येति पदच्छेदः अस्य यजमानस्य युवा समर्थः सभेयो सभायां योग्यो वीरः पुत्रो जायताम् सभायां साधुः सभेयः ढश्छन्दसीति सभाशब्दात्तत्र साधुरित्यर्थे ढप्रत्ययः । तस्य ण्यादेशः । किञ्च नोऽस्माकं राष्ट्रे पर्जन्यो निकामे निकामे नितरां कामनायां सत्यां वर्षतु अभ्यासो वीप्सार्थः । नोऽस्माकमोषधयः यवाद्याः फलवत्यः फलयुक्ताः पच्यन्तां स्वयमेव पक्का भवन्तु । नोऽस्माकं योगक्षेमः कल्पतां योगेन युक्तः क्षेमो योगक्षेमः स फलप्रो भवतु अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः ॥ २२ ॥

प्राणाय स्वाहा॑ऽपानाय स्वाहा॑ व्यानाय स्वाहा॒ चक्षु॑षे स्वाहा॒ श्रोत्रा॑य स्वाहा॑ वा॒चे स्वाहा॒ मन॑से स्वाहा॑ ॥ २३ ॥

आज्यसक्तुधानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रति मन्त्रं सर्वरात्रमावर्तम् ॥ २३ ॥

का० (२०, ४, ३१) आज्यसक्तुधानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रतिमन्त्रꣳ सर्वरात्रमावर्त्तम् । आज्यादीनां प्रतिप्रहरमेकैकं क्रमेण सर्वरात्रमुत्तरवेदिस्थाग्नौ जुहोति प्राणाय स्वाहेत्यादिद्वादशकण्डिकात्मकैरनुवाकैः । किं कृत्वा आवर्त्तम् प्राणाय स्वाहेत्यादिकमेकशताय स्वाहेत्यन्तं मन्त्रगणमावर्त्यावर्त्य सर्वरात्रमिति द्वितीयाग्रहणाद्धोमक्रियाया रात्रेः कार्त्स्न्येन संयोगः कार्य्यः ततः प्रथमयामे घृतेन यागः द्वितीये सक्तुभिः तृतीये धानाभिः चतुर्थे लाजैः । एकस्मै इति द्वादशेऽनुवाके (३४) एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेत्यत्र त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहा अष्टभ्यः स्वाहा नवभ्यः स्वा-

इत्येवमादयो मन्त्रा अपठिता अपि एकैकोपचयेन शतपर्यन्ताः प्रयोज्याः । एकोत्तरा जुहोतीति (१३, २, १, ५) श्रुतेः । व्युष्टायां समाप्तायां रात्रौ व्युष्ट्यै स्वाहेति घृताहुतिमेकामुदिते सूर्ये स्वर्गाय स्वाहेति च जुहोतीति सूत्रार्थः ॥ लिङ्गोक्तदेवतानि यजूंषि । प्राणादय इन्द्रियदेवाः ॥ २३ ॥

प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २४ ॥

प्राच्यै । दिग्देवताः ॥ २४ ॥

प्राच्यै । दिग्देवताः ॥ २४ ॥

अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥ २५ ॥

अद्भ्यः । जलदेवताः ॥ २५ ॥

अद्भ्यः : जलदेताः ॥ २५ ॥

वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहावर्षते स्वाहा स्वाहोग्रं वर्षते शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनी-

भ्यः स्वाहा नीहाराय स्वाहा ॥ २६ ॥

वाताय । मेघोपयोगिदेवताः ॥ २६ ॥

वाताय । मेघोपयोगिदेवताः ॥ २६ ॥

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः स्वाहाशाभ्यः स्वाहोर्व्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा॥२७

अग्नये । अग्न्यादयः प्रसिद्धाः ॥ २७ ॥

अग्नये । अग्न्यादयः प्रसिद्धाः ॥ २७ ॥

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाहा ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याᳬ स्वाहा चन्द्राय स्वाहा सूर्य्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥२८॥

नक्षत्रेभ्यः । नक्षत्रादयः कालाधिष्ठात्र्यः ॥ २८ ॥

नक्षत्रेभ्यः । नक्षत्रादयः कालाधिष्ठात्र्यः ॥ २८ ॥

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः

स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा॥२९॥

पृथिव्यै । पृथिव्यादयो लोकाधिष्ठात्र्यः ॥ २९ ॥

पृथिव्यै । पृथिव्यादयो लोकाधिष्ठात्र्यः ॥ २९ ॥

असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥ ३० ॥

असवे । अस्वादयश्च ॥ ३० ॥

असवे । अस्वादयश्च ॥ ३० ॥

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाꣳहसस्पतये स्वाहा ॥ ३१ ॥

मधवे । मध्वादयो मासाधिष्ठातारः ॥ ३१ ॥

मधवे । मध्वादयो मासाधिष्ठातारः ॥ ३१ ॥

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहान्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य प-

तये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥ ३२ ॥

वाजाय । वाजादयोऽन्नाधीशाः ॥ ३२ ॥

वाजाय । वाजादयोऽन्नाधीशाः ॥ ३२ ॥

आयुर्यज्ञेन कल्पताᳬ स्वाहा प्राणो यज्ञेन कल्पताᳬ स्वाहापानो यज्ञेन कल्पताᳬ स्वाहा व्यानो यज्ञेन कल्पताᳬ स्वाहोदानो यज्ञेन कल्पताᳬ स्वाहा समानो यज्ञेन कल्पताᳬ स्वाहा चक्षुर्यज्ञेन कल्पताᳬ स्वाहा श्रोत्रं यज्ञेन कल्पताᳬ स्वाहा वाग्यज्ञेन कल्पताᳬ स्वाहा मनो यज्ञेन कल्पताᳬ स्वाहात्मा यज्ञेन कल्पताᳬ स्वाहा ब्रह्मा यज्ञेन कल्पताᳬ स्वाहा ज्योतिर्यज्ञेन कल्पताᳬ स्वाहा स्वर्यज्ञेन कल्पताᳬ स्वाहा पृष्ठं यज्ञेन कल्पताᳬ स्वाहा यज्ञो यज्ञेन कल्पताᳬ स्वाहा ॥ ३३ ॥

आयुः यज्ञेनाश्वमेधेनायुः कल्पताम् । एवमग्रेऽपि प्रार्थनामन्त्राः ॥ ३३ ॥

आयुः । यज्ञेनाश्वमेधेनायुः कल्पताम् । एवमग्रेऽपि प्रार्थनामन्त्राः ॥ ३७ ॥

एकस्मै स्वाहा द्वाभ्याᳬ स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा ॥ ३४ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां
द्वाविंशोऽध्यायः ॥ २२ ॥

व्युष्टया इति व्युष्टयम् स्वर्गायेत्युदिति । प्राणाय स्वाहेत्यारभ्य द्वादशभिः कण्डिकासंमितै रनुवाकैर्देवता उक्ताः आज्यादिहविर्भिः। एते सर्वे एव यागाः महतो यज्ञस्य लोककालाग्न्यादिवपुषो ऽवयविनोऽवयवभूताः । यथा देवदत्तस्यावयविनोऽवयवभूताः। शिरः पाण्यादयः। सोऽयमश्वमेधः प्रजापतेरवयविनोऽवयवभूतः प्रजापतेश्चात्मनः। सोऽयमात्मा। शाखाप्रशाखागतः स्तूयते हूयते च ज्ञानकर्मसमुच्चयकारिभिर्यजमानैः। एकस्मै स्वाहा द्वाभ्याᳲ स्वाहेति मकारदर्शनम् त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहेति एकशतात् ॥ ३४ ॥

इति उव्वटकृतौ मन्त्रभाष्ये द्वाविंशोऽध्यायः ॥ २२ ॥

एकस्मै। संख्याधीशाः। व्युष्टी रात्रिः स्वर्गो दिनम् । रात्रिर्वै व्युष्टिरहः स्वर्गोऽहोरात्रे एव तत् प्रीणातीति श्रुतेः (१३, २, १, ६)॥ प्राणादयोऽश्वमेधस्यावयविनोऽवयवाः स च प्रजापतेरवयः स आत्मन इत्यात्मैव स्तूयते इज्यते इति भावः। सर्वमिदं यदयमात्मेति श्रुतेः॥ ३४॥

श्रीमन्महीधरकृते वेददीपे मनोहरे।
अश्वमेधाहुतिर्नाम द्वाविंशोऽध्याय ईरितः॥ २२॥

त्रयोविंशोऽध्यायः ।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकं आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥

हिरण्यगर्भः सम् । महिम्नः (२) पुरोरुक् । व्याख्यातम् ॥ १ ॥

द्वाविंशे होममन्त्रास्त्रयोविंशेऽध्याये शिष्टं कर्मोच्यते ॥ का० (२०, ५, १--२) प्रातरुक्थ्यो महिमानौ गृह्णाति सौवर्णेन पूर्वं हिरण्यगर्भ इति । प्रातर्द्वितीयेऽहनि उक्थ्यसंस्थमहर्भवति तत्र महिमसंज्ञौ द्वौ ग्रहौ गृह्णाति आगन्तुत्वादाग्रयणोक्थ्ययोर्मध्ये तौ गृह्णाति अन्तराग्रयणोक्थ्यावागन्तुस्थानं ग्रहाणामिति वचनात् द्वयोर्मध्ये पूर्वं महिमानं सौवर्णेनोलूखलेन गृह्णाति । व्याख्याता (१३,४,) ॥१॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि । एष ते योनिः सूर्यस्ते महिमा । यस्तेऽहन् संवत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सूर्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥ २ ॥

उपयामगृहीतोऽसि । प्रजापतये त्वा जुष्टमभिरुचितं गृह्णामि । सादयति । एष ते तव योनिः स्थानं सूर्यस्तव महिमा महाभाग्यं शक्तिः दीपस्येव प्रभा । जुहोति । यस्तेऽहन् । यस्तव अहनि संवत्सरे च महिमा सम्बभूव सम्भूत उत्पन्नः । अहनि निमित्तभूते सर्वाण्येव भूतानि सम्पद्यन्ते । निमित्तसप्तम्यर्थैताः । चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरमिति यथा । यः ते वायौ अन्तरिक्षे च महिमा सम्बभूव । यस्ते दिवि च सूर्ये म-

हिमा सम्बभूव । तस्मै ते तव महिम्ने प्रजापतये च स्वाहा देवेभ्यश्च ॥ २ ॥

उपयाम० प्रजापतये जुष्टं रचितं त्वां हे ग्रहाहं गृह्णामि ॥ का० (९, ५, २५) एष ते योनिरिति ग्रहसादनम् । एष ते योनिः स्थानं ते तव महिमा शक्तिः सूर्यः दीपस्येव प्रभा ॥ का० (२०, ७, १६) यस्तेऽहन्निति जुहोति । पूर्वमहिमानं ग्रहं जुहोति वषट्कृते सर्वहुतम् ॥ देवदेवत्यं यजुः द्व्यधिका शक्करी । हे महिमन् । यः ते तव महिमा अहन् अह्नि दिवसे संवत्सरे च निमित्ते सम्बभूव उत्पन्नः वायौ अन्तरिक्षे च यः तव महिमा सम्बभूव दिवि सूर्ये च यस्ते महिमा सम्बभूव ते तव तस्मै महिम्ने प्रजापतये देवेभ्यश्च स्वाहा सुहुतमस्तु ॥ २ ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३ ॥

द्वितीयं गृह्णाति तस्य पुरोरुक्यः प्राणतः कायी प्राजापत्या यः कः प्रजापतिः प्राणतः प्राणनं कुर्वतः भूतग्रामस्य निमिषतः निमेषण कुर्वतः क्रियावत इत्यर्थान्तरम् महित्वास्वकीयेन महाभाग्येन । एक इत् । इच्छब्द एवार्थे । एक एव समस्तस्य जगतो राजा बभूव संवृत्तः । यश्च ईशे ईष्टे अस्य द्विपदः प्राणिजातस्य यश्च चतुष्पदः ईष्टे प्राणिजातस्य । तस्मै कस्मै देवाय प्रजापतये हविषा विधेम । विदधातिर्दानकर्मा हविरिति विभक्तिव्यत्ययो द्वितीयान्तः । हविर्दद्मः ॥ ३ ॥

का० (२०, ५, २) द्वितीयं राजतेन यः प्राणत इति । द्वितीयं महिमानं ग्रहं राजतेनोलूखलेन गृह्णाति ॥ हिरण्यगर्भदृष्टा कदेवत्या त्रिष्टुप् । तस्मै कस्मै प्रजापतये देवाय वयं हविर्विधेम हविर्दद्मः विदधातिर्दानार्थः तृतीया द्वितीयार्थे । तस्मै कस्मै यः प्रजापतिः प्राणतः प्राणनं जीवनं कुर्वतो निमिषतो निमेषणं कुर्वतः उपलक्षणमे-

तत् दृगादीन्द्रियव्यापारं कुर्वतः सचेतनस्य जगतः विश्वस्य एक एव राजा बभूव केन महित्वा महेर्महिम्नो भावो महित्वं तेन महित्वेन विभक्तेः पूर्वसवर्णः महाभाग्येनेत्यर्थः । यश्चास्य द्विपदः द्वौ पादौ यस्य स द्विपात् तस्य पादः पदिति पदादेशः द्विपादस्य मनुष्यपक्ष्यादेः चतुष्पदः हस्तिगवादेः प्राणिजातस्य ईशे ईष्टे ऐश्वर्य्यं करोति लोपस्त आत्मनेपदेष्विति तकारलोपे ईशे इति रूपम् अधीगर्थदयेशां कर्मणाति कर्मणि षष्ठी ॥ ३ ॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि । एष ते योनिश्चन्द्रमास्ते महिमा । यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥ ४ ॥

उपयामगृहीतोऽसि प्रजापये त्वां जुष्टं गृह्णामि । सादयति । एष ते योनिः चन्द्रमास्ते महिमा । जुहोति यस्ते रात्रौ संवत्सरे पृथिव्यामग्नौ च नक्षत्रेषु चन्द्रमसि च महिमा संबभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥ ४ ॥

उपयामपात्रेण गृहीतोऽसि प्रजापतये जुष्टं त्वां गृह्णामि ॥ सादयति । एष ते । चन्द्रमास्ते तव महिमा दीप्तिः ॥ का० (२०, ७, २६) वपान्ते द्वितीयेन पूर्ववद् यस्ते रात्राविति जुहोति । वपायागान्ते द्वितीयेन महिम्ना पूर्ववदिति सर्वहुतं महिमानं जुहोति ॥ अर्थः हे महिमन् ! रात्रौ संवत्सरे च यस्ते तव महिमा सम्बभूव पृथिव्यामग्नौ च यस्ते महिमा सम्बभूव नक्षत्रेषु चन्द्रमसि च यस्तव महिमा सम्बभूव सर्वव्यापकस्तव यो महिमा तस्मै महिम्ने प्रजापतये देवेभ्यश्च स्वाहा सुहुतमस्तु ॥ ४ ॥

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ ५ ॥

अश्वं युनक्ति । युञ्जन्ति ब्रध्नम् । अश्वोऽत्रादित्यवत्स्तूयते उत्तरोऽर्द्धर्चः प्रथमं व्याख्यायते । यस्य भासा । रोचन्ते देदीप्यन्ते रोचनाः रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि । दिवि द्युलोके । तं युञ्जन्ति रथे बध्नन्ति । कथंभूतम् ब्रध्नम् परिवृढम् आदित्यम् अरुषमरोषणम् । चरन्तं गच्छन्तं वैदिककर्मसिध्यर्थम् । के युञ्जन्ति परितस्थुषः सर्वतस्थिता ऋग्यजमानाः॥५॥

का० (२०, ५, ११) युनक्त्येनं युञ्जन्ति ब्रध्नमिति । अश्वं रथे युनक्ति ॥ मधुच्छन्दोदृष्टा आदित्यदेवत्या गायत्री । तस्थुषः विभक्तेर्व्यत्ययः तस्थिवांसः कर्मार्थे-स्थिता ऋत्विजः ब्रध्नमादित्यं युञ्जन्ति रथे योजयन्ति । अश्व आदित्यत्वेन स्तूयते असौ वा आदित्यो ब्रध्नोऽरुषोऽमुमेवास्मा आदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै इति श्रुतेः (१३, २, ६, १) । किम्भूतं ब्रध्नम् अरुषं रोषति क्रुध्यति रुषः इगुपधेति कः न रुषः अरुषः तं क्रोधरहितम् परिचरन्तं वैदिककर्मसिद्ध्यर्थं सर्वत्र गच्छन्तम् । यस्य ब्रध्नस्य रोचना विभक्तिलोपः दीप्तयो दिवि आकाशे रोचन्ते प्रकाशन्ते यद्वा रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि ब्रध्नस्य भासा रोचन्ते तेजसां गोलकः सूर्यो नक्षत्राण्यम्बुगोलका इति ज्योतिःशास्त्रोक्तेः ॥ ५ ॥

यु॒ञ्जन्त्य॑स्य॒ काम्या॒ हरी॒ विप॑क्षसा॒ रथे॑ । शोणा॑ धृ॒ष्णू नृ॒वाह॑सा ॥ ६ ॥

इतराश्वं युनक्ति । युञ्जन्त्यस्य । गायत्री । युञ्जन्ति रथे-अस्याश्वमेधिकस्याश्वस्य काम्याकाम्यौ कामसम्पादिनौ नह्येको रथं वोढुं शक्तः । हरी हरितवर्णावश्वौ हरिणौ वा वेगवन्तौ । विपक्षसा । विविधाः पक्षसः पक्षाः ययोस्तौ विपक्षसौ । विविधपक्षावस्थितौ । यद्वा विरिति शकुनिनाम । वेतेर्गतिकर्मणः । वेः शकुनेरिव पक्षौ ययोस्तौ शोणा । शोणौ शोणशब्दोऽत्रवर्णवचनः । रक्तो वर्णो धूम्रभासः शोण इत्युच्यते । धृष्णू प्रसहनौ नृवाहसा । नृणाम्मनुष्याणां वोढारौ ॥ ६ ॥

का० (२०, ५, ११) इतराँश्च युञ्जन्त्यश्वेति । इतरान् त्रीनश्वान् रथे युनक्ति । गायत्री अश्वस्तुतिः । ऋत्विजो हरी अश्वौ रथे युञ्जन्ति । कीदृशौ अश्वादश्वमेधिकादश्वस्य काम्या काम्यौ काम्येते तौ काम्यौ कामसम्पादिनौ न ह्येको रथं वोढुं शक्त इति तौ काम्यौ विपक्षसापक्षपरिग्रहे असुन्प्रत्ययः पक्षयन्ति शरीरं गृह्णन्ति पक्षसः पक्षाः विविधाः पक्षसः पक्षाः ययोस्तौ विपक्षसौ यद्वा विरिति शकुनिनाम वेतेर्गतिकर्मण इति यास्कः (निरु० २,६) वेः पक्षिण इव पक्षसौ ययोस्तौ । शोणा शोणौ रक्तौ धृष्णू प्रगल्भौ ञि धृषा प्रागल्भ्ये कुप्रत्ययः । नृवाहसा नॄन् वहतस्तौ वहेरसुन्प्रत्ययः सर्वत्र विभक्तेराकारः नृणां वोढारौ ॥ ६ ॥

यद्वातो अपो अगनीगन् प्रियामिन्द्रस्य तन्वम् ।
एतꣲस्तोतरनेन पथा पुनरश्वमावर्तयासि नः ॥ ७ ॥

अपो यात्वावगाढेषु वाचयति । यद्वातः । बृहती अश्वदेवत्या । यत् यस्मात् वातः । वातवेगोऽश्वः अपः प्रति अगनीगन् अत्यर्थं गतः । प्रियाश्च इन्द्रस्य तन्वं शरीरम् अगनीगन् अतो ब्रवीमि । एतमश्वम् हे स्तोतः अध्वर्यो अनेन पथा येन गतः । पुनः अश्वम् आवर्तयासि आवर्तय आनय नोऽस्माकम् ॥ ७ ॥

का० (२०, ५, १, १४) अपो यात्वावगाढेषु वाचयति यद्वात इति । चतुर्भिरश्वैर्युक्तं रथमध्वर्युयजमानावारुह्य तडागादिजलं गत्वा जलं प्रविष्टेष्वश्वेषु यजमानं वाचयति । बृहती अश्वस्तुतिः । सिंहो माणवक इति यत् वातः वातसमानवेगोऽश्वः यत् यस्मात् अपो जलानि अगनीगन् इन्द्रस्य प्रियं तन्वं शरीरं चागनीगन् अत्यर्थं गतः दाधार्तिदर्धर्तीत्यादिना यङ्लुगन्तो निपातः अतो हे स्तोतः अध्वर्यो ! एतं नोऽस्माकमश्वमनेन पथा मार्गेण येन गतस्तेन पुनरावर्तयासि आवर्तय आनय लेटोऽडाटौ पुरुषव्यत्ययः ॥ ७ ॥

वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा । रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसा । आदित्यास्त्वाञ्जन्तु जागतेन

छन्दसा । भूर्भुवः स्वर्लाजीइञ्छाचीइन्यव्ये गव्यं एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ॥ ८ ॥

आगतमश्वम्महिषी वावाता परिवृक्ता आज्येनाभ्यञ्जयन्ति वसवस्त्वेति प्रतिमन्त्रम् । वसवस्त्वाञ्जन्तु । निगदव्याख्यातम् । सौवर्णान् मणीनेकशतमश्वकेसरपुच्छेषु प्रवयन्ति पत्न्यः । भूर्भुवः स्वः । व्याख्यातम् । अश्वाय रात्रिहुतशेषं प्रयच्छति । लाजीन् शाचीन् । योऽयं लाजानां समूहो लाजीनित्युक्तः योऽयं सक्तूनां समूहः शाचीनित्युक्तः । सक्तवो हि अतितरां शच्या कर्मणा निस्पद्यन्त इति शाचीनित्युक्ताः । यश्चायं यव्ये यवमयः समूह उक्तो धानाः यश्चायं गोर्विकारसमूह उक्तो गव्य इति । एतदन्नम् अत्त भक्षयत हे देवाः । एतदन्नमद्धि भक्षय हे प्रजापते । येभ्योऽश्वः । प्रोक्षितः तद्देवतत्वादेतद्देवत्योऽश्व इति ॥ ८ ॥

का० (२, ५, १५) आयाय विमुक्तमश्वं महिषी वावाता परिवृक्ताज्येनाभ्यञ्जन्ति पूर्वकायमध्यापरकायान्यथादेशं वसवस्त्वेति प्रतिमन्त्रम् । आयाय जलप्रदेशाद्देवयजनमागत्य रथाद्विमुक्तमश्वं महिष्याद्यास्तिस्रः पत्न्यो यथाक्रममश्वस्य पूर्वादिकायानभ्यञ्जन्ति घृतेन महिषी पूर्वकायं वसव इति वावाता देहमध्यं रुद्रा इति परिवृक्ता पश्चाद्भागमादित्या इति मन्त्रेणेति सूत्रार्थः । त्रीणि यजूंषि लिङ्गोक्तदेवत्यानि । हे अश्व । वसवोऽष्टौ देवा गायत्रेण छन्दसा त्वां त्वामञ्जन्तु स्निग्धं कुर्वन्तु । रुद्रा एकादश त्रैष्टुभेन छन्दसा त्वामञ्जन्तु । आदित्या द्वादश जागतेन छन्दसा त्वामञ्जन्तु । का० (२०, ५, १६) अश्वं प्रदयमानान्मणीन् सौवर्णानेकशतमेकशतं केसरापुच्छेष्वावयन्ति भूर्भुवः स्वरिति प्रतिमहाव्याहृतिः । महिष्याद्यास्तिस्रः पत्न्यः एकाधिकं शतं सुवर्णमयमणीन् यथा न पतन्ति तथा केसरयोः शिरःस्कन्धस्थयोः पुच्छे चावध्नन्ति महिष्यश्वशिरोरोमसु भूरिति एकशतं मणीन् प्रवयन्ति वावाता ग्रीवारोमसु भुव इति

परिवृक्ता पुच्छरोमसु स्वरिति वयतीति सूत्रार्थः । भूर्भुवः स्वः व्याख्याताः । का० (२०, ५, १८) अश्वाय रात्रिहुतशेषं प्रयच्छति लाजीञ्छाचीनिति । सक्तुधानालाजारूपं रात्रिहुतशेषमश्वाय ददाति भक्ष्याय । अश्वो नास्ति चेत् जले प्रक्षेपः । लाजीन् अश्वदेवत्यं यजुः । लाजानां समूहो लाजीनित्युक्तः सक्तूनां समूहः शाचीन् यश्चार्यं यव्ये यव्यः यवसमूहः गव्ये गव्यः गोविकारसमूहो दध्यादिः । हे देवाः ! एतदन्नमत्त भक्षयत हे प्रजापते ! एतदन्नमद्धि भक्षय येभ्योऽश्वः प्रोक्षितस्तद्रूपोऽश्वः सम्बोध्यते ॥ ८ ॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किᳬ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥ ९ ॥

ब्रह्मा पृच्छति होतारं यूपमभितः । काःस्वित् । चतस्रोऽनुष्टुभः प्रश्नप्रतिप्रश्नरूपाः । कः पुनरेकाकी असहायः चराति गच्छति । क उ स्वित् । को नु विनष्टः सन् जायते पुनः उकारः पादपूरणः । किं पुनः हिमस्य शीतस्य भेषजम् । किञ्च आवपनं महत् उप्यते निक्षिप्यतेऽस्मिन्नित्यावपनम् ॥ ९ ॥

का० (२०, ५, २०) ब्रह्मा पृच्छति होतारं यूपमभितः कः स्विदेकाकीति । यूपस्य दक्षिणत उदङ्मुखो ब्रह्मा यूपोत्तरतो दक्षिणामुखं होतारं पृच्छति । ब्रह्मोद्ये कर्मणि होतुर्ब्रह्मणश्च प्रश्नप्रतिप्रश्नभूताश्चतस्रोऽनुष्टुभः । स्विदिति वितर्के एकः असहायः कः चरति गच्छति । उ पादपूरणः कः स्वित् विनष्टः सन् पुनर्जायते उत्पद्यते । किं स्वित् हिमस्य शीतस्य भेषजमौषधम् । किं स्वित् महत् आवपनम् आ समन्तादुप्यते यस्मिंस्तद्वपनस्थानम्॥९॥

सूर्य्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥ १० ॥

होता प्रत्याह । सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।

अग्निर्हिमस्य शीतस्य भेषजम् भूमिः अयं लोकः आवपनं महत् ॥ १० ॥

का० (२०, ५, २१) सूर्य इत्याचष्टे । होता ब्रह्माणं प्रति वक्ति॥ सूर्योऽसहायो गच्छति अनेन होतृब्रह्माणौ यजमाने ब्रह्मवर्चसं धत्तः। असौ वा आदित्य एकाकी चरत्येष ब्रह्मवर्चसं ब्रह्मवर्चसमेवास्मिंस्तद्धत्त इति (१३, २, ६, १०) श्रुतेः। चन्द्रमाः क्षीणः पुनर्जायते वर्धते अनेनायुर्धत्तः। चन्द्रमा वै जायते पुनरायुरेवास्मिंस्तद्धत्त इति (१३, २, ६, ११) श्रुतेः। हिमस्य भेषजमग्निः अनेन तेजो धत्तः। अग्निर्वै हिमस्य भेषजं तेज एवास्मिंस्तद्धत्त इति (१२) श्रुतेः। भूमिरयं लोको महदावपनम् अनेनास्मिन् प्रतिष्ठां धत्तः। अयं वै लोक आवपनं महदस्मिन्नेव लोके प्रतितिष्ठतीति (१३) श्रुतेः ॥ १० ॥

का स्विदासीत् पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः। का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥ ११ ॥

होता ब्रह्माणं पृच्छति । कास्वित् । का पुनः आसीत् पूर्वचित्तिः । किम्पुनरासीत् बृहत् वयः पक्षी । का पुनरासीत् पिलिप्पिला का पुनरासीत् पिशङ्गिला ॥ ११ ॥

का० (२०, ५, २२) होता ब्रह्माणं का स्विदासीदिति । होता ब्रह्माणं पृच्छति ॥ पूर्वं चिन्त्यत इति पूर्वचित्तिः सर्वेषां प्रथमस्मृतिविषया का स्वित् बृहत् महत् वयः पक्षी किं स्वित् आसीत् । पिलिप्पिला का स्वित् पिशङ्गिला च का स्विदासीत् ॥ ११ ॥

द्यौरासीत् पूर्वचित्तिरश्व आसीद् बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ १२ ॥

ब्रह्मा प्रश्नान् व्याकरोति । द्यौरासीत् । द्युग्रहणेनात्र वृ-

ष्टिर्लक्ष्यते । सा हि पूर्वं सर्वैः प्राणिभिश्चिन्त्यते अश्व आसीद्‌-बृहद्वयः । अश्वशब्देनाश्वमेधो लक्ष्यते । वयसा इव ह्यनेनाश्वमेधेन स्वर्गं लोकमारोहन्ति । अविरासीत् अविः पृथिव्यभिधीयते सा आसीत् पिलिप्पिला वृष्ट्या हि क्रियमाणा पृथिवी पिलिप्पिला भवति । श्रीरिति श्रुत्या पृथिव्युक्ता च । रात्रिरासीत्पिशङ्गि-ला । पिशमिति रूपनाम रात्रिर्हि सर्वाणि रूपाणि गिलति अ-दृश्यानि करोति ॥ १२ ॥

का० (२०, ५, २३) द्यौरिति प्रत्याह । ब्रह्मा होतारं प्रति व-क्ति ॥ पूर्वचित्तिः पूर्वस्मरणविषया द्यौर्वृष्टिरासीत् द्योशब्देन वृष्टि-र्लक्ष्यते सर्वप्राणिनामिष्टत्वात् । तथा च श्रुतिः (१३, २, ६, १४) द्यौर्वै वृष्टिः पूर्वचित्तिर्दिवमेव वृष्टिमवरुन्द्धे इति ॥ अश्वः बृहद्वयः आसीत् अश्वशब्देनाश्वमेधो लक्ष्यते अश्वमेधेन वयमेव स्वर्गमा-रोहतीत्यश्वमेधो वयः । अवतीत्यविः पृथिवी पिलिप्पिलासीत् वृष्ट्या भूः पिलिप्पिला चिक्कणा भवति । श्रीर्वै पिलिप्पिलेति (१३, २, ६, १६) श्रुत्या श्रयन्त यनामिति श्रीशब्देन भूरेव । रात्रिः पिश-ङ्गिला आसीत् पिशमिति रूपनाम पिशं रूपं गिलतीति पिशङ्गिला रात्रौ सर्वाणि रूपाण्यन्तर्भवन्ति ॥ १२ ॥

वायुष्ट्वा पचतैरवतु । असितग्रीवश्छागैः । न्यग्रो-धश्चमसैः । शल्मलिर्वृद्ध्या । एष स्य राथ्यो वृषा । प-ड्भिश्चतुर्भिरेदगन् । ब्रह्माकृष्णश्च नोऽवतु । नमोऽ-ग्नये ॥ १३ ॥

प्रोक्षत्यश्वम् । वायुष्ट्वा वायुः त्वा पचतैः पाकैः अवतु । वा-य्वग्निसंयोगाद्धि द्रव्याणि पच्यन्ते । असितग्रीवः छागैः असि-तग्रीवोऽग्निः धूमसंयोगात् । छागैः अवतु कृष्णग्रीवादिभिः प-र्यङ्गैः । अश्वाङ्गेष्वालभ्यमाना अश्वायोपकुर्वन्ति अदृष्टेनोपका-

रेण। न्यग्रोधश्चमसैः अवतु सोमसंबन्धेन। शल्मलिः स्वकीयया वृद्ध्या त्वा अवतु पालयतु। एष स्यः एष सः राथ्यः रथे साधुः राथ्यः। वृषा सेक्ता। पद्भिश्चतुर्भिः। आ इत् आगन् आगतः चतुर्ग्रहणाद्भिः। तस्मादश्वस्त्रिभिस्तिष्ठति अथ युक्तः सर्वैः सममायुत इति श्रुतिः। ब्रह्मा कृष्णश्च। ब्रह्मा परिवृढः अकृष्णः न विद्यते कृष्णमस्येत्यकृष्णश्चन्द्रमाः। स च नोऽस्माकम् अश्वम् अवतु। नमः अग्नये अग्निं नमस्करोत्यविघ्नाय ॥ १३ ॥

का० (२०, ६, ७) अश्वप्रोक्षणमद्भ्यस्त्वा वायुष्ट्वेति। अद्भ्यस्त्वौषधीभ्य इति प्राकृतमन्त्रेण (६, ९) वायुष्ट्वेत्यारभ्य देवः सविता द्धात्वित्यन्तेन (१६) कण्डिकाचतुष्टयेनाश्वमेधिकेन चाश्वप्रोक्षणं करोतीति सूत्रार्थः॥ चत्वारि यजूंष्यश्वदेवत्यानि। हे अश्व! वायुः पचतेः पाकैः त्वा त्वामवतु वायुसंयोगादग्निः शीघ्रं पचति। असिता ग्रीवा यस्य धूमेनेत्यसितग्रीवोऽग्निः छागैः त्वामवतु। अग्निर्वा असितग्रीव इति (१३, २ ७, २) श्रुतेः। कृष्णग्रीव आग्नेयो रराटे इति (२४, १) वक्ष्यमाणत्वादश्वाङ्गेषु कृष्णग्रीवादयः पञ्चदश पर्यङ्ग्याः पशवः सन्ति तैरग्निरवत्वित्यर्थः। न्यग्रोधः चमसैः सोमपात्रैः त्वामवतु। शाल्मलिः वृक्षविशेषो वृद्ध्या त्वामवतु शाल्मलिर्वनस्पतीनां वर्षिष्ठः वर्धत इति (१३, २, ७, ४) श्रुतेः॥ किञ्च स्यः स एष वृषा सेक्ताश्वः राथ्यः रथे साधुः पड्भिः पादैः चतुर्भिरेव आ अगन् आगतः आ इत्गमिति पदच्छेदः अश्वस्त्रिभिः पादैस्तिष्ठति चतुर्भिश्च गच्छतीति चतुर्ग्रहणम्। तथा च श्रुतिः (१३,२,७,५) तस्माद्दश्वस्त्रिभिस्तिष्ठत्यथ युक्तः सर्वैः पड्भिः सममायुत इति। पदशब्दस्य डान्तत्वं छान्दसम्। किञ्च अकृष्णः नास्ति कृष्णं लाञ्छनं यस्मिन् स ब्रह्मा चन्द्रो नोऽस्मानवतु। चन्द्रमा वै ब्रह्माकृष्णश्चन्द्रमस एनं परिददातीति (१३, २, ७, ७) श्रुतेः। नोऽस्माकमश्वमवत्विति वा। अग्नये नमः नमस्कारोऽस्तु विघ्नाभावायाग्नेर्नतिः क्रियते ॥ १३ ॥

सꣳशितो रश्मिना रथः सꣳशितो रश्मिना ह-

र्यः । सᳬशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः॥१४॥

सᳬशितो रश्मिना । तिस्रो ऽनुष्टुब्विराड्त्रिष्टुभः । मोक्षणे एव अश्वदेवत्याः । सम्पूर्वः श्यतिः शोभने वर्तते । संदर्शितः यथा दर्शनीयतमः रश्मिना रथो भवति । यथा च संसितः रश्मिना हयोऽश्वः । एवमयं संशितः । अप्सु अद्भिः । अप्सुजाः अप्सुजातोऽश्वः । अप्सुजाताः अश्व इति श्रुतिः । किम्भूतः ब्रह्मा–विभर्ता । परिवृढो वा । सोमपुरोगवः । सोमसंस्कारान्पुरस्कृत्य स्वर्गं लोकं गच्छतीति सोमपुरोगम ः । सोमार्था हि पशवः । स यत्पशुमालभते रसमेवास्मिन्दधातीति श्रुतिः ॥ १४ ॥

अश्वदेत्यानुष्टुप् । सम्पूर्वः श्यतिः शोभनार्थः रथः रश्मिना कृत्वा संशितः दर्शनीयो भवति तस्माद्रथः पर्युतो दर्शनीयतमो भवतीति (१३, २,७, ८) श्रुतेः । हयोऽश्वो रश्मिना संशितः शोभितः । अप्सु जायते अप्सु जा अश्वः अप्सु अद्भिः संशितः विभक्तिव्यत्ययः । अप्सु योनिर्वा अश्व इति (२३, २, ७, ९) श्रुतेः । कीदृशः ब्रह्मा परिवृढः सोमपुरोगमः सोमः पुरोगमोऽग्रगामी यस्य सः सोमं पुरस्कृत्य स्वर्गं लोकं गच्छति । सोमपुरोगममेवैनᳬ स्वर्गं लोकं गमयतीति (१०) श्रुतेः ॥ १४ ॥

स्वयं वाजिँस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व । महिमा तेऽन्येन न सं नशे ॥ १५ ॥

किञ्च । स्वयं वाजिन् । स्वयमेव हे वाजिन् तन्वं शरीरं कल्पयस्व । स्वराज्यं तवास्तीत्यर्थः । अत एव स्वयमेव यजस्व । न तेऽन्यो यष्टास्तीति भावः । स्वयञ्च जुषस्व । स्वयमेवाभिरुचितं स्थानं कुरुष्व । किमर्थमिदमुच्यतेऽस्माभिरिति चेत् । महिमा ते तव संबन्धी अन्येन महिम्ना न संनशे । नाशिर-

दर्शनार्थः। वेदे तु व्याप्त्यर्थोऽपि भवति। न संव्याप्यते ॥१५॥

आद्यो विपाट्। हे वाजिन्। स्वयं तन्वं शरीरं त्वं कल्पयस्व स्वयं रूपं कुरुष्व यादृशमिच्छसीति (१३, २, ७, ११) श्रुतेः। स्वाराज्यं तवास्तीति भावः अतः स्वयं यजस्व न तवान्यो यष्टास्ति स्वयं जुषस्व इष्टस्थानं सेवस्व। यतस्ते तव महिमा अन्येन महिम्ना न संनशे न संनश्यते न व्याप्यते नशिरदर्शनार्थोऽत्र तु व्याप्त्यर्थः यलोपे नशे रूपम् ॥ १५ ॥

न वा उ॑ एतन्म्रि॑यसे॒ न रि॑ष्यसि दे॒वाँ२॥ इदे॑षि प॒थिभि॑ः सु॒गेभि॑ः। यत्रास॑ते सु॒कृतो॒ यत्र॒ ते य॒युस्तत्र॑ त्वा दे॒वः स॑वि॒ता द॑धातु ॥ १६ ॥

न वै। वै उ पादपूरणौ। न एतत् म्रियसे यत् संज्ञप्यसे। नच रिष्यसि विनश्यसि ॥ विशस्यमानः। किमिति। यत् देवान् इत्मति एपि गच्छसि। पथिभिः सुगेभिः साधुगमनैर्देवयानैरित्यर्थः। किञ्च। यत्र आसते सुकृतः साधुकारिणः। यत्र च ते ययुः गताः तत्र त्वान्देवः सविता दधातु ॥ १६ ॥

आद्यौ त्रिष्टुप्। हे अश्व! अस्माभिर्यत्त्वं संज्ञप्यसे एतत्त्वं न म्रियसे मरणं नाप्नोपि न च रिष्यसे न विनश्यसि विशस्यमानः। वै उ निपातौ पादपूरणौ। यत्सुगेभिः सुगैः सुदुरोरधिकरण इति (पा० ३,२,४८ वा० ३,) गमेर्डप्रत्ययः साधुगमनैः पथिभिः देवयानमार्गैः देवानित् देवान् प्रति एपि गच्छसि। किञ्च सुकृतः साधुकारिणो नरा यत्र लोके आसते तिष्ठन्ति यत्र च ते सुकृतो ययुर्गताः तत्र लोके सविता देवः त्वा त्वां दधातु स्थापयतु सवितैवैनᳪ स्वर्गे लोके दधातीति (१३, २, ७, १२) श्रुतेः ॥ १६ ॥

अ॒ग्निः प॒शुरा॑सी॒त्तेना॑यजन्त॒ स ए॒तं लो॒कम॑जय॒द्यस्मि॑न्न॒ग्निः स ते॑ लो॒को भ॑विष्यति॒ तं जे॑ष्यसि॒ पिबै॒ता अ॒पः। वा॒युः प॒शुरा॑सी॒त्तेना॑यजन्त॒ स ए॒तं लो॒क-

मंजयद्यस्मिन्वायुः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः । सूर्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन् सूर्यः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ॥ १७ ॥

उपगृह्णात्यपः । अग्निः पशुः । सृष्टियज्ञे देवानामासीत् । तेनाग्निना वै अयजन्त । स चाग्निस्तत्र साधनभावमुपगतः सन् एतं पृथिवीलोकम् अजयत् । यस्मिन् लोके अग्निः । अतः स ते लोको भविष्यति तञ्च जेष्यसि । पिब एताः प्रोक्षणीः अपः । वायुः । सूर्यः पशुः व्याख्यातमन्यत् ॥ १७ ॥

का० (२०, ६, ८) उपगृह्णात्यपां पेद्यग्निः पशुरिति । अपां पेद्यरिति (६, १०) प्राकृतेन मन्त्रेणाग्निः पशुरिति वैकृतेन च प्रोक्षणीरश्वास्ये उपगृह्णातीति सूत्रार्थः ॥ अश्वदेवत्यानि त्रीणि यजूंषि। सृष्टिदेवानामग्निः पशुरासीत् तेनाग्निरूपेण पशुना देवा अयजन्त ईजिरे स पशुभावमुपगतोऽग्निः एतं लोकं पृथ्वीलोकमजयत् यस्मिन् लोकेऽग्निः हे अश्व ! स लोकः ते तव भविष्यति तं लोकं त्वं जेष्यसि एताः प्रोक्षणीरपः पिब । तथा च श्रुतिः (१३, २, ७, १३) यावानग्नेर्विजयो यावांल्लोको यावदैश्वर्य्यं तावांस्ते विजयस्तावांल्लोकस्तावदैश्वर्य्यं भविष्यतीत्येवैनं तदाहेति । वायुः पशुरासीत् सूर्य्यः यदैश्वर्य्यं भविष्यतीत्येवैनं तदाहेति । वायुः पशुरासीत् सूर्य्यः पशुरासीत् वायुलोकोऽन्तरिक्षं सूर्य्यलोकः स्वर्गः तावपि ते । भविष्यत इत्यर्थः ॥ १७ ॥

प्राणाय स्वाहा । अपानाय स्वाहा । व्यानाय स्वाहा । अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ १८ ॥

परिपशव्ये हुत्वा प्राणाय स्वाहेति । तिस्रोऽपराः वाच-

यति पत्नीर्नयन् । अम्बे । अनुष्टुप् । अश्वस्तुतिः । पत्न्यः परस्परमामन्त्रयन्ते । हे अम्बे हे अम्बिके हे अम्बाले । न मां नयति अश्वं प्रति प्रापयति कश्चन कश्चिदपि । मदगमनेन च । ससस्ति । सस् स्वप्ने । अन्यां परिगृह्य शेते । कुत्सितोऽश्वः । अश्वकः । अकुत्सितोऽपीर्ष्यया कुत्स्यते । सुभद्रिकाम् । कुत्सिता सुभद्रा सुभद्रिका । इयमपीर्ष्यया कुत्स्यते । काम्पीलवासिनीम् काम्पीलनगरे हि सुभगा सुरूपा विदग्धा विनीताश्च स्त्रियो भवन्ति ॥ १८ ॥

का० (२०, ६, ११) परिपशव्ये हुत्वा प्राणाय स्वाहेति तिस्रोऽपराः । परिपशव्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेति (६, ११) द्वे आहुती हुत्वा प्राणायेत्याद्यास्तिस्र आहुतीर्जुहोति एकामश्वसंज्ञपनादौ चतस्रोऽन्ते इति सूत्रार्थः । त्रीणि यजूंषि । प्राणाय अपानाय व्यानाय आभिराहुतिभिरश्वं प्राणवन्तं करोति । तथा च श्रुतिः (१३, २, ८, २) प्राणानेवास्मिन्नेतद्दधाति तथो हास्यैतेन जीवतैव पशुनेष्टं भवतीति । का० (२०, ६, १२) वाचयति पत्नीर्नयन्नम-स्तेऽम्ब इति । सर्वाः पत्नीः पशुशोधनाय पान्नेजनीहस्ताः पशून् प्रति नयन्नमस्ते आतानेति (६, १२) प्राकृतं मन्त्रमम्बे इत्याश्वमेधिकं च वाचयतीति सूत्रार्थः । अश्वदेवत्यानुष्टुप् । पत्न्यः परस्परं वदन्ति हे अम्बे ! हे अम्बिके ! हे अम्बालिके ! नामान्येतानि कश्चन नरो मां न नयति अश्वं प्रति न प्रापयति तर्हि किमर्थं गम्यते, तत्राह अश्वकः कुत्सितोऽश्वोऽश्वकः अकुत्सितोऽपीर्ष्यया कुत्स्यते सुभद्रिकां कुत्सिता सुभद्रा सुभद्रिका ईर्ष्यया कुत्स्यते तां नारीमादाय ससस्ति शेते सस् स्वप्ने इत्यादिः मदगमनेऽश्वोऽन्यामादाय शयिष्यत इति मया गम्यते न तु मां कश्चिन्नयतीति भावः । किम्भूतां सुभद्रिकां काम्पीलवासिनीं काम्पीले नगरे वसतीति काम्पीलवासिनी ताम् तत्र हि विदग्धाः सुरूपाः कामिन्यो भवन्ति आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे अम्बालेऽम्बिके पूर्वे इति (पा० ६, १, ११८) प्रकृतिभावः ॥ १८ ॥

गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ १९ ॥

पत्न्यः त्रिःपरियन्त्यश्वम् । गणानां त्वा । स्त्रीगणानाम् । मध्ये त्वां युगपत् गणपतिं हवामहे आह्वयामः । एवमेव प्रियाणां मनुष्याणां मध्ये त्वामेव प्रियपतिं प्रियं भर्तारं हवामहे । एवमेव निधीनां सुखनिधीनां मध्ये त्वामेव निधिपतिं हवामहे । कथं कृत्वा । हे वसो । अश्व मम त्वं पतिर्भूयाः इति । महिषी अश्वमुपसंविशति । आहमजानि । आकृष्य अहम् अजानि अज गतिक्षेपणयोः । क्षिपामि । गर्भधम् । गर्भस्य धारयितृ रेतः । आत्वमजासि गर्भधम् । आकृष्य च त्वं हे अश्व अजासि क्षिपसि गर्भधं रेतः ॥ १९ ॥

का० (२० ६, १३) अश्वं त्रिस्त्रिः परियन्ति पितृवन्मध्ये गणानां प्रियाणां निधीनामिति । सर्वाः पत्न्यः पान्नेजनहस्ता पय प्राणशोधनात्प्राक् अश्वं त्रिस्त्रिः परियन्ति मध्ये पितृवत् अप्रदक्षिणं परियन्ति त्रिः त्रिभिर्मन्त्रैः वसो ममेति त्रिष्वप्यनुषङ्गः तत्राश्चैवम् प्रथमं गणानामिति त्रिः प्रदक्षिणं परियन्ति तत्र सकृन्मन्त्रेण द्विस्तूष्णीम् ततः प्रियाणामित्यप्रदक्षिणं त्रिः निधीनामिति प्रदक्षिणं त्रिः एवं नवकृत्व इति सूत्रार्थः । त्रीणि यजूंषि लिङ्गोक्तदेवत्यानि । हे अश्व ! वयं त्वां हवामहे आह्वयामः कीदृशं त्वाम् गणपतिं गणानां मध्ये गणपतिं गणरूपेण पालकम् प्रियाणां वल्लभानां मध्ये प्रियपतिं प्रियस्य पालकम् निधीनां सुखनिधीनां मध्ये निधिपतिं सुखनिधेः पालकं त्वां हवामहे । हे वसुरूप अश्व ! मम पतिस्त्वं भूया इति शेषः । का० (२०, ६, १४) प्रक्षालितेषु महिष्यश्वमुपसंविशत्याहमजानीति । प्रक्षालितेषु शोधितेषु पशूनां प्राणेषु पत्नीभिरध्वर्युणा

यजमानेन प्राणशोधने कृते महिषी अश्वसमीपे शेते । अश्वदेवत्यम् । हे अश्व ! गर्भधं गर्भे दधाति गर्भधं गर्भधारकं रेतः अहम् आ अजानि आकृष्य क्षिपामि अज गतिक्षेपणयोः लोट् तं च गर्भधं रेतः आ अजासि आकृष्य क्षिपसि ॥ १९ ॥

ता उ॒भौ च॒तुरः॑ प॒दः स॒म्प्रसा॑रयाव स्व॒र्गे लो॒के प्रोर्णु॑वाथां॒ वृषा॑ वा॒जी रे॑तो॒धा रेतो॑ दधातु ॥ २० ॥

ता उभौ । यौ आवां कृतसङ्केतौ तौ उभौ त्वं चाहञ्च । चतुरः पदः पादान् । द्वौ तव सम्बन्धिनौ द्वौ च मम सम्बन्धिनौ । संप्रसारयाव । एवं हि सम्बन्धे संवेशप्रकार इत्यभिप्रायः । अधीवासेन प्रच्छादयति । स्वर्गे लोके । एष वै स्वर्गो लोको यत्र पशुᳪंसञ्ज्ञपयन्ति । प्रोर्णुवाथाम् । ऊर्णोतिराच्छादने । प्रोर्णुवनङ्कुरुतमित्यध्वर्युराह । अश्वशिश्नमुपस्थे कुरुते । वृषा वाजी वृषा सेक्ता वाजी अश्वः रेतोधा रेतसः धारयिता रेतो दधातु आसिञ्चतु ॥ २० ॥

पूर्वमन्त्रशेषः । तौ त्वमहं च उभौ चतुरः पदः पादानावां सम्प्रसारयाव तव द्वौ मम द्वौ एवं संवेशनप्रकारः । का० (२०, ६, १४) अधीवासेन प्रच्छादयति स्वर्गे लोक इति । अधीवासेनाश्वमहिष्यौ छादयति अथ उपरिष्टाधाच्छादनक्षमं वासोऽधीवासः। अश्वदेवत्यम् । अध्वर्युर्वदति । हे अश्वमहिष्यौ ! युवां स्वर्गे लोकेऽस्यां यज्ञभूमौ प्रोर्णुवाथां वास आच्छादयतम् ऊर्णुञ् आच्छादने एष वै स्वर्गे लोको यत्र पशुᳪं संज्ञपयन्तीति (१३, २, ८, ५) श्रुतेः । का० (२०, ६, १६) अश्वशिश्नमुपस्थे कुरुते वृषा वाजीति । महिषी स्वयमेवाश्वशिश्नमाकृष्य स्वयोनौ स्थापयति ॥ अश्वदेवत्यम् । वाजी अश्वो रेतो दधातु मयि वीर्यं स्थापयतु कीदृशोऽश्वः वृषा सेक्ता रेतोधाः रेतो दधातीति रेतोधाः वीर्यस्य धारयिता॥२०॥

उ॒त्स॒क्थ्या॒ अव॑ गु॒दं धे॑हि॒ सम॒ञ्जिं चा॑रया वृष॒न् । यः स्त्री॒णां जी॑व॒भोज॑नः ॥ २१ ॥

उत्सक्थ्या । गायत्र्याऽश्वं यजमानोऽभिमन्त्रयते । उद्गते सक्थनी यस्याः सा उत्सक्थी तस्या उत्सक्थ्याः । महिष्याः । अवगुदन्धेहि । अवाचीनङ्गुदम् रेतो धेहि सिञ्च । कथमिति चेत् । समञ्जिञ्चारया वृषन् । सञ्चारय अञ्जिम् अनक्ति व्यनक्ति पुंस्त्वमित्यञ्जिः पुंस्त्वजननमुक्तम् । हे वृषन् सेक्तः । कथंभूतोऽञ्जिः । यः स्त्रीणाञ्जीवभोजनः । यस्मिन्सति स्त्रियो जीवन्तीत्युच्यन्ते । यस्मिंश्च सति । भोजनादीन् भोगान् लभन्ते । स जीवभोजनः ॥ २१ ॥

का० (२०, ६, १७) उत्सक्थ्या इत्यश्वं यजमानोऽभिमन्त्रयते॥ अश्वदेवत्या गायत्री । हे वृषन् सेक्तः अश्व । महिष्या गुदमव गुदोपरि रेतो धेहि वीर्यं धारय कीदृश्याः उत्सक्थ्याः उत् ऊर्ध्वे सक्थिनी ऊरू यस्याः सा उत्सक्थी तस्याः । कथम् तदाह अञ्जि लिङ्गं सञ्चारय अनक्ति व्यनक्ति पुंस्त्वमित्यञ्जिर्लिङ्गम् लिङ्गं योनौ प्रवेशय योऽञ्जिः स्त्रीणां जीवभोजनः जीवयति जीवः भोजयति भोजनः जीवश्चासौ भोजनश्च जीवभोजनः यस्मिन् लिङ्गे योनौ प्रविष्टे स्त्रियो जीवन्ति भोगांश्च लभन्ते तं प्रवेशय ॥ २१ ॥

यकासकौ शकुन्तिकाहलगिति वञ्चति । आहन्ति गभे पसो निगल्गलीति धारका ॥ २२ ॥

इत उत्तरं दशानुष्टुभोऽभिमेथिन्यः पुंस्त्वजननमुक्तम् । द्वितीयोपरिष्टाद् बृहती अत्र च यो यत्र भण्यते स तत्र देवतात्वमुपगच्छति । अध्वर्युः कुमारीमभिमेथयति । यकासकौ । अकप्रत्यययोऽत्र कुत्सायाम् । अङ्गुल्या प्रदर्शयन्नाह । यका असकौ । शकुन्तिका । अल्पे कन्प्रत्ययः । अल्पीयसी पक्षिणीव । आहलक् इति । प्रकारवचनम् । हलेहले इति ब्रुवन्ती । वञ्चति त्वरितं गच्छति । चपलेत्यर्थः । तस्या अपि । आहन्ति । ह-

न्तिर्गत्यर्थः। आगच्छति। अन्तर्भावितण्यर्थो वा। आगमयति प्रवेशयति। अत्यर्थं वाहन्ति। गभे पसः। गभ इति आद्यन्तवर्णविपर्ययः। पसः पसतेः स्पृशतिकर्मणः। भगे शिश्नमाहन्तीत्यर्थः। अथ तदा निगल्गलीति अत्यर्थं शुक्रं मुञ्चति धारका योनिः। यद्वा शब्दानुकरणम् निगल्गलीति गिरते वा। निगिरति शिश्नं योनिः॥ २२॥

का० (२०, ६ १८) अध्वर्युब्रह्मोद्गातृहोतृक्षत्तारः कुमारीपत्नीभिः संवदन्ते यकासकाविति दशर्चस्य द्वाभ्यां द्वाभ्यां हये-हयेऽसावित्यामन्त्र्यामन्त्र्य। अध्वर्य्वादयः पञ्च हये-हयेऽसाविति सम्बुद्ध्यन्तनामोच्चारणपूर्वकं संमुखीकृत्य यकासकाविति दशर्चसम्बन्धिनीभ्यां द्वाभ्यामृग्भ्यां कुमारीपत्नीभिः सह सोपहासं संवदन्ते तत्र प्रथममध्वर्युः कुमारीं पृच्छति कुमारि हये हये कुमारि यकासकौ शकुन्तिकेतीत्यर्थः॥ कुमार्य्यादिदेवत्या दश तन्मध्ये द्वितीयोपरिष्टाद् बृहती अन्या नवानुष्टुभः॥ अव्ययसर्वनाम्नामकच् प्राक् टेरिति अकच् कुत्सायाम्। अल्पा शकुन्तिः शकुन्तिका अल्प इति (पा० ५, ३, ८५) कन्। अङ्गुल्या योनिं प्रदर्शयन्नाह। यका या असकौ असौ शकुन्तिका अल्पपक्षिणीव आहलक् शब्दानुकरणं हले हले इति शब्दयन्ती वञ्चति गच्छति। स्त्रीणां शीघ्रगमने योनौ हलहलाशब्दो भवतीत्यर्थः। गभे वर्णविपर्य्यय आर्षः भगे योनौ शकुनिसदृश्यां यदा पसो लिङ्गमाहन्ति आगच्छति स इति पसतेः स्पृशतिकर्मण इति (निघ०-५, १६) यास्कः पुंस्प्रजननस्य नाम हन्तिर्गत्यर्थः यदा भगे शिश्नमागच्छति तदा धारका धरति लिङ्गमिति धारका योनिर्निगल्गलीति नितरां गलति वीर्य्यं क्षरति यद्वानुकरणम् गल्गलेति शब्दं करोति॥ २२॥

यकोऽसकौ शकुन्तक आहलगिति वञ्चति। विक्षत इव ते मुखमध्वर्यो मा नस्त्वमभिभाषथाः॥ २३॥

अध्वर्युं प्रत्याह कुमारी। यकोऽसकौ। यकः असकौ यः

असौ शकुन्तक इव आहलगिति वञ्चति । तस्य श्लीलं भाषिणः किमन्यत् ब्रवीमि । विवक्षत इव ते मुखम् । असाधुवक्तुमिच्छत इव ते मुखं पश्यामि । अतो हे अध्वर्यो मा नः अस्मान् त्वमभि भाषथाः ॥ २३ ॥

कुमारी अध्वर्युं प्रत्याह । अङ्गुल्या लिङ्गं प्रदर्शयन्त्याह । हे अध्वर्यो ! यकः यः असकौ असौ शकुन्तकः पक्षीव विवक्षतः वक्तुमिच्छतस्ते तव मुखमिव आहलगिति वञ्चति इतस्ततश्चलति अग्रभागे सच्छिद्रं लिङ्गं तव मुखमिव भासते । अतो नोऽस्मान् प्रति मा अभिभाषथाः मा वद तुल्यत्वात् ॥ २३ ॥

माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः । प्रतिलामीति ते पिता गभे मुष्टिमतंसयत् ॥ २४ ॥

ब्रह्मा महिषीमभि मेथति । माता च ते । हे महिषि यदा माता च तव पिता च तव । अग्रं वृक्षस्य । वार्क्ष्यस्येति तद्धितलोपः । वार्क्ष्यस्य पर्यङ्कस्य उपरितनम्भागम् रोहतः । मैथुनार्थमेकं पर्यङ्कमारोहत इति अश्लीलाभिप्रायं वचनम् । तदा प्रतिलामीति तिल स्नेहने । स्नेहाम्यहमनेन कर्मणा । इति एवमिति प्रकारवचनं वदन् । तव पिता गभे भगे मुष्टिं मुष्ट्याकारं शिश्नम् अतंसयत् अक्षिपत् । एवन्तवोत्पत्तिः ॥ २४ ॥

ब्रह्मा महिषीमाह । महिषि हये हये महिषि ते तव माता च पुनस्ते तव पिता यदा वृक्षस्य वृक्षजस्य काष्ठमयस्य मञ्चकस्याग्रमुपरिभागं रोहतः आरोहतः तदा ते पिता गभे भगे मुष्टिं मुष्टितुल्यं लिङ्गमतंसयत् तंसयति प्रक्षिपति एवं तवोत्पत्तिरित्यश्लीलम् तसि अलङ्कृतौ चुरादिः लिङ्गमुत्थानेनालङ्करोति वा । किं कुर्वन् प्रतिलामीति वदन्निति शेषः तिल स्नेहने तव भोगेन स्निह्यामीति वदन् । एष तवोत्पत्तिः ॥ २४ ॥

माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः। विवक्षत इव ते मुखं ब्रह्मन्मा त्वं वदो बहु ॥ २५ ॥

महिषी प्रत्याह। माता च ते। हे ब्रह्मन्। यदा माता च ते अग्रे वृक्षस्य पर्यङ्कस्य क्रीडतः। तदा त्वमुत्पन्नः। तुल्योत्पत्तिरावयोः। यत्रोभयोर्दोषो न तमेकश्चोदयितुमर्हति। एवं सति। यदसाधु वदितुमिक्षत इव ते मुखं पश्यामि तत् हे ब्रह्मन् मा त्वं वदो बहु ॥ २५ ॥

सानुचरी महिषी ब्रह्माणं प्रत्याह। हे ब्रह्मन्! ते तव माता ते पिता च यदि वृक्षस्य वृक्षविकारस्य मञ्चकस्याग्रे क्रीडतः रमेते तद तवोत्पत्तिरिति तवापि तुल्यम्। यत्रोभयोः समो दोषः परिहारोऽपि वा समः नैकः पर्यनुयोक्तव्यस्तादगर्थविचारणे इति न्यायात्त्वयेदं न वक्तव्यमिति भावः। एवं सत्यपि विवक्षतः वक्तुमिच्छोरिव ते तव मुखं लक्ष्यत इति शेषः। हे ब्रह्मन्। त्वं मा बहु वदः मा ब्रूहि॥२५॥

ऊर्ध्वामेनामुच्छ्रापय गिरौ भारꣳ हरन्निव। अथास्यै मध्यमेधताꣳ शीते वाते पुनन्निव ॥ २६ ॥

उद्गाता वावातामभिमेथयति ऊर्ध्वामेनाम्। कश्चित्पुरुषमाह। ऊर्ध्वामेनां वावाताम् उच्छ्रितां कुरु। कथमिव। गिरौ भारं मध्ये निगृह्य हरेत् एवमेनां मध्ये निगृह्य। ऊर्ध्वामुच्छ्रापय। अथ यथैतस्य स्थाने तथा च उच्छ्रापय यथा अस्यावातापः मध्यं योनिप्रदेशः एधताम्। एध वृद्धौ वृद्धिं यायात्। अथैनां गृह्णीयाः। शीते वाते पुनन्निव। पावा खला व। पावा हि धान्यवाते शुद्धं कुर्वन्। ग्रहणमोक्षौ झटिति करोति ॥ २६ ॥

उद्गाता वावातामाह। कश्चिन्नरं प्रत्याह। हे नर! एनां वावातामूर्ध्वामुच्छ्रापय उच्छ्रितां कुरु। कथमिव गिरौ भारं हरन्निव यथा कश्चित् गिरौ पर्वते भारं हरन् पर्वतोपरि भारमारोपयन् य-

था तमुच्छ्रयति। तथैनामुर्ध्वां कुरु। कथमूर्ध्वा कार्या तदाह अं- थेति निपातो यथार्थः यथा अस्यै अस्या वावातायाः मध्यमेधतां योनिप्रदेशो वृद्धिं यायात् यथा योनिर्विशाला भवति तथा मध्ये गृहीत्वोच्छ्रापयेत्यर्थः। दृष्टान्तान्तरमाह शीते वाते पुनन्निवं यथा शीतले वायौ वाति पुनन्धान्यपवनं कुर्वाणः कृषीवलो धान्यपात्रं यथा ऊर्ध्वं करोति तथेत्यर्थः॥ २६॥

ऊर्ध्वमेनमुच्छ्रयताद्गिरौ भार॑ᳬ हर॑न्निव। अथा॑- स्य मध्य॑मेजतु शीते वाते॑ पुनन्नि॑व॥ २७॥

वावाता प्रत्याहोद्गातारम्। भवतोऽप्येतदेयम्। ऊर्ध्वमे- नम्। उद्गातारमुच्छ्रयतात् उच्छ्रापय। अत्र स्त्री पुरुषायते। गिरौ भारं हरन्निव। अथैवं क्रियमाणस्यास्य मध्यं प्रजननम् एजतु चलतु। अथैनन्निगृहीष्व शीतेव ते पुनन्निव। यवान्॥२७॥

वावातोद्गातारं प्रत्याह। भवतोऽप्येतत्समानम्। हे नर! एत- मुद्गातारमूर्ध्वमुच्छ्रयतात् ऊर्ध्वं कुरु गिरौ भारमिति पूर्ववत्। अ- थ यथास्य उद्गातुर्मध्यं लिङ्गमेजतु कम्पताम् एजृ कम्पने लोट्। शीते वाते उक्तम्॥ २७॥

यद॑स्या अᳬहुभेद्याः कृधु स्थूलमुपात॑सत्। मुष्का॑- विद॑स्या एजतो गोशफे शकुलावि॑व॥ २८॥

होता परिवृक्तामभिमेथयति। यदस्याः। यत् यदा अ- स्याः परिवृक्तायाः। अंहुभेद्याः। अल्पयोनेः। अंहुः हन्तव्यः भेद्यप्रदेशः प्रजननमस्या इति अंहुभेदी तस्याः अंहुभेद्याः। कृधु इति ह्रस्वनाम। ह्रस्वं शिश्नम्। स्थूलञ्च उपातसत् उप- सङ्गच्छेत्। अथ तदा अल्पत्वात् योनेः स्थूलत्वाच ह्रस्वत्वाच्च दुष्प्रजननस्य। मुष्कौ वृषणौ इत् एवम् अस्याः प्रजननस्योपरि एजतः। एजृ कम्पने। कम्पनङ्कुरुतः। कथमिव गोशफे गोष्प-

दे उदकपूर्णे । शकुलाविव मत्स्याविव ॥ २८ ॥

होता परिवृक्तामाह । यत् यदा अस्याः परिवृक्तायाः कधु ह्रस्वं स्थूलञ्च शिश्नमुपातसत् उपगच्छेत् योनिं प्रति गच्छेत् तंस उपक्षये तदा मुष्कौ वृषणौ इत् एव अस्याः योनेरुपरि एजतः कम्पेते। लिङ्गस्य स्थूलत्वात् योनेरल्पत्वात् वृषणा बहिस्तिष्ठत इत्यर्थः। तत्र दृष्टान्तः गोशफे जलपूर्णे गोः खुरे शकुलौ मत्स्याविव यथा उदकपूर्णे गोः पदे मत्स्यौ कम्पेते। कुध्विति ह्रस्वनाम (निघ० ३, २, ६) । कीदृश्या अस्याः अंहुभेद्याः अंहु भगं भेद्यं विदार्यं यस्याः सा अंहुभेदी तस्याः अंहुर्भिद्यते यस्या वा॥ २८ ॥

यद्देवासो ललामगुं प्रविष्टीमिनमाविषुः । सक्था देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥ २९ ॥

परिवृक्ता मत्याह । यद्देवासः । होतृप्रमुखान् सर्वानेव ऋत्विजः परिवदति । यदा एते देवासः शिश्नदेवाः शिश्नक्रीडिनः । ललामगुम् ललामेति सुखमभिधीयते सुखङ्कर्तुङ्गच्छतीति ललामगुः शिश्नम् । यद्वा ललामेति पौण्ड्रमभिधीयते। शिश्नं हि योनिम्प्रविशत् पौण्ड्रम्भवति । प्रविष्टीमिनम् प्रवेश्य विष्टम्भ्य च । आविषुः आलिङ्गनचुम्बनादिभिर्निगृह्णीयुर्नारीम्। अथ तदा । सक्था देदिश्यते नारी सक्थिकृतेन कुटिलगमनेन अतिदिश्यते लक्ष्यते नारी । नहि तस्याः किञ्चिदन्यासं पुरुषेण भवति अन्यत्र सक्थ्न इत्यभिप्रायः । कथमिवासत्यस्याक्षिभुवो यथा । द्विःमकारं सत्यम् अक्षिप्रभवमनक्षिप्रभवञ्चेति । आक्षिग्राह्यमक्षिप्रभवं तत्र हि सर्वं व्याप्तं भवति । अनक्षिप्रभवं श्रोत्रग्राह्यम् तत्तु साकाङ्क्षम् वक्तुराप्ततामपेक्षते । अतो विशिनष्टि आक्षिभुव इति । सत्यस्य अक्षिभुवः यथा अवितथत्वं तथेति ॥ २९ ॥

परिवृक्ता होतारमाह । यत् यदा देवासः देवाः दीव्यन्ति क्रीडन्ति देवा होत्रादय ऋत्विजो ललामगुं लिङ्गं प्र आविषुः योनौ प्रवेशयन्ति । अव रक्षे गतौ कान्तौ तृप्तौ प्रीतौ चुतौ श्रुतौ । प्राप्तौ श्लेषेऽर्पणे वेशे भागे वृद्धौ गृहे वधे । इत्युक्तेरवधातुः प्रवेशनार्थः लुङ् छन्दसि लुङ्लङ्लिट इति वर्त्तमाने लुङ् व्यवहिताश्चेति (पा० १, ४, ८२) प्रोपसर्गेण व्यवधानम् । ललामेति सुखनाम ललामं सुखं गच्छति प्राप्नोति ललामगुः शिश्नः । यद्वा ललामं पुण्ड्रं गच्छति ललामगुः लिङ्गं योनिं प्रविशदुत्थितं पुण्ड्राकारं भवतीत्यर्थः । कीदृशं ललामगुं विष्टीमिनं ष्टीम क्लेदे विशेषेण स्तीमनं क्लेदनं विष्टीमः घञ्प्रत्ययः विष्टीमः क्लेदोऽस्यास्ति विष्टीमी तम् अत इनिठनाविति अस्त्यर्थे इनिप्रत्ययः शिश्नस्य योनिप्रवेशे क्लेदनं भवतीत्यर्थः । यदा देवाः शिश्नक्रीडिनो भवन्तो ललामगुं योनौ प्रवेशयन्ति तदा नारी सक्थ्ना ऊरुणा ऊरुभ्यां देदिश्यते निर्दिश्यते, अत्यन्तं लक्ष्यते दिश्यतेर्यङ्प्रत्ययः भोगसमये सर्वस्य नार्य्यङ्गस्य नरेण व्याप्तत्वादूरुमात्रं लक्ष्यते इयं नारीतीत्यर्थः । तत्र दृष्टान्तः सत्यस्याक्षिभुवो यथेति सत्यं द्विविधम् अक्षिभ्यां भवतीत्यक्षिभु प्रत्यक्षम् एकं च श्रोत्रग्राह्यम् षष्ठी तृतीयार्थे । यथा कश्चिदक्षिभुवा प्रत्यक्षेण सत्येन निर्दिश्यते तत्र विश्वासो भवति तथा ऊरुणा दृष्टेन नारीति लक्ष्यते इत्यर्थः । श्रोत्रग्राह्ये तु सत्ये वक्तुराप्तत्वमपेक्षितम् ॥ २९ ॥

यद्ध॒रिणो॒ यव॒मत्ति॒ न पु॒ष्टं प॒शु मन्य॑ते । शू॒द्रा य॒दर्य॑जारा॒ न पोषा॑य धनायति ॥ ३० ॥

क्षत्ता पालागलीमभिमेथयति । यद्धरिणः । यदा हरिणो मृगः यवं सस्यम् अत्तिभक्षयति । अथ तदा क्षेत्री । न पुष्टम्पशु । पशुमिति प्राप्ते विभक्तिलोपः । पुष्टम्पशुम् मन्यते अवगच्छति । मम क्षेत्रम् भक्षितमिति यथा । एवम् शूद्रा यत् यस्य शूद्रस्य भर्तुः । अर्यजारा अर्यः वैश्यः जारो यस्याः सा अर्यजारा भवेत् तदा स शूद्रः क्षेत्री । न पोषाय ममेतदिति मन्यते।

नच तस्मान्धनायति । धनमिव च तां न मन्यते परस्योपभोग्यत्वात् ॥ ३० ॥

क्षत्ता पालागलीमाह । यत् यदा हरिणो यवमत्ति मृगो यदा क्षेत्रस्थं धान्यं भक्षयति तदा क्षेत्री पशु पशुं हरिणं पुष्टं न मन्यते मम धान्यभक्षणेन पशुः पुष्टो जातः सम्यगिति न जानाति किन्तु मदीयं क्षेत्रं भक्षितमिति दुःखी भवतीत्यर्थः । पशुशब्दात् सुपां सुलुगित्यमो लुक् । एवं शूद्रा शूद्रजातिः स्त्री यदा अर्य्यजारा भवात अर्य्यः स्वामिवैश्ययोरिति निपातनादर्य्यो वैश्यो जार उपपतिर्यस्याः सा अर्य्यजारा । शूद्राचामहत्पूर्वाजातिरिति (पा० ४, १, ४ वा० १, २) शूद्राज्जात्यर्थे टाप् । वैश्यो यदा शूद्रां गच्छति तदा शूद्रः पोषाय न धनायते पुष्टिं न इच्छति मन्द्रार्य्या वैश्येन भुक्ता सती पुष्टा जातेति न मन्यते किन्तु व्यभिचारिणी जातेति दुःखितो भवतीत्यर्थः अशनायोदन्येति क्यचि धनायतीति इच्छार्थे निपातः॥३०॥

यद्ध॑रि॒णो यव॒मत्ति॒ न पु॒ष्टं प॒शु म॑न्यते । शू॒द्रो य॒दर्य॑जारा॒ न पोष॑मनुमन्यते ॥ ३१ ॥

पालागली मत्याह । यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते क्षेत्रीति । यदुक्तं भवतोऽप्येतदेवमिति सोल्लुहमाह । कियांस्तु विशेषः । शूद्रः यत् अर्यायै अर्यायाः वैश्यायाः जारः जारयिता । तदा क्षेत्री वैश्यः आत्मनः पोषं नानुमन्यते । नहि सा तस्य पोष्या निकृष्टश्च शूद्रः उत्कृष्टा वैश्या इति । समाप्तमश्लीलभाषणम् ॥ ३१ ॥

पालागलीक्षत्तारमाह । यदा हरिणो यवमत्ति तदा बहु यथा तथा पशुं पुष्टं न मन्यते इदं भवतोऽपि तुल्यम् इयान् विशेषः यत् यदा शूद्रः अर्य्यायै अर्य्याया वैश्याया जारो भवति तदा वैश्यः पोषं पुष्टिं नानुमन्यते मम स्त्री पुष्टा जातेति नानुमन्यते किन्तु शूद्रेण नीचेन भुक्तेति क्लिश्यतीत्यर्थः । अश्लीलभाषणं समाप्तम् ॥ ३१ ॥

द॒धि॒क्राव्णो॑ अकारिषं जि॒ष्णोरश्व॑स्य वा॒जिनः॑ ।
सु॒र॒भि नो॒ मुखा॑ कर॒त् प्रण॒ आयू॑ᳬषि तारिषत् ॥३२॥

ऋत्विजो यजमानश्च सुरभिमतीमृचमन्तत आहुः वाचमेवं पुनन्ति । दधिक्राव्णः । अनुष्टुबश्वदेवत्या । यत् दधिक्राव्णः अश्वस्य संस्कारार्थमश्लीलभाषणम् अकारिषम् अकार्षम् अकार्ष्म कृतवन्तः वचनव्यत्ययः । एकवचनस्य स्थाने बहुवचनं बोध्यम् । उपरिष्टाद्बहूनि पदानि बहुवचनान्तानि दृश्यन्ते । किम्भूतस्य दधिक्राव्णः । जिष्णुः जेतुः अश्वस्य अशनस्य व्यापिनः वाजिनः । ओविजी भयचलनयोः वेजनवतः तत्र सुरभीणि सुगन्धीनि । अश्लीलभाषणेन हि दुर्गन्धीनि मुखानि भवन्ति पापहेतुत्वात् । नः अस्माकं मुखानि । निकारलोपश्छान्दसः करत् करोतु यज्ञ इत्यध्याहारः । किञ्च । प्र णः आयूंषि तारिषत् । प्रतारिषत् प्रवर्द्धयतु च नः अस्माकम् । बहुवचनं बालयौवनवृद्धवयोऽपेक्षम् ॥ ३२ ॥

का० (२०, ६, २१) महिषीमुत्थाप्य पुरुषा दधिक्राव्ण इत्याहुः । महिषीं यजमानस्य प्रथमपरिणीतां पत्नीमश्वसमीपसुप्तामुत्थाप्य पुरुषा अध्वर्युब्रह्मोद्गातृहोतृक्षत्तारो मन्त्रं पठेयुरिति सूत्रार्थः ॥ वामदेवात्मजदधिक्रावदृष्टाश्वदेवत्यानुष्टुप् । वयमध्वर्य्वादयः अकारिषमकार्ष्म कृतवन्तः वचनव्यत्ययः अश्लीलभाषणमिति शेषः किमर्थम् अश्वस्य संस्कारायेति शेषः अश्वसंस्कारायाश्लीलभाषणं कृतवन्त इत्यर्थः । कीदृशस्याश्वस्य दधिक्राव्णः दधाति धारयति नरामिति दधिः आदृगमहनेति किप्रत्ययः दधिः सन् क्रामतीति दधिक्रावा तस्य अन्येभ्योऽपि दृश्यत इति वनिप्प्रत्ययः विड्वनोरनुनासिकस्यादिति । धातोराकारः । जिष्णोः जयनशीलस्य । वाजिनः वजति गच्छति वाजी वाजोऽस्यास्तीति वा वाजी । तस्य च नोऽस्माकं मुखा मुखानि सुरभि सुरभीणि करत् करोतु यज्ञ-

इति शेषः अश्लीलभाषणेन दुर्गन्धं प्राप्तानि मुखानि सुरभीणि यज्ञः करोतीत्यर्थः । तथा च श्रुतिः (१३, २, ९९) सुरभिमतीमृचमन्ततोऽन्वाहुर्वाचमेव पुनत इति । सुरभिशब्दाद्विभक्तिलोपः । किञ्च नोऽस्माकमायूंषि जीवनानि बाल्ययौवनवार्द्धकानि प्रतारिषत् प्रतारयतु प्रवर्द्धयतु लेटि रूपम ॥ ३२ ॥

गायत्री त्रिष्टुब्जगंत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिंः शम्यन्तु त्वा ॥ ३३ ॥

पत्न्योऽसि पथङ्कल्पयन्ति । गायत्री त्रिष्टुप् पड्भिर्ऋग्भिः । तत्राद्या उष्णिक् चतस्रोऽनुष्टुभः परा त्रिष्टुप् । गायत्री च त्रिष्टुप् च जगती च अनुष्टुप् च । अनुष्टुप् च पङ्क्त्या सह बृहती च । उष्णिहा सह ककुप् च । सूचीभिः शम्यन्तु त्वाम् हे अश्व मदागमनमार्गभेदेन वर्त्मनिदर्शनं सूचीभिः क्रियते तेन यथा असिः प्रवर्तते ॥ ३३ ॥

का० (२०, ७, १) तिस्रः पत्न्योऽसिपथान् कल्पयन्त्यश्वस्य सूचीभिर्लोहराजतसौवर्णीभिर्मणिसंख्याभिर्गायत्री त्रिष्टुबिति द्वाभ्याम । गायत्री त्रिष्टुबिति षड्ऋचे द्वाभ्यां द्वाभ्यामृग्भ्यां महिष्याद्यास्तिस्रः पत्न्यः ताम्ररूप्यस्वर्णमयीभिः प्रत्येकमेकाधिकशतसंख्याभिः सूचीभिरश्वाङ्गेऽसेः शासस्य मार्गान् कुर्वन्ति शासस्य सुखप्रवेशाय सूचीभिर्वितुद्य वितुद्याश्वत्वचं जर्जरीकुर्वन्तीति सूत्रार्थः ॥ अश्वदेवत्याः षड्ऋचः आद्योष्णिक् । हे अश्व ! गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्त्या सह बृहती उष्णिहा सह ककुप् एतानि छन्दांसि सूचीभिरेताभिः त्वां शम्यन्तु संस्कुर्वन्तु विकरणव्यत्ययः असिपथार्थं त्वग्भेदनं संस्कारः ॥ ३३ ॥

द्विपदा याश्चतुंष्पदास्त्रिपंदा याश्च षट्पदाः । विच्छन्दा याश्च सच्छन्दाः सूचीभिंः शम्यन्तु त्वा ॥ ३४ ॥

द्विपदा याः । याः द्विपदाः याश्च चतुष्पदाः याश्च त्रिपदाः

याश्च पट्पदाः । याश्च विच्छन्दाः विगतं छन्दो याभ्यस्ताः । विषमाक्षराः विषमपदाः छन्दोलक्षणेनानभिसम्बद्धाः । याश्च सच्छन्दाः अन्यूनातिरिक्ताक्षराश्छन्दसां जातयः ताः सर्वाः सूचीभिः शम्यन्तु त्वाम् ॥ ३४ ॥

चतस्रोऽनुष्टुभः । द्वे पदे यासां ता द्विपदाः याः चतुष्पदा यास्त्रिपदाः याः षट्पदाः याः विच्छन्दाः विगतं छन्दो याभ्यस्ताः छन्दोलक्षणहीनाः याः सच्छन्दाः छन्दोलक्षणयुताः ताः सर्वाः छन्दोजातयः हे अश्व । सूचीभिः त्वां शम्यन्तु ॥ ३४ ॥

महानाम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः । मैघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥ ३५ ॥

महानाम्न्यो रेवत्यः । महानाम्न्य ऋचः शाक्वर्य इति या भण्यन्ते । रेवत्य एता अपि रेवत्यः । रैवतं साम भवति । विश्वाः सर्वाः आशा दिशः । प्रभूवरीः प्रभूततमाः । मैघीः मेघे भवाः विद्युतः तदुत्पन्नायाश्च वाचः ताः सर्वाः सूचीभिः शम्यन्तु । शमनेन हविः कुर्वन्तु त्वाम् ॥ ३५ ॥

महत् नाम यासां ता महानाम्न्यः शाक्वर्यं ऋचः । रेवत्यः ऋचः यस्यामृचि रैवतं साम गीयते सा रेवती । विश्वाः सर्वाः आशा दिशः । कीदृश्य आशाः प्रभूवरीः प्रभवन्ति सर्वभूतानि धारयितुं समर्था भवन्ति प्रभूवर्यः अन्येभ्योऽपि दृश्यन्त इति (पा० ३, २, ७५) वनिप् ऋन्नेभ्य इति ङीप् वनो र चेति तस्य रेफः पूर्वसवर्णदीर्घत्वम् । मेघे भवा मैघ्यः पूर्वसवर्णः मेघोत्था विद्युतः वाचो वेदलक्षणा अन्या अपि । एताः सर्वाः सूचीभिः हे अश्व ! त्वां शम्यन्तु हविः कुर्वन्तु ॥ ३५ ॥

नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया । देवानां पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ॥ ३६ ॥

नार्यस्ते । नृणामपत्यानि बहूनि स्त्रीलक्षणानि नार्यः । ते

तत्र। पत्न्यः यजमानस्य पत्न्यः। लोम लोमानि विचिन्वन्तु पृथक्कुर्वन्तु। मनीषया मनस इच्छया मनसः पर्यालोचनेन। देवानाञ्च याः पत्न्यः दिशः ताः सर्वाः सूचीभिः शम्यन्तु शमनेन हविष्कुर्वन्तु त्वाम् ॥ ३६ ॥

हे अश्व! नार्य्यः नृणामपत्यानि स्त्रियः ते तव लोम रोमाणि मनीषया मनस इच्छया विचार्य्य विचिन्वन्तु पृथक् कुर्वन्तु रोमेत्यत्र जातावेकवचनं विभक्तिलोपो वा। कीदृश्यो नार्य्यः पत्न्यः पत्युर्नो यज्ञसंयोग इति नकारः यजमानभार्य्या महिष्याद्या इत्यर्थः। किञ्च देवानामिन्द्रादीनां पत्न्यः दिशः प्राच्याद्याः सूचीभिः त्वां शम्यन्तु ॥ ३६ ॥

रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः॥३७॥

रजता हरिणीः। रजतसुवर्णसीसमय्यः सूच्यः। युजः सहयोजनाः। युज्यन्ते कर्मभिः सीमालक्षणैः। याः ताः अश्वस्य वाजिनः वेजनवतः त्वचि रोमसु। सीमाः सिमाशब्दः सीमपर्यायो मर्यादावचनः सीमानङ्कुर्वाणाः शम्यन्तु हविः कुर्वन्तु शम्यन्तीः हविष्कुर्वाणाः अश्वम् ॥ ३७ ॥

रजताः रजतमय्यः हरिणीः हरिण्यः सुवर्णमय्यः सीसाः सीसं ताम्रं तन्मय्यः। एव्यः सूच्यो भवन्ति। लोहमय्यो रजता हरिण्या दिशो वै लोहमय्योऽवान्तरदिशो रजता ऊर्ध्वा हरिण्यस्ताभिरेवैनं कल्पयन्तीति (१३, २, १०, ६) श्रुतेः। सूचीनां दिग्रुपत्वादश्वसंस्कारक्षमत्वम् ताः सूच्यः कर्मभिः अश्वदेहे सीमाकरलक्षणैः युज्यन्ते योगं प्राप्नुवन्ति सीमाकरणयोग्या भवन्तीत्यर्थः। कीदृश्यस्ताः युजः युज्यन्ते ता युजः संयुता एकीभूता इत्यर्थः। ताः सूच्यो वाजिनो वेगवतोऽश्वस्य त्वचि सिमाः सीमा रेखाः शम्यन्तु शम्यक् कुर्वन्तु सिमाशब्दः सीमापर्य्यायः। कीदृश्यस्ताः शम्यन्तीः शम्यन्त्यः संस्कारं कुर्वाणाः ॥ ३७ ॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूर्य । इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं यजन्ति ॥ ३८ ॥

कुविदङ्गेति व्याख्यातम् ॥ ३८ ॥

इयं व्याख्याता (१०, ३२) ॥ ३८ ॥

कस्त्वाच्छ्यति कस्त्वा विशास्ति कस्ते गात्राणि शम्यति । क उ ते शमिता कविः ॥ ३९ ॥

अश्वं विशास्ति अनुवाकेन षड्चेन । तत्राद्या गायत्री परा अनुष्टुभः । कस्त्वा । कः प्रजापतिः त्वाम् आच्छ्यति । छो छेदने । आछिनत्ति । त्वचः । कश्च प्रजापतिः त्वां विशास्ति त्वचा वियोजयति । कश्च प्रजापतिः ते तव गात्राणि शरीराणि शम्यति शमनेन हविर्भावमापादयति । क उ ते प्रजापतिरेव ते शमिता कविः मेधावी क्रान्तदर्शनः । यद्वा प्रश्नरूपोऽयं मन्त्रः । कोऽयं मनुष्यः त्वाम् आच्छ्यति कश्च त्वां विशास्ति कश्च ते शमिता कविः । न कश्चिदपीत्यभिप्रायः । उः पादपूरणः ॥३९॥

का० (२०, ७, ६) अश्वं विशास्त्यनुवाकेन कस्त्वाच्छ्यतीति । षड्चेनानुवाकेनाश्वं विशास्ति अश्वोदरं पाटयति मेदस उद्धरणाय वपाया अभावात् उदरमध्यस्थं स्थानं घृताभं घनं श्वेतं मांसं मेद इति सूत्रार्थः ॥ अश्वदेवत्याः षड्चः आद्या गायत्री । हे अश्व ! कः प्रजापतिः त्वा त्वामाच्छ्यति छिनत्ति छो छेदने लट् ओतः श्यनीति ओकारलोपः । हे अश्व । कः त्वां विशास्ति त्वचा वियोजयति । ते तव गात्राणि कः शम्यति शमनेन हविः करोति । कः उ कश्च प्रजापतिरेव कविर्मेधावी ते तव शमिता शमयिता प्रजापतिरेव सर्वं करोति नाहमित्यर्थः ॥ ३९ ॥

ऋतवस्त ऋतुथा पर्वं शमितारो विशासतु । संवत्सरस्य तेजसा शमीभिः शम्यन्तु त्वा ॥ ४० ॥

यस्मिन् पक्षे कस्त्वा प्रजापतिस्त्वेति व्याख्यातं तस्मिन्पक्षे प्रतार्यते । ऋतवस्ते । ऋतवश्च तव शमितारः ऋतुथा ऋतावृतौ कालेकाले । पर्व । पर्वणि पर्वणि । संवत्सरस्य च तेजसा । शमीभिः कर्मभिः शम्यन्तु शमनेन हविर्भावमापादयन्तु त्वां हे अश्व ॥ यदा तु कः त्वां विशासितुं समर्थो मनुष्य एवं व्याख्यातम् तदा ऋतवो देवाः ते शमितारः इत्येवं व्याख्येयम् ॥ ४० ॥

पञ्चानुष्टुभः । हे अश्व ! ऋतवः शमितारः ऋतुथा ऋतौ ऋतौ काले काले ते तव पर्व पर्वाणि अस्थिग्रन्थीन् शमीभिः कर्मभिः विशासतु भिन्नानि कुर्वन्तु । केन संवत्सरस्य संवत्सरात्मकस्य कालस्य तेजसा । किञ्च ऋतवः त्वा त्वां शम्यन्तु पर्वविशासनेन हविः कुर्वन्तु ॥ ४० ॥

अर्धमासाः परूंᳪषि ते मासा आच्छ्यन्तु शम्यन्तः । अहोरात्राणि मरुतो विलिष्टᳪ सूदयन्तु ते ॥ ४१ ॥

अर्धमासाः । अर्द्धमासाः मासाश्च ते तव परूंषि पर्वणि आछयन्तु आछिन्दन्तु शम्यन्तः शमनेन हविर्भावमापादयन्तः । किञ्च । अहोरात्राणि मरुतश्च विलिष्टन्दुःश्लिष्टं सूदयन्तु षूद क्षरणे पठ्यते । इह सन्धाने वर्तते वाक्ययोगात् सन्दधन्तु ते तव ॥ ४१ ॥

अर्धमासाः पक्षाः मासाश्च तदभिमानिनो देवाः शम्यन्तः संस्कुर्वन्तः सन्तो हे अश्व ! ते तव परूंषि पर्वाणि आच्छ्यन्तु समन्ताच्छिन्दन्तु ग्रन्थिर्ना पर्वपरुषीति कोशः । किञ्च अहोरात्राणि अहोरात्राभिमानिदेवा मरुतश्च देवाः ते तव विलिष्टं लिश अल्पीभावे

विशेषेणालपमक्रम् तद् सूदयन्तु सन्दधतु सूद निरालें अत्र सन्धानार्थः व्यर्थं मास्तु ॥ ४१ ॥

दैव्या अध्वर्य्यवस्त्वाच्छ्यन्तु वि च शासतु । गात्राणि पर्वशस्ते सिमाः कृण्वन्तु शम्यन्तीः ॥ ४२ ॥

दैव्या अध्वर्यवः । ये च दैव्या दिव्या अध्वर्यवः अश्विप्रभृतयः ते च त्वा त्वाम् । आछ्यन्तु वि च शासतु चकारो भिन्नक्रमः। विशासतु च। किञ्च गात्राणि पर्वशः ते तव सिमाः मर्यादाः कृण्वन्तु कुर्वन्तु शम्यन्तीः । मर्यादा दर्शनेन शमनं कुर्वाणाः ॥ ४२ ॥

देवानामिमे दैव्याः अश्विनौ देवानामध्वर्यू इत्युक्तत्वात् अश्विप्रभृतयो देवसम्बन्धिनोऽध्वर्य्यवः हे अश्व। त्वा त्वामाच्छ्यन्तु आच्छिन्दन्तु विशासतु च चकारो भिन्नक्रमः हविः कुर्वन्तु किञ्च ते तव गात्राणि विभक्तिव्यत्ययः गात्रेषु शरीरेषु पर्वशः पर्वाणि पर्वाणि सिमाः सीमा मर्य्यादाः कृण्वन्तु कुर्वन्तु कृ करणे स्वादिः कीदृशीः सीमाः शम्यन्तीः संस्कुर्वाणाः ॥ ४२ ॥

द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते । सूर्य्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ॥ ४३ ॥

द्यौस्ते द्यौश्च ते तव पृथिवी च अन्तरिक्षञ्च वायुश्च छिद्रं पृणातु पूरयतु ते । किञ्च । सूर्यश्च ते तव नक्षत्रैः सह लोकं स्थानं कृणोतु साधुया साधुम् । द्वितीयार्थे या छान्दसः ॥४३॥

द्यौः स्वर्गः पृथिवी अन्तरिक्षं लोकत्रयाभिमानिनो देवाः अग्निवायुसूर्य्याः वायुरन्योऽपि शरीरस्थः प्राणादिः हे अश्व। ते तव छिद्रं पृणातु वचनव्यत्ययः पृणन्तु पूरयन्तु यत् न्यूनं तत् पूरयन्तु। किञ्च नक्षत्रैः सह नक्षत्रयुक्तः सूर्यः ते तव साधुया साधुं समीचीनं लोकं कृणोतु करोतु सुपां सुलुगित्यादिना साधुशब्दात्परस्यामो यादेशः सूर्य्यस्ते उत्तमं लोकं ददात्वित्यर्थः ॥ ४३ ॥

शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः । शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ॥ ४४ ॥

शं ते । सुखं ते तव अस्तु हे अश्व परेभ्यः गात्रेभ्यः ।

शं सुखम् अवरेभ्यः । अस्तु । शम् अस्थभ्यः अस्थिभ्यः मज्जभ्यश्च अस्तु । शश्चास्तु तन्वे शरीराय । पष्ठ्यर्थे छन्दसि चतुर्थी वक्तव्येति षष्ठ्यर्थे चतुर्थी तन्वाः तव ॥ ४४ ॥

हे अश्व ! ते तव परेभ्योऽवयवेभ्य उच्चेभ्यः शिरआदिभ्यः शं सु शमस्तु । अवरेभ्यः अधःस्थेभ्यश्च पादादिभ्यो गात्रेभ्यः शमस्तु । अस्थभ्यः तवास्थिभ्यश्च शमस्तु अस्थिदधीति अस्यानुवृत्तौ छन्दस्यपि दृश्यत इति सूत्रेण हलादावप्यस्थिशब्दस्यानङादेशः । मज्जभ्यः पृष्ठधातुभ्योऽपि शमस्तु किम्बहुना तव तन्वै तन्वाः सर्वस्यापि शरीरस्य शमु सुखमेवास्तु । षष्ठी चतुर्थ्यर्थे आशिषि वा चतुर्थी । उ एवार्थे ॥ ४४ ॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किंᳪ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥ ४५ ॥

इत उत्तरं ब्रह्मोद्यमष्टादशर्चम् उत्तरमत्युत्तरैः परस्परं सम्वादः ब्रह्मोद्यम् । तत्राद्या चतस्रोऽनुष्टुभः का स्विदासीत्पूर्वचित्तिरित्याद्याश्च चतस्रोऽनुष्टुभः त्रिष्टुभोऽन्याः । होताध्वर्युम्पृच्छति कः स्विदेकाकी ॥ ४५ ॥

का० (२०, ७, १०) प्राग्वपाहोमाद्धोताध्वर्यू च सदसि संवदेते चतसृभिः कः स्विदेकाकीति पूर्ववत् । वपाहोमात्प्राक् च चतुर्भिर्भिः पूर्ववदुक्तिप्रत्युक्त्या सदोमध्ये गत्वा होता अध्वर्युश्च संवादं कुरुतः ॥ अष्टादश ऋचो ब्रह्मोद्यसंज्ञाः ब्रह्मोद्यं परस्परं संवादः आद्याश्चतस्रोऽनुष्टुभः का स्विदित्याद्याश्च (५३) अनुष्टुभः । होताध्वर्युं पृच्छति । व्याख्याता (९) ॥ ४५ ॥

सूर्य्यं एकाकी चरति चन्द्रमा जायते पुनः । अ-
ग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥ ४६ ॥

तम्प्रत्याह । सूर्य एकाकी चरति अग्रे व्याख्याता ॥ ४६॥
व्याख्याता (१०) ४६ ॥

किꣳ स्विद् सूर्य्यसमं ज्योतिः किꣳ समुद्रसमꣳ
सरः । किꣳ स्वित् पृथिव्यै वर्षीयः कस्य मात्रा न
विद्यते ॥ ४७ ॥

अध्वर्युर्होतारम्पृच्छति । किꣳस्वित्सूर्यसमं ज्योतिः । कि
ञ्च समुद्रसमं सरः । किंस्वित्पृथिव्यै पृथिव्याः वर्षीयः महत्तरं
कस्य च मात्रा परिमाणम् न विद्यते नास्ति ॥ ४७ ॥

अध्वर्य्युर्होतारं पृच्छति । हे होतः ! स्विदिति तर्के सूर्य्यसमं
सूर्यमण्डलतुल्यं ज्योतिः तेजः किं तत् ब्रूहि । समुद्रसमं सरः किं
स्वित् । पृथिव्यै पृथिव्याः सकाशात् वर्षीयः महत्तरं किं स्वित् प्रि-
यस्थिरेत्यादिना वृद्धस्य वर्षादेशः । कस्य मात्रा परिमाणं न
विद्यते ॥ ४७ ॥

ब्रह्म सूर्य्यसमं ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥४८॥

तं प्रत्याह । ब्रह्म सूर्यसमम् । ब्रह्म त्रयीलक्षणं परं वा । सू-
र्यसमं ज्योतिः । द्यौः समुद्रसमं सरः । इन्द्रः पृथिव्यै वर्षीयान्
महत्तरः । गोस्तु मात्रा न विद्यते गवा हि यज्ञो धार्यते स जग-
तः कारणम् भवतीत्येतदभिप्रायम् । पृथिवी वा गौः ॥ ४८ ॥

होता प्रत्याह सूर्य्यसमं ज्योतिर्ब्रह्म त्रयीलक्षणम् परं च । समु-
द्रसमं सरो द्यौरन्तरिक्षं यतो वृष्टिर्भवति । पृथिव्यै पृथिव्याः सका-
शात् इन्द्रः वर्षीयान् वृद्धतरः । तु पुनः गोः धेनोः मात्रा न विद्य-
ते यज्ञधारकत्वात् ॥ ४८ ॥

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ । येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वं भुवनमाविवेशाँ ३ ॥ ॥ ४९ ॥

ब्रह्मोद्गातारं पृच्छति पृच्छामि त्वा । पृच्छामि त्वा भवन्तम् चितये । चिती संज्ञाने परिज्ञानाय । हे देवसख उद्गातः । यदि त्वम् अत्र पृष्टः सन्मनसा प्रश्नविवेचनाय सूक्ष्मानर्थान् जगन्थ अवगच्छसि । येषु विष्णुः यज्ञः त्रिषु पदेषु गार्हपत्याहवनीयदक्षिणाग्निषु आ इष्टः यजेरेतद्रूपम् । तेषु विश्वं भुवनं भूतजातम् । आविवेश उत नेति । प्रश्ने प्लुतः ॥ ४९ ॥

का० (२०, ७, ११) ब्रह्मोद्गातारौ च पृच्छामि त्वेति । ब्रह्मोद्गातारं पृच्छति पृच्छामीति चकाराच्चतुर्भिर्ऋग्भिः सदसि ब्रह्मोद्गातारौ संवदेते ॥ ब्रह्मा उद्गातारं पृच्छति । पृच्छामि । देवानां सखा देवसखः राजाहःसखिभ्यष्टच् हे देवसख देवानां मित्र उद्गातः । त्वा त्वां चितये ज्ञानायाहं पृच्छामि अत्र मत्कृते प्रश्ने यदि त्वं मनसा जगन्थ जानासि गमेर्लिट् ये गत्यर्थास्ते ज्ञानार्थाः । किं पृच्छसीत्यत आह विष्णुः यज्ञो येषु त्रिषु पदेषु गार्हपत्याहवनीयदक्षिणाग्निषु एष्टः आ इष्टः यागेन तर्पितः यज्ञः कः तेषु त्रिषु पदेषु विश्वं सर्वं भुवनमाविवेश प्रविष्टमुत नेति प्रश्ने प्लुतः ॥ ४९ ॥

अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश । सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥ ५० ॥

प्रत्याह । अपि तेषु तेषु अहमस्मि अपि त्वञ्चेत्यपिशब्दः । तेषु गार्हपत्याहवनीयदक्षिणाग्निषु । त्रिषु पदेषु । अहमस्मि त्वञ्च केषु । येषु विश्वम्भूतजातम् आविवेश । आविष्टम् । यत्पुनरेतदुक्तम्भवता यदि त्वमत्र मनसा जगन्थेति । अत्र ब्रूमः ।

सद्यः एककालमेव । पर्येमि परिगच्छामि पृथिवीम् उत अपि च द्याम् एकेन अङ्गेन मनसा अस्य दिवः पृष्ठञ्च किमुत भूतजातानि तत्राविष्टानीति ॥ ५० ॥

उद्गाता प्रत्याह। येषु त्रिषु पदेषु विश्वं भुवनमाविवेशेति यत्त्वया पृष्टम् तेषु त्रिषु पदेषु गार्हपत्यादिषु अहमस्मि अहमपि तत्रैव स्थितोऽस्मि अपिशब्दात् त्वं च तत्रैवासि किमेतावदेव जानामि किन्तु पृथिवीमुतापि च द्यां स्वर्गं दिवः स्वर्गस्य पृष्ठमुपरिभागमपि सद्यः स्वक्षणमेव एकेनाङ्गेन मनसा पर्य्येमि परिगच्छामि सर्वं जानामि किम्पुनर्भूतानि प्रविष्टानीति भावः ॥ ५० ॥

केष्वन्तः पुरुष आविवेश कान्यन्तः पुरुषे अर्पितानि । एतद् ब्रह्मन्नुपवल्हामसि त्वा किᳬ स्विन्नः प्रतिवोचास्यत्र ॥ ५१ ॥

उद्गाता ब्रह्माणम्पृच्छति । केष्वन्तः । केषु अन्तर्मध्ये पुरुषः आविवेश आविष्टः । प्रविष्टः । कानि चान्तः मध्ये पुरुषे अर्पितानि । एतत् हे ब्रह्मन् उपवल्हामसि। वल्हा प्राधान्ये । इह तु आह्वानपूर्वे संहर्षे वर्तते । उपसङ्गम्याहूयोत्क्षिप्य बाहू पृच्छामि भवन्तम् । किंस्विन्नः किं पुनरस्माकम्प्रति वोचासि मध्य पुरुष आविवेश । किं च तानि प्राणाधीनानि करणानि अन्तः पुरुषे अर्पितानि । एतत् त्वा भवन्तं प्रति मन्वानः प्रतिजानानः अस्मि अवस्थितः । नच मायया प्रश्नया भवसि उत्तरः उद्गातृतरः मत् प्रति ब्रवीषि अत्र प्रश्ने ॥ ५१ ॥

उद्गाता ब्रह्माणं पृच्छति । हे ब्रह्मन् ! पुरुषः केषु पदार्थेषु अन्तर्मध्ये आविवेश प्रविष्टः । पुरुषे अन्तः पुरुषमध्ये कानि वस्तूनि अर्पितानि स्थापितानि । एतत् त्वा त्वां वयमुपवल्हामसि उपवल्हामः स्पर्धया पृच्छामः वल्ह प्राधान्यपरिभाषणहिंसादानेषु लट् इदन्तो मसि । अत्र प्रश्ने किं स्वित् त्वं प्रतिवो-

च्चासि प्रतिवदासि वच उमिति लेटि छान्दस उम् लेटोऽडाटाविति (पा० ३, ४, ९४) आडागमः ॥ ५१ ॥

पञ्चस्वन्तः पुरु॑ष॒ आवि॑वेश॒ तान्य॒न्तः पुरु॑षे॒ अर्पि॑तानि । ए॒तत्त्वात्र॑ प्रति॒मन्वा॒नो अ॑स्मि॒ न मा॒यया॑ भ॒वस्यु॒त्त॑रो॒ मत् ॥ ५२ ॥

मत्याह । पञ्चस्वन्तः पञ्चस्विति प्राणाः ख्यायन्ते । पञ्चसु प्राणेषु मत्तः मामपेक्ष्य ॥ ५२ ॥

ब्रह्मा प्रत्याह । पुरुषः आत्मा पञ्चसु प्राणेषु अन्तः प्राणमध्ये आविवेश प्रविष्टः तानि प्रसिद्धानि श्रोत्राधिकरणानि पुरुषे अन्तः मध्ये अर्पितानि प्राणात्मनामन्योऽन्यापेक्षासिद्धिरित्यर्थः न चात्मानमन्तरेण प्राणाः ख्यायन्ते न प्राणानन्तरेणात्मेति बह्वृचश्रुतेः। यद्वा पञ्चसु भूतेषु भूम्यादिषु आत्मा प्रविष्टस्तानि चात्मनि प्रविष्टानि तानि सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । उद्गातः । अहमत्र प्रश्ने त्वा त्वां प्रति एतदुत्तरं प्रतिमन्वानः प्रतिजानानोऽस्मि एवमुत्तरं ददामीत्यर्थः । किञ्च मायया बुद्ध्या मत् मत्तः उत्तरोऽधिकस्त्वं न भवसि मत्तो बुद्धिमान्नासीत्यर्थः ॥ ५२ ॥

का स्वि॑दासीत् पू॒र्वचि॑त्तिः॒ किँ स्वि॑दासीद् बृ॒हद्वयः॑ । का स्वि॑दासीत्पिलिप्पि॒ला का स्वि॑दासीत्पि॒शङ्गि॒ला ॥ ५३ ॥

होताध्वर्युं पृच्छति । कास्विदासीत् ॥ ५३ ॥

का० (२०, ७, १२) पुनः पूर्वापरेणोत्तरवेदिं का स्विदिति । ततः सदसो निष्क्रम्य हविर्धानस्य पुर उत्तरवेदेः पश्चादुपविश्य पूर्वौ पूर्वोक्तौ होत्रध्वर्यू चतुर्भिर्ऋग्भिः संवदेते इति सूत्रार्थः ॥ होताध्वर्युं पृच्छति । व्याख्याता (११) ॥ ५३ ॥

द्यौरा॑सीत् पू॒र्वचि॑त्ति॒रश्व॑ आसीद् बृ॒हद्वयः॑ । अ-

विरासीत्पिलिप्पिला रात्रिरासीत् पिशङ्गिला ॥ ५४ ॥

मत्याह । द्यौरासीत् । व्याख्याता ॥ ५४ ॥

व्याख्याता (१२) ५४ ॥

क ईमरे पिशङ्गिला क ईं कुरु पिशङ्गिला । क ईमास्कन्दमर्षति क ईं पन्थां विसर्पति ॥ ५५ ॥

अध्वर्युर्होतारम्पृच्छति । का ईमरे ईमिति चकारार्थे अरे इत्यामन्त्रितविषयः उभावपि निपातौ । का च अरे होतः पिशङ्गिला । कश्च आस्कन्दम् अर्षति कश्च पन्थां विसर्प्पति॥५५॥

अध्वर्युर्होतारं पृच्छति । ईमिति निपातश्चार्थः अरे होतः । का च पिशङ्गिला का च कुरुपिशङ्गिला कश्च आस्कन्दं णमुलन्तः आस्कन्द्य उत्प्लुत्य अर्षति गच्छति ऋष गतौ तुदादिः व्यत्ययेन शप् कश्च पन्थां पन्थानं मार्गं प्रति विसर्पति विविधं गच्छति ॥ ५५ ॥

अजारे पिशंगिला श्वावित् कुरुपिशंगिला । शश आस्कन्दमर्षत्यहिः पन्थां विसर्पति ॥ ५६ ॥

मत्याह । अजारे अजा नित्या रात्रिः अरे अध्वर्यो पिशङ्गिला । सा हि पिशं रूपम् गिलति भक्षयति । स हि तस्याः प्रभावः । श्वावित् सेधा उच्यते कुरु पिशङ्गिला । कृत्वा उपलभ्योपलभ्य पिशं रूपं गिलति भक्षयति सा कुरु पिशङ्गिला । सा हि शतम्मूलानाम् स्त्रो भक्षणाय कुक्षौ स्थापयति । शतं च भक्षयति । स हि तस्याः प्रभावः । शशश्च आस्कन्दम् आस्कन्द्यास्कन्द्य अर्षति गच्छति । स हि तस्य स्वभावः । अहिश्च स्वकीयं पन्थानं विसर्पति विकुर्वन् गच्छति ॥ ५६ ॥

अरे अध्वर्यो ! अजा पिशङ्गिला अजा नित्या माया रात्रिर्वा पिशङ्गिला पिशं रूपं गिलति भक्षयति पिशङ्गिला माया विश्वं ग्रसते

रात्रावपि रूपाणि न प्रतीयन्ते तमसा । श्वावित् सेधा कुरुपिशङ्गिला कुरुशब्दोऽनुकरणे पिश अवयवे इति धातोरिगुपधेति कप्रत्ययः कुरु इति शब्दानुकुर्वाणा पिशान् मूलाद्यवयवान् गिलति पिशङ्गिला मूलानां शतं कुक्षौ स्थापयति शतं च भक्षयतीति सेधायाः स्वभावः शशः वन्यो जीवविशेषः आस्कन्दमास्कन्द्यास्कन्द्य अर्पति स तस्य स्वभावः । अहिः सर्पः पन्थां पन्थानं विसर्पति विशेषेण गच्छति ॥ ५६ ॥

कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः । यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥ ५७ ॥

ब्रह्मोद्गातारं पृच्छति । कत्यस्य । अस्य यज्ञस्य कति कति विष्ठाः । विशेषेण तिष्ठति यज्ञो यासु ता विष्ठा अन्नानि । कति च अक्षराणि कति च होमाः कतिधा च समिद्धः समिधः यज्ञस्य त्वा भवन्तम् विदथा आवेदनेन हेतुना पृच्छं पृच्छामि । अत्र च यज्ञे कति होतारः ऋतुशः ऋतुयाज्यान् यजन्ति ॥ ५७ ॥

का० (२०,७,१३) उत्तरौ च कत्यस्येति । उत्तरौ पश्चादुक्तौ ब्रह्मोद्गातारौ चतुर्ऋग्भिः संवदेते ॥ ब्रह्मोद्गातारं पृच्छति । अस्य कति विष्ठाः कियन्ति अन्नानि का संख्या यासां ताः कति विशेषेण तिष्ठति यज्ञो यासु ताः विष्ठाः अन्नानि कियत्प्रकाराणि यज्ञे । अक्षराणि च कति । होमासः होमाः कति । समिद्धः समिधः कतिप्रकाराः धकारस्य द्वित्वमार्षम् । यज्ञस्य विदथा वेत्तीति विदः विदस्य भावो विदथा यज्ञावेदितृत्वेन हेतुना अत्र स्थले त्वा त्वामहं पृच्छमपृच्छम् पृच्छामि पृच्छतेर्लङ् अडभाव आर्षः । ऋतुशः । ऋतौ ऋतौ कति होतारः यजन्ति ॥ ५७ ॥

षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो

इ तिस्रः । यज्ञस्य ते विदथा प्रब्रवीमि सप्त होतार-
ऋतुशो यजन्ति ॥ ५८ ॥

प्रत्याह । षडस्य । रससंख्ययोपसञ्जिहीर्षुराह । अस्य य-
ज्ञस्य षड् विप्राः अङ्गानि सर्वाङ्गानां षड्रसात्मकत्वात् । शतम-
क्षराणि । छन्दसामुद्धारेणाप सञ्जिहीर्षुराह । चतुर्दशछन्दांसि
गायत्रीप्रभृतीनि चतुर्विंशत्यक्षरादीनि । चतुरुत्तराणि अतिधृ-
तिपर्यन्तानि । अतिधृतिस्तु षट्सप्तत्या भवति एतैः प्रायशो य-
ज्ञस्तायते । तत्र गायत्री अतिधृतिश्च शतम् । एवमुष्णिक् धृतिश्च
शतम् एवमन्येष्वपि छन्दस्सु इत्येतदभिप्रायम् । अशीतिर्होमाः ।
एकविंशतिरश्वमेधे यूपाः । तत्राग्निष्ठे अश्वस्तूपरोगोमृगान् नि-
युनक्ति । इतरेषु षोडश षोडश । तत्र विंशतियूपैः चतस्रोऽशी-
तयो भवन्ति तदभिप्रायमेतत् । कतिधा समिद्ध इति यदुक्तम्
अत्र ब्रूमः । समिधो ह तिस्रः । याभिः समिद्भिः संदीप्तो यज्ञः
तास्तिस्रः । अश्वस्तूपरोगोमृगाः प्राजापत्याः पशवः यज्ञस्य ते
तव विदथा वेदनेन । ब्रवीमि सप्त होतारः वषट्कर्तारः ऋतुशः
ऋतुयागेषु यजन्ति ॥ ५८ ॥

उद्गाता प्रत्याह । रससंख्यया अङ्गसंख्यामाह अस्य यज्ञस्य
षड् विप्राः अङ्गानि सर्वेषामङ्गानां षड्रसात्मत्वात् षडेवाङ्गानीत्यर्थः ।
अस्य यज्ञस्य शतमक्षराणि छन्दोभिर्यज्ञो निष्पाद्यते तानि च छन्दां-
सि गायत्र्यादीन्यतिधृत्यन्तानि चतुर्दश चतुर्विंशत्यक्षरादीनि च
तुर्वर्णान्तराणि तेषां क्रमोत्क्रमगत्या द्वाभ्यां शतमक्षराणि भवन्ति ।
तथा हि । गायत्री चतुर्विंशतिवर्णा अतिधृतिः षट्सप्तत्यक्षरा एवं
द्वे मिलित्वा शतमक्षराणि उष्णिक् २८ धृतिः ७२ एवं शतम् अनु-
ष्टुप् ३२ अत्यष्टिः ६८ एवं शतम् अष्टिः ६४ बृहती ३६ एवं शतम्
अतिशक्वरी ६० पङ्क्तिः ४० एवं शतम् शक्वरी ५६ त्रिष्टुप् ४४ एवं
शतम् अतिजगती ५२ जगती ४८ एवं शतमक्षराणि अनेनाभिप्राये-

ण शतमक्षराणीत्युक्तम् । होमाः अशीतिः अश्वमेध एकविंशतियूपाः तत्राग्निष्ठे मध्यमयूपेऽश्वतूपरगोमृगाग्नियुनक्ति इतरेषु षोडश पशून् तत्र विंशतियूपेषु चतस्रोऽशीतयः पशवो भवन्तीत्यभिप्राये णोक्तम् अशीतिर्होमाः । इ स्फुटं तिस्रः समिधः अश्वतूपरगोमृगाः प्राजापत्याः पशवः तद्रूपाभिः समिद्भिर्यज्ञो दीप्त इति तिस्रः समिधः उक्ताः । यज्ञस्य विदथा वेदनेन हेतुना ते तुभ्यं प्रब्रवीमि प्रवदामि । किञ्च सप्तहोतारो वषट्कर्त्तारः ऋतुशः ऋतुयागेषु यजन्ति ॥ ५८ ॥

को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् । कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः ॥ ५९ ॥

उद्‍गाता ब्रह्माणं पृच्छति । को अस्य कः अस्य वेद जानाति । कश्च द्यावापृथिवी अन्तरिक्षं च वेद । कश्च सूर्यस्य वेद जानाति । बृहतः महतः जनित्रञ्जन्म । कश्च वेद चन्द्रमसम् चन्द्रमसः इति विभक्तिव्यत्ययः । यतो जाः यतो जन्म ॥ ५९ ॥

उद्‍गाता ब्रह्माणं पृच्छति । हे ब्रह्मन् ! अस्य भुवनस्य भूतजातस्य नाभिं नभ्यते यत्र स नाभिर्बन्धनस्थानं कारणमिति यावत् नाभौ हि सर्वा नाड्यो बध्यन्ते नभ हिंसायामत्र बन्धनार्थः औणादिक इप्रत्ययः भूतजातस्य कारणं को वेद जानाति । द्यावापृथिवी द्यावापृथिव्यौ अन्तरिक्षं च को वेद। बृहतो महतो जनित्रं जन्म को वेद सूर्यस्योत्पत्तिः कस्मादित्यर्थः जनेरित्रप्रत्ययः । यतो जायते उत्पद्यते इति यतोजाः यत इत्युपपदे जनसनखनक्रमगमो विडिति विट्प्रत्ययः विड्वनोरनुनासिकस्येति नकारस्यात्वम् प्रथमा द्वितीयार्था यतोजाः यत उत्पन्नं चन्द्रमसमिन्दुं को वेद यतश्चन्द्रस्योत्पत्तिस्तं को वेदेत्यर्थः ॥ ५९ ॥

वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अ-

न्तरिक्षम् । वेद् सूर्य्यस्य बृहतो जनित्रमथो वेद् च
न्द्रमसं यतोजाः ॥ ६० ॥

मत्याह । वेदाहम् । वेद जानामि अहम् अस्य भुवनस्य नाभिम् नहनम् बन्धनं परं ब्रह्म । वेद च द्यावापृथिवी अन्तरिक्षं च ब्रह्मणो विकारभूतम् । वेद च सूर्यस्य बृहतः जनित्रम् परमात्मलक्षणम् । अथो अपि च वेद जानामि चन्द्रमसं यतोजाः चन्द्रमसः यतो जन्म परमात्मनः यस्माद्वा ॥ ६० ॥

ब्रह्मा प्रत्याह । अस्य भुवनस्य नाभिं कारणमहं वेद जानामि विष्णो लक्ष्मी वा परब्रह्मैव जगत्कारणं जानामीत्यर्थः । द्यावापृथिवी अन्तरिक्षं च वेद ब्रह्मणो विकारभूतं जानामि । बृहतः सूर्य्यस्य जनित्रमुत्पत्तिकारणं ब्रह्मैव वेद ॥ अथो अपि च यतोजां चन्द्रमसमहं वेद परमात्मनो जातं चन्द्रमहं वेद्मीत्यर्थः ॥ ६० ॥

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र
भुवनस्य नाभिः । पृच्छामि त्वा वृष्णो अश्वस्य रेतः
पृच्छामि वाचः परमं व्योम ॥ ६१ ॥

अध्वर्युं यजमानः पृच्छति पृच्छामि त्वा । पृच्छामि त्वां भवन्तम् परम् अन्तं पृथिव्याः । पृच्छामि च तत्र भुवनस्य नाभिः नहनम् । पृच्छामि च भवन्तम् वृष्णः सेक्तुः अश्वस्य रेतः । पृच्छामि च वाचः परमं व्योम व्यवनं स्थानम् ॥ ६१ ॥

का० (२०, ७, १४) यजमानोऽध्वर्युं पृच्छामि त्वेति । यजमानोऽध्वर्युं पृच्छति । हे अध्वर्यो ! पृथिव्याः परमन्तमवधिभूतं पर्य्यन्तं त्वा त्वामहं पृच्छामि द्विकर्मकः । यत्र यस्मिन् स्थले भुवनस्य भूतजातस्य नाभिः कारणंतदपि त्वां पृच्छामि । वृष्णः सेक्तुः अश्वस्य रेतः वीर्यं त्वां पृच्छामि । वाचो वाण्याः त्रयीलक्षणायाः परममुत्कृष्टं व्योम स्थानं त्वां पृच्छामि ॥ ६१ ॥

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः । अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ६२ ॥

प्रत्याह । इयं वेदिः । इयं वेदिः परः अन्तः पृथिव्याः । वेदिर्हि सर्वम् पृथिवीरूपा भवति । अयं च यज्ञः भुवनस्य नाभिः नहनम् यज्ञाद्धि प्रजाः प्रजायन्त इति श्रुतिः । अयं च सोमः चन्द्रमाः लता सोमो वा वृष्णः सेक्तुः अश्वस्य रेतः । अयं च ब्रह्मा ऋत्विक् वाचः परमं व्योम व्यवनं स्थानम् । त्रिवेदयोगात् । समाप्तं ब्रह्मोद्यम् ॥ ६२ ॥

का० (२०, ७, १५) इयं वेदिरित्यध्वर्युः । अध्वर्युः यजमानं प्रत्याह । इयं वेदिः उत्तरवेदिः पृथिव्याः परः अन्तोऽवधिः वेदेः सर्वपृथ्वीरूपत्वादित्यर्थः । भुवनस्य नाभिः कारणम् अयं यज्ञोऽश्वमेधः भुवनस्य प्राणिजातस्य नाभिः कारणम् यज्ञाद्धि प्रजाः प्रजायन्त इति श्रुतेः । वृष्णः अश्वस्य रेतः अयं सोमः सोमलताश्वस्य वीर्य्याज्जातेत्यर्थः । अयं ब्रह्मा ऋत्विक् वाचः त्रयीरूपायाः परमं व्योम स्थानम् ब्रह्मणस्त्रिवेदसंयोगादित्यर्थः ॥ ब्रह्मोद्यं समाप्तम् ॥ ६२ ॥

सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे । दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥ ६३ ॥

महिम्नः पुरोऽनुवाक्या । सुभूः स्वयम्भूः । अनुष्टुप् प्राजापत्या । साधु भवनः स्वयम्भूः स्वेच्छया गृहीतशरीरः । प्रथमः अनादिनिधनः पुरुषः । किमकरोदित्याह । अन्तर्महत्यर्णवे दधे ह । अन्तर्महतोऽर्णवस्य हेति निपातः पुराकल्पद्योतनार्थः । किन्दधे । गर्भम् ऋत्वियम् प्राप्तकालम् । कथम्भूतं ग-

र्भम् । यतो जातः प्रजापतिः । यस्माद् गर्भाद् जातः प्रजापतिः अनन्योपमः ॥ ६३ ॥

सुभूरिति पूर्वस्य महिम्नः पुरोऽनुवाक्या उत्तरस्य याज्या च । उदिते ब्रह्मोद्यं सम्प्रपद्याध्वर्युर्हिरण्मयेन पात्रेण प्राजापत्यं महिमानं ग्रहं गृह्णाति तस्य पुरोरुग्घिरण्यगर्भः समवर्त्तताग्र इत्यथास्य पुरोऽनुवाक्या सुभूः स्वयम्भूरिति (१३, ५, २, २३) श्रुतेः । प्रजापतिदेवत्यानुष्टुप् । ह इति प्रसिद्धम प्रथमः सर्वस्य आदिः अनादिनिधनः पुरुषः महति अर्णवे कल्पान्तकालीने समुद्रे अन्तर्मध्ये गर्भं दधे स्थापितवान् कीदृशः सुष्ठु भूरुत्पत्तिर्यस्मात्स सुभूः विश्वोत्पादकः स्वयं भवतीति स्वयम्भूः स्वेच्छाधृतशरीरः कीदृशं गर्भम् ऋत्वियम् ऋतुः प्राप्तो यस्य घस्प्रत्ययः प्राप्तकालम् यतो गर्भात् प्रजापतिः ब्रह्मा जातः उत्पन्नः ॥ ६३ ॥

होता॑ यक्षत्प्रजाप॑तिँ॒ सोम॑स्य महि॒म्नः । जु॒षतां॒ पिब॑तु॒ सोम॒ँ होत॒र्यज॑ ॥ ६४ ॥

प्रैषः । होता यक्षत् । दैव्यो होता यजतु । प्रजापतिम् सोमस्य महिम्नः संबन्धिनम् । स चेज्यमानः सन् जुषतां प्रीत्या परिगृह्णातु पिबतु च । सोमं त्वमपि च हे मनुष्यहोतः । यज ॥ ६४ ॥

महिम्नः प्रैषः । होता यक्षत्प्रजापतिमिति प्रैष इति (१३, ५, २, २३) श्रुतेः । आर्षी गायत्री । महिम्नः सोमस्य महिमसंज्ञस्य सोमग्रहस्य सम्बन्धिनं प्रजापतिं होता दैव्यो यक्षत् यजतु । इज्यमानः स प्रजापतिः जुषतां सोमं महिमग्रहं पिबतु च । हे मनुष्यहोतः ! त्वमपि यज ॥ ६४ ॥

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ रू॒पाणि॒ परि॒ता ब॑भूव । यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु । व॒यँ स्या॑-

म पतयो रयीणाम् ॥ ६५ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां
त्रयोविंशोऽध्यायः ॥ २३ ॥

प्रजापते न। व्याख्यातो मन्त्रः ॥ ६५ ॥

इति उव्वटकृतौ मन्त्रभाष्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

पूर्वस्य महिम्नो याज्या। प्रजापते न त्वदेतान्यन्य इति होता यजतीति (१३, ५, २, २३) श्रुतेः । व्याख्याता (१०, २०) ऋगियम् ॥ ६५ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे।
त्रयोविंशोऽयमध्यायो व्यरंसीदाश्वमेधिकः ॥ २३ ॥

चतुर्विंशोऽध्यायः ।

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्यार्ठ० सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ॥ १ ॥

इत उत्तरं श्रुतिरूपाः मन्त्रा आश्वमेधिकानां पशूनां देवतासंबन्धाभिधायिनोऽध्यायेनोच्यन्ते । अश्वस्तूपरो गोमृगस्ते प्राजापत्या इति शतपथोऽप्येतमध्यायं श्रुतिकृत्याह । अश्वस्तूपरो गोमृग इति तन्मध्ये यूप आलभत इत्यादिना ग्रन्थेन दिङ्मात्रं(१)प्रदर्शयन् सूत्रकृता चायमध्यायः सूत्रीकृतः येनैवमाह अग्निष्ठे अश्वस्तूपरो गोमृगाभियुनक्ति । यथोक्तपश्वादौ देवता इति । तत्र वैष्णवो वामन इत्येवमन्ताः पर्यङ्ग्याः । अश्वस्तूपरो निःशृङ्गः गोमृगो गवयः एते प्रजापतिदेवत्याः । कृष्णग्रीवश्छाग आग्नेयः पुरस्ताल्ललाटे (२)अश्वस्य बन्धनीय इति शेषः।(३)एवं

(१) दिङ्मात्रप्रदर्शनं कुर्वन्"इति पाठान्तरम्" वाराणसीस्थराजकीयसंस्कृतपाठशालीयोव्वटभाष्यपुस्तकेऽस्ति ॥ मुम्बईमुद्रितपुस्तके नास्ति ॥

(२) अश्वस्यैव इति पा० ॥ वाराणसी० पु० अस्ति । मुम्बई मु० पु० नास्ति

(३) सारस्वती मेषी अश्वस्य हन्वोरधस्ताद्बन्धनीया इति पा०॥ वाराणसी० पु० अस्ति । मुम्बईमु० पु० नास्ति ।

सारस्वती मेषी अधस्ताद्धन्वोः आश्विनौ अधोरामौ (१) अधः शुक्लौ छागौ पूर्वपादयोः । सोमपूषदेवत्यो नाभ्याम् बन्ध० । सूर्यदेवत्यः श्वेतः यमदेवतः कृष्णश्च पार्श्वयोः लोमयुते सक्थ्नी ययोस्तौ त्वष्टृदेवत्यौ सक्थ्योः । वायव्यः श्वेतः पुच्छे स्वपस्याय शोभनकर्मणे इन्द्राय वेहत् विष्णुदेवत्यो वामनश्च पशुः अश्वस्य पुच्छ एव । एते पर्यङ्ग्याः । एवमग्रेऽपि देवतापशुबन्धो ज्ञेयः । ललाटादिषु पशुबन्धनायाश्वशरीरं रज्जुभिर्वेष्टनीयम् । एते मध्यमयूपे ॥ १ ॥

श्रुतिरूपमन्त्रा आश्वमेधिकानां पशूनां देवतासम्बन्धविधायिनोऽध्यायेनोच्यन्ते । तत्राश्वमेधे एकविंशतिर्यूपाः सन्ति तत्र मध्यमो यूपोऽग्निष्ठसंज्ञः तत्र सप्तदश पशवो नियोजनीयाः । तान् देवतासम्बन्धकथनपूर्वकमाह । अश्वस्तूपरो गोमृगस्ते प्राजापत्याः अश्वः तूपरः शृङ्गोत्पत्तिकालेऽतीतेऽपि शृङ्गहीनः गोमृगः गवयः एते प्रजापतिदेवताः ततः प्रजापतये जुष्टं नियुनज्मीति मन्त्रेण बन्धनीयाः । एवमग्रेऽपि यो यद्देवत्यः पशुः स अमुष्मै जुष्टं नियुनज्मीत्यादिमन्त्रैर्बन्धनीयः । आग्नेयोऽग्निदेवतः कृष्णग्रीवः श्यामवर्णगलोऽजः अश्वस्य पुरस्तात् ललाटे उपायेन बन्धनीयः । हन्वोरधस्तात्सारस्वती मेषी बन्धनीया । आश्विनावधोरामौ अधोभागे शुक्लवर्णावजौ बाह्वोः अश्वस्य पूर्वपादयोरेकैकः । सोमपूषदेवत्यः श्यामः शुक्ल-

(१) अत्रायं पाठक्रमः वाराणसीस्थ राजकीयसंस्कृतपाठशालीयौव्वटभाष्यपुस्तकेऽस्ति। मुम्बईमुद्रित पुस्तके तु नास्ति। तद्यथा। अधः शुक्लौ छागौ अश्वस्य बाह्वोरग्रपादयोर्बन्धनीयौ सौमापौष्णः सोमपूषदेवत्यः श्यामः छागः अश्वस्य नाभ्यां बन्धनीयः॥ सौर्ययामौ श्वेतः कृष्णश्च सूर्यदेवत्यः श्वेतः पशुः यमदेवत्यः कृष्णश्च अश्वस्य पार्श्वयोर्बन्धनीयौ लोमशानि सक्थीनि ययोस्तौ लोमशसक्थौ त्वष्टृदेवत्यौ पशू अश्वस्य पुच्छे एव एते पर्यङ्ग्याः । एवमग्रेऽपि देवतापशुसंबन्धो ज्ञेयः अश्वस्य ललाटादिषु पशुबन्धनायाश्वशरीरं रज्जुभिर्वेष्टनीयम् एते मध्यमयूपे इति ॥ १ ॥

कृष्णरोमाजोऽश्वस्य *नाभ्यां* बन्धनीयः । श्वेतः कृष्णश्च सौर्ययामौ श्वेतः पशुः सूर्यदेवतो दक्षिणपार्श्वे बन्धनीयः । यमदेवतः कृष्णोऽश्वस्य वामपार्श्वे । त्वाष्ट्रौ त्वष्टृदेवतौ लोमशसक्थौ बहुरोमपुच्छिकौ पशू अश्वस्य सक्थ्योरूर्वोः पश्चात्पदयोरेकैकः । वायव्यः श्वेतवर्णः पशुरश्वस्य पुच्छे । स्वपस्याय शोभनकर्मणे इन्द्राय स्वपस्येन्द्रदेवतो वेहद् गर्भघातिनी वैष्णवो वामनः पशुश्च पुच्छ एव अङ्गान्तरायुक्तेः। एवमश्वादिभिः सह पञ्चदश भवन्ति एते पर्यङ्ग्या उच्यन्ते । अथाश्वस्य शरीरं तरणाय तुम्बीफलवद्रज्जुं बध्वा गुम्फनीयम् । ततः कृष्णग्रीवः आग्नेयो रराटे इत्यादयोऽश्वस्य शरीरे यथोक्तस्थाने सम्बद्धायां रज्ज्वां बन्धनीयाः ततो रोहितो धूम्ररोहित इत्यादयो द्वादशसंख्याकाः शितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्या इत्यन्ता *मध्यमे एव यूपे नियोज्याः सप्तदशैव पशून्मध्यमे यूप आलभत इति* (१३,५,१,१५)श्रुतेः । तत्र त्रयोऽश्वतूपरगोमृगाः द्वौ चाग्नेयादिकादशिनौ द्वादश रोहितादयः एवं सप्तदश मध्यमे यूपे । ततःपृषती क्षुद्रपृषतीत्यादीनां श्वेताः सौर्या इत्यन्तानां (१९) शतत्रयसंख्याकानां पशूनां मध्ये पञ्चदश पशूनेकैकस्मिन् यूपे युनक्ति ॥ एवमितरेषु यूपेषु पञ्चदश पञ्चदशैते पशवः एकैकश्चैकादशिनः । एवं *मध्यमयूपव्यतिरिक्तेषु विंशतियूपेषु* षोडश षोडश पशवो भवन्ति षोडश षोडशेतरेष्विति (१३,५,१,१५) श्रवणात् ॥ १ ॥

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥ २ ॥

रोहितो धूम्ररोहित इत्यादयः श्वेता वायव्याः श्वेताः सौर्या इत्येवमन्ता इतरेषु यूपेषु रोहितादिषु ये गुणवचनाः शु-

ब्दास्ते गुणिनं (१)पशुं लक्षयन्ति ॥ २—१९ ॥

रोहितः सर्वरक्तः धूम्ररोहितः धूम्रवर्णमिश्रो रक्तः तृतीयः कर्कन्धुरोहितः बदरसदृशरक्तः ते त्रयः सौम्याः सोमदेवत्याः सोमाय जुष्टं नियुनज्मीत्यादिमन्त्रेण प्रत्येकं मध्यमे यूप एव नियोज्याः । ततो बभ्रुः कपिलवर्णः अरुणबभ्रुः अरुणवर्णमिश्रः कपिलः शुकबभ्रुः शुकपक्षिसमवर्णः कपिलश्च ते त्रयो वारुणाः वरुणदेवत्याः मध्यमयूप एव । शिति कृष्णं रन्ध्रं छिद्रं यस्य स शितिरन्ध्रः अन्यत इत्येकपार्श्वे शितिरन्ध्रः समन्तं सर्वतः शितिरन्ध्रः एते सारस्वताः मध्यमे एव । शितिबाहुः श्वेतपूर्वपादः अन्यतः शितिबाहुः एकस्मिन्नेव पार्श्वे शितिपादः समन्तशितिबाहुः सर्वश्वेतबाहुः शिती धवलमेचकौ एते बार्हस्पत्याः बृहस्पतिदेवत्याः मध्यमे एव ॥

अथ द्वितीययूपे । पृषती विचित्रवर्णबिन्दुयुक्तशरीरा क्षुद्रपृषती सूक्ष्मविचित्रबिन्दुयुक्ता स्थूलपृषती स्थूलविचित्रबिन्दुयुक्ता एते स्त्रीपशवो मित्रावरुणदेवताः द्वितीये यूपे नियोज्याः ॥ २ ॥

शुद्धवा॑लः स॒र्वशु॑द्धवालो म॒णिवा॑ल॒स्त आ॑श्वि॒नाः श्येतः॑ श्ये॒ता॒क्षो॒ऽरुणस्ते रु॒द्राय॑ पशु॒पत॑ये क॒र्णा या॒मा अ॑वलि॒प्ता रौ॒द्रा नभो॑रूपाः पार्ज॒न्याः ॥ ३ ॥

(२)

(१) पशुमुपलक्षयन्ति इति पा० वाराणसी० पु० नास्ति । मुम्बई मु० पु० नास्ति ।

(२) अथ महीधरोक्तमर्थं विलिखामीति पाठ औव्वटभाष्ये कस्मिंश्चिदादर्शे केन चिट्टिप्पण्यां समुद्धृत इत्यनुमीयते परं तु मुम्बईमुद्रितपुस्तके शोधकेन मूलभाष्य एव हठात् सन्निवेशित इति वाराणसीस्थराजकीयसंस्कृतपाठशालीयौव्वटभाष्यपुस्तकदर्शनात् सुस्पष्टं भवति । स च पाठो मया त्यक्तः महीधरभाष्यस्यात्र सत्वेन पुनस्तत्सन्निवेशस्याप्रयोजकत्वादिति सुधीभिर्विभावनीयमिति । इतः परं बहुषु स्थलेषु औव्वटभाष्यं भाष्यकृता कृतमेव नास्तीति पूर्वोक्तौव्वटभाष्यपुस्तकदर्शनात् सुस्पष्टं भवतीति बोध्यम् ॥

शुद्धवालः शुभ्रवालः सर्वशुद्धवालः मणिशुद्धवालः मणिवर्णकेशः ते त्रयः आश्विदेवत्याः द्वितीये । श्येतः श्वेतवर्णः श्येताक्षः श्वेतनेत्रः अरुणः रक्तः ते त्रयो रुद्राय पशुपतये पशुपतिरुद्रदेवता द्वितीये । कर्णास्त्रयः पशुविशेषाः कर्णश्चन्द्रे च वृक्षे चेति विश्वोक्तेः कर्णाश्चन्द्रसदृशश्वेतकर्णास्त्रयः पशवः 'बहुवचनस्य त्रित्वे पर्यवसानात् यामाः यमदैवताः द्वितीये । अवलिप्ताः सगर्वास्त्रयो रौद्राः । एते द्वितीये पञ्चदश ॥ अथ तृतीये यूपे । नभोरूपाः आकाशवन्नीलवर्णाः पार्जन्याः पर्जन्यदेवताः पशवस्तृतीये नियोज्याः ॥ ३ ॥

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उषस्याः ॥ ४ ॥

पृश्निः विचित्रवर्णः तिरश्चीनानि पृश्नीनि बिन्दवो यस्य सः एवमूर्ध्वानि पृश्नीनि यस्य सः ते त्रयो मारुताः मरुद्देवत्यास्तृतीये । फल्गूः अपुष्टशरीरा लोहितोर्णी रक्तरोमवती पलक्षी श्वेता पलक्षशब्दो वलक्षार्थः श्वेतपर्यायः तास्तिस्रोऽजाः सारस्वत्यः सरस्वतीदेवतास्तृतीये । प्लीहाकर्णः प्लीहा रोगविशेषः तद्युक्तौ कर्णौ यस्य स प्लीहकर्णः *अन्येषामपि दृश्यत* इति (पा० ६, ३, १३७) संहितायां दीर्घः शुण्ठकर्णः ह्रस्वकर्णः अध्यालोहकर्णः रक्तवर्णकर्णः ते त्रयस्त्वाष्ट्राः त्वष्टृदेवतास्तृतीये । कृष्णग्रीवः शितिकक्षः श्वेतकक्षः अञ्जिसक्थः आञ्जि पुण्ड्रं सक्थ्नोरूर्वोर्यस्य सः ते त्रय ऐन्द्राग्नाः इन्द्राग्निदेवताः तृतीये । पञ्चदश पूर्णाः ॥ कृष्णाञ्जिः कृष्णपुण्ड्रः अल्पाञ्जिः महाञ्जिः अल्पमाञ्जि यस्य महदञ्जि यस्य स तथा ते त्रय उषस्याः उषोदेवताश्चतुर्थे यूपे नियोज्याः ॥ ४ ॥

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञा-

ता अदि॑त्यै स॒रूपा॑ धा॒त्रे व॑त्सत॒र्यो॑ दे॒वानां॒ पत्नी॑भ्यः ॥५॥

विचित्रवर्णास्तिस्रः स्त्रीपशवो वैश्वदेव्यः विश्वदेवदेवताश्चतुर्थे । रोहिण्यः । रक्तवर्णाः त्र्यवयः सार्धसंवत्सरास्तिस्रोऽजा वाचे वाग्देवताश्चतुर्थे । अविज्ञाताः कृष्णग्रीवादिचिह्नविज्ञानशून्यास्त्रयः पशवोऽदित्यै अदितिदेवताश्चतुर्थे । सरूपाः समानरूपास्त्रयः पशवो धात्रे धातृदेवताश्चतुर्थे । एवं पञ्चदश । अथ पञ्चमे यूपे तिस्रो वत्सतर्यः बालछाग्यो देवानां पत्नीभ्यः तद्देवताः पञ्चमे ॥ ५ ॥

कृ॒ष्णग्री॑वा आग्ने॒याः शि॑ति॒भ्रवो॒ वसू॑ना॒ꣳ रोहि॑ता रु॒द्राणा॑ꣳ श्वे॒ता अ॑वरो॒किण॑ आदि॒त्यानां॒ नभो॑रूपाः पार्ज॒न्याः ॥ ६ ॥

कृष्णग्रीवाः कालकण्ठास्त्रयः पशव आग्नेयाः अग्निदेवताः पञ्चमे। शितिभ्रवः श्वेतवर्णभ्रूयुक्तास्त्रयो वसूनां वसुदेवताः पञ्चमे । रोहिताः रक्तवर्णास्त्रयः रुद्राणां रुद्रदेवताः पञ्चमे । श्वेताः अवरोकिणः अवलोकिनः यद्वा अवाधस्ताद्रोकः छिद्रं येषां ते छिद्रं निर्व्यथनं रोकः ते त्रयः आदित्यानां तद्देवताः पञ्चमे। अथ षष्ठे यूपे । नभोरूपाः पार्जन्यास्त्रयः षष्ठे ॥ ६ ॥

उ॒न्नत॑ ऋष॒भो वा॑म॒नस्त ऐ॑न्द्रावैष्ण॒वा उ॑न्न॒तः शि॑ति॒बाहुः॑ शिति॒पृष्ठस्त ऐ॑न्द्राबार्हस्प॒त्याः शु॒करू॑पा वाजि॒नाः क॒ल्माषा॑ आग्निमारु॒ताः श्या॒माः पौ॒ष्णाः ॥७॥

उन्नतः उच्चः ऋषभः पुष्टः वामनः बह्वन्यपि वयसि गते वृद्धिरहितः ते त्रय ऐन्द्रावैष्णवाः इन्द्रविष्णुदेवताः षष्ठे । उन्नतः शितिबाहुः श्वेतपूर्वपादः शितिपृष्ठः श्वेतपृष्ठः ते त्रयः ऐन्द्राबार्हस्पत्याः । इन्द्रबृहस्पतिदेवताः । षष्ठे । शुकरूपाः शुकपक्षिसमवर्णाः त्रयो वाजिनाः वाजिदेवता षष्ठे । कल्माषाः कर्बुरास्त्रयः पशव आग्निमारुताः षष्ठे। एवं पञ्चदश। अथ सप्तमे यूपे । श्यामाः शुक्लकृष्णवर्णाः पौष्णाः पूषदेवताः सप्तमे ॥ ७ ॥

एता ऐन्द्राग्रा द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवा वशा मैत्रावरुण्योऽन्यतएन्यो मैत्र्यः ॥ ८ ॥

एताः कर्बुरवर्णास्त्रय इन्द्राग्निदेवताः सप्तमे । द्विरूपाः वर्णद्वयोपेतास्त्रयः अग्नीषोमीयाः अग्निसोमदेवत्याः सप्तमे । वामना अनड्वाहः त्रय आग्नावैष्णवाः अग्निविष्णुदेवत्याः सप्तमे । वशाः वन्ध्याः त्रिस्रोऽजाः मैत्रावरुण्यः तद्देवताः सप्तमे ॥ अथाष्टमे यूपे । अन्यत एन्यः एकपार्श्वे कर्बुरवर्णास्तिस्रोऽजा मैत्र्यः मित्रदेवत्याः अष्टमे ॥ ८ ॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेता वायव्या अविज्ञाता अदित्यै सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥ ९ ॥

कृष्णग्रीवा आग्नेयास्त्रयः अष्टमे । बभ्रवः कपिलवर्णास्त्रयः सौम्या सोमदेवत्याः अष्टमे श्वेतास्त्रयः वायव्याः वायुदेवत्याः अष्टमे । अविज्ञाताः चिह्नविशेषणाज्ञातास्त्रयः अदितिदेवत्याः अष्टमे ॥ अथ नवमे । सरूपाः धातृदेवत्याः नवमे । वत्सतर्यः देवपत्नीदेवत्यास्तिस्रः नवमे ॥ ९ ॥

कृष्णा भौमा धूम्रा आन्तरिक्षा बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारकाः ॥ १० ॥

कृष्णाः भौम्याः भूमिदेवत्यास्त्रयः नवमे । धूम्रवर्णास्त्रयः अन्तरिक्षदेवत्याः नवमे । बृहन्तो महान्तस्त्रयः दिव्या द्युदेवत्याः नवमे ॥ अथ दशमे शबलाः कर्बुरास्त्रयः वैद्युताः विद्युद्देवत्याः दशमे । सिध्मा सिध्माख्यरोगवन्तस्त्रयः तारकाः नक्षत्रदेवत्या दशमे ॥ १० ॥

धूम्रान् वसन्तायालभते श्वेतान् ग्रीष्माय कृष्णान् वर्षाभ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥ ११ ॥

धूम्रवर्णान् त्रीनजान् वसन्ताय वसन्तदेवतानालभते नियुनक्ति दशमे। श्वेतान् त्रीन् ग्रीष्माय दशमे। कृष्णवर्णान् त्रीन् वर्षाभ्यः दशमे॥ अथैकादशे अरुणान् रक्तान् त्रीन् शरदे एकादशे। पृषतः नानावर्णबिन्दुयुक्तान् त्रीन् हेमन्ताय एकादशे। पिशङ्गान् लोहितमिश्रकपिलवर्णान् त्रीन् शिशिराय एकादशे॥ ११॥

त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्सा अनुष्टुभे तुर्य्यवाह उष्णिहे॥ १२॥

सार्धसंवत्सरास्त्रयः गायत्र्यै एकादशे। सार्धद्विसंवत्सरास्त्रयः त्रिष्टुभे एकादशे॥ अथ द्वादशे यूपे। दित्यवाहः द्विसंवत्सरास्त्रयो जगत्यै द्वा०। त्रिवत्साः त्रिवर्षाः त्रयोऽनुष्टुभे द्वा०। तुर्य्यवाहः सार्धत्रिसंवत्सरास्त्रय उष्णिहे द्वा०॥ १२॥

पष्ठवाहो विराज उक्षाणो बृहत्या ऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे॥ १३॥

पष्ठवाहः चतुःसंवत्सरास्त्रयो विराजे द्वा०। उक्षाणः सेचनसमर्था युवानस्त्रयः बृहत्यै द्वा०॥ अथ त्रयोदशे यूपे। ऋषभाः उक्षणोऽप्यधिकवयस्काः त्रयः ककुभे त्रयोदशे। अनड्वाहः शकटवहनसमर्था अजास्त्रयः पङ्क्त्यै त्रयो०। धेनवः नवप्रसूता अजास्तिस्रः अतिच्छन्दसे त्रयो०॥ १३॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्य्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः॥ १४॥

अथ चातुर्मास्यदेवाः पशवः श्वेताः सौर्य्या इत्यन्ताः। तत्र प्रथमं वैश्वदेवपर्व्वपशव उच्यन्ते। कृष्णग्रीवाः त्रयः आग्नेयाः त्रयो०। बभ्रवः कपिलास्त्रयः सौम्याः॥ अथ चतुर्दशे यूपे उपध्वस्ताः उपध्वंसनमधः पतनं तद्गुणविशिष्टा वर्णान्तरमिश्रिता वा त्रयः स-

वितृदेवताः चतु० । चरसतर्ष्यः तिस्रः सरस्वतीदेवताः चतु० । श्यामाः शुक्लकृष्णवर्णाः पौष्णाः पूषदेवत्याः चतु० ॥ पृषन्तयः तनुकाया विचित्रवर्णा वा त्रयो मरुद्देवताः चतु० । बहुरूपास्त्रयो वैश्वदेवाः चतु० ॥ अथ पञ्चदशे । वशाः वन्ध्यास्तिस्रो द्यावापृथिवीयाः द्यावापृथिवीदेवत्याः पञ्च० ॥ १४ ॥

उक्ताः संञ्चरा एता ऐन्द्राग्नाः कृष्णा वारुणाः पृश्नंयो मारुताः कायास्तूपराः ॥ १५ ॥

अथ वरुणप्रघासपर्वपशव उच्यन्ते । सञ्चरशब्देन कृष्णग्रीवा आग्नेया इत्यादयः पूर्वकण्डिकोक्ताः पञ्चदश पशव उच्यन्ते पञ्च सञ्चराणि हवींषि भवन्तीति यत् यथा चातुर्मास्येषु चतुर्ष्वपि पर्वसु आग्नेयादीनि पञ्च हवींषि समानानि एवमपि चतुर्णां पर्वणां सम्बन्धिनाम् आद्यानां पञ्चानां देवानामाद्या एते पञ्चदश पशवः समाना एव भवन्ति । तेन सञ्चरा उक्ताः आग्नेयादयः पञ्चदश पशव उक्ता इत्यर्थः । आग्नेयाः कृष्णग्रीवास्त्रयः पञ्चदशे । सौम्याः बभ्रवस्त्रयः पञ्च० । सावित्रा उपध्वस्ताः त्रयः पञ्च० । सारस्वतयः चरसतर्ष्यः तिस्रः पञ्च० ॥ अथ षोडशे । पौष्णाः श्यामाः त्रयः षोडशे । एते संचराः उक्ताः । एताः कर्बुरास्त्रय ऐन्द्राग्नाः इन्द्राग्निदेवताः षो० । कृष्णाः कृष्णवर्णास्त्रयो वारुणाः वरुणदेवताः षो० । पृश्नयः तनुशरीरास्त्रयः मारुताः षो० । त्रयः तूपरा निःशृङ्गाः कायाः कदेवताः षो० ॥ १५ ॥

अग्नयेऽनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो वष्किहान्मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥ १६ ॥

अथ सप्तदशे । अथ साकमेधपशवः । प्रथमजान् मातुः प्रथमगर्भे जातान् त्रीन् अजान् अनीकवते अनीकवद्गुणविशिष्टायाग्नये आलभते नियुनक्ति सप्त० । वातसमूहो वात्या तया सह वर्तन्ते

इति सवान्याः वातमण्डलीमध्यस्थान् त्रीनजान् सान्तपनेभ्यः म-रुद्भ्यः सप्त०। घण्किहान् चिरप्रसूतान् त्रीन् गृहमेधिभ्यो मरुद्भ्यः सप्त०। संसृष्टान् सह सृष्टान् त्रीन् क्रीडिभ्यो मरुद्भ्यः सप्त०। अनु-सृष्टान् अनु क्रमेण जातान् त्रीन् स्वतवद्भ्यो मरुद्भ्यः सप्त० ॥१६॥

उक्ताः संश्चरा एता ऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः ॥ १७ ॥

अथाष्टादशे यूपे महाहविः पशवः कृष्णग्रीवादयः पञ्चदश पूर्व-वत् ॥ अथैकोनविंशतितमे एताः कर्बुरास्त्रय ऐन्द्राग्नाः एकोन०। प्राशृङ्गाः संहितायां दीर्घः प्रकृष्टशृङ्गयुक्ता माहेन्द्राः महेन्द्रदेवताः ए-कोन०। बहुरूपास्त्रयो वैश्वकर्मणाः विश्वकर्मदेवताः एकोन० ॥ १७॥

धूम्रा बभ्रुनीकाशाः पितॄणाᳯ सोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदां कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥

अथ पितृयेष्टिदेवतापशवः। धूम्राः कृष्णवर्णमिश्रा लोहितवर्णाः बभ्रुनीकाशाः कपिलवर्णसदृशास्त्रयः पशवः सोमवतां पितॄणां नि-योज्याः एकोन०। बभ्रवः कपिलाः धूम्रनीकाशाः धूम्रा इव नितरां काशन्ते इति तादृशास्त्रयः बर्हिषदां पितॄणामेकोन० ॥ अथ विंशे यूपे। कृष्णा बभ्रुनीकाशाः अग्निष्वात्तानां पितॄणां विंशे। कृष्णाः पृ-षन्तः बिन्दुयुक्ताः त्रैयम्बकाः त्र्यम्बकदेवताः विंशे ॥ १८ ॥

उक्ताः संश्चरा एताः शुनासीरीयाः श्वेता वाय-व्याः श्वेताः सौर्याः ॥ १९ ॥

अथ शुनासीरीयपशवः। तत्र सञ्चराः आग्नेयादयः पञ्चदशो-क्ताः। तेन कृष्णग्रीवा आग्नेयाः विंशे। बभ्रवः सौम्याः विंशे। उप-ध्वस्ताः सावित्राः विंशे ॥ अथैकविंशे यूपे। पञ्चतय्यः सारस्वत्यः एकविंशे। श्यामाः पौष्णाः एक०। एताः कर्बुराः शुनासीरीयाः शु-नासीरदेवताः एक०। श्वेताः त्रयो वायव्याः वायुदेवत्याः एक० ॥

श्वेताः त्रयः सौर्याः सूर्यदेवताः एक० ॥ एवं समाप्ताः यूपाः । इत्य-श्वाद्याः सौर्य्यान्ताः सप्तविंशत्यधिकशतत्रयं ग्राम्याः सर्वे उक्ताः॥१९॥

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिका हेमन्ताय ककराञ्छिशिराय विककरान् ॥ २० ॥

वसन्ताय कपिञ्जलानालभत इत्यादयः विश्वेषां देवानां पृषन्त इत्येवमन्ता यूपान्तरेषु त्रयोदश त्रयोदशारण्याः पशव आलभ्यन्ते ॥ (१)तत्र ये पशवो न ज्ञायन्ते ते निगमनिघण्टुनिरुक्तव्याकरणेभ्यो ज्ञातव्याः तत्सम्प्रग् विद्भ्यश्चाटविकेभ्यः) ॥ २०—४० ॥

इति उव्वटकृतौ मन्त्रभाष्ये चतुर्विंशोऽध्यायः ॥ २४(२) ॥



अथारण्याः पशव उच्यन्ते ॥ अत्रैकविंशतिर्यूपाः तेषां यूपानां विंशतिरन्तरालानि तेष्वन्तरालेषु अन्तरालोत्पत्तिक्रमेण कपिञ्जलादयस्त्रयोदश त्रयोदश पशव आलम्भनीयाः । अत्र यूपान्तरालेष्वारण्यपशूनां बन्धनोपाय उक्तो मानवसूत्रे नाडीषु प्लुषिमशकान् करण्डेषु सर्पान् पञ्जरेषु मृगव्याघ्रसिंहान् कुम्भेषु मकरमत्स्यमण्डूकान् जालेषु पक्षिणः कारासु हस्तिनो नौषु चोदकानि यथार्थमितरानिति । ये पशवो येनोपायेन यूपान्तरालेषु तिष्ठन्ति ते तेनोपायेन स्थापनीया इति तात्पर्य्यम् ॥ अत्र येषामारण्यजीववाचिपदानामर्था न ज्ञायन्ते ते निगमनिरुक्तनिघण्टुव्याकरणोणादिवृत्त्यभिधा-

(१) अयं पाठो वाराणसी० पु० अस्ति ॥ मुम्बईमु० पु० नास्ति

(२) अत्राध्याये स्थलत्रये एव श्रीमतोव्वटेन भाष्यं कृतमिति वाराणसीस्थराजकीयसंस्कृतपाठशालीयौव्वटभाष्यपुस्तकदर्शनात् तथान्यत्र मुद्रितपुस्तकेषु चाग्रेवाध्याये तृतीयमन्त्राधस्तात् (महीधरोक्तमर्थं विलिखामीति) लेखाच्च सुस्पष्टं प्रतीयते" इति ।

मग्रन्थेभ्यो विलोक्यावगन्तव्याः आटवीकेभ्यश्च लक्षणीयाः ॥ तत्र 'प्रथमोत्पन्ने यूपान्तराले त्रीन् कपिञ्जलान् वसन्ताय आलभते नियुनक्ति। त्रीन् कलविङ्कान् चटकान् ग्रीष्माय। तित्तिरीन् त्रीन् वर्षाभ्यः। वर्त्तिका पक्षिविशेषान् शरदे। ततस्त्रयाणां ककराणां मध्ये एकं ककरं हेमन्ताय ॥ अथ द्वितीयेऽवकाशे शिष्टौ द्वौ ककरौ पक्षिविशेषौ हेमन्ताय। त्रीन् विककरान् शिशिराय ॥ २० ॥

समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान् मित्राय कुलीपयान् वरुणाय नाक्रान् ॥ २१ ॥

त्रीन् शिशुमारान् जलचरजन्तून् समुद्रायालभते। त्रीन्मण्डूकान् भेकान् पर्जन्याय। त्रयाणां मत्स्यानां मध्ये द्वौ अद्भ्यः। अथ तृतीयेऽवकाशे एकं शिष्टं मत्स्यमद्भ्यः। त्रीन् कुलीपयान् जलजान् मित्राय। त्रीन् नाक्रान् नक्रा एव नाक्रास्तान् जलचरान् वरुणाय॥२१॥

सोमाय हुंसानालभते वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान् मित्राय मद्गून् वरुणाय चक्रवाकान् ॥२२॥

त्रीन् हंसान् सोमाय। तिस्रो बलाकाः बकपत्नीः वायवे॥ अथ चतुर्थेऽवकाशे। त्रीन् क्रुञ्चान् पक्षिणः इन्द्राग्निभ्याम्। त्रीन् मद्गून् जलकाकान् मित्राय। त्रीन् चक्रवाकान् वरुणाय ॥ २२ ॥

अग्नये कुटरूनालभते वनस्पतिभ्य उलूकानग्नीषोमाभ्यां चाषानश्विभ्यां मयूरान् मित्रावरुणाभ्यां कपोतान् ॥ २३ ॥

त्रीन् कुटरून् कुक्कुटानग्नये। ततस्त्रयाणामुलूकानां मध्ये एकमुलूकं वनस्पतिभ्यः॥ अथ पञ्चमेऽवकाशे द्वौ उलूकौ काकवैरिणौ त्रीन् चाषानग्नीषोमाभ्यां त्रीन् मयूरानश्विभ्यां त्रीन् कपोतान् मित्रावरुणाभ्याम ॥ २३ ॥

सोमाय लवानालभते त्वष्ट्रे कौलीकान् गोषादी-र्देवानां पत्नीभ्यः कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥ २४ ॥

त्रयाणां लवानां लावकानां मध्ये द्वौ सोमाय ॥ अथ षष्ठेऽवकाशे एकं लवं सोमाय । कौलीकान् पक्षिणः त्वष्ट्रे । तिस्रो गोषादीः गवां मादयित्रीः पक्षिणीः देवानां पत्नीभ्यः । तिस्रः कुलीकाः पक्षिणीः देवजामिभ्यः देववधूभ्यः जामिः स्वसृकुलस्त्रियोः । त्रीन् पारुष्णसंज्ञान् गृहपतयेऽग्नये ॥ २४ ॥

अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः सन्धिभ्यो जतूर्मासेभ्यो दात्यौहान् संवत्सराय महतः सुपर्णान् ॥ २५ ॥

अथ सप्तमेऽवकाशे त्रीन् पारावतान् कलरवानह्ने तिस्रः सीचापूः पक्षिणीः रात्र्यै तिस्रो जतूः पात्राख्याः पक्षिणीः अहोरात्रयोः सन्धिभ्यः । त्रीन् दात्यूहान् कालकण्ठान् मासेभ्यः त्रयाणां महतां सुपर्णानां मध्ये एकं संवत्सराय ॥ अथाष्टमेऽवकाशे द्वौ महान्तौ सुपर्णौ संवत्सराय ॥ २५ ॥

भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान् दिवे काशान् दिग्भ्यो नकुलान् बभ्रुकानवान्तरदिशाभ्यः २६

भूम्यै आखून् मूषकान् त्रीन् पाङ्क्त्रान् मूषकजातिविशेषानन्तरिक्षाय काशान् तद्भेदानेव दिवे त्रीन् नकुलान् दिग्भ्यः तत्र द्वौ अष्टमे ॥ अथ नवमे एकम् । त्रीन् बभ्रुकानवान्तरादिशाभ्यः ॥ २६ ॥

वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून् विश्वेभ्यो देवेभ्यः पृषतान् साध्येभ्यः कुलुङ्गान् ॥ २७ ॥

त्रीनृष्यान् वसुभ्यः ऋष्यादयो मृगविशेषाः । रुद्रेभ्यः रुरून् ।

त्रीन् न्यङ्कूनादित्येभ्यः ॥ अथ दशमेऽवकाशे त्रीन् पृषतान् विश्वेभ्यो देवेभ्यः त्रीन् कुलुङ्गान् साध्येभ्यः ॥ २७ ॥

ईशानाय परस्वत आलभते मित्राय गौरान् वरुणाय महिषान् बृहस्पतये गवयाँस्त्वष्ट्र उष्ट्रान् ॥२८॥

परस्वतः मृगविशेषानीशानाय । त्रीन् गौरान् मृगान् मित्राय त्रीन् महिषान् वरुणाय तत्रैव दशमे ॥ अथैकादशेऽवकाशे त्रीन् गवयान् गोसदृशानारण्यपशून् बृहस्पतये त्रीनुष्ट्रान् त्वष्ट्रे ॥ २८ ॥

प्रजापतये पुरुषान् हस्तिन आलभते वाचे प्लुषीँश्चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥ २९ ॥

प्रजापतये पुरुषान् हस्तिनः त्रीन् । त्रीन् प्लुषीन् वक्रतुण्डान् वाचे तन्मध्ये द्वौ प्लुषी एकादशे ॥ अथ द्वादशेऽवकाशे एकं प्लुषिम् । त्रीन् मशकान् चक्षुषे । त्रयो भृङ्गाः श्रोत्राय नियोज्याः ॥ २९ ॥

प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः कृमिः समुद्राय शिशुमारो हिमवते हस्ती ॥ ३० ॥

प्रजापतये च वायवे च एको गोमृगः गवयः । एक आरण्यो मेषो वरुणाय । एकः कृष्णो मेषो यमाय । एको मर्कटः मनुष्यराजाय । एको रोहिदृष्यः शार्दूलाय । एका गवयी ऋषभाय तदाख्यदेवाय ॥ अथ त्रयोदशेऽवकाशे एका वर्तिका क्षिप्रश्येनाय देवाय । एकः कृमिः कीटः नीलङ्गोः नीलङ्गवे । शिशुमारः एको जलचरः समुद्राय । हस्ती हिमवते ॥ ३० ॥

मयुः प्राजापत्य उलो हलिक्ष्णो वृषदंशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पुष्कर-

सादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥ ३१ ॥

मयुः प्राजापत्यः तुरङ्गवदनः किन्नरः प्रजापतिदेवतः । उलो मृगविशेषः हलिक्ष्णः सिंहविशेषः वृषदंशो विडालः ते त्रयो धात्रे । एकः कङ्कः बकः दिशां दिग्भ्यः । एका धुङ्क्षा पक्षिणी आग्नेयी अग्निदेवत्या । कलविङ्कः चटकः लोहिताहिः रक्तवर्णसर्पः पुष्करसादी पुष्करे सीदतीति कमलभक्षी पक्षिविशेषः ते त्रयः त्वाष्ट्राः त्वष्टृदेवताः । अथ चतुर्दशोऽवकाशे एकः क्रुञ्चः वाचे ॥ ३१ ॥

सोमाय कुलुङ्ग आरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥ ३२ ॥

कुलुङ्गः कुरङ्गो हरिण एकः सोमाय । आरण्यो वनजोऽजश्छागः नकुलः शका शकुन्तिः एते त्रयः पौष्णाः पूषदेवत्याः । क्रोष्टा शृगालो मायोर्देवस्य । एको गौरमृगः इन्द्रस्य । पिद्वो मृगविशेषः न्यङ्कुः अपि कक्कटः स एव ते त्रयोऽनुमत्यै । चक्रवाकः प्रतिश्रुत्कायै ॥ ३२ ॥

सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥ ३३ ॥

बलाका बकस्त्री सूर्यदेवत्या । शार्गः पक्षिविशेषः ॥ अथ पञ्चदशेऽवकाशे सृजयः पक्षिविशेषः शयाण्डकोऽपि ते मैत्राः मित्रदेवत्याः पुरुषवाक् मनुष्यवद्वादिनी शारिः शुकी सरस्वत्यै । श्वावित् सेधा भौमी भूदेवत्या शार्दूलो व्याघ्रः वृकः चित्रकः पृदाकुः सर्पः ते त्रयो मन्यवे । पुरुषवाक् शुकः सरस्वते समुद्राय ॥ ३३ ॥

सुपर्णः पार्जन्य आतिर्वाहसो दर्विदा ते वायवे-

बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्तरिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥ ३४ ॥

सुपर्णः गरुत्मान् पार्जन्यः पर्जन्याय आतिः आडी वाहसः दार्विदा काष्ठकुट्टः ते त्रयः पक्षिविशेषाः वायवे । बृहस्पतये वाचस्पतये वाचो वाण्याः पतये इति बृहस्पतिविशेषणम् ईदृशाय बृहस्पतये पैङ्गराजः पक्षिविशेषः ॥ अथ षोडशेऽवकाशे अलजः पक्षिविशेषः आन्तरिक्षः अन्तरिक्षदेवतः । प्लवः जलपक्षी मद्गुः कारण्डवः मत्स्यः ते नदीपतये । कूर्मः कच्छपः द्यावापृथिवीयः द्यावापृथिवीदेवतः ॥ ३४ ॥

पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हꣳसो वातस्य नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः॥३५॥

पुरुषमृगः पुंमृगः चन्द्रमसः । गोधा कालका पक्षिविशेषः दार्वाघाटः सारसः ते वनस्पतीनाम् । कृकवाकुः ताम्रचूडः सावित्रः सवितृदेवतः हंसः वातस्य नाक्रः मकरः कुलीपयः ते त्रयो जलचरविशेषाः अकूपारस्य समुद्रस्य त्रयाणां मध्ये द्वौ षोडशे ॥ अथ सप्तदशेऽवकाशे एकः कुलीपयः अकूपारस्य । शल्यकः श्वाविम् ह्रियै देव्यै ॥ ३५ ॥

एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्या ऋक्षो जतूः सुषिलीका त इतरजनानां जहका वैष्णवी ॥ ३६ ॥

एणी मृगी अह्नः आलभ्या । मण्डूको मूषिका तित्तिरिः ते त्रयः सर्पाणाम् । लोपाशो वनचरविशेषः आश्विन अश्विदेवतः । कृष्णो मृगः रात्र्यै । ऋक्षः भल्लूकः जतूः सुषिलीका एतौ पक्षिविशेषौ ते त्रयः इतरजनानां देवानाम् । जहका गात्रसङ्कोचनी वैष्णवी विष्णुदेवत्या ॥ ३६ ॥

अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रो मासां कश्यपो रोहित् कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ॥ ३७ ॥

अन्यवापः कोकिलाख्यः पक्षिविशेषोऽर्धमासानां पशुः ॥ अथा-ष्टादशोऽनुवाकः । ऋश्यो मृगविशेषः मयूरः बर्ही सुपर्णो गरुत्मान् ते गन्धर्वाणां पशवः । उद्रः जलचरः कर्कटसंज्ञः अपां पशुः । कश्यपः कच्छपः मासां मासानाम् । रोहित् ऋश्यः कुण्डृणाची वनचरीविशेषः गोलत्तिकापि ते त्रयोऽप्सरसाम् । असितः कृष्णः पशुर्मृत्यवे ॥ ३७ ॥

वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाजगरो वसूनां कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥ ३८ ॥

वर्षाहूः वर्षाभूः भेकी ऋतूनाम् । आखुः मूषकः कशः मान्थाल-श्च तद्विशेषौ ते त्रयः पितॄणाम् ॥ अथैकोनविंशः । अजगरो महासर्पः बलाय । कपिञ्जलो वसूनाम् । कपोतः उलूकः शशः ते निर्ऋत्यै । आरण्यो मेषो वरुणाय ॥ ३८ ॥

श्वित्र आदित्यानामुष्ट्रो घृणीवान् वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥ ३९ ॥

श्वित्रः श्वेतः पशुरादित्यानाम् । उष्ट्रः दीर्घग्रीवः घृणिवान् ते-जस्वी पशुविशेषः संहितायां घृणिशब्ददीर्घः वार्ध्रीनसो कण्ठे स्तन-वानजः ते त्रयो मत्यै देव्यै । सृमरः गवयोऽरण्याय देवाय । रुरुः मृगः रौद्रः रुद्रदेवत. क्वयिः पक्षिविशेषः ॥ अथ विंशोऽनुवाकः । कु-टरुः कुक्कुटः दात्यौहः कलकण्ठः ते त्रयो वाजिनां देवानाम् । पि-कः कोकिलः कामाय ॥ ३९ ॥

खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ॥ ५४ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां
चतुर्विंशोऽध्यायः ॥ २४ ॥

खड्गो मृगविशेषो विश्वदेवदेवतः । एकः कृष्णः श्वा सारमेयः द्वितीयः कर्णो लम्बकर्णो गर्दभः तृतीयस्तरक्षुः मृगादनः ते त्रयो रक्षसां पशवः । सूकरः इन्द्राय । सिंहो मारुतः मरुद्देवतः । कृकलासः सरटः पिप्पका पक्षिणी शकुनिः पक्षी ते त्रयः शरव्यायै । एकः पृषतः मृगविशेषो विश्वेषां देवानां पशुर्भवति विश्वेभ्यो देवेभ्यो जुष्टं वियुनज्मीति योज्यः ॥ एवं षष्ट्यधिकं शतद्वयमारण्याः पशव उक्ताः ॥ अत्र द्वाविंशतिरेकदशिनः सप्तविंशत्यधिकानि त्रीणि शतानि अश्वादयः सौर्यन्ताः षष्ट्यधिकं शतद्वयं कपिञ्जलादयः पृषतान्ता आरण्याः पशवः सर्वे मिलित्वा षट् शतानि नवाधिकानि पशवो भवन्ति । श्लोकश्च । षट् शतानि । नियुज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि चेति ॥ ते ऽप्यारण्याः सर्वे उत्स्रष्टव्या न तु हिंस्याः ॥ ४० ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
गतोऽध्यायश्चतुर्विंशो देवतापशुवाचकः ॥ २४ ॥

पञ्चविंशोऽध्यायः ।

शादं दद्भिरवकां दन्तमूलैर्मृदं बर्स्वैस्तेगान् दᳬंष्ट्राभ्याᳬं सरस्वत्या अग्रजिह्वं जिह्वाया उत्सादमवक्रन्देन तालु वाजᳬं हनुभ्यामप आस्येन वृषणमाण्डाभ्यामादित्याँ श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्त्तोभ्यां विद्युतं कनीनकाभ्याᳬं शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवो ऽवार्याणि पक्ष्माणि पार्या इक्षवः ॥ १ ॥

शादं दद्भिः । इयमपि श्रुतिर्देवतास्वाङ्गयोश्चोदनां विदधाति । शादो देवताविशेषः दन्ता अश्वाङ्गम् । शादं दद्भिः प्रीणाति । देवता भोक्त्री द्वितीयया निर्दिश्यते । अश्वाङ्गम्भोग्यं तृतीयया करणविभक्त्या निर्दिश्यते । एवं हि विभक्त्योः सामर्थ्यं भवति । युक्तश्च होमकाले अङ्गाभिधानम् देवतायै होमः । आह च श्रुतिः । आज्यमवदानीकृत्वा प्रत्याख्यायम् देवताभ्य आहुतिर्जुहोतीति । दद्भिः शादाय स्वाहा । (१)दन्तमूलैरवकाय स्वाहा इत्येवम्प्रयोगाः । क्वचिच्च देवता केवला भवति । यथा शुक्लाय स्वाहा कृष्णाय स्वाहेति । क्वचिच्चान्यया विभक्त्या निर्देशो द्रव्यदेवतयोः । यथा अग्नेः पक्षतिर्वायोर्निपक्षतिरिति । एवं द्रव्यदैवतमप्रसिद्धम् (२)यज्ञपार्श्वादिभ्यो ऽवगन्तव्यमिति पृथिवीं त्वचेति यावत् ॥ १-८ ॥

(१) दन्तमूलैरवकायै इति पा० ॥

(२) यज्ञपार्श्वं परिशिष्टं ग्रन्थविशेषः तदादिभ्यः ।

प्रणम्य कमलानाथं गणेशं गिरिजां गिरम्।
पञ्चविंशोऽयमध्याये वेददीपो मयेर्यते ॥

का० (२०, ८, ५, ६) स्विष्टकृद्वनस्पत्यन्तरे दत्वयं हुत्वा देवताश्वाङ्गेभ्यो जुहोत्यमुष्यै स्वाहेति प्रतिदैवतं शादप्रभृतित्वगन्तेभ्यो विभुखाद्य परेभ्य इति। स्विष्टकृद्वनस्पत्योरन्तरे वनस्पतियागानन्तरं स्विष्टकृद्यागात् पूर्वं शूले श्रपितं मांसं प्राजापत्योऽश्व इति वचनात् प्रजापतये हुत्वा अमुष्मै स्वाहेति प्रतिदैवतं शादादित्वगन्तेभ्यो देवताश्वाङ्गेभ्यो देवताभ्योऽश्वाङ्गेभ्यश्च घृतं जुहुयात् अनादेशे घृतस्योक्तत्वात्। तत्र शादं दद्भिरित्यादि पृथिवीं त्वचेत्यन्तः संहिताभागो ब्राह्मणं न मन्त्राः। शादयो देवाः दन्ताद्यङ्गानि। ततश्चतुर्गृहीतमाज्यं गृहीत्वा गृहीत्वा शादाय स्वाहा दद्भ्यः स्वाहा अवकाभ्यः स्वाहा दन्तमूलेभ्यः स्वाहेत्यादि पृथिव्यै स्वाहा त्वचे स्वाहेत्यन्तं जुहुयादित्येकः पक्षः शाखान्तरोदितः। स्वपक्षे तु शादं दद्भिः प्रीणामि स्वाहेत्यादिहोममन्त्राः। देवता भोक्त्री द्वितीयया निर्दिश्यते अश्वाङ्गं भोग्यं तृतीयया करणविभक्त्या निर्दिश्यते। क्वचित् केवला देवतैव यथा शुक्लाय स्वाहा कृष्णाय स्वाहेति क्वचिदन्यविभक्त्यैव द्रव्यदेवतयोर्निर्देशः यथा अग्नेः पक्षतिर्वायोर्निपक्षतिरिति। तथा च श्रुतिः (१३, ३, ५, १) शादं दद्भिरवकां दन्तमूलैरित्याज्यमवदानानि कृत्वा प्रत्याख्यायं देवताभ्य आहुतीर्जुहोति या एव देवता अपिभागास्ता भागधेयेन समर्धयतीति। अस्यायमर्थः। शादं नाम देवमश्वस्य दद्भिर्दन्तैः प्रीणामीति शेषः स्वाहाकारो दानार्थः ततश्च शादं दद्भिः प्रीणामि स्वाहेति एवमन्यान्यपि योज्यानि। आज्यमवदानानि कृत्वा आज्यमेवाश्वाङ्गत्वेन परिकल्प्य प्रत्याख्यायमवदानमवदानं प्रति शादादिदेवता आख्यायाख्यायाज्याहुतीर्जुहोति सङ्कल्पिताश्वाङ्गभावा एता आहुतीः शादादिभ्यो ददाति एवं कुर्वन्नपिभागाः कल्पितभागास्ता भागेन समर्धयति प्रीणातीत्यर्थः॥ अथ संहितार्थः। दद्भिरश्वदन्तैः शादं देवं प्रीणामि। दन्तमूलैरवकां देवतां प्रीणामि। वस्वैर्दन्तपीठैर्मृदं देवतां प्रीणामि वस्वं स्याद्दन्तपीठिका। शादादयोऽप्रसिद्धा देवाः, आदित्यादयः प्रसिद्धाः। दंष्ट्राभ्यां तेगां देवतां प्रीणामि। सरस्वत्यै अग्रजिह्वम् अत्र चतुर्थ्या

देवतोद्देशः प्रथमयाङ्गस्य अतो विभक्तिव्यत्ययः जिह्वाया अग्रमग्र-जिह्वं जिह्वाग्रेण सरस्वतीं प्रीणामि । जिह्वायाः उत्सादम् अत्र पञ्चम्या-ऽद्वयाङ्गोद्देशः द्वितीयया देवस्य विभक्तिव्यत्ययः जिह्वयोत्सादं देवं प्रीणामि । अवक्रन्देन तालु अत्र देवे तृतीया अङ्गे प्रथमा व्यत्ययः तालुना अवक्रन्दं देवं प्रीणामि । वाजं हनुभ्यां हनुभ्यां वक्त्रैकदे-शाभ्यां वाजं देवं प्रीणामि । आस्येन मुखेनापो देवताः प्रीणामि । आण्डाभ्यां वृषणाभ्यां वृषणं देवं प्रीणामि । श्मश्रुभिर्मुखकेशैरा-दित्यान् प्रीणामि । भ्रूभ्यां ललाटगरोमपङ्क्तिभ्यां पन्थानं देवं प्रीणामि । वर्त्ताः पक्ष्मपङ्क्तिः ताभ्यां द्यावापृथिव्यो दैवते प्रीणामि । कनीनकाभ्यां नेत्रमध्यगकृष्णगोलाभ्यां विद्युतं देवतां प्रीणामि । शुक्लाय स्वाहा कृष्णाय स्वाहा देवोद्देश एव न त्वङ्गम् शुक्लाय कृष्णाय देवाय सुहुतमस्तु यद्वा चतुर्थ्याऽऽद्वयाङ्गमेव निर्दिश्यते प्राजापत्योऽश्व इति वचनाद्देवोऽध्याहर्त्तव्यः शुक्लेन कृष्णेन चाद्वयाङ्गेन प्रजापतिं प्रीणामि एवं लोमभ्यः स्वाहेत्यादावपि बोध्यम् । पार्य्याणि पक्ष्माणि अत्र तल्लिङ्गेन देवतोद्देशः पक्ष्माणि नेत्रोपरिलोमानि पार्य्याणि पारदेवत्यानि ततः पक्ष्मभिः पारं प्रीणामि । इक्षवो नेत्राधोभागरोमाणि अवारदेवत्याः ततः इक्षुभिरवारं प्रीणामि । विपरीतं वा अवार्य्याणि अवारदेवत्यानि पक्ष्माणि इक्षवः पार्य्याः पारदेवत्याः॥१॥

वातं॑ प्रा॒णेना॑पा॒नेन॒ नासि॑के उपया॒मम॑ध॒रेणौष्ठे॑न स॒दुत्त॑रेण प्रका॒शेना॑न्त॒रम॑नूका॒शेन॒ बाह्यं॑ निवे॒ष्यं॑ मू॒र्ध्ना स्त॑नयि॒त्नुं नि॑र्बा॒धेना॒शनिं॑ म॒स्तिष्के॑ण वि॒द्युतं॑ क॒नीन॑काभ्यां कर्णा॑भ्या॒ᳬ श्रोत्र॒ᳬ श्रोत्रा॑भ्यां॒ कर्णौ॑ ते॒द॒नीम॑ध॒रक॒ण्ठेना॒पः शु॒ष्कक॒ण्ठेन॑ चि॒त्तं मन्या॑भि॒- रदि॑तिᳬ॒शीर्ष्णा॒ निर्ऋ॑तिं॒ निर्जर्जल्पेन॑ शी॒र्ष्णा सं॑क्रो॒शैः प्रा॒णान् रे॒ष्माण॑ᳬ स्तु॒पेन॑ ॥ २ ॥

अदयस्य प्राणवायुना वातं प्रीणामि । अपानवायुना नासिका-संज्ञे द्वे देवते प्रीणामि । अधस्तनेन ओष्ठेन उपयामं देवं प्रीणामि ।

उपरितनेन ओष्ठेन मन्त्संस देवं प्रीणामि । प्रकाशेनोपरितनदेहकान्त्या अन्तरं देवं प्रीणामि । उपसर्गस्य घञ्यमनुष्ये बहुलमिति (पा० ६, ३, १२२) अनोर्दीर्घः अनूकाशेनाधस्तनदेहकान्त्या वाह्यं देवं प्रीणामि । मूर्ध्ना मस्तकेन निबेष्य देवं प्रीणामि । निश्चितं बध्यते निर्बाधः शिरोऽस्थिमध्यसंलग्नो मज्जाभागः तेन स्तनयित्नुं देवं प्रीणामि । मस्तके भवं मस्तिष्कं शिरोमध्यस्थो जर्जरो मांसभागः मस्तिष्कं गोर्दमित्यमरः (२, ६, ६५) मस्तकमिष्यति गच्छति मस्तिष्कम् इष गतौ मस्तकमज्जेति क्षीरस्वामी तेन मस्तिष्केणाशनिं देवं प्रीणामि । विद्युतं कनीनकाभ्यां प्रीणामीति पूर्ववत् । कर्णाभ्यां श्रोत्रम् अत्रादयाह्लामिका एव देवता कर्णाभ्यां कर्णशष्कुलीभ्यां श्रोत्रं देवं प्रीणामि । श्रोत्रेन्द्रियाभ्यां कर्णौ देवौ प्रीणामि । कण्ठाधोभागेन तेदनीं देवतां प्रीणामि । शुष्कश्चासौ कण्ठश्च शुष्ककण्ठम् कण्ठस्य यः शुष्को निर्मांसो देशः तेनापो देवताः प्रीणामि । पश्चाद्ग्रीवा शिरा मन्येति (२, ६, ६५) अमरः ग्रीवापश्चाद्भागे कृकाटिकायां शिरा मन्या मन्यत इति मन्या संज्ञायां समजनीति (पा० ३, ३, ९९) क्यप् ग्रीवापश्चाद्भागनाडीभिश्चित्तं प्रीणामि । शीर्ष्णा शिरसादितिं देवतां प्रीणामि शीर्षस्य शीर्षन्नादेशः शसादौ । नितरां जर्जरीभूतेन शिरोभागेन निर्ऋतिं देवं प्रीणामि । सम्यक् क्रोशन्ति शब्दायन्ते तानि सङ्क्रोशानि गच्छतोऽश्वस्य यान्यङ्गानि शब्दं कुर्वन्ति तैरङ्गैः प्राणान् देवान् प्रीणामि । स्तुप उच्छ्राये स्तुपेन उच्छ्रितेन शिखाभूतेनाङ्गेन रेष्माणं देवं प्रीणामि ॥ २ ॥

मशकान् केशैरिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन कूर्माञ्छफैराक्रमणꣳ स्थूराभ्यामृक्षलाभिः कपिञ्जलान् जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निमतिरुग्भ्यां पूषणं दोर्भ्यामश्विनावꣳसाभ्याꣳरुद्रꣳ रोराभ्याम् ॥ ३ ॥

केशैः स्कन्धस्थरोमभिः मशकान् देवान् प्रीणामि । वहः स्कन्धस्तेनेन्द्रं प्रीणामि । कीदृशेन वहेन स्वपसा अप इति कर्मनाम

शोभनमपः कर्म पर्य्याणधारणवहनादिकं यस्य स स्वपाः तेन । शकुनिः पक्षी तद्वत् सादो गमनम् पदुत्व विशरणगत्यादौ यस्य वेगवत् कुदनं तेन बृहस्पतिं देवं प्रीणामि । शफं क्लीवे खुरः पुमान् खुरैः कूर्मान् देवान् प्राणामि । रलयोरैक्यम् स्थूलाभ्यां गुल्फाभ्यामाक्रमणं देवं प्रीणामि । गुल्फाधःस्था नाड्यः कक्षलास्ताभिः कपिञ्जलान् देवान् प्रीणामि । गुल्फजानुनोर्मध्यभागौ जङ्घा ताभ्यां जवं देवं प्रीणामि । अग्रपादयोर्जानूर्ध्वभागौ बाहू ताभ्यां अध्वानं देवं प्रीणामि । जाम्बीरं जम्बीरतरोः फलं रलयोरभेदः तदाकारौ जानुमध्यभागौ जाम्बीरस्तेनारण्यं देवं प्रीणामि । अत्यन्तं रोचेते तौ अतिरुचौ जानुदेशौ ताभ्यामग्निं देवं प्रीणामि । अग्रपादयोर्जान्वधो दोषौ करौ ताभ्यां पूषणं देवं प्रीणामि । अंसौ स्कन्धौ ताभ्यामश्विनौ देवौ प्रीणामि । रोरावंसग्रन्थी ताभ्यां रुद्रं प्राणामि ॥ ३ ॥

अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताᳬं सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ ४ ॥

अत्र षष्ठ्या देवतोद्देशः प्रथमयाङ्गोद्देशः ततोऽस्त्वित्यध्याहरः । अग्नेः देवस्य पक्षतिरस्तु । पक्षः साध्यविरोधयोः बले काले पतत्रे च रुचौ पार्श्वे प्रकटिपत इत्यभिधानोक्तेरत्र पक्षः पार्श्ववाची पक्षस्य मूलं पक्षतिः पक्षात्तिरिति (पा० ५, २, २५) मूलार्थे तिप्रत्ययः ततः पक्षस्य पार्श्वस्य मूलभूतान्यस्थीनि वङ्क्रिशब्दवाच्यानि पक्षतिशब्देनोच्यन्ते तानि च प्रतिपार्श्वं त्रयोदश भवन्ति षड्विᳬंशतिरश्वस्य वङ्क्रय इति (कौषीत० ब्रा० १०, ४) श्रुतेः । तेषां क्रमेण देवतासम्बन्धं वक्ति । तत्रादौ दक्षिणपार्श्वास्थां देवता आह अग्नेः पक्षतिः प्रथमं दक्षिणपार्श्वास्थि अग्नेरस्तु विभक्तिव्यत्ययो वा पक्षत्याग्निं देवं प्रीणामि । वायोर्निपक्षतिः नीचा पक्षतिर्निपक्षतिः द्वितीयं दक्षिणपार्श्वास्थि वायोर्देवस्यास्तु । एवमग्रेऽपि व्याख्येयम् । तृतीया पक्षतिरिन्द्रस्यास्तु । चतुर्थी पक्षतिः सोमस्य ।

अदित्यै चतुर्थी पष्ठ्यर्थी पञ्चमी पक्षतिः अदित्याः । पष्ठी पक्षतिः इन्द्राण्याः। सप्तमी पक्षतिः मरुताम् । अष्टमी पक्षतिः बृहस्पतेः नवमी पक्षतिरर्यम्णो देवस्य । दशमी धातुर्देवस्य । एकादशी पक्षतिः इन्द्रस्य। द्वादशी पक्षतिः वरुणस्य । त्रयोदशी पक्षतिः दक्षिणपार्श्वास्थि यमस्य देवस्यास्तु ॥ ४ ॥

इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीयापां चतुर्थी निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाᳬं सप्तमी विष्णोरष्टमी पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम्॥५॥

अथ वामपार्श्वास्थ्नां देवानाह। प्रथममुपरिस्थं वामपार्श्वास्थि इन्द्राग्न्योर्देवयोरस्तु । सरस्वत्यै निपक्षतिः द्वितीया पक्षतिः सरस्वत्याः। तृतीया पक्षतिर्मित्रस्य देवस्य । चतुर्थी अपां देवतानाम् । पञ्चमी निर्ऋत्यै निर्ऋतेः। षष्ठी अग्नीषोमयोः । सप्तमी सर्पाणां देवानाम्। अष्टमी विष्णोर्देवस्य । नवमी पूष्णो देवस्य। दशमी त्वष्टुः एकादशी इन्द्रस्य। द्वादशी वरुणस्य । यमस्येयं यमी त्रयोदशी पक्षतिः यमसम्बन्धिनी चतुर्थी प्रथमार्था। अथ समस्तयोः पार्श्वयोर्देवानाह दक्षिणं पार्श्वं द्यावापृथिव्योरस्तु उत्तरं वामं पार्श्वं विश्वेषां देवानामस्तु ॥ ५ ॥

मरुताᳬं स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः पुच्छमग्नीषोमयोर्भासदौ क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणावल्गाभ्यामाक्रमणᳬं स्थूराभ्यां बलं कुष्ठाभ्याम् ॥ ६ ॥

अथाङ्गान्तराणां देवता आह । विभक्तिव्यत्ययः । स्कन्धप्रदेशौ मरुतो देवान् प्रीणामि। अश्वपुच्छोपरि त्रिस्रोऽस्थिपङ्क्तयः सन्ति

गर्सों देवता आह। कीकसं कुल्यमस्थि चेत्यमरः (२, ६, ६८) कीकसाति शब्दं करोति कीकसमस्थि प्रथमा कीकसा प्रथमानि कीकसानि पुच्छोपरिस्थायास्थिपङ्क्तिविशेषं देवानां प्रथमकीकसैर्विश्वान् देवान् प्रीणामि। द्वितीयास्थिपङ्क्तिः रुद्राणां द्वितीयै रुद्रान् प्रीणामि। तृतीयानि कीकसानि आदित्यानां तृतीयैः कीकसैरादित्यान् प्रीणामि। वायोः पुच्छं पुच्छेन वायुं प्रीणामि। भासदौ भासेते तौ भासदौ नितम्बौ तावग्नीषोमयोः भासद्भ्यामग्नीषोमौ प्रीणामि। कुञ्चौ श्रोणिभ्यां पुनः पूर्ववदङ्गात् तृतीया कटिः श्रोणिः ककुद्मतीत्यमरः (२, ६, ७४) श्रोणिभ्यां दक्षवामाभ्यां कटिप्रदेशाभ्यां कुञ्चौ देवौ प्रीणामि। इन्द्राबृहस्पती ऊरुभ्याम् सक्थि क्लीबे पुमानूरुरित्यमरः (२, ६, ७३) ऊरुभ्यामिन्द्राबृहस्पती देवौ प्रीणामि। मित्रावरुणौ अल्गाभ्याम् अलमत्यर्थं गच्छत ऊरुभ्यां संयोगं प्राप्नुतस्तौ अल्गौ वङ्क्षणौ ऊरुसन्धी ताभ्यां मित्रावरुणौ प्रीणामि। स्थूरौ स्थूलौ स्फिजौ नितम्बाधोभागौ ताभ्यामाक्रमणं देवं प्रीणामि। कुष निष्कर्षे कुष्येते तौ कुष्ठौ नितम्बस्थौ कूपकौ आवर्त्तौ ककुन्दरशब्दवाच्यौ ताभ्यां बलं देवं प्रीणामि॥ ६॥

पूषणं वनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्पान् गुदाभिर्विह्रुतं आन्त्रैरपो वस्तिना वृषणमाण्डाभ्यां वाजिनं शेपेन प्रजां रेतसा चाषान् पित्तेन प्रदरान् पायुना कूश्माञ्छकपिण्डैः॥ ७॥

वनति संभजति वनिष्ठुः स्थूलान्त्रं तेन पूषणं देवं प्रीणामि। गुदं त्वपानं पायुर्नेत्यमरः (२, ६, ७२) स्त्रीत्वं छान्दसम् स्थूला चासौ गुदा च स्थूलगुदा तया गुदस्य स्थूलभागेन अन्धाहीन् प्रीणामि। अन्धाश्च ते अहयश्च सर्पास्तान्। सर्पान् गुदाभिः स्थूलगुदातिरिक्तैर्गुदभागैः सर्पान् प्रीणामि। विह्रुत आन्त्रैः आन्त्रं पुरीतदित्यमरः (२, ६, ६६) अम गतौ भजने शब्दे अमति भजत्यनेनाऽन्नमित्यन्त्रम् अन्त्रे भवा आन्त्राः अन्त्रसम्बन्धिनो मांसभागाः तैर्विह्रुतो देवान् प्रीणामि। अपो वस्तिना वस्तिनो-

भेद्यो द्वयोरित्यमरः (२, ६, ६३) वसति मूत्रं यस्मिन् स वस्तिः नाभेरधो वर्त्तमानं मूत्रपुटं तेनापो देवताः प्रीणामि। मुष्कोऽण्डो वृषणः कोशः (अमर० २, ६, ७६) अण्ड वृषाण्डः ताभ्यां लिङ्गोभयपार्श्वस्थाभ्यां मांसपिण्डाभ्यां वृषणं देवं प्रीणामि । शेपो लिङ्गं तेन वाजिनं देवं प्रीणामि शिश्नो मेढ्रं मेहनशेपसी इति (२, ६, ७६) अमरः शि निशाने शिनोति भगमिति शेपः सान्तोऽदन्तश्च । प्रजां रेतसा शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि चेति (२, ६, ६२) अमरः रीङ् स्रवणे रियते स्रवति रेतो वीर्य्यं तेन प्रजां देवतां प्रीणामि । मायुः पित्तं पतति स्रंसते पित्तं धातुविशेषस्तेन चाषान् देवान् प्रीणामि । पाति मलोत्सर्गमिति पायुर्गुदमुष्कातिरिक्तं तेन गुदतृतीयभागेन प्रदरान् देवान् प्रीणामि । कूश्मान् शकपिण्डैः । शको देशे नृपे विशि । विशि विष्ठायां शकस्य विष्ठायाः पिण्डैः कूश्मान् देवान् प्रीणामि ॥ ७ ॥

इन्द्र॑स्य क्रो॒डोऽदि॑त्यै पाज॒स्यं॑ दि॒शां ज॒त्रवोऽदि॑त्यै भ॒सज्जी॒मूता॑न् हृदयौप॒शेना॒न्तरि॑क्षं पुरी॒तता॒ नभ॑ उद॒र्य्ये॒ण च॑क्रवा॒कौ म॑तस्ना॒भ्यां दिवं॑ वृ॒क्काभ्यां॑ गि॒रीन् प्ला॒शिभि॒रुप॑लान् प्ली॒ह्ना व॒ल्मीका॑न् क्लो॒मभि॑र्ग्लौ॒भिर्गु॒ल्मान् हि॒राभिः॒ स्रव॑न्तीर्ह्र॒दान् कु॒क्षिभ्या॑ᳪ समु॒द्रमु॒दरे॑ण वैश्वान॒रं भस्म॑ना ॥ ८ ॥

पुनर्द्वैव षष्ठी अङ्के प्रथमा । न ना क्रोडं भुजान्तरमित्यमरः (२, ६, ७७) कुड घनत्वे कुडतीति क्रोडः घनो वक्षोमध्यभागः स इन्द्रस्यास्तु क्रोडेन वा इन्द्रं प्रीणामि एवमग्रेऽपि । पाजसे बलाय हितं पाजस्यं बलकरमङ्गं तददित्याः देवतायाः । सन्धी तस्यैव जत्रुणी इति (२, ६, ७८) अमरः अंसकक्षयोः सन्धिर्जत्रु । जायत इति पुंस्त्वमार्षम् तानि दिशां देवतानाम् । भस भर्त्सनदीप्त्योः बभस्ति दीप्यते भसत् लिङ्गाग्रं तददित्याः अस्तु ॥ पुनर्द्वैव द्वितीया अङ्के तृतीया । हृदये उपशेते हृदयौपशं हृदयस्थं मांसं तेन जी-

मूतान् प्रीणामि । पूर्यते पुरीतत् हृदयाच्छादकमन्त्रं तेनान्तरिक्षं देवं प्रीणामि । उदरे भवमुदर्यमुदरस्थं मांसं तेन नभो देवं प्रीणामि शरीरावयवाद्यत् । ग्रीवाधस्तान्नागास्थितहृदयोभयपार्श्वस्थे अस्थिनी मतस्ने ताभ्यां चक्रवाकौ देवौ प्रीणामि । वृक्काग्रमांसमित्यमरः (२, ६, ६४) वृक आदाने वृक्यते स्वादुतया गृह्यते वृक्का-नान्तः पुस्ययं स्त्रीत्येके इति क्षीरस्वामी वृक्का मुख्यं मांसं तेन दिव्यं देवतां प्रीणामि वृक्कौ कुक्षिस्थौ मांसगोलकावाम्रफलाकृती इति याज्ञिकाः । प्रकर्षेणाश्नन्ति भुङ्क्तेऽश्नातीति प्लाशयः शिश्नमूलनाड्यः तथाडाह्लोरयाब्धस्य देहे सञ्चारात् रलयोरभेदः ताभिर्गिरीन् देवान् प्रीणामि । गुल्मस्तु प्लीहा पुंसीति (२, ६, ६६) अमरः हृदयवामभागे शिथिलो मांसभागः पुप्पुससंज्ञः प्लिह गतौ प्लेहते प्लीहा नान्तः तेन उपलान् देवान् प्रीणामि । तिलकं क्लोमेत्यमरः (२, ६, ६५) क्लोमति क्लोमा उदर्यो जलाधारः । हृदयस्य दक्षिणे यकृत् क्लोमा वामे प्लीहा पुप्पुसश्चेति वैद्या इति क्षीरस्वामी क्लोमा गलनाडीति कर्कः तैर्वल्मीकान् देवान् प्रीणामि । ग्लायन्ति श्राम्यन्ति ग्लावो हृदयनाड्यः ताभिर्गुल्मान् देवान् प्रीणामि । हरन्त्यन्नरसमिति हिरा अन्नवाहिन्यो नाड्यः ताभिः स्रवन्तीः देवताः प्रीणामि । पिचण्डकुक्षी जठरोदरतुण्डमित्यमरः (२, ६, ७७) जठरस्य दक्षवामभागौ कुक्षी ताभ्यां ह्रदान् देवान् प्रीणामि । उदरेण जठरेण समुद्रं प्रीणामि । भस्मनाङ्कोरथेन वैश्वानरं देवं प्रीणामि ॥ ८ ॥

विधृतिं नाभ्या घृतꣳ रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वा अश्रुभिर्ह्रादुनीर्दूषीकाभिरस्ना रक्षाꣳसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय स्वाहा ॥ ९ ॥

अवभृथे अप्सु मग्नस्य पिङ्गलखलतिविक्लिधशुक्लस्य मूर्द्धनि जुहोति । जुम्बकाय स्वाहा इति । वारुणी द्विपदा औदन्य मुण्डिभदृष्टा । वरुणो वै जुम्बक इति श्रुतिः ॥ ९ ॥

नाभ्या उदराधःस्थग्रन्थिना विधृतिं देवतां प्रीणामि। रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः शृङ्गारादिरसे वीर्ये देहधात्वम्बुपारदे इति विश्वः रसेन वीर्य्येण धातुविशेषेण वा घृतं देवं प्रीणामि। यूषः कथितो रसः पद्दन्नित्यादिना (पा० ६, १, ६३) यूषन्नादेशः यूष्णा पक्वान्नरसेनापो देवताः प्रीणामि। पृषन्ति विन्दुपृषताः पुमांसो विप्रुषः स्त्रिय इत्यमरः (१. २, २१) विप्रुड्भिर्वसाविन्दुभिर्मरीचीर्देवताः प्रीणामि। ऊष्माणस्तु निदाघोष्णग्रीष्माः शष्पसहा अपीति विश्वः ऊष्मणा शरीरगतेनौष्ण्येन नीहारं देवं प्रीणामि। मेदस्तु वपा वसेति (२, ६, ६४) अमरः वस्ते मांसमिति वसा शुद्धमांसस्य यः स्नेहः सा वसेति वैद्या इति स्वामी वसया मांसस्नेहेन शीनं देवं प्रीणामि। अश्रु नेत्राम्बु रोदनमित्यमरः (२, ६, ९३) अश्रुभिर्नेत्राम्बुभिः ह्रादुन्याः देवताः प्रीणामि। दूषिका नेत्रयोर्मलमित्यमरः (२, ६, ६७) दूषीकाभिर्नेत्रमलैर्ह्रादुनीर्देवताः प्रीणामि। रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितमित्यमरः (२, ६,६४) अस्यते सृज्यते इति वा असृक् रुधिरं पद्दन्न इत्यसन्नादेशः (पा० ६, १, ६३) अस्ना रक्षांसि प्रीणामि। अङ्गैः पूर्वानुक्तावयवैः चित्राणि दैवतानि प्रीणामि। रूपं स्वभावे सौन्दर्य्ये नाणके पशुशब्दयोरिति विश्वः रूपेण सौन्दर्य्येण नक्षत्राणि देवतानि प्रीणामि। त्वचा चर्मणा पृथिवीं देवीं प्रीणामि स्वाहेति मन्त्रैराज्यं जुहोतीत्यर्थः॥ अत्र अग्निं हृदयेनाशनिं हृदयाग्रेणेत्यादि द्यावापृथिवीभ्यां स्वाहेत्यन्ता अपि (३९, ८, १३) आहुतीर्जुहुयात् आश्वमेधिकत्वात्॥ का० (२०, ८, १८) अवभृथेष्ट्यन्तेऽप्सु मग्नस्य पिङ्गलस्य खलतिविक्लिधशुक्लस्य मूर्धनि जुहोति जुम्बकाय स्वाहेति। अवभृथयागान्ते एवं विधस्य पुंसो मूर्धनि जुम्बकायेति मन्त्रेणाज्यं सकृद्गृहीतं जुहुयात् कीदृशस्य पुंसः जले मग्नस्य पिङ्गलाक्षस्य खलतेः खल्वाटस्य विक्लिधस्य दन्तुरस्य शुक्लस्यातिगौरस्येति सूत्रार्थः॥ वरुणदेवत्या द्विपदा यजुर्गायत्री उदन्यपुत्रमुण्डभदृष्टा। जुम्बकाय वरुणाय स्वाहा सुहुतमस्तु वरुणो वै जुम्ब इति श्रुतेः। (१३, ३, ७, ५) एषा चान्तर्जले जप्ता पापनाशिनी तदुक्तं हारीतेन।

जुम्बका नाम गायत्री वेदे वाजसनेयके।
अन्तर्जले सकृज्जप्ता ब्रह्महत्यां व्यपोहतीति॥९॥

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १० ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ११ ॥

(१)हिरण्यगर्भः सम्। चतस्रस्त्रिष्टुभः काय्याः(२)। हिरण्यगर्भः यः प्राणत इति व्याख्याते ॥ १० ॥ ११ ॥

चतस्रः कदेवत्याः त्रिष्टुभः प्रजापतिसुतहिरण्यगर्भदृष्टाः प्राजापत्यपशूनामश्वादीनां याज्यानुवाक्याः ॥ द्वे व्याख्याते (२३, १, ३) ॥ १० ॥ ११ ॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाहुः। यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ १२ ॥

(३)यस्येमे। यस्य कसंज्ञकस्य प्रजापतेः इमे हिमवन्तः बहुवचनादन्येऽपि गृह्यन्ते हिमवत्प्रभृतयः पर्वताः महित्वा महित्वं महाभाग्यं विभूतिः रसया रसा नदी रसतेः शब्दकर्मणः नद्या सह समुद्रं यस्य विभूतिमाहुस्तद्विदः। इमाः प्रदिशः दिशः यस्य

(१) एतदौव्वटभाष्यं वाराणसी० पु० अस्ति। मुम्बईमुद्रितपुस्तके नास्ति।

(२) कदेवत्याः।

(३) एतदौव्वटभाष्यं वाराणसी० पु० अस्ति। मुम्बईमु० पु० एतन्नास्ति।

बाहू । एकं यस्येति पदमनर्थकं निर्देशाभावात् । तस्मै कस्मै प्रजापतये देवाय हविषा विधेम हविर्देश्च विभक्तिव्यत्ययः ॥१२॥

यं कस्मै प्रजापतये देवाय हविषा विधेम हविर्देश्च विभक्तिव्यत्ययः कशब्दस्य सर्वनामत्वमार्षम् । इमे हिमवन्तः बहुवचनादन्येऽपि हिमाचलप्रभृतयः पर्वताः प्रथमा द्वितीयार्थे सुपां सुपो भवन्तीति वचनात् इमान् हिमवत्प्रभृत्यद्रीन् यस्य प्रजापतेर्महित्वं महिमानमाहुर्बुधाः महित्वेति विभक्तेराकारः । रसा नदी रसतेः शब्दकर्मण इति (निरु० ११, २५) यास्कः । रसया नद्या सह समुद्रं यस्य महित्वमाहुः । इमाः प्रदिशः पूर्वाद्याः प्रकृष्टा आशा यस्य महित्वमाहुः यस्य बाहू भुजौ जगद्रक्षणाविति शेषः । सर्वं जगत् यस्य प्रजापतेर्विभूतिरित्यर्थः ॥ १२ ॥

य आत्मदा बलदा यस्य विश्वं उपासते प्रशिषं यस्य देवाः । यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ १३ ॥

(१)य आत्मदाः यश्चात्मनं ददाति उपासकानां तदनुगृहीता हि उपासकाः सायुज्यं सालोक्यं वा प्राप्नुयुः। यश्च बलदाः बलार्थिनां बलं ददाति विश्वे मनुष्या असुराश्च यस्य प्रशिषं प्रशासनमुपासते देवाः यस्य प्रशासनमुपासते आह च "यस्य ज्ञेयावधि ज्ञानं शिष्यावधि च शासनम् । कार्यावधि च कर्तृत्वं स स्वयम्भूः पुनातु वः" इति । किञ्च यस्य छाया आश्रयः परिज्ञानपूर्वकमुपासनम् अमृतम् अमृतत्वप्राप्तिहेतुभूतं यस्य च अपरिज्ञानं मृत्युः मृत्युप्राप्तिहेतुभूतम् उक्तं च "ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्तीति" कस्मै इति व्याख्यातं प्राजापत्यानां याज्यानुवाक्या उक्ताः ॥ १३ ॥

---

(१) एतदौव्वटभाष्यं वाराणसी० पु० अस्ति । मुम्बईमुद्रित पुस्तके चैतन्नास्ति ।

कस्मै देवाय हविषा विधेमेति व्याख्यातम् । आत्मानं ददाति आत्मदाः उपासकानां सायुज्यप्रदः बलं सामर्थ्यं ददाति बलदाः भुक्तिमुक्तिप्रद इत्यर्थः । विश्वे सर्वे मनुष्याः यस्य प्राशिषं शासनमुपासते देवाश्च यस्य प्रशिषमुपासते । तदुक्तम् यस्य क्षेयावधि ज्ञानं दिक्षावधि च शासनम् । कार्य्यावधि च कर्तृत्वं स स्वयम्भूः पुनातु च इति । किञ्च यस्य छाया आश्रयो ज्ञानपूर्वमुपासनम् अमृतं मुक्तिहेतुः यस्य अज्ञानमिति शेषः मृत्युः संसारहेतुः तदुक्तम् ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्तीति (श्वेताश्वतरोपनिष० ३, १०) ॥ १३ ॥

आ नो॑ भ॒द्राः क्रत॑वो यन्तु वि॒श्वतो॒ऽद॑ब्धासो॒ अप॑रीतास उ॒द्भिदः॑ । दे॒वा नो॒ यथा॒ सद॒मिद् वृ॒धे अ॑स॒न्नप्रा॑युवो रक्षि॒तारो॑ दि॒वे दि॑वे ॥ १४ ॥

(१)आ नो भद्राः । वैश्वदेवानां पशूनां याज्यानुवाक्याः दश पञ्चाद्याः सप्तमी च जगत्यः त्रिष्टुभोऽन्याः । नोऽस्माकं भद्राःभन्दनीयाः स्तुत्याः । क्रतवः यज्ञाः संकल्पा आयन्तु आगच्छन्तु किं भूताः । विश्वतः सर्वतः अदब्धासः अनुपहिंसिताः । अपरीतासः न परीता अपरिगताः अपरिज्ञाताः केनचित् । उद्भिदः उद्भेत्तारोऽन्येषां क्रतूनाम् किञ्च देवाः नोऽस्माकं सद इत् सदैव यथा । वृधे वर्द्धनाय असन् भूयासुः तथा भूयादिति वाक्यशेषः किं देवाः अप्रायुवः अप्रमाद्यन्तः दिवे दिवे अहन्यहनि रक्षितारः ॥ १४ ॥

वैश्वदेवपशुवपापुरोडाशपशूनां याज्यानुवाक्या दश ऋचो विश्वदेवदेत्या *गौतमदृष्टाः तत्रादौ पञ्च जगत्यः । क्रतवो यज्ञाः सङ्कल्पा* वा नोऽस्मान् प्रति आयन्तु आगच्छन्तु यज्ञकर्त्तारो वयं भवेमेत्यर्थः । कीदृशाः क्रतवः भद्राः भन्दनीयाः भदि कल्याणे

---

(१) अयं पाठक्रमः वाराणसी० पु० अस्ति ।

कल्याणकारिणः तथा विश्वतः अदब्धासः सर्वतोऽनुपाहिंसिता नि-र्विघ्ना इत्यर्थः। अपरीतासः न परीता अपरीताः अपरिगता अ-ज्ञाताः केनचित् फलानुमेया इत्यर्थः। उद्भिदः उद्भिन्दन्ति प्रकट-यन्ति उद्भिदः उद्भेत्तारो यज्ञान्तराणां प्रकटीकर्त्तार इत्यर्थः। किञ्च यथा येन प्रकारेण देवा नोऽस्माकं सदमित् सदैव वृधे वृद्ध्यै असन् भवन्ति तथा क्रतवः आयन्त्वित्यर्थः। सदमित्यव्ययं सदार्थे। कीदृशा देवाः अप्रायुवः प्रकर्षेणायुवन्ति प्रमाद्यन्ति ते प्रायुवः यौतेः क्विप् तुगभाव आर्षः न प्रायुवः अप्रायुवः अनालसा अस्माकं वृद्ध्यै भवन्त्वित्यर्थः तथा दिवे दिवे अहन्यहनि प्रत्यहं रक्षितारः पालकाः॥ १४॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानांꣳ रातिर-भि नो निर्वर्त्तताम्। देवानांꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे॥ १५॥

(१)देवानाम्भद्रा। देवानां भद्रा सुमतिः नोऽभिनिवर्तताम्। अस्मान्प्रत्यभिमुखीभवतु किं देवानाम्। ऋजूयताम् ऋजूयन्ति ते तथा ऋजुगामिनाम्। यद्वा ऋजुकामिनाम्। ऋजु प्रगुणम् यजमानं कर्तुम् ये कामयन्ते ते तथोक्ताः। किञ्च। देवानां रातिः दानम् नः अभिनिवर्तताम्। ततो लब्धदाना वयं देवानां सख्यम् उपसेदिम प्राप्नुयाम ततो भक्तानामस्माकं देवाः आयुः प्रतिरन्तु वर्धयन्तु किमर्थं जीवसे चिरं जीवनाय॥ १५॥

भद्रा कल्याणकारिणी देवानां सुमतिः शोभना बुद्धिः नोऽस्मान् प्रति अभिनिवर्त्ततामस्मदभिमुखी भवतु। कीदृशानां देवानाम् ऋजूयताम् ऋजु अवक्रं यान्ति गच्छन्ति ऋजूयन्तस्तेषाम् इणः शतृप्रत्ययः अवक्रगामिनाम् यद्वा ऋजुमवक्रं साधुं यजमानं कामयन्ते

(१) वाराणसीस्थराजकीयसंस्कृतपाठशालीयौव्वटमाध्यलिखितपुस्तकसंमतोऽयं पाठः।

ते ऋजूयन्ति सुर आत्मनः पयच् ऋजूयन्ति ते ऋजूयन्तस्तेषाम् यजन्तीच्छतॄं साधुं यजमानं कामयमानानामित्यर्थः । किञ्च देवानां रातिः दानं नोऽस्मानभिनिवर्त्ततामु देवा अस्मभ्यं ददतित्यर्थः । देवेभ्यो लब्धदाना वयं देवानां सख्यं मैत्रीमुपसेदिम प्राप्नुयाम संदेलिटि उत्तमबहुत्वे रूपं संहितायां दीर्घः । देवा नोऽस्माकं सर्वानामायुः जीवसे जीवितुं प्रतिरन्तु प्रवर्धयन्तु ॥ १५ ॥

तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्यमणं वरुणꣳसोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ १६ ॥

(१)तान् पूर्वया । पूर्वया अकृत्रिमया स्वयम्भुवा । निविदा निविच्छब्दो वाग्वचनः वाचा वयं तान् देवान् हूमहे आह्वयामः तान् कानित्यत आह । भगं मित्रम् अदितिं दक्षम् अस्रिधम् स्रेधते स स्रित् न स्रित् अस्रित् तम् अच्युतसद्भावम् दक्षस्यैतद्विशेषणम् । अर्यमणं वरुणं सोमम् आश्विनौ । एतैः सहिता सुभगा सुभजनीयां सरस्वती नः अस्माकं मयः सुखङ्करत् करोतु ॥ १६ ॥

पूर्वया प्राचीनया अकृत्रिमया स्वयम्भुवा निविदा वाचा वेदरूपया वयं तान् प्रसिद्धान् देवान् हूमहे आह्वयामः । निविच्छब्दो वाग्वाचकः । तान् कान् तत्राह भगं मित्रमदितिं देवमातरम् दक्षं प्रजापतिम् अर्यमणं वरुणं सोममश्विना अश्विनौ । अस्रिधमिति भगादीनां विशेषणम् न स्रेधते च्योतते सोऽस्रित् तमच्युतसद्भावम् । किञ्च शोभनं भगं भाग्यं यस्याः सा सुभगा भजनीया सरस्वती भगादिसहिता नोऽस्माकं मयः करत सुखं करोतु ॥ १६ ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी

(१) वाराणसी० पुस्तकसंमतोऽयं पाठक्रमः ।

तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तद॑-श्विना शृणुतं धिष्ण्या युवम् ॥ १७ ॥

(१)तन्नः वातः नोऽस्माकं मयोभु सुखस्य भावयितृ तत् भेषजं हितं वातु । अनुगृह्णातु । माता पृथिवी च तद् भेषजं वातु पिता तद् भेषजं वातु सोमसुतः सोमाभिषवकारिणः मयोभुवः सुखस्य भावयितारः ग्रावाणः तद्भेषजं वान्तु हे अश्विनौ हे धिष्ण्या धारयितारौ युवं युवामपि तद्भेषजं शृणुतं श्रुत्वा च अनुगृह्णीतम् ॥ १७ ॥

वातः पवनः नोऽस्माकं भेषजमौषधं हितं यथा तथा वातु वा गतिगन्धनयोः लोट् प्रवातु अनुगृह्णात्वित्यर्थः ददात्विति यावत् । कीदृशं हितं मयोभु मयः सुखं भवति यस्मात् तन्मयोभु सुखोत्पादकं हितं ददातु । माता जगन्निर्मात्री पृथिवी तत् हितं वातु । पिता पालको द्यौः स्वर्गः तत् हितं वातु । सोमं सुन्वन्ति सोमसुतः सोमाभिषवकारिणो ग्रावाणः दृषदः तत् भेषजं वान्तु ददतु । कीदृशा ग्रावाणः मयोभुवः मयः सुखं भावयन्ति ते मयोभुवः सुखस्य दातारः । हे अश्विना अश्विनौ ! युवं युवां तत् वातादिभ्यो भेषजप्रार्थनं शृणुतं युवामपि हितं दत्तमित्यर्थः । कीदृशौ युवां धिष्ण्या धिष्ण्यौ गृहवद्धारयितारौ ॥ १७ ॥

तमीशा॑नं जग॑तस्तस्थुष॒स्पतिं॑ धियञ्जि॒न्वमव॑से हूमहे व॒यम् । पूषा नो॒ यथा॒ वेद॑सा॒मस॑द् वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥ १८ ॥

(२)तमीशानम् । वयं तम् ईशानं रुद्रम् हूमहे आह्वयामः ।

(१) अयं पाठक्रमः वाराणसी० पुस्तकसंमतः ।
(२) वाराणसी० लिखितपुस्तकसंमतोऽयं पाठक्रमः ।

किंभूतम् जगतो जङ्गमस्य तस्थुषः स्थावरस्य पतिं धियञ्जिन्वम् । धिया बुद्ध्या संकल्पमात्रेण जिन्वति प्रीणाति इति धियञ्जिन्वः यद्वा धिया कर्मणा जिन्वति तं किमर्थं हूमहे । अवसे अवनाय तर्पणाय । पूषा यथा येन प्रकारेण नः अस्माकम् वेदसान्धनानाम् वृधे वर्द्धनाय । स्वस्तये च असत् भूयात् तथा हूमहे किं पूषा रक्षिता धनस्य पायुः पाताऽस्माकम् अदब्धः अनुपहिंसितः केनापि ॥ १८ ॥

वयं तं प्रसिद्धमीशानं यद्वं हूमहे आह्वयामः । कीदृशं तं जगतः जङ्गमस्य तस्थुषः स्थावरस्य च भूतजातस्य पतिं पालकम् । धियञ्जिन्वं धियं बुद्धिं जिन्वति प्रीणातीति धियञ्जिन्वस्तम् खलु क् बुद्धिसन्तोषकारकम् जिन्वतिः प्रीणनार्थः । किमर्थं हूमहे अवसे अवितुं तर्पयितुं तुमर्थे असेप्रत्ययः यथा येन प्रकारेण पूषा नो ऽस्माकं वृधे वृद्ध्यै स्वस्तये कल्याणाय च असत् भवतु तथा हूमहे इत्यर्थः । कीदृशः पूषा वेदसां धनानां ज्ञानानां वा रक्षिता रक्षकः । पायुः पालकः पुत्रादीनाम् । अदब्धः अनुपहिंसितः ॥ १८ ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १९ ॥

(१)स्वस्ति नः । वृद्धश्रवाः प्रभूतधनः महाशब्दो महाकीर्तिर्वा । इन्द्रः नोऽस्माकं स्वस्ति स्वस्त्ययनं दधातु स्थापयतु विश्ववेदाः सर्वधनः सर्वज्ञो वा पूषा नः स्वस्ति दधातु । अरिष्टनेमिः अनुपहिंसितरथनेमिः तार्क्ष्यः नः स्वस्ति दधातु बृहस्पतिश्च नः स्वस्ति दधातु ॥ १९ ॥

विराट्स्थाना । आद्यौ पादौ नववर्णौ तृतीयो दशकः तुर्यो न्यूहेनैकादशकः नवकौ वैराजस्त्रैष्टुभश्चेति वचनात् । इन्द्रः नोऽस्मभ्यं

(१) अयं पाठक्रमः वाराणसी० लिखितपु० संमतः ।

स्वस्ति अविनाशं शुभं दधातु ददातु। कीदृशः वृद्धश्रवाः वृद्धं महत् श्रवः कीर्त्तिर्यस्य सः। पूषा नः स्वस्ति ददातु कीदृशः विश्ववेदाः विश्वं सर्वं वेदो धनं यस्य विश्वं वत्तीति वा विश्ववेदाः। तार्क्ष्यो रथो गरुडो वा नः स्वस्ति दधातु कीदृशः अरिष्टनेमिः अरिष्टा अनुपहिंसिता नेमिश्चक्रधारा प्रक्षो वा यस्य सः। बृहस्पतिः देवगुरुर्नोऽस्मभ्यं स्वस्ति ददातु ॥ १९ ॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥ २० ॥

(१)पृषदश्वा मरुतः। पृषन्तः शवला अश्वा येषां ते पृषदश्वाः। पृश्निमातरः। पृश्नि द्यौ माता येषान्त एवमुच्यन्ते। शुभंयावानः शुभङ्कर्तुञ्जनान्प्रति ये यान्ति ते शुभंयावानः। आतो मनिन्क्वनिप्वनिपश्चेति वनिप्। विदथेषु यज्ञेषु जग्मयः-गमनशीलाः। आदृगमहनेति किः। य इत्थंभूता मरुतस्ते अवसा अन्नेन हविर्लक्षणेन आहूताः सन्तः आगमन् आगच्छन्तु इहेत्यनुषङ्गः। ये च अग्निजिह्वा अग्निमुखा हुतादा इत्यर्थः। मनवः चतुर्दश ते च अवसागमन्निह। ये च सूरचक्षसः आदित्यदर्शनाः

---

(१) वाराणसीस्थ संस्कृतपाठशालीयौव्वटभाष्यलिखितपुस्तकसंमतोऽयं पाठक्रमः तद्यथा नोऽस्माकम् इह यज्ञे अवसा अन्नेन हविर्लक्षणेन आहूताः सन्तः आगमन् आगच्छन्तु किं मरुतः पृषदश्वाः पृषतः शवलाः अश्वाः येषां ते पृश्निमातरः पृश्नि द्यौः गौर्वा माता येषां ते शुभंयावानः। शुभं कर्तुं जनान् प्रति यान्तु ते शुभंयावानः आतो मनिन् क्वनिप्वनिपश्चेति वनिप् विदथेषु यज्ञेषु जग्मयः। गमनशीलाः। आदृगमहनेति किः मनवः चतुर्दश ते च इहागमन् किं मनव अग्निजिह्वाः अग्निमुखा हुताद इत्यर्थः विश्वे सर्वे देवाश्च अवसा इह आगमन् किं देवाः सूरचक्षसः आदित्यदर्शनाः ॥ २० ॥

विश्वदेवाः ते च नःअस्माकम् अवसागमन्निह यज्ञे ॥ २० ॥

जगती । मरुतो देवाः अवसाव्रेन हविर्लक्षणेन हेतुना इहयज्ञे आगमन्आगच्छन्तु । कीदृशा मरुतः पृषदश्वा पृषत्यः पृषतीसंज्ञा अश्वा वडवा वाहनं येषां ते पृषदश्वाः पुंवद्भावः पृषत्यो मरुतामिति (निघ० १, १५, ६) वचनात् । यद्वा पृषन्तः शबलाः अश्वाः येषां ते । पृश्निर्गौर्दितिर्वा माता जननी येषां ते पृश्निमातरः । शुभं कल्याणं यान्ति प्राप्नुवन्ति प्रापयन्ति वा शुभंयावानः आतो मनिन्क्वनिप् (पा० ३, २, ७४) वनिप्प्रत्ययः । विदथेषु यज्ञगृहेषु जग्मयः गमनशीलाः आदृगमहनेति (पा० ३, २, १७१) किः । अग्निजिह्वाः अग्निर्जिह्वा भोजनसाधनं येषां ते अग्निमुखा वै देवा इति श्रुतेः हुतादः इत्यर्थः । मन्यन्ते जानन्ति मनवः सर्वज्ञाः । सूरः सूर्यश्चक्षुः चक्षुः येषां ते सूर्ये चक्षते पश्यन्ति वा सूरचक्षसः । किञ्च न केवलं मरुतः विश्वे सर्वे देवाः च नोऽस्माकं यज्ञे आगमन्आगच्छन्तु ॥ २० ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २१ ॥

(१)भद्रं कर्णेभिः हे देवाः वयं कर्णेभिः कर्णाभ्यां भद्रमनुकूलं शृणुयाम हे यजत्राः यजनीयाः देवाः अक्षभिः अक्षिभ्यां वयं भद्रं पश्येम । किं च स्थिरैः अशिथिलैः अङ्गैः तुष्टुवांसः देवान् स्तुवन्तः सन्तः तनूभिः भार्यापुत्रपौत्रादिवपुर्भिः सहिता देवहितं देवैः स्थापितं मनुष्याणां यत् आयुः तत् व्यशेमहि वयं व्यश्नुवीमहि ॥ २१ ॥

तिस्रस्त्रिष्टुभः । हे देवाः ! कर्णेभिः कर्णैः भद्रं कल्याणमनुकूलं वचः शृणुयाम । हे यजत्राः ! यजन्तं त्रायन्ते रक्षन्ति यजत्राः यजमा-

---

(१) अयं पाठक्रमः वाराणसी० लिखितपुस्तकेऽस्ति ।

नपालकाः अक्षभिः नेत्रैः भद्रं वयं पश्येम बहुलं छन्दसीति (पा० ७, १, ७६) हलादौ अक्षिशब्दस्यानङ्गादेशः । किञ्च देवहितं देवैः स्थापितं देवानां हितं देवोपासनयोग्यं वा यदायुः जीवनं तद्वयं व्यशेमहि व्यश्नुवीमहि प्राप्नुयाम । कीदृशा वयं स्थिरैः दृढैरङ्गैः अवयवैः करचरणादिभिः तनूभिः शरीरैश्च पुत्रादिभिर्वा युताः तुष्टुवांसः भवतः स्तुवन्तः सन्तः ॥ २१ ॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ २२ ॥

(१)शतमित्। हे देवा शतम् इत शतमपि शरदः अन्ति अन्तिके भवथ। आकल्पकालमिति भावः यत्र यस्मिन् शरदां शते नोऽस्माकं तनूनां यूयं जरसं जरानिमित्तामशक्तिं चक्र कृतवन्तः। करोतेर्लिण्मध्यमबहुवचनम्। किञ्च यत्र शरदां शते। पुत्रासः पितरो भवन्ति पुत्रा अग्नयः ते हि यजमानस्य पितरो जनितारो भवन्ति। तदुक्तम् यत्र वै प्रजापतिः प्रजाः ससृजे इत्युपक्रम्य। तमाजनयित्वा बिभृहीति। यत्र पितरो भवन्ति एतदप्युक्तमेव। स यत्र म्रियते यत्रैनमग्नावभ्यादधाति तदेषो अग्नेरधिजायते स एष पुत्रः सन्पिता भवतीति। अथवा यत्र शरदां शते पुत्राः और्ध्वदैहिकं कुर्वाणाः पितरो भवन्ति पुत्राणां पुत्राः स्युरित्यर्थः। यतो यूयमन्तिकेऽतो ब्रूमः मध्या मध्ये अकाले एव नोऽस्माकमायुः मा रीरिषत मा हिंसिष्ट किंभूतमायुः गन्तोः गन्तृ गमनशीलम्। उक्तञ्च ॥

सञ्चिन्त्य सञ्चिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य।

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति।

वर्षासु सिक्ता इव चर्मबन्धाः सर्वे प्रयत्नाः शिथिलीभवन्तीति ॥ २२ ॥

हे देवाः ! शतमित् शतमपि शरदो वर्षाणि शतवर्षपर्यन्तं यूयमन्ति अन्तिके समीपे भवतेति शेषः यत्र शरच्छते नोऽस्माकं तनूनां शरीराणां यूयं जरसं जरां चक्र कुरुत करोतेर्लिटि मध्यमबहुवचनम् द्व्यचोऽतस्तिङ इति (पा० ६, ३, १३५) चक्रेत्यत्र संहितायां दीर्घः निपातस्य चेति (पा० ६, १३६) यत्रेत्यत्र दीर्घः वार्द्धकावधि यूयं समीपे भवतेत्यर्थः । यत्रास्माकं जरायां पुत्रासोऽस्मत्पुत्राः पितरो भवन्ति पुत्रवन्तो भवन्ति यावदस्माकं पौत्रा भवन्तीत्यर्थः तावत् मध्या मध्ये नोऽस्माकमायुर्मा रीरिषत मा हिंसिष्ट रिषतेर्हिंसार्थस्य णिजन्तस्य चङि रूपम् । कीदृशमायुः गन्तोः गन्तृ गमनशीलम् तदुक्तम् सञ्चिन्त्य संचिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य । वर्षासु सिक्ता इव चर्मदण्डाः सर्वे प्रयत्नाः शिथिलीभवन्तीति ॥ २२ ॥

अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑तिर्मा॒ता स पि॒ता स पु॒त्रः । विश्वे॑ दे॒वा अदि॑तिः॒ पञ्च॒ जना॒ अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम् ॥ २३ ॥

(१)सर्वात्मकत्वेनादितिं मन्त्रदृक् स्तौति अदितिर्द्यौः द्यौः अन्तरिक्षं माता सः सा पिता पुत्रः सः सा अदितिरिति छान्दसो लिङ्गव्यत्ययः विश्वे च देवाः पञ्चजनाः मनुष्याः सर्वम् अदितिरेव किम्बहुनोक्तेन जातं भूतं जनित्वं जनिष्यमाणं च अदितिरेव । अथवानेन मन्त्रेणादितिर्नोच्यते । किं तु द्यौःप्रभृतीन्येतानि अदीनानि महाभाग्ययुक्तानि ॥ २३ ॥

मन्त्रदृक् सर्वात्मकत्वेनादितिं स्तौति । द्यौः स्वर्गोऽदितिः तदधिष्ठातृत्वात् एवमग्रेऽपि अन्तरिक्षमदितिः माता पिता पुत्रश्च सः

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति ।

पत्य आवयन्ति तदभिमायमेतत् । एवं विधस्याश्वस्य गृभीतां गृहीतां रातिन्दानम् आज्यसक्तुधानालाजालक्षणम् उदरतो नयन्ति मुखाग्रे मापयन्ति । अश्वाय रात्रिहुतशेषं प्रयच्छन्तीत्येतदभिमायम् । तत् तदा अश्वस्य सुप्राङ् सुष्ठु माग-श्नः ललाटे बद्धः अजः अप्येति अभ्यागच्छति किंभूतः अजः मेम्यत् मेम्यदिति शब्दानुकरणम् । मेमे इति शब्दं (२)कुर्वाणः । विश्वरूपः नानावर्णः कृष्णग्रीव आग्नेयो रराटे पुरस्तादित्येतदभिमायमेतत् । किञ्च इन्द्रापूष्णोः इन्द्रस्य पूष्णश्च प्रियं पाथः अन्नं पशुलक्षणम् श्यामाख्यम् अश्वस्य नाभिवद्धं तदप्येति अभ्यागच्छति । यदिह पठ्यते सौमापौष्णः श्यामो नाभ्याम् । तदयं मन्त्रोऽभिवदति । इन्द्रापूष्णोः प्रियमप्येति पाथ इति हुतशेषमन्नमश्वाग्रे भक्षार्थं यदा नीयते तदा ललाटनाभिवद्धौ अजौ आगच्छत इत्यर्थः ॥ २५ ॥

यत् यदा विप्रा अश्वस्य मुखतो मुखाग्रे गृभीतां गृहीतां रातिं दानमाज्यसक्तुधानालक्षणं नयन्ति प्रापयन्ति अश्वाय रात्रिहुतशेषं प्रयच्छतीत्युक्तं तदा अजः छागःअप्येति भक्षणायागच्छति । कीदृशोऽजः सुप्राङ् सुष्ठु प्राश्नाति पूर्वं गच्छति सुप्राङ् ललाटे बद्ध इत्यर्थः कृष्णग्रीव आग्नेयो ललाटे पुरस्तादित्युक्तेः (२४, १) तथा मेम्यत् शब्दानुकरणम् मे मे इति शब्दं कुर्वन् । विश्वरूपः विश्वानि रूपाणि यस्य नानावर्ण इत्यर्थः । किञ्च इन्द्रापूष्णोः इन्द्रश्च पूषा च इन्द्रपूषणौ तयोः देवताद्वन्द्वेति (पा० ६, ३, २६) इन्द्रपदस्य दीर्घः इन्द्रस्य पूष्णश्च प्रियमिष्टं पाथोऽन्नं पशुलक्षणं तदप्येति भक्षाय नाभिबद्धोऽप्यागच्छति सौमापौष्णः श्यामो नाभ्यामित्युक्तेः (२४, १) । हुतशेषमन्नं यदाश्वाय दीयते तदा ललाटनाभिबद्धावजौ भक्षणायागच्छत इत्यर्थः । कीदृशस्याश्वस्य निर्णिजा निर्णेजनेन स्नानेन प्रावृतस्य संस्कृतस्य आलम्भनकाले स्नापितस्य

(२) कुर्वन् इति पाठान्तरम् ।

निर्णेजनं निर्णिक् तया निजतेः सम्पदादित्वाद्भावे क्विप् । तथा रेक्णसा प्रावृतस्य आच्छादितस्य रेक्ण इति धननाम (निघ० २, १०, २) धनेन सौवर्णमणिलक्षणेन प्रावृतस्य अश्वस्य सौवर्णान्मणीन् केसरपुच्छेषु पत्न्य आवयन्तीत्युक्तेः ॥ २५ ॥

एष छार्गः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः । अभिप्रियं यत् पुरोडाशमर्वता त्वष्टेदेनꣳ सौश्रवसाय जिन्वति ॥ २६ ॥

(१) एष छागः । एष आग्नेयश्छागः पुरः अग्रतः स्थितः नीयते अश्वेन वाजिना व्यापकेन सहितः । पूष्णश्च पोषकस्याग्नेश्च भागो भजनीयः नीयते अश्वैः सह । सोऽपि पर्य्यङ्ग्य एव । विश्वे देव्यः विश्वेभ्यः सर्वेभ्यो देवेभ्यः हितः अग्नेःसर्वदेवात्मकत्वात्सर्वदेवप्रियत्वम् । कस्मात् अभि प्रियम् अभिप्रेतं यत् । यच्च पुरोडाशम् । पुरोडाशङ्कर्तुम् अर्वत । अश्वेन सहितम् । अश्वस्तस्मिन्काले संज्ञप्यते पशुपुरोडाशः क्रियते तदेतदुक्तम् । त्वष्टा च एनमजम् । तदा सौश्रवसाय शोभनान्तकरणाय जिन्वति प्रीणाति । स हि तस्याधिकार इति ॥ २६ ॥

यत् यदा एषः छागोऽजः वाजिना वेगवताश्वेन पुरः पुरस्ता-

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति मुम्बई मु० पु० नास्ति । तद्यथा एष छागः । एषः छागः शृङ्गरहितोऽजः वाजिना शीघ्र व्यापकेन अश्वेन सह पूष्णः पोषकस्याग्नेः भागः भजनीयः विश्वदेव्यः सर्वदेवार्हः अग्नेः सर्वदेवात्मकत्वात् इहत्येन सर्वदेवप्रियत्वम् एवंविधोऽजः पुरः पुरस्तात् नीयते प्राप्यते यम् यस्मात् एवं क्रियते तस्मादभिप्रियं समन्तात् प्रीडयितारं पुरोडाशं पुरस्ताद् दातव्यम् । एनमजं त्वष्टा इत् त्वष्टैव सर्वोत्पादको देवः अर्वता अरणवता अश्वेन सह सौश्रवसाय शोभनान्तकरणाय जिन्वति प्रीणाति स हि तस्याधिकारः ॥ २६ ॥

स् नीयते प्राप्यते ललाटवद्धत्वात्। कीदृशः छागः पूष्णो भागः पुष्णाति देवानिति पूषाग्निस्तस्य भागः भजनीयः आग्नेयो रराटे इत्युक्तत्वात् (२४, १)। तथा विश्वदेव्यः विश्वेभ्यो हितः सर्वदेवार्हः अग्नेः सर्वदेवात्मकत्वात्। तदा त्वष्टा इत् त्वष्टैव प्रजापतिरेव अर्वता अश्वेन सह एनं छागं जिन्वति प्रीणाति। किमर्थं सौश्रवसाय शोभनं श्रवः कीर्तिर्यस्य सः सुश्रवास्तस्य भावः सौश्रवसं तस्मै सुकीर्तये यशेऽमृतानां स्वर्गस्तिरुक्तत्वात्। किम्भूतमेनम् अभिप्रियम् अभिप्रीणातीति तम् समन्ताद्देवानां प्रीणयितारम्। पुरोडाशं पुरो डाशन्ते ददति एनं स पुरोडाशः तम् पुरस्ताद्दातव्यम्॥२६॥

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति। अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः॥ २७॥

यद्धविष्यम्(२)। यदा हविष्यम् ऋतुशः ऋतावृतौ स्वचारिणं देवयानम् देवानाम् प्रापणीयम् देवयानमार्गगामिनम्वा आदित्यवदनिवारितगतिं वा। त्रिःसंस्कृतम्। स्नापनं व्यजनसुवर्णमणिकमवारैः मानुषाः ऋत्विग्यजमानाः परिणयन्ति अश्वम्। अत्र तत्रेत्यर्थः। तस्मिन् काले पूष्णः पोषकस्याग्नेः प्रथमो भागोऽजाख्यः एति यज्ञम् देवेभ्यःप्रतिवेदयन् अजः स्वकीयेन शब्देन। चरकश्रुतौ पूष्णो ललाट इति पठ्यते तदभिप्रायमेतत् ॥२७॥

मानुषा मनुष्या ऋत्विजो यत् यदा अश्वं त्रिः परिणयन्ति वारत्रयं पर्य्यग्नि कुर्वन्ति। कीदृशमश्वं हविष्यं हविषे हितं हविर्योग्य-

(२) यद्धविष्यम् हविष्यं हविर्योग्यं देवयानं देवानां प्रापणीय देवयानमार्गगामिनं वा आदित्यवदनिवारितगतिं वा अश्वं यत् यदा काले काले त्रिः त्रिवारं परिणयन्ति पर्यग्नि कुर्वन्तीत्यर्थः अत्र अस्मिन् समये ऋचि नन्वियेति दीर्घः पूष्णः पोषकस्याग्नेर्भागोऽजः प्रथमःपुरोगामी सन् एति गच्छति किं कुर्वन् देवेभ्यः यज्ञं प्रति वेदयन्। प्रख्यापयन् स्वशब्देन चरकश्रुतौ पूष्णो ललाटे इति पठ्यते तदभिप्रायमेतत ॥२७॥

म् । क्रतुशः क्रतौ क्रतौ यज्ञकाले देवयानं देवानां प्रापणीयं देवेषु यानं गमनं यस्य तम् देवयानमार्गगामिनं वा यद्वा देवयद्वादित्यवयानं गतिर्यस्य अनिवारितगतिमित्यर्थः । अत्रास्मिन् समये पर्यग्निकरणकाले पूष्णः पोषकस्य वृद्धस्य याग्रेभागोऽजः प्रथमः पुरोगामी सन् एति गच्छति । किं कुर्वन् देवेभ्यः यज्ञं प्रतिवेदयन् प्रख्यापयन् स्वशब्देन ज्ञापयन् एष वृद्धो एवति वर्धते पुराग्निः ॥ २७ ॥

होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः । तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आपृणध्वम् ॥ २८ ॥

(३)होताध्वर्युः । होता तत्र शंशिता सुविप्र इति संबन्धः । यस्मिन्यज्ञे होता विशंसिता । शस्त्राणामपि साधु मेधावी साधुब्राह्मणो वा अध्वर्युश्च यस्मिन्यज्ञे आवयाः आभिमुख्येन वयति-कर्मणीत्यावयाः अग्निमिन्धः अग्निदीपकः ग्रावग्रामः । ग्रवग्राहः

(३) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति मुम्बई मुद्रित पुस्तके नास्ति । तद्यथा होताध्वर्युः । होता देवानामाह्वाता तन्नामक ऋत्विक् अध्वर्युः अध्वरयुः अध्वरस्य नेता सोऽपि आवयाः । आभिमुख्येन वयति तनोति कर्माणीति आवयाः अध्वर्योर्विशेषणमेतत् यद्वा आभिमुख्येन अवयष्टा प्रति प्रस्थातोच्यते अव यजः इति ण्विन् अवयाव्योरुपसर्गयोरिति अवशब्दस्याल्लोपः अवयाः श्वेतवाः पुरोडाश्चेति निपातितः अग्निमिन्धोऽग्नीत् अग्नेर्दीपकः अग्नेरन्ध्योरिध इति मुम् । ग्रावग्राभः ग्रावणः स्तुत्या गृह्णातीति ग्राहः ग्रावस्तुत् कर्मण्यण् उत अपि शंस्ता प्रशास्ता सुविप्र इति मेधाविनामशोभनमेध्योपेतो ब्रह्म ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीत्युक्तत्वात् ब्रह्मैव सुविप्रशब्देनाभिधेयः स चानुक्त ऋत्विगुपलक्षकः एते सर्वे तेन प्रसिद्धेन स्वरं कृतेन सुष्ठु अलंकृतेन स्विष्टेन सुष्ठु इष्टेन यज्ञेन वक्षणाः नदीः घृतकुल्यायाः प्रवहणस्वभावाः आपृणध्वं सर्वतः पूरयत यज्ञं सम्यग् निर्वर्त्य फलं साधयतेत्यर्थः ॥ २८ ॥

सोमाभिषवायग्रावग्रहणशीलः उत अपि शंस्ता । तेन यज्ञेन साध्वलङ्कृतेन स्विष्टेन साधु इष्टेन च । वक्षणाः नदीः देवानां तुष्टिकराः । पयोदधिपयस्या पुरोडाशमांसैः । आपृणध्वम् आपूरयध्वम् अकृपणन्दातव्यमित्यभिप्रायः ॥ २८ ॥

हे होत्रादय ऋत्विजः ! तेन प्रसिद्धेन यज्ञेनाश्वमेधेन वक्षणाः नदीः घृतकुल्याद्याः आपृणध्वं घृतपयोदधिपयस्यापुरोडाशमांसैः पूरयत । वहन्तीति वक्षणाः । यज्ञं सम्पाद्य फलं साधयतेत्यर्थः । कीदृशेन यज्ञेन स्वलङ्कृतेन रलयोरैक्यं सुष्ठु अलंकृतेन विप्रहवि-र्दक्षिणादिभिः शोभितेन । स्विष्टेन सुष्ठु इष्टेन । के ऋत्विजस्तानाह होता आह्वाता देवानां तन्नामक ऋत्विक् । अध्वर्युः अध्वरमिच्छ-ति अध्वर्यति सुप आत्मनः क्यच् कव्यध्वरपृतनस्यार्चि लोप इति (पा० ७, ४, ३९) टिलोपः ततः क्याच्छन्दसीति (पा०३,२, १७०) उप्रत्ययः । आवयाः आभिमुख्येनायजतीत्यावयाः श्वेतवाहोक्थ-शासेति उम् आवयाः प्रतिप्रस्थाता अवे यज इति (पा० ३, २, ७२) ण्विन् अयाप्योरिति अवस्यालोपः । अग्निमिन्धः अग्निमिन्-द्धे दीपयति अग्निमिन्धः अग्नीत् भ्राष्ट्राग्न्योरिन्ध इति (पा० ६, ३, ७० वा० ६) मुम । ग्रावग्राभः ग्रावग्राहः ग्राव्णो गृह्णाति स्तौति ग्रावग्राभः कर्मण्यण् हस्य भः ग्रावस्तोता । उतापि शंस्ता शंसति स्तौति शंस्ता प्रशास्ता । सुविप्रः शोभनो विप्रो मेधावी सुविप्रो ब्रह्म ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीत्युक्तेः । अयमनुक्तर्त्विगुपल-क्षकः । एते यज्ञेन वक्षणाः पृणध्वमिति सम्बन्धः ॥ २८ ॥

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति । ये चार्वते पचनꣳ सम्भरन्त्युतो तेषामभि-गूर्तिर्न इन्वतु ॥ २९ ॥

(४) यूपव्रस्का उत यूपं ये व्रश्चन्ति त एवमुच्यन्ते उत अपि.

(४) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति । मुम्बईमु० पु०ना० तद्यथा यूपव्रस्काः यूपार्हवृक्षस्य मश्चनकर्तारः छत्तारःउत ये

च ये यूपवाहाः यूपं ये वहन्ति चषालं ये अश्वयूपाय तक्षन्ति ये जनाः अश्वबन्धनयूपाय चषालं यूपाग्रभागन्तक्षति। तक्षन्तीति प्राप्ते छान्दसमेकवचनम् साधु सम्पादयन्ते। ये च अर्वते अश्वाय पचनम्पच्यते ऽनेनेति पचनकाष्ठादिसम्भरन्ति। अतो अपि च तेषाञ्जनानां संबन्धिनी अभिगूर्त्तिः गुरी उद्यमने। आगूरणमभिगूर्त्तिः स्वकाले सर्वं करणीयमिति बुद्धिः इन्वतु व्याप्नोतु ॥ २९ ॥

तेषामृत्विजामभिगूर्त्तिः आभिगोरणमाभिगूर्तिरुद्यमः नोऽस्मानिन्वतु प्रीणातु व्याप्नोतु वा अस्माकं यज्ञं सम्यक् साधयत्वित्यर्थः इवि व्याप्तिप्रीणनयोः लोट् शपि इदितो नुम् धातोरिति (पा० ७, १, ५८) नुमागमः। तेषां केषाम् ये यूपव्रस्काः यूपाय वृश्चन्ति तरुं छिन्दन्ति ते यूपव्रस्काः। उतापि च ये यूपवाहाः यूपं वहन्ति ते यूपवाहाः कर्मण्यण् छिन्नस्य यूपस्य वोढारः। ये च अश्वयूपाय अश्वबन्धनयूपार्थं चषालं तक्षति यूपाग्रे भागे स्थाप्यं काष्ठं तक्षन्ति वचनव्यत्ययः। चषालो यूपकटक इत्यमरः (२, ७, १८) तक्षू तनूकरणे साधु सम्पादयन्तीत्यर्थः। उतो अपि च ये नराः अर्वते अश्वाय पचनं पच्यतेऽनेनेति पचनं पाकसाधनं काष्ठभाण्डादिकं सम्भरन्ति संहरन्ति आनयन्ति तेषामुद्यमोऽस्मान् प्रीणात्वित्यर्थः॥२९॥

उप॒ प्रागा॑त् सु॒मन्मे॑ऽधायि॒ मन्म॑ दे॒वाना॒माशा॒ उप॑

यूपवाहाः छिन्नस्य वोढारः ये च चषालं यूपस्योपरि स्थाप्यं यूपाग्रभागं चषालमाहुः तत् अश्वयूपाय अश्वबन्धनयूपाय तक्षति तक्षन्ति इति प्राप्ते वचनव्यत्ययः साधु सपादयन्ति ये च अर्वते अरणवतेऽश्वाय पचनं पाकसाधनं काष्ठभाण्डादिकं संभरन्ति उतो अपि च नोऽस्मत्सम्बन्धिनं तेषां ऋत्विजाम् अभिगूर्त्तिः सकाले सर्वं करणीयमितिबुद्धिः इन्वतु व्याप्नोतु इन्वतिर्व्याप्तिवचनः यद्वा तेषामभिगूर्तिः गुरी उद्यमे आगोरणम् अभिगूर्तिः नोऽस्मान् इन्वतु याग साधु पारं प्रापय्य बलेन योजयत्वित्यर्थः ॥ २९ ॥

धीतपृष्ठः । अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥ ३० ॥

(५) उपम । उपप्रागात् उपैतु सुमत् स्वयमित्यर्थ इति यास्कः । मे मम अधायि निहितम् । यत् मत् मननम् किं तदिति चेत् । देवानाम् आशाः शंसनानि साधु साध्वयं पशुरागच्छेदित्येवमादीनि । उप आगतः वीतपृष्ठः साधुपोषणेन प्राप्तपश्चाद्भागः। कामितपृष्ठो वा । अश्वपृष्ठं हि सर्व एवारोढुं कामयन्ति । यत एवमतो ब्रवीमि । अन्वेनं विप्रा ऋषयो मदन्ति । अनुमदन्ति अनुमोदन्ति एनमश्वं विप्रा ऋषयश्च स्वयञ्च देवानां पुष्टे पोषणाय । चकृम कृतवन्तः । सुबन्धुं शोभनबन्धनम् शोभनार्थवाद वा ॥ ३० ॥

मन्म मननीयं फलं सुमत् स्वयमुपप्रागात् उपगच्छतु सुमदित्यव्ययं स्वयमित्यर्थे सुमत् स्वयमित्यर्थे इति यास्कोक्तेः (निरु० ६, २२) तन्मन्म फलं मे मया अधायि धृतमित्यर्थः । किञ्च अयं वीतं पुष्टं पृष्ठं यस्य यद्वा वीतं कामितं पृष्ठं यस्य अश्वपृष्ठमारोहणाय सर्वे कामयन्ते स वीतपृष्ठोऽश्वो देवानामाशाः मनोरथान् पूरयितुमिति शेषः उप गच्छतु उपसर्गेण क्रियावृत्तिः । किञ्च देवानां पुष्टे

(५) अयं पाठक्रमः वाराणसी० पु० आस्ति । उपप्रागात् मन्म मननीयं फलं सुमत् उपप्रागात् उपैतु सुमत् स्वयमित्यर्थ इति यास्कः । यद्वा सुमत् स्वयमेव मन्म फलभूतोऽश्वः मे मयि आगतः स च मया अधायि धृत इत्यर्थः किमर्थं वीतपृष्ठः साधु पोषणेन प्राप्तपश्चाद्भागः कामितपृष्ठो वा अश्वपृष्ठं हि सर्वे एवारोढुं कामयन्ते तादृशोऽयमश्वः देवानामाशाः पूरयितुमुपगच्छतु यागार्थमागतमेनं सुबन्धुं शोभनबन्धनम् अश्वं देवानाम् आयतां पुष्टे पोषाय चकृम कुर्मः तं च विप्रा मेधाविनः ऋत्विजः ऋषयोऽतीन्द्रियद्रष्टारः अन्ये वा विप्रा ऋषयश्च अनुमदन्ति अनुमोदतां सम्यक् कृतमिति परितुष्यन्तु ॥ ३० ॥

पोषणं पुष्टम् भावे निष्ठा निमित्ते सप्तमी देवपुष्टिनिमित्तं यमश्वं च-यं सुबन्धुं चक्रम कृतवन्तः संहितायां दीर्घः शोभनो बन्धुर्बन्धनं यस्य तम् यमश्वं बद्धवन्तः एनमश्वं विप्रा मेधाविनः ऋषयो मन्त्रदर्शिन ऋत्विजोऽनुमदन्ति अनुमोदन्तां तुष्यन्तु ॥ ३० ॥

यद् वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य । यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते अपि देवेष्वस्तु ॥ ३१ ॥

(१)यद्वाजिनः । वेजनवतः । दाम ग्रीवाबन्धनरज्जुः सन्दानं सम्यगवच्छेदकं पादबन्धनम् अर्वतः अश्वस्य पश्चशीर्षण्या शिरसि बद्धा नियोजनीया रज्जुः अस्याश्वस्य । यद्वा घः पादपूरणे । अस्याश्वस्य प्रभृतम्प्रहृतं निक्षिप्तम् आस्ये मुखे तृणम् सर्वाणि तानि ते तव हे यजमान । अपि देवेषु अपि प्रजापतये अस्तु । सन्त्विति प्राप्ते वचनव्यत्ययः ॥ ३१ ॥

वाजिनो वेगवतोऽर्वतोऽश्वस्य यत् दाम ग्रीवाबद्धा रज्जुः यच्च सन्दानं पादबन्धनरज्जुः । या च शीर्षण्या शीर्षे भवा शीर्षण्या शिरोबद्धास्याश्वस्य रज्जुः शिरःशब्दाद्भवे छन्दसीति (पा० ४, ४, ११०) यत् । ये च तद्धित इति पा० ६, १, ६१) शीर्षन्नादेशः तित्

(१)अयं पाठक्रमः वाराणसी०लि०पु० अस्ति । मुम्बई मु०पु०नास्ति ॥ यद्वाजिनः वाजिनो गमनवतोऽर्वतोऽश्वस्य यत् दाम ग्रीवाबद्धा रज्जु यच्च सन्दानं सम्यगवच्छेदकं बन्धकं पादबन्धनं दामास्ति या च अस्याश्वस्य शीर्षण्या शिरसि बद्धा रशना नियोजनीया रज्जुरस्ति शिरःशब्दाद्भवे छन्दसीति यत् ये च तद्धित इति शीर्षभावः तित्स्वरितः यद्वा अस्याश्वस्य आस्ये मुखे प्रभृतं प्रहृतं प्रक्षिप्तं तृणमस्ति घशब्दो ह्यर्थे स च प्रसिद्ध्यर्थः सर्वा सर्वाणि अपि ता तानि ते तव हे यजमान देवेषु मध्ये अस्तु सन्तु देवत्वं प्राप्नुवन्तु वा वचनव्यत्ययः अत्रोपयुक्तानां सर्वेषां देवत्वं क्रियाशास्त्रे ऽश्वस्य तत्प्राप्तिर्नाशङ्कनीया ॥ ३१ ॥

स्वरितम्। कटिस्था रशना रज्जुः अस्यान्यापि या रज्जुः। अस्याश्वस्य च प्रसिद्धम् आस्ये मुखे प्रभृतं प्रहृतं प्रक्षितं यत् तृणं हे अश्व! ते तव सर्वा सर्वाणि ता तानि देवेषु अस्तु सन्तु देवोपयोगीनि भवन्तु देवत्वं प्राप्नुवन्तु वा। अश्वोपयुक्तानां सर्वेषां देवत्वमाशास्यते ॥ ३१ ॥

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति। यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ ३२ ॥

(१) यदश्वस्य। यत् अश्वस्य क्रविषः अश्वाङ्गभूतस्य क्रव्यस्य मांसस्य क्रव्यं विकृन्ताज्जायत इति नैरुक्ताः। अङ्गम्। मक्षिका आश अशितवती। यद्वा। स्वरौ स्वधितौ रिप्तमस्ति। यच्च स्वरोपश्वञ्जनकाले स्वधितौ शासे छेदनकाले लिप्तं लग्नमस्ति। यच्च हस्तयोः शमितुः रिप्तम् यच्च नखेषु रिप्तम्। सर्वा ता ते अपि देवेष्वस्तु इति व्याख्यातम् ॥ ३२ ॥

मक्षिका अश्वस्य क्रविषः क्रविः यदाश भक्षितवती अश्नातेर्लिट् क्रविषः इति कर्मणि षष्ठी वाथवा यत् मांसं स्वरौ पश्वञ्जनकाले रिप्तं लिप्तमस्ति स्वरुणा पशुमनक्तीति श्रुतेः। यत् स्वधितौ शा

(१) वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मु० मुद्रितपुस्तके नास्ति। यदश्वस्य। अश्वस्य अवयवभूतस्य क्रविषः आममांसस्य यत् अङ्गं मक्षिका आश भक्षयति अश् भोजने यद्वा कर्मणि षष्ठी अश्वस्य यत् मांसं भक्षयति वा अथवा स्वरौ पश्वञ्जनकाले यत् रिप्तं लिप्तमस्ति स्वरुणां पशुमनक्तीति श्रुतेः। अथवा स्वधितौ शासे छेदनकाले अवदानकाले यत् लिप्तमस्ति शमितुर्हस्तयोर्यल्लिप्तमस्ति विशसनकाले यच्च नखेषु लिप्तं तानि सर्वाणि ते तव हे अश्व देवेषु सन्तु तेषामर्थाय भवन्तु अतिपकम् ईषत् पक्वं च मा कुर्वन्तित्यर्थः ॥ ३२ ॥ ३३ ॥

दो लिप्तमस्ति छेदनकालेऽवदानकाले च । यच्च शमितुर्हस्तयोः लिप्तं यच्च शमितुर्नखेषु लिप्तम् हे अश्व ! सर्वा ता सर्वाणि तानि अपि देवेषु अस्तु भवन्तु वचनव्यत्ययः सर्वं त्वदीयं देवभोग्यं भवतु ॥३२॥

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति । सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ॥ ३३ ॥

यदूवध्यम् यत् ऊवध्यम् भक्षितमपरिणतमामाशयस्थमूबध्यमुच्यते । उदरस्य अयुतं पृथग्भूतम् अपवाति गन्धायते । यश्च आमस्य पक्वस्य क्रविषः मांसस्य गन्धः अस्ति विद्यते । सुकृता तच्छमितारः कृण्वन्तु । तत्सर्वं शमितारः विशसनकर्तारः सुकृतानि सुसंस्कृतानि दोषरहितानि कुर्वन्तु । उत अपि च मेधं मेध्यं यज्ञार्हम् । शृतपाकं देवयोग्यपाकं पचतु अतिपक्वमीषत्पक्वञ्च मा कुर्वन्त्वित्यर्थः ॥ ३३ ॥

उदरस्य ऊवध्यमीषज्जीर्णतृणपुरीषं यत् अपवाति अपगच्छति । भक्षितमपक्वमामाशयस्थमूवध्यमुच्यते । आमस्यापक्वस्य क्रविषो मांसस्य यो गन्धो लेशोऽस्ति शमितारः विशासितारः तत्सर्वं सुकृता सुकृतं सुसंस्कृतं कृण्वन्तु कुर्वन्तु । उतापि च मेधं मेध्यमदवं शृतपाकं यथा पचन्तु शृतो देवयोग्यो जातः पाको यस्मिन् कर्मणि तथा पचन्तु अतिपक्वमीषत्पक्वं च मा कुर्वन्त्वित्यर्थः ॥ ३३ ॥

यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति । मा तद् भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ३४ ॥

(१) यत्ते । शूले सशेषश्रपणम् तदभिवदत्ययं मन्त्रः । यच-

(१) वाराणसी० लिखितपु०संमतोऽयं पा०मुम्बईमु० पु० नास्ति तद्यथा यत्ते । हे अश्व ते तव अग्निना पच्यमानात् गात्रात् यत्

ते तव गात्रादवयवात् अग्निना पच्यमानात्। ऊष्मरूपं रसो वा अवधावति गच्छति तथा निहतस्य निःशेषेण हतस्य यदङ्गरसरूपम् अभिशूलं शूलमभिलक्ष्य मांसादुत्कृष्टं धावति गच्छति। मा श्रिपत् मा श्लिपत् तदङ्गभूम्याम् मा च तृणेषु। किं तु देवेभ्यः तत् उशद्भ्यः वश कान्तौ कामयमानेभ्यः रातन्दानम् अस्तु ॥३४॥

हे अश्व! अग्निना पच्यमानात्ते तव गात्रात् शरीरात् यत् ऊष्मा रसो वा अवधावति अधस्तात् गच्छति। तथा निहतस्य निःशेषेण हतस्य यत् अङ्गशूलमभि अवधावति शूलेन पाके क्रियमाणे यन्निर्गच्छति तन्निर्गतमूष्माङ्गादिकं भूम्यां मा आश्रिपत् भूम्यादिलिष्टं मा भूत् श्लिषेः पुषादित्वात् च्लेरङ्। तथा तृणेषु मा श्रिपत् विशसनसमये तृणलग्नं मास्तु। किं तर्हि तत्पतितं तृणलग्नं सर्वं देवेभ्यो रातं दत्तमस्तु रा दाने। कीदृशेभ्यो देवेभ्यः उशन्ति कामयन्ते ते उशन्तः तेभ्यः हविः कामयमानेभ्यः वश कान्तौ लटः शत्रादेशः ॥ ३४ ॥

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति। ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वन्तु ॥ ३५ ॥

(१) ये वाजिनम्। ये जनाः वाजिनमश्वं परिपश्यन्ति पक्वं

ऊष्मरूपं रसो वा यत् किञ्चिदयधावति गच्छति तथा निहतस्य निःशेषेण हतस्य ते तव यदङ्गं रसरूपं शूलम् अभिलक्ष्यावधावति निर्गच्छति तदङ्गं भूम्यां मा आश्रिपत् आश्लिष्टं मा भूत् श्लिषेः पुषादित्वादङ् पाकसमये तथा तृणेषु विशसनसमये दर्भेषु मा श्रिपत् मापगच्छतु तर्हि तत्पतितं कुत्र गच्छतीति चेत् उच्यते तत् ईदृशमुशद्भ्यः कृत्स्नं हविः कामयमानेभ्यो देवेभ्यो रातं दत्तं हुतमस्तु॥३४॥

(१) वाराणसी० लिखितपु०संमतोऽयं पा० मुम्बईमु० पु० आ०। ये वाजिनं पक्वं वाजिनमश्वमश्वावयवं ये परिपश्यन्ति ये इम् ये ईमं

सन्तम्। ये च एनमश्वम् आहुः। किमाहुः सुरभिरयमश्वः अतो निर्हर किञ्चिदस्मभ्यं देहीति। इतिशब्दः प्रकारवचनः ये च अर्वतोऽश्वस्य संबन्धिनीं मांसभिक्षामुपासते हुतशिष्टमांसयाच्ञां काङ्क्षन्ते। उतो तेषाम् अपि च तेषां संबन्धिनी या अभिगूर्त्तिः सा नः अस्मान् इन्वतु व्याप्नोतु। यद्वा देवपरोऽयं मन्त्रो व्याख्येयः। ये देवाः वाजिनं परिपश्यन्ति पक्वम् कदा होष्यतीति विलम्बं दृष्ट्वा ये च सुरभिरयमश्वोऽतो निर्हर निःशेषेणास्मभ्यं देहीत्याहुः। ये चार्वतो मांसभिक्षामुपासते लिप्सन्ते उतो तेषामभिगूर्त्तिर्न इन्वतु। वयन्तु देवानामन्यभूता इत्यभिप्रायः॥ ३५॥

ये जनाः पक्वं वाजिनमश्वं परिपश्यन्ति अयं पक्व इति जानन्ति। य ईम् ईमित्यव्ययं चार्थे ये च इत्याहुः एवं कथयन्ति किम् सुरभिः सुगन्धः पाको जातः अतो निर्हर अग्नेः सकाशादुत्तारयेति। ये च जनाः अर्वतोऽश्वस्य मांसभिक्षामुपासते हुतशिष्टमांसयाचनां कुर्वते। उतो अपि च तेषां पाकद्रष्ट्रादिजनानामभिगूर्त्तिः उद्यमो नोऽस्मानिन्वतु प्रीणातु। यद्वायं मन्त्रो देवपरो व्याख्येयः। ये देवाः पक्वं वाजिनं परिपश्यन्ति कदा होष्यतीति ये च विलम्बं दृष्ट्वा सुरभिः पाको जातोऽस्मभ्यं निर्हर देहीत्याहुः ये चार्वतो मांसभिक्षा-

---

सुरभिः शोभनोऽतो निर्हर किञ्चिदस्मभ्यं देहीत्याहुः। यद्वा निःशेषेण देवेभ्यो हरेत्याहुः यतः सुरभिः अतो देवयोग्य इति किञ्च ये नराः अस्यार्वतोऽश्वस्य मांसभिक्षामुपासते हुतशिष्टमांसयाचनां काङ्क्षन्ति। उतो अपि च तेषामुक्तविधानामभिगूर्त्तिः अभित उद्यमनं सङ्कल्पो नोऽस्मान् इन्वतु व्याप्नोतु यदस्माभिरश्व उपालभ्य एवं स्पृहयन्ति तदा यशो निर्वहाम्यित्यर्थः यद्वा अयं मन्त्रो देवपरो व्याख्येयः ये देवाः वाजिनं पक्वं परिपश्यन्ति कदा होष्यतीति विलम्बं दृष्ट्वा ये च सुरभिः एनं निर्हर निःशेषेणास्मभ्यं देहीत्याहुः ये चार्वतोऽश्वस्य मांसभिक्षामुपासते तेषामभिगूर्त्तिर्नः इन्वतु सङ्कल्पः सफलो भवत्वित्यर्थः॥ ३५॥

मुपासते मांसं याचन्ते तेपामभिगूर्त्तिः सङ्कल्पोऽस्मान् प्रीणातु सफलो भवत्वित्यर्थः ॥ ३५ ॥

यन्नीक्षणं माꣳस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि । ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परिभूषन्त्यश्वम् ॥ ३६ ॥

(१) यन्नीक्षणम् । यत् नीक्षणम् निरतामीक्ष्यते शृताश्च तव संविन्धनोऽर्था इति येन दर्व्यादिना तत् नीक्षणम् । मांसपचन्याः मांसस्य पचि युद्घञोरित्यकारलोपः । उखायाः यानि च पात्राणि यूष्णः वसायाः यूपशब्दस्य यूपन्नादेशः पष्ठ्येकवचने उपधालोपश्च । आसेचनानि आसिच्यते येष्विरयासेचनानि । ऊष्मण्या ऊष्मशब्दस्य धारणार्थे यत्प्रत्ययः । यानि च ऊष्मण्यानि । पिधाना । पिधानानि च चरूणां स्थालीनाम् । ये च अङ्काः अङ्कोपलक्षकाः । शरीरवचनोऽङ्कशब्दः । याश्च सूनाः अश्वविशसनाधिकरणभूताः वेतसमय्यः तानि सर्वाणि । परि-

·(१०) वाराणसी०लिखितपु०संमतोऽय पा०मुम्बईमु०पु०नास्ति । यत् नीक्षणं मांस्पचन्याः मांसपचन्याः पचेतरधिकरणे ल्युट् मांसस्य पचि युट्घञोरित्यलोपः उखायाः स्थाल्याः यत् नीक्षणं नितरामीक्षणं पाकपरीक्षार्थम् । तथा या यानि पात्राणि यूष्णो रसस्य क्वथितस्य आसेचनानि यूपशब्दस्य यूपन्नादेशः पष्ठ्येकवचने उपधालोपः आसिच्यन्तेऽस्मिन्निति आसेचनम् आसेचनसाधनानि तथा उष्मण्या- उष्मन् शब्दस्य धारणार्थे यत्प्रत्ययः यानि उष्मण्यानि उष्मधारणार्हाणि पात्राणि तथा चरूणां पात्राणां मांसपूर्णानाम् अपिधाना अपिधानानि तत्साधनानि तथा अङ्काः हृदयाद्यवयवाङ्ककर्मसाधनभूताः वेतसमय्यः सूनाः अश्वविशसनाधिकरणभूताः स्वधिन्यादयः तानि सर्वाणि एवमश्वम् अश्वावयवं परिभूषन्ति परितो भूषयन्ति स्वस्वव्यापारेण साधयन्तीत्यर्थः । भूष अलङ्कारे भौवादिकः ॥ ३६ ॥

भूषन्ति । भूष अलङ्कारे । अलं कुर्वन्ति । परिरक्षन्ति वा । अश्वम् ॥ ३६ ॥

एते पदार्था अश्वं परिभूषन्ति अलंकुर्वन्ति स्वव्यापारेण साधयन्तीत्यर्थः भूष अलङ्कारे भौवादिकः । एते के तानाह यत् उखायाः स्थाल्याः नीक्षणं नितरामीक्षणं पाकपरीक्षार्थं दर्शनम् । कीदृश्या उखायाः मांसपचन्याः मांसं पच्यते यस्यां सा मांसपचनी तस्याः मांसपाकाधिकरणभूतायाः करणाधिकरणयोश्चेति (पा० ३, ३, ११७ ल्युट् मांसस्य पचि युड्घञोरिति (काशिका० पा० ६, १, १४४) मांसस्याकारलोपः टिड्ढाणञ्मिति (पा० ४, १, १५) ङीप् । तथा यूष्णः पक्वरसस्य आसेचनानि आसिच्यन्ते येषु तानि आसेचनसाधनानि या यानि पात्राणि पद्दन्निति यूषशब्दस्य यूषन्नादेशः । यानि च चरूणां मांसपूर्णपात्राणामपिधाना अपिधानानि आच्छादनपात्राणि । कीदृशानि आच्छादनपात्राणि । कीदृशानि तानि ऊष्मण्या ऊष्माणं धारयन्ति तानि ऊष्मण्यानि ऊष्मन्शब्दाद्धारणार्थे यप्रत्ययः आच्छादने ऊष्मा बहिर्न यातीत्यर्थः । तथा अङ्काः चिह्नसाधनानि हृदयाद्यवयवज्ञापकानि वेतसमयानि । सूनाः विशसनकरणभूता स्वधित्यादयः । एतेऽश्वं परिभूषयन्ति ॥ ३६ ॥

मा त्वाग्निर्ध्वनयीद् धूमगन्धिर्मोखा भ्राजन्त्यभिविक्त जघ्रिः । इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रतिगृभ्णन्त्यश्वम् ॥ ३७ ॥

(१) मा त्वाग्निः । मा त्वा हे अश्व अग्निः ध्वनयीत् ।

---

(१)अयं पाठक्रमः वाराणसी०लिखितपु०समतः मुम्बईमु०पु०ना०॥ हे अश्वपच्यमानावयव त्वा त्वां धूमगन्धिः धूमेन व्याप्तोऽग्निः अल्पधूमावरणो वा अग्निः मा ध्वनयीत् मा ध्वनयतु मा शब्दं कारयेत् ध्वनौ सति भाण्डभङ्गः स्यात् दह्यमानं मांसं सिमसिमाशब्दं करोतीत्यत एव मुच्यते नोनयतीत्यादिना चङ्प्रतिषेधः ह्म्यन्तक्षणेति ण्यन्तत्वाद्वृद्ध्यभावः किञ्च भ्राजन्ती अत्यन्ताग्निसंयोगेन दीप्यमाना उखा

ध्वनिः शब्दकर्मा शब्दं कारयेत् कथम्भूतः धूमगन्धिः अल्पधूमावरणः मांसं हि पचन्नग्निर्दहन्नप्यल्पधूमावरणो भवति । तत्र दह्यमानं समसिमाशब्दङ्करोत्येवमुच्यते । मा च उखा भ्राजन्ती सन्दीपिता अत्यन्ताग्निसंयोगेन । अभिविक्त ओविजी भयचलनयोः अभिविनक्तु । अभिनष्टा विदीर्येत वा । उखा-वा दृद्धा मांसरसं तदिहोच्यते । जग्घ्रिः ग्रहणशीला उखा । नन्वचेतनोखा कथं गन्धाञ्जिघ्रति । उच्यते । अधिष्ठात्र्योऽत्र देवताः सन्तीति पुरस्तात्प्रतिपादितम् तच्चात्र पुनः स्मार्य्यते इष्टं योगेन सङ्गतीकृतम् वीतं कामितम् अभिगूर्तम् अभ्युद्यतम् वषट्कृतं चादानकाले । यद्वा इष्टं मयाजैः वीतमाप्रीभिः पर्यग्निकृतम् अभिगूर्त्तं ये यजामह इत्यागूर्योक्तम् वषट्कृतं वषट्कारेण संस्कृतम् । तन्तादृशम् देवा एव देवासः प्रतिगृभ्णन्ति प्रतिगृह्णन्ति अश्वम् ॥ ३७ ॥

हे अश्व पच्यमानाश्वावयव । अग्निः त्वा त्वां मा ध्वनयीत् ध्वनिं मा कारयतु ध्वनौ सति भाण्डभङ्गः स्यात् दह्यमानं मांसं सिमसिमेति शब्दं करोति तन्मास्तु नोनयतिध्वनयतीत्यादिना (पा० ३, १, ५१) ण्यन्ताच्च्लेप्रतिषेध ह्म्यन्तक्षणेति (पा० ७, २, ५) वृद्ध्यभावः । कीदृशोऽग्निः धूमगन्धिः धूमस्य गन्धो लेशो यत्र सः अल्प-

स्थाली मा अभिविक्त अभितो मा चीचलत् तापातिशयेन मा नीनश क्त्यर्थः । ओविजी भयचलनयोः लुङि झलो झलीति सलोपः किम्भूता उखा जघ्रिः जिघ्रन्ती गन्धग्रहणशीला घ्रा गन्धोपादाने आदृगमहनेति किप्रत्ययः । नन्वचेतनोखा कथं जिघ्रति अधिष्ठात्र्योऽत्र देवताः सन्तीत्यतस्तत्प्रतिपादितम् अत्र पुनः स्मार्यन्ते तं ता दृशमश्वमिष्टं भोक्तुमिष्टं वीतं होमायानीतम् अभिगूर्तम् अभ्युद्यतं यद्वा इष्टं प्रयाजैः वीतम् आप्रीभिः पर्यग्निकृतम् अभिगूर्त्तं ये यजामह इत्यागूर्य युक्तं वषट्कृतं वषट्कारेण संस्कृतम् एवम्भूतं देवासो देवाः प्रतिगृभ्णन्ति प्रतिगृह्णन्ति ॥ ३७ ॥

धूमवानित्यर्थः अल्पाख्यायामिति (पा० ५, ४ १३६) धूमाद्दिकारः । किञ्च भ्राजन्ती अतितापेन दीप्यमाना उखा स्थाली मा अभिविक्त मा चलतु ओविजी भयचलनयोः लुङि तङि झलो झलीति (पा० ८, २, २६) सिलोपे रूपम् न माङ्योग इति (पा० ६, ४, ७४) अडभावः । कीदृशो वंश्वा जघ्रिः जिघ्रति गन्धं गृह्णातीति जघ्रिः आदृगमेति (पा० ३,२, १७१) किन्प्रत्ययः अधिष्ठात्र्या देवतायाः घ्राणम् । तमेवंविधमश्वं देवासः देवाः प्रतिगृभ्णन्ति प्रतिगृह्णन्तु । कीदृशमश्वम् इष्टं प्रयाजैः वीतमाप्रीभिः पर्यग्निकृतम् अभिगूर्त्ते ये यजामह इत्यागूर्योक्तम् वषट्कृतं वषट्कारेण संस्कृतम् ॥ ३७ ॥

निक्रमणं निषदनं विवर्तनं यच्च पड्वीशमर्वतः । यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ ३८ ॥

(१)निक्रमणं निषदनम् । निक्रमणं गमनम् वसतिस्थानात् । निषदनं तत्रैव स्थितिः । विवर्तनं भ्रमणम् । यान्येतानि चेष्टितानि । यच्च पड्वीशम् । पादेषु विशतीति पड्वीशम्पादबन्ध-

(१)अयं पा०वाराणसी०लिखितपु०अस्ति मुम्बईमु०पु०ना०। निक्रमणं यत् । निक्रमणं नितरां क्रमते यत्र तत् निक्रमणं स्थानं नितरां सीदन्त्यस्मिन्निति निषदनं विवर्तनम् इतस्ततो लुण्ठनं यत्र तत् सर्वत्राधिकरणे ल्युट् यश्चावर्तोऽश्वस्य पड्वीशं पादबन्धनं यद्वा बन्धनं पद्तद्गन्तं प्रदेशम् यत्र सर्वत्र देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वाभावाय तत्स्थानमपि स्वीक्रियते यद्वा क्रियापरा वा अवगन्तव्याः आलम्भसमये निग्रहणे या निक्रमणाद्यश्चेष्टाः सन्ति ता इत्यर्थः यत्र पपौ यदुदकमपि तत् यच्च घासिम् अदनीयम् तृणादिकं घासं जघास अभक्षयत् घस्लृ अदने हे अश्व ते तव ता तानि सर्वा सर्वाणि निक्रमणादीनि देवेष्वस्तु सन्तु देवेषु प्राप्नुवन्तु तान्यपि निरर्थकानि मा भूवन्नित्यर्थः ॥ ३८ ॥

नमुच्यते। अर्वतः अश्वस्य यच्च पपौ पीतवानुदकम्। यच्च घासिं यवसं जघास। घस्लृ अदने भक्षितवान्। सर्वाणि तानि निक्रमणादीनि ते तव हे अश्व अपि देवेषु अपि प्रजापतये अस्तु सन्तु तान्यपि निरर्थकानि मा भूवन्नित्याशयः॥ ३८॥

यत् निक्रमणं नितरां क्रमते यत्र तत् निक्रमणस्थानम् निषदनं नितरां सीदत्यस्मिन्निति निषदनमुपवेशनस्थानम् विवर्त्तनं विविधं वर्त्तते यत्र तत् इतस्ततो लुण्ठनस्थानम् सर्वत्राधिकरणे ल्युट् यच्चार्वतोऽश्वस्य पड्वीशम् पदेषु विशति पड्वीशं पादबन्धनम्। क्रियापरा वा निक्रमणादयः शब्दाः आलम्भसमये यानि अश्वस्य निक्रमणादीनि चेष्टितानि। किञ्च यच्च पपौ यज्जलं पीतवान् यच्च घासिमदनीयं तृणादिकं जघास भक्षितवान् घस्लृ अदने लिट् हे अश्व। ता तानि सर्वाणि ते तव निक्रमणादीनि देवेषु अस्तु सन्तु। देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वं मास्त्वित्यर्थः॥ ३८॥

यदश्वा॑य॒ वास॑ उपस्तृ॒णन्त्य॑धीवा॒सं या हिर॑ण्यान्यस्मै। स॒न्दान॒मर्व॑न्तं॒ पड्बी॑शं प्रि॒या दे॒वेष्वाया॑मयन्ति॥ ३९॥

(१) यदश्वाय। यत् अश्वाय संज्ञप्यमानाय वासः उपस्तृणन्ति। सर्वत आच्छादयन्ति। यच्च अधीवासम् उपर्याच्छादनयोग्यं वास उपस्तृणन्ति। यानि च हिरण्यानि उपस्तृ-

(१)अयं पा०वाराणसी०लिखितपु०अस्ति मुम्बईमु०पु०ना०। यदश्वाय अस्मै अश्वाय संज्ञप्यमानाय अधीवासम् उपर्याच्छादनयोग्यं यत् वासः उपस्तृणन्ति सर्वत आच्छादयन्ति स्तृञ् आच्छादने क्र्यादिकः तथा अस्मै अश्वाय या यानि हिरण्यानि सौवर्णशकलानि उपस्तृणन्ति तथा अर्वन्तं षष्ठ्यर्थे द्वितीया अर्वतोऽश्वस्य सन्दानं सन्दीयतेऽनेनेति सन्दानं शिरोबन्धनं पड्वीशं पादेषु प्रविष्टं पादबन्धनम् एतानि प्रिया देवानां प्रियतराणि चात्वाले बध्वा स्थापितानि देवेषु आयामयन्ति आगमयन्ति प्रापयन्ति॥ ३९॥

णन्ति अस्मै अश्वाय । यच्च सन्दानं सन्दीयतेऽनेनेति सन्दानं शिरोबन्धनम् अर्वन्तम् अर्वते इति विभक्तिव्यत्ययः अश्वायेति सामानाधिकरण्यात् । यच्च पड्वीशम्पादबन्धः एतानि प्रियाणि देवेषु आयामयन्ति गमयन्ति ॥ ३९ ॥

प्रिया प्रियाणि एतानि वस्तूनि देवेषु आयामयन्ति आगमयन्ति ऋत्विजोऽश्वस्यैतानि देवेष्वेव प्रापयन्तीत्यर्थः । कानीत्यत आह अश्वाय यत् अधीवासमाच्छादकं वासो वस्त्रमुपस्तृणन्ति स्तृञ् आच्छादने कश्यादिकः तथा या यानि हिरण्यानि सौवर्णशकलानि अस्मै अश्वाय उपस्तृणन्ति । तथा अर्वन्तम् षष्ठ्यर्थे द्वितीया अर्वतोऽश्वस्य सन्दानं शिरोबन्धनं पड्वीशं पादबन्धनम् । एतानि देवेषु प्रापयन्ति । कीदृशानि प्रिया प्रियाणि देवानामिष्टानि ॥ ३९ ॥

यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद । स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ ४० ॥

(१) यत्ते सादे । हे अश्व यत् ते तव सादे । सीदन्त्यश्वचारा अस्मिन्निति सादोऽश्वपृष्ठम् तस्मिन्सादे अवस्थितोऽश्व-

(१) अयं पाठक्रमः वाराणसी० लिखितपुस्तकेऽस्ति । मुम्बईमुद्रितपुस्तके नास्ति । तथा हि । यत्ते सादे । हे अश्व महसा बलेन शूकृतस्य शब्दानुकरणमेतत् शूत्कारं कुर्वतस्ते तव सादे सदने गमने निमित्तभूते सति सदेर्भावे घञ् । दर्पतो गमनकृतत्वात् शूत्कारं कुर्वतस्ते त्वां पार्ष्ण्या कशया तुतोद व्यथयति अश्वचारः यत् यस्मात् यद्वा सीदन्त्यस्मिन्नश्वचारा इति सादोऽश्वपृष्ठं यत् तव सादे स्थितोऽश्वचारः महसा महत्त्वेनान्वितः सन् शूकृतस्यानन्तरं पार्ष्ण्या कशया यां तुदति ते तव ता तानि सर्वाणि अध्वरेषु यागेषु ब्रह्मणा सूदयामि क्षारयामि आहुतित्वेन कल्पयामीत्यर्थः । तत्र दृष्टान्तः अध्वरेषु हविषः हविः आज्यादिकं स्रुचेव स्रुचा यथा सूदयति तद्वत् एकं ता इति पदं पादपूरणम् ॥ ४० ॥

चारः। महसा महत्त्वेनान्वितः सन् कथम्भूतस्य शूकृतस्य शब्दानुकरणमेतत् शूत्कारं कुर्वतः अनन्तम् पाष्ण्या वा कशया वा तु तोद। तुद व्यथने। तुदति व्यथयति स्रुचा इव ता तानि यथा स्रुचा हविषः हविरिति विभक्तिव्यत्ययः अध्वरेषु यज्ञेषु जुहृति एवं सर्वाणि ते तव ब्रह्मणा त्रयीलक्षणेन सूदयामि क्षारयामि आहुतित्वेन कल्पयामीत्यर्थः॥ ४०॥

हे अश्व! अश्वचारः सादे गमने यत्ते तव त्वां पाष्ण्या पादाधोभागेन कशया वा तुतोद पीडितवान् तुद व्यथने लिट् सदनं सादः घञ् कीदृशस्य तव महसा बलेन शूकृतस्य शूकृतमस्यास्ति शूकृतः तस्य शब्दानुकरणमेतत् शूकारं कुर्वतः। अध्वरेषु ता सर्वा तानि सर्वाणि ते तव पार्ष्णिकशाताडनानि ब्रह्मणा मन्त्रेणाहं सूदयामि षूद क्षरणे चुरादिः क्षारयामि यज्ञे आहुतित्वेन कल्पयामीत्यर्थः। तत्र दृष्टान्तः हविषः स्रुचेव हविराज्यादिकं यथा स्रुचा जुह्वा सूदयामि तद्वत्। एकं तापदं पादपूरणाय॥ ४०॥

चतु॑स्त्रि॒ꣳश॒द् वा॒जिनो॑ दे॒वब॑न्धो॒र्वङ्क्री॒रश्व॑स्य॒ स्वधि॑तिः॒ समे॑ति। अच्छि॑द्रा॒ गात्रा॑ व॒युना॑ कृणोत॒ परु॑ष्परुरनु॒घुष्या॒ विश॑स्त॥ ४१॥

(१)चतुस्त्रिंशत्। चतुस्त्रिंशत् वङ्क्रयः वाजिनः वेजनवतोऽश्व-

(१) वाराणसी० लिखितपु० संमतोऽयं पाठक्रमः। मुम्बईमुद्रितपु० नास्ति। तथा हि * चतुस्त्रिंशद्वाजिनः वाजिनो वेगवतः देवबन्धोर्देवानां प्रियस्य देवा बन्धवो यस्येति वा भावी निर्देशः ईदृशादश्वस्य चतुस्त्रिंशत् एतत्संख्याकाः वङ्क्रीः उभयपार्श्वास्थीनि स्वधितिः छेदनसाधनोऽसिः समेति सम्यगागच्छति छेदनाय इतरेषामजादीनां षड्विंशतिरेव षड्विंशतिरस्य वङ्क्रय इत्युक्तत्वात् हे विशसनकर्त्तारः अस्य गात्राणि शरीरावयवान् अच्छिद्रा अच्छिद्राणि यथा भवति तथा वयुना वयुनानि प्रज्ञातानि वयुनमिति प्र-

स्य देवबन्धोः देवानां प्रियस्य । देवा बन्धवोऽस्य इति वा भावी देवबन्धुः । देवो ह्यसौ भविष्यति एवम्भूतस्याश्वस्य वङ्क्रीः वङ्क्रयः उभयपार्श्वस्थास्थीनि स्वधितिः छेदनसाधनोऽसिः समेति एकमकृत्वा सङ्गच्छति यतः अतो ब्रवीमि । अच्छिद्रा गात्रा अच्छिद्राणि अनवखण्डितानि गात्रा गात्राणि वयुना प्रज्ञानेन कृणोत कुरुत हे शमितारः । किञ्च परुः परुः पर्वपर्व हृदयाद्यङ्गम् अनुघुष्य इदमिदमिति संशब्द्य विशस्त विशसनं कुरुत उत्तरार्द्धस्यैव मन्त्ररूपसम्बन्धः ४१ ॥

स्वधितिः पशुच्छेदनसाधनोऽसिः अश्वस्य चतुस्त्रिंशत् वङ्क्रीः चतुस्त्रिंशत्संख्याकान्युभयपार्श्वास्थीनि समेति सम्यगागच्छति छेदनाय । कीदृशस्याश्वस्य वाजिनः वजति गच्छतीति वाजी तस्य वेगवत इत्यर्थः । देवबन्धोः देवानां बन्धुः प्रियस्तस्य देवा बन्धवो यस्येति वा । भावी निर्देशः । अश्वस्य चतुस्त्रिंशद्वङ्क्रयः अजादीनां षड्विंशतिः । अतो हे ऋत्विजः ! वयुना वयुनेन ज्ञानेनाश्वस्य गात्रा गात्राणि अच्छिद्रा अच्छिद्राणि छिद्रहीनानि यूयं कृणोत कुरुत स्वधितिना छिन्नानि सच्छिद्राणि वर्त्तन्ते तान्यच्छिद्राणि कुरुत । किञ्च परुः परुः ग्रन्थिर्ना पर्वपर्वाति अमरः नित्यवीप्सयोरिति (पा० ८, १, ४) द्वित्वम् प्रतिपर्व प्रत्यवयवम् अनुघुष्य इदमिति नाम्ना संशब्द्य यूयं विशस्त विशसनं छेदं कुरुत शसु हिंसायाम् छान्दसः शपो लुक् । कृणोत कृ करणे स्वादिः तप्तनप्तनथनाश्चेति (पा० ७, १, ४५) मध्यमबहुवचनस्य तबादेशः ततो गुणः । अनुघुष्य घुषिर् शब्दे क्त्वो ल्यप् ॥ ४१ ॥

एकस्त्वष्टुरश्वस्याविशस्ता द्वा यन्तारा भवतस्तथा

ज्ञाननाम वयुनमभिख्येति तन्नामसूक्तत्वात् कृणोत कुरुत तप्तनप्तनथनाश्चेति तनादेशः हृदयजिह्वाचक्षुःप्रभृतीनि ज्ञानं विना मध्ये छिन्नानि मा कुरुतेत्यर्थः तदर्थं परुः परुः प्रतिपर्व । प्रतिहृदयाद्यवयवम् अनुघुष्य इदमिदमिति संशब्द्यैव विशस्त विशसनं कुरुत शसु हिंसायाम् छान्दसः शपो लुक् ॥ ४१ ॥

ऋतुः। या ते गात्राणामृतुथा कृणोमि ता ता पिण्डानां प्रजु होम्यग्नौ ॥ ४२ ॥

(१)एकस्त्वष्टुः। एकः। अश्वस्य विशस्ता विशसिता संवत्सरः। तदुक्तम् संवत्सरस्य तेजसेति त्वष्टुः आदित्यादुत्पन्नस्याश्वस्य तदुक्तम् सूरादश्वं वसवो निरतिष्टदिति। द्वा यन्तारा। द्वौ नियन्तारौ अहोरात्रौ द्यावापृथिव्यौ वा भवतः। तथ ऋतुः द्वितीयो मासानां नियन्तेति शेषः। एवमश्वस्य विशसितान् उक्त्वा अथेदानीं स्वकीयं कर्माध्वर्युराह। या ते यानि तव हे अश्व गात्राणामङ्गानाम् ऋतुथा ऋतावृतौ कालेकाले बन्धनानि कृणोमि करोमि। ता ता तानि तानि पिण्डानां मांसपिण्डानां मध्ये प्रजुहोमि प्रज्ञानानुरोधेन जुहोमि। अग्नौ ॥ ४२ ॥

अश्वस्य विशस्ता विशनकर्ता एकः ऋतुः। कीदृशस्याश्वस्य त्वष्टुः दीप्तस्य। ऋतूपलक्षितः कालात्मा प्रजापतिरेवाश्वस्य शस्तेत्यर्थः शसस्तृच्। तथा यन्तारा यन्तारौ नियमकर्त्तारौ द्वा द्वौ द्यावापृथि-

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति-मुम्बईमुद्रितपुस्तके नास्ति * तथा हि * एकस्त्वष्टुः। त्वष्टुः त्वष्टा संवत्सरः तदुक्तं "संवत्सरस्य तेजसेति" त्वष्टुरादित्यादुत्पन्नस्याश्वस्य. तदुक्तं 'सूरादश्वं वसवो निरतिष्टदिति' यद्वा त्वष्टुः दीप्तस्याश्वस्य विशस्ता विशसनकर्ता एकः एक ऋतुः ऋतूपलक्षितः कालात्मा तस्यैव तस्यैव सर्वेषामपि। पर्यवसिततवात् तथा द्वौ यन्तारौ यमितारौ अहोरात्रदेवौ द्यावापृथिव्यौ भवतः तथ ऋतुरित्यत्र ऋत्यक इति प्रकृतिभावो ह्रस्वत्वं च। एवमश्वस्य विशसितारं उक्त्वा-अथाध्वर्युः स्वकीयं कर्माह हे अश्व ते तव गात्राणां मध्ये अङ्गानि हृदयादीनि ऋतुथा काले काले कृणोमि छिनद्मि सम्पादयामि पिण्डानां मांसपिण्डानां मध्ये ता ता तानि तानि प्रज्ञातानुरोधेनाग्नौ प्रजुहोमि प्रकर्षेण हुतानि करोमि ॥ ४२ ॥

द्यभिमानिदेवौ भवतः तयोरेव सर्वेषां नियन्तृत्वादिति भावः । तथा ऋतुः अत्र ऋत्यक इति (पा० ६, १, १२८) ह्रस्वमप्रकृतिभावौ । एवमश्वस्य विशासितृयन्तृनुक्त्वाध्वर्युः स्वकर्माह हे अश्व ! ते तव गात्राणां पिण्डानां गात्रसम्बन्धिनां मांसपिण्डानां या यानि अङ्गानि अहं कृणोमि हन्मि छिनद्मि कृञ् वधे स्वादिः ऋतुथा ऋतौ ऋतूपलक्षिते वसन्तादियज्ञकाले ता-ता तानि-तान्यङ्गानि अग्नौ प्रजुहोमि प्रकर्षेण हुतानि करोमि ॥ ४२ ॥

मा त्वा तपत् प्रिय आत्मापियन्तं मा स्वधितिस्तन्व आतिष्ठिपत्ते । मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥ ४३ ॥

(१) मा त्वा तपत् । मा त्वान्तपत् । त्वाशब्देनात्र विज्ञानात्मोच्यते सुखदुःखयोर्भोक्ता प्रिय आत्मा प्राण उक्तः । स हि श्रुतौ प्रियमित्येतदुपासीतेत्युक्तः । देवानाम् पियन्तम् देवलोकगमनप्रवृत्तं सन्तम् । मा च स्वधितिः शस्त्रन्तन्वः शरीरस्य अतिष्ठिपत् अस्थापयत् एकादशमवदानभूतम् ते तव । मा च ते तव गृध्नुः मांसग्रहणे गर्द्धी लुब्धः । अविशस्ता विशसने

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति मुम्बईमुद्रित पुस्तके नास्ति । मा त्वा । हे अश्व त्वामपियन्तं देवान् प्रति गच्छन्तं प्रियः आत्मा भोगायतनत्वात्तव प्रियतमो देहो मा तपत् तप्तं मा कार्षीत् वियोगजनिता व्यथा मा भूदित्यर्थः त्वाशब्देनात्र विज्ञानात्मोच्यते स्वधितिः शस्त्रं ते तव तन्वः तनूः अङ्गानि मा अतिष्ठिपत् त्वयि चिरं स्थितानि मा कार्षीत् । स्थापयतेर्लुङि तिष्ठतेरिदितीत्वं गृध्नुः केवलमांसग्रहणेच्छुः अविशस्ता विशसने अकुशलः शमितानि तव गात्राणि अतिहाय न्यूनातिरेकभावेण तत्तदङ्गमतिक्रम्य मध्ये मिथु मिथ्याः अव्ययम् असिना छिद्रा छिद्राणि तिर्यक् छिन्नानि मा कः मा कार्षीत् करोतेर्लुङि । मन्त्र ,घसेति' च्लेर्लुक् गुणे हल्ङ्याप्भ्य इति तिपो लोपः ॥ ४३ ॥

अकुशलः । आतिहाय अतिक्रम्य । छिद्रा छिद्राणि गात्राणि असिना मिथू कः मिथ्या अकार्षीत् ॥ ४३ ॥

हे अश्व ! प्रियः वल्लभो भोगायतनत्वात् तथात्मा देहः त्वा त्वां मा तपत् तप्तं दुःखितं मा कार्षीत् तव देहवियोगजनिता व्यथा मा भूदिति विज्ञानात्मानं प्रत्युच्यते । किम्भूतं त्वाम् अपियन्तम् अप्येतीत्यपियन् तम् देवलोकं गच्छन्तं अपिपूर्वादेतेः शतृप्रत्ययः । किञ्च स्वधितिः शस्त्रं ते तव तन्वः तनूः अङ्गानि मा आतिष्ठिपत् मा स्थापयतु सर्वाणि छित्त्वा देवेभ्यो ददत्वित्यर्थः । तिष्ठतेर्ण्यन्तस्य लुङि चङि तिष्ठतेरिदिति (पा० ७, ४, ५) इकारे कृते द्वित्वादि । किञ्च शमिता ते तव गात्राणि अङ्गानि आतिहाय त्यक्त्वा शास्त्रोक्तक्रमं त्यक्त्वा असिना शास्त्रेन मिथु मिथ्या छिद्रा छिद्राणि अपथच्छिद्राणि मा कः मा कार्षीत् करोतेर्लुङि मन्त्रे घसह्वरेत्यादिना (पा० २, ४, ८०) च्लेर्लुक् गुणे हल्ङ्याविति (पा० ६. १, ६८) तिपो लोपे विसर्गः । मिथु इति मिथ्यार्थेऽव्ययम् संहितायां दीर्घः । कीदृशः शमिता गृध्नुः गृध्यतीति गृध्नुः लुब्धः केवलं मांसग्रहणेच्छुः अतः एवाविशस्ता न विशेषेण शसति हिनस्ति अविशस्ता विशसने अकुशलः अत एवान्यथा मा छिदत् सम्यगवदानानि करोतित्यर्थः ॥ ४३ ॥

न वा उ॑ ए॒तन्म्रि॑यसे॒ न रि॑ष्यसि दे॒वाँ२॥ इदे॑षि प॒थिभि॑ः सु॒गेभि॑ः । हरी॑ ते॒ युञ्जा॒ पृष॑ती अभूता॒मुपा॑स्थाद्वा॒जी धु॒रि रास॑भस्य ॥ ४४ ॥

(१)न वै । नवा उ एतदिति व्याख्यातम् । अन्यच्च हरीन्द्रा-

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति मुम्बई मुद्रित पुस्तके नास्ति । न वै । न वा उ नैव खलु एतन्म्रियसे वै एवार्थे उ अवधारणे नैवेदानीम् इतराश्ववन्मृतो भवसि देवत्वप्राप्तेर्वश्यमाणत्वात् अत एव न रिष्यसि न हिंसस्ये व्यर्थहिंसाया अभावात् । ननु प्रत्यक्षतः मृतिरवयवनाशश्च दृश्यते कथमेवमुच्यत इति चेत् उच्यते । सुगेभिः शोभनगमनसाधनैः पथिभिर्मार्गैः देवयानलक्षणैः

हयौ ते तव । युञ्जा युञ्जौ योजनार्हौ वोढारौ प्रतिधुरी अभूताम् पृषती च मरुतां संबन्धिनावश्वौ प्रतिधुरावभूताम् । तदुक्तम् अश्वरथयाने युञ्जन्त्यश्वकाम्या हरी इति । एभिर्दिव्यैस्त्वं समानं लोकं संज्ञात इत्यभिप्रायः । एनमुपश्रुत्य स्वयमेव उपास्थात् उपस्थितः वाजी धुरि रासभस्य अश्विसम्बन्धिनः । रासभावश्विनोरित्यादिष्टं प्रयोजनम् ॥ ४४ ॥

घ पदार्थे उ अवधारणे हे अश्व ! त्वमेतन्नैव म्रियसे इतराश्ववत् मृतो न भवसि देवत्वप्राप्तेर्वक्ष्यमाणत्वात् अत एव न रिष्यसि हिंस्यसे व्यर्थहिंसाया अभावात् रिषतेर्व्यत्ययेन परस्मैपदमार्षम् । ननु प्रत्यक्षस्त्वे मरणमङ्गनाशश्च दृश्यते तर्हि कथमेवमुच्यते तत्राह सुष्ठु गम्यते यत्र ते सुगाः तैः सुगेभिः सुगैः साधुगमनैः पथिभिर्मार्गैः देवयानरूपैः देवान् इत एषि देवानेव गच्छसि अतो युक्ता मदुक्तिः । कथं देवान् प्रति गमनम् तत्राह हे अश्व ! ते तव हरी इन्द्राश्वौ युञ्जा युञ्जौ रथे युक्तौ अभूतां भविष्यतः आशंसायां भूतवच्चेति (पा० ३, ३, १३२) भूतकालप्रयोगो भविष्यदर्थे । हरी इन्द्रस्येति यास्कः (निघ० १, १५, १) तथा पृषतौ मरुतां वाहनभूते तव युञ्जौ अभूताम् पृषत्यो मरुतामिति (निघ० १, १५, २) । युङ्क्तस्ते युञ्जौ ऋत्विग्दधृगित्यादिना (पा० ३, २, ५९) क्विन् देवान् इदेषि देवानेव प्राप्नोषि अतो युक्तैषोक्तिः । कैः साधनैरिति तत्राह ते त्वां यत् हरी एतन्नामानाविन्द्रस्याश्वौ ते तव युञ्जा रथे युक्तौ अभूतां भविष्यतः आशंसारूपत्वाद्भूतार्थनिर्देशः हरी इन्द्रस्येति निरुक्तं तथा पृषती मरुतां वाहनभूतौ युञ्जा अभूतां युक्तौ भविष्यतः । पृषत्यो मरुतामिति निरुक्तं युजे ऋत्विग्दधृगित्यादिना क्विन् युजेरसमासे इति नुम् । सुपां सुलुगित्याकारः । तथा रासभस्य अश्विवाहनस्य एतन्नामकस्याश्वस्य धूरि स्थाने वर्तमानः कश्चिद्वाजी उपास्थात् उपस्थास्यति वहतीत्यर्थः । यद्वा रासभस्य भानोर्धूरि वर्त्मनि युक्तो वाजी अश्वम् उपस्थास्यति । देवत्वं गच्छतस्तव गमनाय इन्द्रादयः स्वस्ववाहनानि प्रेषयन्तीत्यर्थः । यद्वा तत्तद्देवभावमापन्नं त्वां तानि वाहनानि वहन्ति ॥ ४४ ॥

क्विन्प्रत्ययस्य कुरिति (पा० ८, २, ६२) कुत्वम् युजेरसमासे इति (पा०७, १, ७१) नुम् सुपां सुलुगिति (पा० ७, १, ३९) विभक्तेरात्वम् । किञ्च रासभस्यादिववाहनस्य धुरि अश्विवाहनस्थाने वाजी कश्चिदश्वः उपास्थात् उपस्थास्यति । देवत्वं प्राप्तस्य तव वहनाय इन्द्रादयो निजवाहनानि प्रेषयिष्यन्तीति भावः । यद्वा तत्तद्देवभावं प्राप्तं त्वां तानि तानि वाहनानि वक्ष्यन्तीत्यर्थः ॥ ४४ ॥

सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ२॥ उत विश्वापुषंरयिम् । अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतांहविष्मान् ॥ ४५ ॥

(१)इदानीं याच्ञा । सुगव्यन्नः । शोभनगव्यं नोऽस्माकं वाजी कृणोतु करोतु । स्वश्व्यं शोभनाश्वञ्च करोतु । पुंसः पुत्रान्करोतु । दुहितरः पुत्राश्च पुत्रसब्देनोच्यन्ते इत्यतो विशेषणं पुंस इति । उत अपि च विश्वापुषम् सर्वस्य पोषकं रयिन्धनञ्करोतु । किञ्च अनागाः अनपराधम् त्वञ्च । नोऽस्माकम् अदितिर्देवमाता च करोतु । नैघण्टुको वा अदितिशब्दः । अ-

---

(१) वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई० पुस्तके नास्ति तथा हि-इदानीं याच्ञा सुगव्यं नः वाजी नोऽस्माकं सुगव्यं शोभनगोसमूहं कृणोतु करोतु 'खलगोरथादिति' समूहार्थे यः। तथा स्वश्व्यं शोभनाश्वसमूहं च करोतु। तथा पुंसः पुत्रान् पुत्रशब्दः स्त्रीपुमपत्यसाधारणः अतः पुमपत्यानीत्यर्थः । यद्वा पुंसो धन्यादीन् पुत्रान् पुरुरक्षकान् आत्मजान् पुमपत्यानि स्त्र्यपत्यानीत्यर्थः। उत अपि विश्वापुषः विश्वपोषणसमर्थं रयिं धनं च करोतु संहितायां दीर्घः। किञ्च अदितिरदीनोऽश्वः नोऽस्माकम् अनागास्त्वं सर्वतो निष्पापत्वं कृणोतु उक्तानां फलानां पापक्षयाभावे असम्भवदपापत्वं प्रार्थ्यते किञ्च हविष्मान् हविर्भूताश्ववयोऽश्वो नोऽस्माकं क्षत्रं बलं तेजो वा वनतां करोतु करोत्यर्थो वनतिः॥ ४५॥

मागास्त्वं नः अदितिः अदीनोऽश्वः करोतु। किञ्च। क्षत्रं नोऽस्माकं वनताम्। करोत्यर्थे वनतिः। करोतु। हविष्मान्। अश्वः। सर्वे अश्वावयवाः हवींषि ॥ ४५ ॥

इदानीं याचना क्रियते। वाजी देवत्वं प्राप्तोऽश्वः नोऽस्माकं सुगव्यं शोभनं गोसमूहं कृणोतु गवां समूहो गव्यम् खलगोरथादिति (पा० ४, २, ५०) यत्प्रत्ययः शोभनं गव्यं सुगव्यम्। तथा स्वश्व्यं कृणोतु अश्वानां समूहः अश्व्यम् केशाश्वेति (पा० ४, २, ४८) विकल्पात् पक्षे यत् शोभनमश्व्यं स्वश्व्यम्। तथा पुंसः पुमान् करोतु पुम्शब्दाऽपत्यवाचक इति पुंस इति विशेषणम्। यद्वा पुंसः पुरुषार्थसाधकान् पुमान् करोतु।उतापि च रयिं धनं करोतु। कीदृशं रयिं विश्वपुषम् पुष्णाति पुषः इगुपधेति (पा० ३, १, १३५) कप्रत्ययः विश्वस्य सर्वस्य पुषकम् सर्वजनपोषणसमर्थं धनं करोत्वित्यर्थः संहितायां विश्वशब्दस्य दीर्घः। किञ्च नोऽस्माकमनागस्त्वं करोतु नास्ति आगः अपराधः पापरूपो यस्य सोऽनागाः तस्य भावोऽनागस्त्वम् दीर्घश्छान्दसः निष्पापत्वं करोतु पापसद्भावे उक्तफलाप्राप्तेः। किञ्च अश्वो नोऽस्माकं क्षत्रं क्षतत्राणं बलं पराभवाद्रक्षणं वा करोतु। कीदृशोऽश्वः अदितिः नास्ति दितिः खण्डनं दैन्यं वा यस्य सः। हविष्मान् हविरस्यास्ति हविष्मान् तदस्यास्तीति (पा० ५, २, ९४) मतुप् हविर्भूतावयवः यद्वा देवत्वाप्त्या हविष्मान्। ईदृशोऽश्वो नः क्षत्रं वनतां करोतु वनतिः करोत्यर्थः ॥ ४५ ॥

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः। आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ॥ ४६ ॥

(१) इमा नु। षड् द्विपदाः विराजः तिस्रो वैश्वदेव्यादितस्र

(१) अयं पाठक्रमः वाराणसी० लिखितपु० अस्ति–मुम्बईमुद्रितपु० नास्ति। तथा हि। इमा नु षड्द्विपदा विराजस्तिस्रो वैश्वदे-

आग्नेय्यः । द्विपदा उत्तमा जुहोतीति श्रुतिः । नु कम् इति निपातावनर्थकौ इमानि भुवनानि भूतजातानि । सीषधाम साधयाम वयम् । ततोऽनन्तरम् इन्द्रः ऐश्वर्यवान् विश्वे च देवाः आदित्यैः सहितः इन्द्रः सगणः मरुद्भिश्च सहितः अस्मभ्यमस्माकं भेषजा भेषजानि करत्करोतु । किञ्च यज्ञञ्च नोऽस्माकं तन्वञ्च शरीरञ्च आदित्यैः सह इन्द्रः सीषधाति साधयतु वश्यं करोतु ॥४६॥

का० (२०, ८, १२) इमा नु कमिति च द्विपदाः । अयस्मयपात्रेणाश्वलोहितहोमानन्तरमिमा नु कमित्याद्याः षट् द्विपदाः जुहोति । कण्डिकाद्वयस्य षडर्धानि सन्ति तैः षडाहुतीर्जुहोतीति सूत्रार्थः ॥ द्विपदाच्छन्दस्का विश्वदेवदेवत्या आप्त्यपुत्रभुवनदृष्टास्तिस्र ऋचः । नु कम् एतौ निपातौ पादपूरणौ इमा इमानि भुवना भुवनानि भूतजातानि वयं सीषधाम साधयामः वशीकुर्मः इत्यर्थः साधयतेर्लुङि उत्तमबहुवचने रूपम् अडभाव आर्षः । किञ्च इन्द्रः इदि परमैश्वर्ये ऐश्वर्यवान् सगणो निजगणैः परिवारैः सहित इन्द्रो देवेशो विश्वे देवाश्च आदित्यैः द्वादशभिः मरुद्भिः एकोनपञ्चाशत्संख्यैश्च सहिताः अस्मभ्यं भेषजा भेषजानि औषधानि हितानि करत् कुर्वन्तु सर्वे देवा अस्माकं हितकारिणो भवन्त्वित्यर्थः किञ्च इन्द्रः आदित्यैः सह नोऽस्माकं यज्ञमश्वमेधं तन्वं शरीरं प्रजां पुत्रादिकां च सीषधाति साधयतु वशीकरोत्वित्यर्थः । नीरोगाः सपुत्रा वयं यज्ञं सम्यक् कुर्म इति भावः ॥ ४६ ॥

अग्ने॒ त्वं नो॒ अन्त॑म उ॒त त्रा॒ता शि॒वो भ॑वा वरू॒-

व्यस्तिस्र आग्नेय्यः द्विपदा उत्तमा जुहोती ति श्रुतिः । नु कम् इत्यनर्थकौ वयम् इमा इमानि भुवना भुवनानि भूतजातानि सीषधाम साधयाम साधयतेर्लुङि उत्तमबहुवचनम् अडभाव आर्षः । ततोऽनन्तरम् इन्द्रः ऐश्वर्यवान् विश्वे देवाः आदित्यैर्मरुद्भिश्च सहितः सगणः इन्द्रः अस्मभ्यं भेषजानि करत् करोतु यज्ञं नोऽस्माकं तन्वं शरीरं प्रजां च आदित्यैः सह इन्द्रः सीषधाति साधयतु । वश्यं करोतु ॥ ४६ ॥

थयः । वसुरग्निर्वसुश्रवा अच्छानक्षि द्युमत्तमꣳ रयिं दाः । तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ४७ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां
पञ्चविंशोऽध्यायः ॥ २५ ॥

अग्ने त्वन्न इति व्याख्यातम् ॥ ४७ ॥
इति उव्वटकृतौ मन्त्रभाष्ये पञ्चविंशतितमोऽध्यायः॥ २५ ॥

तिस्रो द्विपदा व्याख्याताः (३, २५—२६) ॥ समिद्धो अञ्जन् (२९, १) आश्वमेधिकोऽध्याय इति वचनादत्र द्वीधे तन्मन्त्राणां विनियोगः ॥ समाप्तोऽश्वमेधः सप्तविंशत्युत्तरवर्षसाध्यः ॥ ४७ ॥

श्रीमन्महीधरकृते वेददीपे मनोरमे ।
अध्यायः पञ्चविंशोऽयमश्वमेधगतोऽगमत् ॥ २५ ॥

षड्विंशोऽध्यायः ।

अग्निश्च पृथिवी च संनते ते मे संनमतामदः । वायुश्चान्तरिक्षञ्च संनते ते मे संनमतामदः । आदित्यश्च द्यौश्च संनते ते मे संनमतामदः । आपश्च वरुणश्च संनते ते मे संनमतामदः । सप्त सꣳसदो अष्टमी भूतसाधनी । सकामाँ२॥ अध्वनस्कुरु संज्ञानमस्तु मेऽमुना ॥ १ ॥

(१) इषे त्वेति प्रारभ्य दर्शपौर्णमासाग्निहोत्रपशुचातुर्मा-

---

(१) अत्र वाराणसीस्थराजकीयसंस्कृतपाठशालीयौव्वटभाष्यलिखितपुस्तकसंमतोऽयं पाठक्रमः मुम्बईमुद्रितपुस्तके नास्ति । तथा हि– इषे त्वेति प्रारभ्य दर्शपौर्णमासाग्निहोत्रपशुचातुर्मास्याग्निष्टोमवाजपेयराजसूयाग्निसोत्रामण्यश्वमेधपुरुषमेधपितृमेधप्रवर्ग्योपनिषत्सम्बद्धा मन्त्रा व्याख्येयास्ते इहोच्यन्ते अत्र च ये यत्र सम्बद्धामन्त्रास्तेषां तदेवार्षम् । असम्बद्धानाम् आदित्य एव "आदित्यानीमानि यजूंषीति वा आहुरिति" श्रुतिः । याज्ञवल्क्यो वा "याज्ञवल्क्येनाख्यायन्ते इति श्रुतेः । अविनियुक्तानां । मन्त्राणां लैङ्गिको विनियोगः लिङ्गं प्रकाशनसामर्थ्यमुच्यते । यो हि यमर्थं वदितुं समर्थः स तत्र श्रुत्या विनियुज्यते । तद्यथा अग्निश्च पृथिवी चेति । सप्त सन्नतिमन्त्राः अग्निश्च पृथिवी च संनमनं सन्नतिः प्रह्वीभावः आनुकूल्येन प्रवृत्तिः । अग्निपृथिव्यौ सम्भोगार्थं सङ्गते यस्मात्ततो ब्रवीमीति । अग्निपृथिव्यौ मे मम अदः अमुकं संनमतां अत्र णिचो लोपश्छान्दसः संनमयतां वशवर्त्तिनं कुरुतामित्यर्थः । अद इति पुरुषादेर्विशेषनामोपलक्षणम् द्वितीयान्तं चोपलक्षयति कर्मभावात् । एवमुत्तरेष्वपि योज्यं वायुस्त्वान्तरिक्षं च आदित्यश्च द्यौश्च आपश्च वरुणश्च सप्तसꣳसदः परपात्मोच्यते । यस्य तव सप्त संसदः सप्त संसदनानि प्रकृतानीत्येव अग्निपृथिवीवाय्वन्तरि-

स्याऽग्निष्टोमवाजपेयराजसूयाग्निसौत्रामण्यश्वमेधसम्बद्धा मन्त्रा व्याख्याताः । नामाख्यातोपसर्गनिपातजनिता वाक्यार्थाश्च । अथेदानीं खिलान्यनुक्रमिष्यामः । अग्निष्टोमाग्निसौत्रामण्यश्वमेधपुरुषमेधसर्वमेधपितृमेधप्रवर्ग्योपनिषत्संबद्धा मन्त्रा व्याख्येयाः त इहोच्यन्ते । अत्र च ये अत्र संबद्धा मन्त्रस्तेषां तदेवार्षम् । असंबद्धानान्तु आदित्य एव । आदित्यानीमानि यजूंषीति वा आहुरिति श्रुतेः । याज्ञवल्क्यो वा याज्ञवल्क्येनाख्यायन्त इति श्रुतेः । अविनियुक्तानां मन्त्राणां लैङ्गिको विनियोगः तद्यथा अग्निश्च पृथिवी चेति सप्त सन्नतिमन्त्राः । लिङ्गं नाम प्रकाशनसामर्थ्यमुच्यते । यो हि यमर्थं वदितुं समर्थः स तत्र श्रुत्या विनियुज्यते । अग्निश्च पृथवी च सन्नते । सन्नानं सन्नतिः प्रह्वीभावः । आनुकूल्येन प्रवृत्तिः । अग्निश्च पृथिवी च संभोगार्थं संनमते यस्मादतो ब्रवीमि ते अग्निपृथिव्यौ मे मम सन्नमताम् । अत्र णिचो लोपश्छान्दसः । सन्नमयतां वशवर्तिनङ्कुरुतामित्यर्थः । अद इति पुरुषादेर्विशेषनामोपलक्षणम् द्वितीयान्तं चोपलक्षयति कर्मभावात् । एवमुत्तरेष्वपि योज्यम् । वायुश्चान्तरिक्षञ्च

क्षादित्यद्युलोकाम्युधरुणान्तानि । तत्र सप्त संसदः अष्टमी भूतसाधनी पृथिवी बभूव भूतानां साधयित्री । न हि पृथिवीमन्तरेण भूताना मुत्पत्तिरस्ति ततस्त्वं प्रार्थ्यसे अध्वनो मार्गान् सकामान् कुरु । यदा हि तैर्लभ्यते तदा मार्गाः सकामाः स्युः मे मम अमुना विशेषनामाभिप्रायमेतत् । संज्ञानं सङ्गतं ज्ञानं चास्तु विज्ञानात्मा वोच्यते । यस्य तव सप्त संसदः पञ्च बुद्धीन्द्रियाणि मनो बुद्धिश्च अष्टमी भूतसाधनी भूतप्रसत्तिकरी वाक् अध्वनः मम सकामान् कुरु अमुना मे संज्ञानम् अस्तु ॥ १ ॥

आदित्यश्च द्यौश्च, आपश्च वरुणश्च । सप्त सꣳसदः । परमात्मोच्यते । यस्य तव सप्त, संसदः सप्त संसदानि प्रकृतानीत्येवम् अग्निपृथिवीवाय्वन्तरिक्षादित्यद्युलोकाम्बुवरुणान्तानि । यस्य च तव अष्टमी बभूव भूतानां साधनी पृथिवी । नहि पृथिवीमन्तरेण भूतानामुत्पत्तिरस्ति । तत्त्वं मार्थ्यसे । सकामान् अध्वन कुरु सकामान्मार्गान् अस्माकं कुरु । यदा हि तैर्लभ्यते तदा सकामा मार्गाः स्युः । संज्ञानञ्च सङ्गतश्च ज्ञानम् अस्तु मे मम अमुना । विशेषनामाभिप्रायमेतत् । विज्ञानात्मा वोच्यते । यस्य तव सप्तसंसदः । मनश्च बुद्धिश्च पञ्चबुद्धीन्द्रियाणि च । अष्टमी च वाक् भूतसाधनी भूतप्रज्ञप्तिकरी । तन्त्वां ब्रवीमि सकामान् अध्वनः कुरु अस्माकम् संज्ञानं च । अस्तु । मे मम अमुना ॥ १ ॥

इषे त्वेत्यारभ्य दर्शपौर्णमासपितृयज्ञाग्निहोत्रोपस्थानपशुचातुर्मास्याग्निष्टोमवाजपेयराजसूयाग्निसौत्रामण्यश्वमेधसम्बद्धा मन्त्रा व्याख्याताः । इदानीं खिल्यान्युच्यन्ते क्वचिद्विनियोगानुक्तेः । तेषां विवस्वानृषिरन्यस्यानुक्तेः आदित्यानीमानि यजूंषि व्याख्यायन्त इति श्रुतेः (बृहदारण्य५, ५, ३३) याज्ञवल्क्यो वा याज्ञवल्क्येन व्याख्यायन्त इति श्रुतेः ॥ अग्निश्च । सप्त लिङ्गोक्तानि यजूंषि । चतस्र ऋग्गायत्र्यः । सप्त संसदः आसुर्यनुष्टुप् । सकामान् प्राजापत्यानुष्टुप् : यथेमाम् ब्राह्मी गायत्री ॥ अग्निश्च पृथिवी च सन्नते सन्नमनं सन्नतम् आनुकूल्येन प्रवृत्तिः अग्निपृथिव्यौ भोगाय सङ्गते अतो ब्रवीमि ते अग्निपृथिव्यौ मे ममादः अमुकं सन्नमताम् सन्नमयतां वशवर्तिनं कुरुतामित्यर्थः । अद इति पुरुषादेर्नाम द्वितीयान्तं प्रयोज्यम् (छन्दस्युभयथेति (पा० ३, ४, ११७) शपोऽप्यार्धधातुकत्वाण्णेरनिटीति (पा० ६, ४, ५१) णिचो लोपः सन्नमतामित्यत्र । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् । वायुरन्तरिक्षं च सन्नते ते-

ममामुकं सन्नमयताम् । आदित्यः द्यौश्च सन्नते ते म० । आपश्च वरुणश्च सन्नते ते म० ॥ परमात्मानं प्रत्युच्यते हे स्वामिन् ! यस्य तव सप्त संसदः संसदनानि अधिष्ठानानि अग्निवाय्वन्तरिक्षादित्यद्युलोकाम्बुवरुणाख्यानि तत्राष्टमी भूतसाधनी पृथ्वी भूतानि साधयति भूतसाधनी भूमिं विना भूतोत्पत्तेरभावात् अतः सर्वाधिष्ठानभूतस्त्वमध्वनो मार्गान् सकामान् कुरु येषु मार्गेषु मया गम्यते तत्रास्माकं कामप्राप्तिरस्त्वित्यर्थः । किञ्च मे ममामुना देवदत्तादिना संज्ञानं सङ्गतं ज्ञानमस्तु ऐक्येन मम प्रीतिरस्तु ॥ विज्ञानात्मा वोच्यते यस्य तव सप्त संसदः पञ्च बुद्धीन्द्रियाणि मनो बुद्धिश्चेति सप्तायतनानि अष्टमी भूतसाधनी भूतानि साधयति वशीकरोति भूतसाधनी वाक् स त्वं नोऽस्माकमध्वनः सकामान् कुरु अमुना सह मे संज्ञानं सङ्गतमस्तु ॥ १ ॥

यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥ २ ॥

(१) यथेमाम् । यथा इमां वाचं कल्याणीम्

---

(१)अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा यथेमाम् । यथा अहम् इमां कल्याणीम् अनुद्वेगकरीं वाचं दीयतां भुज्यतामित्येवमादिकाम् आवदानि जनेभ्योऽर्थाय के ते जना इत्याह ब्रह्मराजन्याभ्यां ब्राह्मणाय राजन्याय च शूद्राय अर्याय वैश्याय स्वाय आत्मीयाय अरणाय चारणोऽपगतोदकःपर इत्यर्थः । आवदानीति सर्वत्र सम्बध्यते प्रियो देवानाम् अवसानरहिता अनुष्टुप् । यथेमां वाचामिति यथायोगादत्र तथाशब्दोऽध्याहर्तव्यः । तथा तेन प्रकारेण अहं देवानां प्रियो भूयासम् दक्षिणायै दक्षिणाया दातुश्च इह अस्मिन्नेव काले प्रियो भूयासम् अयं मे कामः समृध्यताम् अयमिति कामनामग्रहणम् । तद्यथा मा-

अनुद्वेजिनीम् दीयतां भुज्यतामित्येवमादिकाम् । आवदानि । जनेभ्यो ऽर्थाय। के ते जना इत्यत आह । ब्रह्मराजन्याभ्याम् ब्राह्मणाय राजन्याय च शूद्राय च अर्याय च अर्यो वैश्यः । स्वाय चात्मीयाय च अरणाय च । अरणः अपगतोदकः पर इत्यर्थः । आवदानीति सर्वत्र संबध्यते ॥ प्रियो देवानाम् । अवसानरहितानुष्टुप् । यथेमां वाचमिति यथाशब्दयोगात्तथाशब्दो ऽत्राध्याहर्तव्यः । तथा तेन प्रकारेण प्रियो देवानां भूयासम् । दक्षिणायै दक्षिणाया दातुश्च इहास्मिन्नेव काले प्रियो भूयासम् अयमिति कामनामग्रहणम् । तद्यथा अयं ग्रामलाभकामः अस्मै मे समृध्यताम् । किं च उप मा अदः नमतु । अद इति यः काम इष्यते स उच्यते । तद्यथा उपनमतु मां प्रति देवदत्तः ॥ २ ॥

इमां कल्याणीमनुद्वेगकरीं वाचमहं यथा यतः आवदानि सर्वेतो ब्रवीमि दीयतां भुज्यतामिति सर्वेभ्यो वच्मि । केभ्यस्तदाह ब्रह्मराजन्याभ्यां ब्राह्मणाय राजन्याय क्षत्रियाय च शूद्राय अर्याय वैश्याय स्वायात्मीयाय अरणाय पराय अरणोऽपगतोदकः शत्रुः नास्ति रणः शब्दो येन सह वाक्सम्बन्धरहितः । शत्रुरिति वा ॥ प्रियो देवानाम् मध्येऽवसानरहितानुष्टुप् लौगाक्षिदृष्टा ।यथेति पूर्वोक्तेरत्र तथाशब्दोऽध्याहार्यः यतोऽहं ब्राह्मणादिभ्यः कल्याणीं वाचं वदामि तथा ततोऽहं देवानां प्रियः भूयासम् इह संसारे दक्षिणायै दक्षिणायाः दातुश्च प्रियः भूयासम् देवा दक्षिणादातारश्च मयि प्रीतिं कुर्वन्त्वित्यर्थः । किञ्च मे ममायं कामः समृध्यतां सफलो भवतु अयमिति नामनिर्देशः धनपुत्रादिलाभकामो मे सम्पद्यतामित्यर्थः किञ्च अदो मा मामुपनमतु अद इति इष्टनामग्रहणम् देवदत्तादि मां प्रीणयतु ॥ २ ॥

मलाभकामोऽसौ समृध्यतां। किञ्च अदो मामुपनमतु । अद इति इष्ट उच्यते । तद्यथा उपनमतु मां प्रति देवदत्तः ॥ २ ॥

बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु । यद् दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् । उपयामगृहीतोऽसि बृहस्पतये त्वा । एष ते योनिर्बृहस्पतये त्वा ॥ ३ ॥

(१) बृहस्पते अति बृहस्पतिसवेऽनया त्रिष्टुभा बृहस्पतिदेवतया ग्रहो गृह्यते गृत्समदस्यार्षम् बृहस्पतेर्वा । हे बृहस्पते । अतिशयेन यत् द्रविणं धनम् । अर्यं ईश्वरः अर्यशब्दः स्वामिन्यन्तोदात्तः वैश्ये आद्युदात्तः । अर्हात् पूजयेत् । यच्च द्युमद्विभाति । द्युमत् द्युतिमत् विभाति भासते । क्रतुमज्जनेषु । यच्च क्रतुमत् यज्ञवत् जनेषु विभातीत्यनुवर्त्तते यत् दीदयत् शवसा यच्च दीप्यते शवसा बलेन । रक्षितारोऽपि यस्य सन्तीत्यभिप्रायः । हे ऋतप्रजात ऋतात्सत्यादविनाशिनः प्रजायत इति ऋतप्रजातः तत्संबुद्धौ हे ऋतप्रजात तत् द्रविणम् अस्मासु धेहि स्थापय चित्रं नानारूपम् । उपयामगृहीतोसि बृहस्पतये त्वा । एष ते योनि-

(१) अत्र वाराणसी लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा हे बृहस्पते अति बृहस्पतिसवेऽनया त्रिष्टुभा बृहस्पतिदेवतया ग्रहो गृह्यते बृहस्पतेरेवार्षं हे बृहस्पते अर्यं ईश्वरः अर्यशब्दः स्वामिन्यन्तोदात्तः वैश्ये आद्युदात्तः । स्वामी यत् द्रविणं धनम् अति अर्हात् अतिशयेन पूजयेत् । यत् जनेषु विभाति भासते कीदृशं धनं द्युमत् द्युतिमत् क्रतुमत् यज्ञवच्च यच्च धनं शवसा बलेन दीदयत् दीप्यते रक्षितारोऽपि यस्य सन्तीति भावः । ऋतात् सत्यात् अविनाशिनस्तस्मात्प्रजायते इति ऋतप्रजातः तस्य सम्बोधनं हे ऋतप्रजात तत् चित्रं नानाविधं द्रविणम् अस्मासु धेहि स्थापय उपयाम एष ते स्थापय उपयाम एष ते स्थापनमन्त्रः ॥ ३ ॥

बृहस्पतये त्वा । स्थापनमन्त्रः ॥ ३ ॥

ब्रह्मदेवत्या त्रिष्टुप् गृत्समददृष्टा बृहस्पतिसवे बार्हस्पत्यग्रहणेऽस्याः सोपयामाया विनियोगः : ऋतात् सत्यात् हे ऋतप्रजात ! ब्रह्मणः सकाशात् प्रजातं प्रकृष्टं जातं जन्म यस्य ऋतप्रजातः हे बृहस्पते बृहतां वेदानां पते पालक ! चित्रं नानाविधं तत् द्रविणमस्मासु यजमानेषु धेहि धारय स्थापय देहीत्यर्थः । तत्किम् अर्य्यः स्वामी यद्धनमर्हति अर्हति पूजयति लेटोऽडाटाविति (पा० ३, ४, ९४) आडागमः अर्य्यः स्वामिवैश्ययोरिति (पा० ३, १, १०३) अर्य्यशब्दः स्वामिन्यन्तोदात्तः वैश्ये आद्युदात्तः ईश्वरयोग्यं धनं देहीत्यर्थः । यद्धनं जनेषु लोकेषु विभाति विविधं शोभते । कीदृशं धनं द्युमत् द्यौः कान्तिरस्यास्ति द्युमत् दिव उद्वेति (पा० ६, १, १३१) उकारः । क्रतुमत् क्रतवो यज्ञा विद्यन्ते येन तत् येन यज्ञाः क्रियन्ते तादृशं धनं देहीत्यर्थः । यत् धनं शवसा बलेन दीदयत् दापयति प्रापयति वा धनान्तरम् तद्धनं देहीत्यर्थः दय दानगतिहिंसादानेषु अस्माण्णिजन्ताल्लुङि रूपम् अडभाव आर्षः ॥ उपयामेन पात्रेण गृहीतोऽसि बृहस्पतयेऽर्थाय त्वा गृह्णामि । स्थापयति एष ते योनिः स्थानम् बृहस्पतये त्वां सादयामि ॥ ३ ॥

इन्द्र गोमन्निहायाहि पिबा सोमं शतक्रतो । विद्यद्भिर्ग्रावभिः सुतम् ॥ उपयामगृहीतोऽसीन्द्राय त्वा गोमते । एष ते योनिरिन्द्राय त्वा गोमते ॥ ४ ॥

(१) इन्द्र गोमन् । द्वाभ्यां गायत्रीभ्यामिन्द्राय गोमते

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा इन्द्र गोमन्द्वाभ्यां गायत्रीभ्यां इन्द्राय गोमते ग्रहो गृह्यते गोसवे आदित्यस्यार्षं याज्ञवल्क्यस्य वा हे इन्द्र हे गोमन् गोमन् गोभिः धेनुभिः संयुक्त स्तुतिभिर्वा इह यज्ञे आयाहि आगच्छ आगत्य च हे शतक्रतो बहुकर्मन् सोमं पिब । किम्भूतं सोमं विद्यद्भिः ग्रावभिः सुतम् अभिषुतम् विशेषेण द्यन्ति खण्डयन्ति ते विद्यन्तः तैः । दो अवखण्डने । अस्य शतरि विद्यन्त इति रूपम् । उप० । गोमते इन्द्राय त्वां गृह्णामि सादयति एष ते ॥ ४ ॥

ग्रहो गृह्यते गोसवे । आदित्यस्यार्षं याज्ञवल्क्यस्य वा । हे इन्द्र गोमन् । गोभिः संयुक्त । स्तुतिभिर्वा । इह यज्ञे आयाहि आगच्छ एत्य च पिब सोमम् हे शतक्रतो बहुकर्मन् कथंभूतं सोमम् विद्यभिर्ग्रावभिः सुतम् दो अवखण्डने । अस्य शतरि विद्यन्त इति रूपम् तैः विद्यद्भिः विशेषेणावखण्डयद्भिः ग्रावभिः सुतमभिषुतं सोमम् ॥ उपयामगृहीतोऽसीन्द्राय त्वा गोमते गृह्णामि । एष ते योनिरिन्द्राय त्वा गोमते सादयामि ॥ ४ ॥

हे इन्द्रदेवत्ये गायत्र्यौ ! एन्याक्षिदृष्टे गोसवे यज्ञे ग्रह ग्रहणे नियुक्ते सोपयामे । शतं क्रतवः कर्माणि यस्य स शतक्रतुः हे शतक्रतो ! हे इन्द्र ! हे गोमन् ! गावो धेनवः स्तुतयः किरणा वा विद्यन्ते यस्य स गोमान् त्वमिह यज्ञे आयाहि आगच्छ सोमं च पिब द्व्यचोऽतस्तिङ इति (पा० ६, ३, १३५) दीर्घः । कीदृशं सोमं ग्रावभिः सुतमश्मभिरभिषुतम् कीदृशैर्ग्रावभिः वियद्भिः विशेषेण द्यन्ति खण्डयन्ति ते वियन्तः तैः दो अवखण्डने दिवादित्वाच्छ्यन् शतरि ओतः श्यनीति (पा० ७, ३, ७१) ओकारलोपः ॥ उपया० गोमते इन्द्राय त्वां गृह्णामि । सादयति एष ते० ॥ ४ ॥

इन्द्रायाहि वृत्रहन् पिबा सोमꣳ शतक्रतो । गोमद्भिर्ग्रावभिः सुतम् ॥ उपयामगृहीतोऽसीन्द्राय त्वा गोमते । एष ते योनिरिन्द्राय त्वा गोमते ॥ ५ ॥

(१) इन्द्रायाहि । हे इन्द्र आगच्छ हे वृत्रहन् । वृत्रस्य हन्तः एत्य च सोमम्पिब हे शतक्रतो बहुकर्मन्। कथंभूतं सोमम्। गोमद्भिः स्तुतिमद्भिः । ग्राह्यासंयुतैर्वा अंशुवचनो वा गोशब्दः ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथः इन्द्रायाहि हे इन्द्र हे वृत्रहन् हे शतक्रतो त्वम् आयाहि । सत्यं च सोमं पिब किंसोमं । गोमद्भिः स्तुतिमद्भिः ग्रावभिः सुतम् । उप० ॥ ५ ॥

बृहस्पतये त्वा । स्थापनमन्त्रः ॥ ३ ॥

ग्रहदेवत्या त्रिष्टुप् गृत्समददृष्टा बृहस्पतिसवे बार्हस्पत्यग्रहणेऽस्याः सोपयामाया विनियोगः । ऋतात् सत्यात् हे ऋतप्रजात ! ब्रह्मणः सकाशात् प्रजातं प्रकृष्टं जातं जन्म यस्य ऋतप्रजातः हे बृहस्पते बृहतां वेदानां पते पालक ! चित्रं नानाविधं तत् द्रविणमस्मासु यजमानेषु धेहि धारय स्थापय देहीत्यर्थः । तत्किम् अर्य्यः स्वामी यद्धनमर्हति अर्हाति पूजयति लेटोऽडाटाविति (पा० ३, ४, ९४) आडागमः अर्य्यः स्वामिवैश्ययोरिति (पा० ३, १, १०३) अर्य्यशब्दः स्वामिन्यन्तोदात्तः वैश्ये आद्युदात्तः ईश्वरयोग्यं धनं देहीत्यर्थः । यद्धनं जनेषु लोकेषु विभाति विविधं शोभते । कीदृशं धनं द्युमत् द्यौः कान्तिरस्यास्ति द्युमत् दिव उच्चेति (पा० ६. १, १३१) उकारः । क्रतुमत् क्रतवो यज्ञा विद्यन्ते येन तत् येन यज्ञाः क्रियन्ते तादृशं धनं देहीत्यर्थः । यत् धनं शवसा बलेन दीदयत् दापयति प्रापयति वा धनान्तरम् तद्धनं देहीत्यर्थः दय दानगतिहिंसादानेषु अस्माण्णिजन्ताल्लुङि रूपम् अडभाव आर्षः ॥ उपयामेन पात्रेण गृहीतोऽसि बृहस्पतयेऽर्थाय त्वा गृह्णामि । स्थापयति एष ते योनिः स्थानम् बृहस्पतये त्वां सादयामि ॥ ३ ॥

इन्द्र गोम॑न्नि॒हा या॑हि॒ पिबा॒ सोम॑ꣳ शतक्रतो ।
वि॒द्यद्भि॒र्ग्राव॑भिः सु॒तम् ॥ उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य
त्वा॒ गोम॑ते । ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ गोम॑ते ॥ ४ ॥

(१) इन्द्र गोमन् । द्वाभ्यां गायत्रीभ्यामिन्द्राय गोमते

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा इन्द्र गोमन्नाद्वाभ्यां गायत्रीभ्यां इन्द्राय गोमते ग्रहो गृह्यते गोसवे आदित्यस्यार्ष याज्ञवल्क्यस्य वा हे इन्द्र हे गोमन् गोमन् गोभिः धेनुभिः संयुक्त स्तुतिभिर्वा इह यज्ञे आयाहि आगच्छ आगत्य च हे शतक्रतो बहुकर्मन् सोमं पिब । किम्भूतं सोमं विद्यद्भिः ग्रावभिः सुतम् अभिषुतम् विशेषेण द्यन्ति खण्डयन्ति ते विद्यन्तः तैः । दो अवखण्डने । अस्य शतरि विद्यन्त इति रूपम् । उप० । गोमते इन्द्राय त्वां गृह्णामि सादयति एष ते ॥ ४ ॥

ग्रहो गृह्यते गोसवे। आदित्यस्यार्षं याज्ञवल्क्यस्य वा। हे इन्द्र गोमन्। गोभिः संयुक्त। स्तुतिभिर्वा। इह यज्ञे आयाहि आगच्छ एत्य च पिब सोमम् हे शतक्रतो बहुकर्मन् कथंभूतं सोमम् विद्यभिर्ग्रावभिः सुतम् दो अवखण्डने। अस्य शतरि वियन्त इति रूपम् तैः वियद्भिः विशेषेणावखण्डयद्भिः ग्रावभिः सुतमभिषुतं सोमम् ॥ उपयामगृहीतो ऽसीन्द्राय त्वा गोमते गृह्णामि। एष ते योनिरिन्द्राय त्वा गोमते सादयामि ॥ ४ ॥

द्वे इन्द्रदेवत्ये गायत्र्यौ। रम्याक्षिदृष्टे गोसवे यज्ञे ग्रह ग्रहणे नियुक्ते सोपयामे। शतं क्रतवः कर्माणि यस्य स शतक्रतुः हे शतक्रतो। हे इन्द्र। हे गोमन्। गावो धेनवः स्तुतयः किरणा वा विद्यन्ते यस्य स गोमान् त्वमिह यज्ञे आयाहि आगच्छ सोमं च पिब द्व्यचोऽतस्तिङ इति (पा० ६, ३, १३५) दीर्घः। कीदृशं सोमं ग्रावभिः सुतमद्रभिरभिषुतम् कीदृशैर्ग्रावभिः वियद्भिः विशेषेण द्यन्ति खण्डयन्ति ते वियन्तः तैः दो अवखण्डने दिवादित्वाच्छ्यन् शतरि ओतः श्यनीति (पा० ७, ३, ७१) ओकारलोपः ॥ उपया० गोमते इन्द्राय त्वां गृह्णामि। सादयति एष ते० ॥ ४ ॥

इन्द्रायाहि वृत्रहन् पिबा सोमंꣳ शतक्रतो। गोमद्भिर्ग्रावभिः सुतम् ॥ उपयामगृहीतोऽसीन्द्राय त्वा गोमते। एष ते योनिरिन्द्राय त्वा गोमते ॥ ५ ॥

(१) इन्द्रायाहि। हे इन्द्र आगच्छ हे वृत्रहन्। वृत्रस्य हन्तः एत्य च सोमम्पिब हे शतक्रतो बहुकर्मन्। कथंभूतं सोमम्। गोमद्भिः स्तुतिमद्भिः। ग्रावासंयुतैर्वा अंशुवचनो वा गोशब्दः ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा इन्द्रायाहि हे इन्द्र हे वृत्रहन् हे शतक्रतो त्वम् आयाहि। सत्यं च सोमं पिब किंसोमं। गोमद्भिः स्तुतिमद्भिः ग्रावभिः सुतम्। उप० ॥ ५ ॥

ग्रावभिः सुतमभिषुतम् उपयामेति व्याख्यातम् ॥ ५ ॥

वृत्रं दैत्यं हन्ति वृत्रहा शतं क्रतवो मखा यस्य स शतक्रतुः । हे वृत्रहन् ! हे शतक्रतो ! हे इन्द्र ! त्वमायाहि आगच्छ सोमं च पिब । कीदृशं सोमं ग्रावभिः सुतम् । कीदृशैर्ग्रावभिः गोमद्भिः गौः स्तुतिर्विद्यते येषां ते गोमन्तस्तैः ॥ उप० एष ते० व्याख्याते ॥ ५ ॥

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ॥ उपयामगृहीतोऽसि वैश्वानराय त्वा एष ते योनिर्वैश्वानराय त्वा ॥ ६ ॥

(१) ऋतावानम् । तिस्रो वैश्वानरीयाः पुरोरुचः गायत्रीत्रिष्टुबुगायत्र्यः । अधस्तन एव ऋषिः । ऋतावानं सत्यवन्तं यज्ञवन्तमुदकवन्तं वा वैश्वानरम् ऋतस्य वा । उदकस्य यज्ञस्य सत्यस्य वा ज्योतिषश्च पतिम् । अथवा ऋतस्य सर्वगतस्य ज्योतिषः पतिमधिपतिम् । अजस्रम् अनुपक्षीणं घर्मम् अक्षरणं दीप्तं वा ईमहे याचामहे । आयज्ञसमाप्तिमिति शेषः सामर्थ्यात् । उपयामेति व्याख्यातम् ॥ ६ ॥

तिस्रो वैश्वानरीयाः पुरोऽनुवाक्याः । आद्या गायत्री प्रद्युराशिर्दृष्टा । वयं वैश्वानरमीमहे याचामः यज्ञसमाप्तिमिति शेषः ईमहे याच्ञाकर्मसु पठितः । कीदृशं वैश्वानरम् ऋतवानम् ऋतं सत्यं यज्ञो जलं वास्यास्ति ऋतवा तम् छन्दसी वनिपौ वाच्याविति (पा० ५, २, १०९ वा० २) अस्त्यर्थे वनप्रत्ययः संहितायामृतस्य दीर्घः ।

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा ऋतावानम् । तिस्रो वैश्वानरीयाः पुरोरुचः गायत्रीत्रिष्टुप्गायत्र्यः अधस्तन एव ऋषिः वयं वैश्वानरम् ईमहे याचामहे यज्ञसमाप्तिमिति शेषः सामर्थ्यात् । किं वैश्वानरम् ऋतावानं सत्यवन्तं यज्ञवन्तमुदकवन्तं वा । ऋतस्योदकस्य यज्ञस्य सत्यस्य वा ज्योतिषश्च पतिम् । अथवा ऋतस्य सर्वगतस्य ज्योतिषः पतिम् अजस्रम् अनुपक्षीणं घर्मम् अपक्षरणं दीप्तं वा ॥ ६ ॥

ऋतस्य सत्यस्याविनाशिनो ज्योतिषः तेजसः पतिं पालकम् तेजोऽधिष्ठानमित्यर्थः अजस्रं न जस्यति नश्यति अजस्रस्तमनुपक्षीणम् जसु हिंसायाम् नमिकम्पीति (पा० ३, २, १६७) रप्रत्ययः घर्मं घृ क्षरणदीप्त्योः जिघर्ति क्षरति जलं घर्मस्तम् दीप्तं वा ॥ उपया० वैश्वानराय त्वा गृह्णामि । एष ते० सादयामि ॥ ६ ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ॥ उपयामगृहीतोऽसि वैश्वानराय त्वा । एषते योनिर्वैश्वानराय त्वा ॥ ७ ॥

(१) वैश्वानरस्य सुमतौ । द्वितीयः पादः पूर्वं व्याख्यायते । यः वैश्वानरः राजा दीप्तः हि कमिति निपातसमाहारोऽनर्थः । यश्च वैश्वानरः भुवनानां भूतजातानामभिश्रीः अभ्याश्रयणीयः सर्वोपकारसामर्थ्यात् । यश्च इतो जातः इतोऽरणितः कुतश्चिद्वा उत्पन्नः सन् विश्वमिदं सर्वमिदं विचष्टे अभिविपश्यति । यथाद्रष्टव्यं कर्मानुरूपेण । यश्च वैश्वानरः यतते स्पर्द्धते सूर्येण सह स्वकीयदीप्त्या तस्य वैश्वानरस्य सुमतौ कल्याणमतौ वयं स्यामेति प्रार्थना । उपयामेति समञ्जसम् ॥ ७ ॥

त्रिष्टुप् कुत्सदृष्टा । वैश्वानरस्य सुमतौ शोभनबुद्धौ वयं स्याम

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा वैश्वानरस्यातस्य वैश्वानरस्य सुमतौ कल्याणमतौ वयं स्यामेति प्रार्थना हि कम् इति । निपातद्वयमनर्थकम् । यः भुवनानां भूतजातानाम् अभिश्रीः अभ्याश्रयणीयः सर्वोपकारकसामर्थ्यात् राजा दीप्तिश्च यश्च इतोऽरणितो जातः सन् इदं विश्वं सर्वं विचष्टे अभिपश्यति यथाद्रष्टव्यं कर्मानुरूपेण यश्च वैश्वानरः सूर्येण सह यतते स्पर्द्धते उपयाम० ॥ ७ ॥

भवेम। कं निपातः पादपूरणः। हि यस्माद्धेतोर्वैश्वानरः इतोऽरणितो जातः उत्पन्नः सन् इदं विश्वं सर्वं विचष्टे कर्मानुरूपं पश्यति सूर्य्येण सह यतते स्पर्धते च सूर्यसमतेजा इत्यर्थः। कीदृशोऽग्निः राजा राजते दीप्यते राजा। भुवनानां भूतजातानामभिश्रीः आश्रयणीयः अभि समन्तात् श्रीयते सेव्यतेऽभिश्रीः कर्मणि क्विप्। उप० एष ते उक्ते ॥ ७ ॥

वैश्वानरो न ऊतय आ प्रयातु परावतः। अग्निरुक्थेन वाहसा ॥ उपयामगृहीतोऽसि वैश्वानराय त्वा। एष ते योनिर्वैश्वानराय त्वा ॥ ८ ॥

(१) वैश्वानरो नः वैश्वानरोऽग्निः नोऽस्मान् ऊतये अवनाय पालनाय आप्रयातु आगच्छतु परावतः दूरात्। यो हि दूरादागच्छेत् आगच्छेदप्यसौ समीपादित्यभिप्रायः। केन आप्रयातु। उक्थेन स्तोमेन। वाहसा वाहनभूतेन। अन्यत्रापि स्तोमो वाहन इत्युच्यते। वाहिष्ठो वाहना स्तोम इति। उपयामेति समानम् ॥ ८ ॥

गायत्री। नोऽस्माकमूतयेऽवनाय परावतः दूरदेशाद्वैश्वानरः आ प्रयातु आगच्छतु केन वाहसा वाहनभूतेन उक्थेन स्तोमेन वाहिष्ठो वाहनानां स्तोमो दूतो हुतं नरा इति श्रुत्यन्तरे स्तोमस्य वाहनत्वमुक्तम्। उप० एष० उक्ते ॥ ८ ॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। त॰

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा वैश्वानरो नः। वैश्वानरोऽग्निः नोऽस्माकम् ऊतये अवनाय पालनाय परावतो दूरतः आप्रयातु यो हि दूराद्गच्छति स समीपादागच्छत्येवेति भावः। केन आयातु वाहसा वाहनभूतेन। उक्थेन स्तोमेन अन्यत्रापि स्तोमो वाहनमित्युच्यते। वाहिष्ठो वाहनानां स्तोम इति। उपयाम० ॥ ८ ॥

मीमहे महागयम् ॥ उपयामगृहीतोऽस्यग्नये त्वा वर्चसे एष ते योनिरग्नये त्वा वर्चसे ॥ ९ ॥

(१) अग्निर्ऋषिः । आग्नेयी गायत्री पुरोरुक् । ऋषिरुक्तः । यः अग्निः ऋषिः द्रष्टा मन्त्राणाम् पवमानः । इतश्चेतश्च गच्छन् । पाञ्चजन्यः पञ्चजनेभ्यो हितः । चत्वारो वर्णा निषादपञ्चमाः पञ्चजनाः । तेषां हि यज्ञेऽधिकारोऽस्ति । पुरोहितः । पुर एनन्दधति यज्ञं कुर्वाणाः । तम् ईमहे याचामहे । महागयम् महान्तं गृहम् । महत्त्वं च गृहस्य द्रव्यनिबन्धनम् उपयामगृहीतो ऽस्यग्नये त्वा वर्चस इति व्याख्यातम् ॥ ९ ॥

अग्निदेवत्या गायत्री वसिष्ठभरद्वाजदृष्टा पुरोरुक् । महान् गयः स्तुतिर्यस्य स महागयो महागृहरूपो वा तमग्निं वयमीमहे याचयामः । तं कं योऽग्निर्ऋषिः मन्त्रद्रष्टा । पवमानः पव गतौ पवत इतस्ततो गच्छति पवमानः यद्वा पूङ् शोधने पवते शोधयति पवमानः । पाञ्चजन्यः पञ्चजनेभ्यो हितः विप्रादयश्चत्वारो वर्णा निषादश्चेति पञ्चजनास्तेषां यज्ञाधिकारात् पुरोहितः पुरोऽग्रे हितः स्थापितः दधातेर्निष्ठा ॥ उप० वर्चसे तेजोरूपायाग्नये त्वां गृह्णामि । एष० ॥ ९ ॥

महाँ२॥ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान् द्वेष्टि । उपयामगृहीतोऽसि

(१) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बईमु० पु० नास्ति। तद्यथा अग्निर्ऋषिः आग्नेयी गायत्री पुरोरुक्।ऋषिरुक्तः। ईदृशो ऽग्निः तं वयम् ईमहे याचामहे । कीदृशोऽग्निः ऋषिः मन्त्राणां द्रष्टा पवमानः इतस्ततो गच्छन् । पाञ्चजन्यः पञ्चजनेभ्यो हितः । चत्वारो वर्णा निषादपञ्चमाः पञ्चजनाः । तेषां हि यज्ञाधिकारोऽस्ति पुरोहितः पुर एनं दधति यज्ञं कुर्वाणाः तम् ईमहे । कीदृशं तं महागयम् । महान्तं गृहं महत्त्वं च गृहस्य द्रव्यनिबन्धनम् । उप० । वर्चसेऽग्नये ॥ ९ ॥

महेन्द्राय त्वा। एष ते योनिर्महेन्द्राय त्वा ॥ १० ॥

(१)महाँ इन्द्रः। माहेन्द्री पुरोरुक् गायत्री। उक्तमार्षम्। महान् इन्द्रः वज्रहस्तः। षोडशी। पञ्च प्राणाः पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः षोडशम् एतल्लिङ्गं यस्य स षोडशीन्द्रः। पञ्चदशो वा वज्रश्चेन्द्रश्च षोडशी वज्रस्य। शर्म शरणं यच्छतु ददातु। हन्तु च पाप्मानं ब्रह्महत्यादिकम्। यश्चास्मान् द्वेष्टि तञ्च हन्तु। यं च वयं द्विष्मः तञ्च हन्तु। उपयामेति समानम् ॥ १० ॥

महेन्द्रदेवत्या गायत्री वसिष्ठकृता। पुरोरुक्। इन्द्रः शर्म सुखं यच्छतु ददातु योऽस्मान् द्वेष्टि तं च पाप्मानं पापिष्ठं हन्तु नाशयतु यद्वास्मद्द्वेष्टारं पाप्मानं च पापं ब्रह्महत्यादिकं हन्तु अस्त्री पङ्कं पुमान् पाप्मेत्यमरः (१, १, १३१)। कीदृश इन्द्रः महान् श्रेष्ठः। वज्रहस्तः वज्रं हस्ते यस्य सः। षोडशी पञ्च प्राणा दशेन्द्रियाणि मनश्चेति षोडशपदार्था लिङ्गशरीररूपा यस्य स षोडशी आत्मरूप इत्यर्थः ॥ उप० एष उक्ते ॥ १० ॥

तं वो॑ द॒स्मम्‌ऋ॑ती॒षहं॒ वसो॑र्मन्दा॒नमन्ध॑सः। अ॒भि व॒त्सं न स्वस॑रेषु धे॒नव॒ इन्द्रं॑ गी॒र्भिर्न॑वामहे ॥ ११ ॥

(२) तं वः ऐन्द्री बृहती। जपस्वाध्यायादिषु विनियो-

---

(१) अत्रायं पाठक्रमः वाराणसी० लि० पु० संमतः मुम्बईमु०पु० नास्ति तद्यथा महाँ इन्द्रः। माहेन्द्री पुरोरुक् गायत्री उक्तमार्षम्। इन्द्रः शर्म शरणं यच्छतु ददातु योऽस्मान् द्वेष्टि तं पाप्मानं पापरूपं हन्तु यद्वा पाप्मानं ब्रह्महत्यादिपापं हन्तु योऽस्मान् द्वेष्टि तं च हन्तु। किम् इन्द्रः महान् वज्रहस्तः षोडशी पञ्चप्राणाः पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः षोडशमेतल्लिङ्गं यस्य स षोडशी। उपयाम०-महेन्द्राय० ॥ १० ॥

(२) अत्रायं पाठक्रमः वाराणसी० लि० पु० संमतः मुम्बईमु०पु०

गः । आदित्यस्यार्षम् याज्ञवल्क्यस्य वा आ अध्यायपरिसमाप्तेः । हे ऋत्विग्यजमानाः तमिन्द्रं गीर्भिर्वाग्भिः स्तुतिलक्षणाभिः । नवामहे । णु स्तुतौ अभिष्टुमः किमर्थम् । वः युष्मभ्यं दास्यतीति । कथंभूतमिन्द्रम् दस्मम् । दर्शनीयम् प्रियवादिनं कार्यसाधनञ्च । ऋतीषहम् ऋती गतिः गतिमात्रेण शत्रुं सहत इत्यृतीषाट् तमृतीषहम् । वसोर्मन्दानमन्धसः । वसोर्वासयितुः सोमस्य स्वकीयेनैकदेशेन मन्दानं माद्यन्तम् अन्धसः अध्यायनीयस्य चान्नस्य स्वकीयेनैवांशेन माद्यन्तम् कथमिव नवामहे । वत्सं न स्वसरेषु धेनवः । नकार उपमार्थीयः । वत्समिव । स्वसरेषु स्वयमेव सरन्ति येषु तानि स्वसराण्यहानि तेषु स्वसरेषु अहस्सु । धेनवः । यथा नवप्रसूता धेनवः दिनेषु अतिहार्द्रात् वत्सं शब्दैराश्वासयेयुः एवं वयमप्यति सौहार्देणेन्द्रङ्गीर्भिर्नवामह इति समस्तार्थः ॥ ११ ॥

इन्द्रदेवत्या पथ्या बृहती नोधागोतमदृष्टा स्वाध्यायादिषु नियुक्ता । आदित्ययाज्ञवल्क्ययोरार्षमाध्यायात् । हे यजमानाः । तमिन्द्रं

नास्ति तद्यथा तं वः । ऐन्द्री बृहती जपस्वाध्यायादिषु विनियोगः । आदित्यस्यार्षं याज्ञवल्क्यस्य वा आ अध्यायपरिसमाप्तेः । हे ऋत्विक् यजमानाः वयं तम् इन्द्रं वः युष्मभ्यं युष्मदर्थं गीर्भिः वाग्भिः स्तुतिलक्षणाभिः अभिवामहे णु स्तुतौ अभिष्टुमः किंभूतम् इन्द्रं दस्मं दर्शनीयं प्रियवादिनं कार्यसाधनं च ऋतीषहम् ऋती गतिः गतिमात्रेण शत्रुं सहते इति ऋतीषाट् तम् ऋतीसहम् । वसोः वासयितुः सोमस्य स्वकीयेन एकदेशेन मदानं माद्यन्तम् अन्धसोऽन्नस्य स्वकीयेनैवांशेन माद्यन्तम् । कमिव नवामहे स्वसरेषु स्वयमेव सरति गावो येषु तानि स्वसराणि अहानि तेषु धेनवः वत्सं नववत्समिव न इवार्थे यथा नवप्रसूता धेनवो दिनेषु अतिस्नेहाद्वत्सं शब्दैराश्वासयेयुः । स्मरन्ति तथा वयमप्यतिसौहृदेनेन्द्रं गीर्भिः नवामहे इत्यर्थः ॥ ११ ॥

धयं गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः अभिनवामहे सम्यक् स्तुमहे नु स्तुतौ व्यत्ययेन शप् । किम्भूतमग्निं वो युष्माकं दस्मं दर्शनीयम् दसि दर्शने मप्रत्ययः । ऋतीषहम् ऋ गतौ क्तिन्प्रत्ययः ऋत्या गत्या सहतेऽभिभवति शत्रूनिति ऋतिषट् तम् पूर्वपदाच्चेति (पा० ८, ३, १०६) षत्वम् संहितायां दीर्घः । वसोः वासयितुः स्थितिहेतुभूस्यान्धसो ऽन्नस्य षष्ठी तृतीयार्थे अन्नेन मन्दानं मोदमानम् म दिङ् स्वप्ने जाड्यं मदे मोदे स्तुतौ गताविति धातोः शानच्प्रत्ययेन शपो लुक् । दृष्टान्तमाह वत्सं न नकार इवार्थः स्वसरेषु स्वेनैवात्मनैव सरन्ति प्रसरन्ति किरणा येषु ते स्वसरा दिवसाः तेषु यथा धेनवो नवप्रसूता गावो वत्सं नुवन्ति स्तुवन्ति शब्दैराह्वयन्तीत्यर्थः । तद्वद्वयमिन्द्रं स्तुमः ॥ ११ ॥

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ १२ ॥

(१) यद्वाहिष्ठम् । आग्नेय्यनुष्टुप् हे उद्गातः यत् वाहिष्ठं वोढृतमं बृहत्साम तत् अग्नये अर्थाय अर्चगाय । ततो दृष्ट्वाग्निं ब्रूहि । हे विभावसो विभूतधन अग्ने । महिषीव त्वद्रयिः महिषी प्रथमविन्ना । यथा प्रथमपत्नी धर्मार्थकामात्मिका उत्तिष्ठति सुखात्मिका भवति एवं त्वद्रयिः सुखात्मिका उदीरते उत्तिष्ठति ॥ अथवा । महिषी यथा सर्वान् भोगान् उदीरते उत्क्षिप-

---

(१) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बईमु०पु० नास्ति । तद्यथा यद्वाहिष्ठम् आग्नेय्यनुष्टुप् । हे उद्गातः यद्वाहिष्ठं वोढृतमं बृहत्साम तत् अग्नयेऽर्थाय अर्चगायं ततो दृष्ट्वाऽग्निं ब्रूहि हे विभावसो विभूतधन अग्ने त्वत् त्वत्तः रयिः धनम् उदीरते उत्तिष्ठति प्रियसुखात्मिका भवति का इव महिषीव महिषी प्रथमविन्ना पत्नी धर्मार्थकामात्मिका यथोत्तिष्ठति यद्वा महिषी यथा सर्वान् भोगान् उदीरते क्षिपति उदीर्ते इति एकवचनेन परिणामः । त्वत्तः वाजा अन्नानि च उदीरते उद्गच्छति परोपकाराय ॥ १२ ॥

ति परोपकाराय । एवं त्वत्तो रयिः उदीरते त्वत्तश्च वाजा अन्नानि उदीरते उद्गच्छन्ति परोपकाराय ॥ १२ ॥

अग्निदेवत्यानुष्टुब्बृहस्पतिदृष्टा । हे उद्गातः ! अग्नये अन्यर्थं तत् बृहत्साम अर्चगाय बृहत्साम्नो गानं कुरु तत्किम् यत् वाहिष्ठम् वाहयति प्रापयति इष्टमिति वाहयितृ वहेर्ण्यन्तात् तृच् अत्यन्तं वाहयितृ वाहिष्ठम् अतिशायने तमबिष्ठनाविति (पा० ५, ३, ५५) अनुवृत्तौ तुश्छन्दसीति (पा० ५,३, ५९) इष्ठनि परे तुरिष्ठेमेयःस्विति (पा० ५, ४, १५४) च तृचो लोपे वाहिष्ठमिति रूपम् । किञ्च सामगानेन प्रत्यक्षमग्निं ब्रूहि किम् हे विभावसो ! विभा कान्तिरेव वसु धनं यस्य स विभावसुः हे अग्ने ! रयिः धनं वाजा अन्नानि च त्वत् त्वत्तः सकाशात् उदीरते उद्गच्छन्ति ईर गतौ कम्पे च लट् शपो लुक् अदभ्यस्तात् (पा० ७, १, ४,) । तत्र दृष्टान्तः महिषीव यथा महिषी प्रथमपरिणीता स्त्री गृहात् भोगार्थं पतिं प्रति उदीर्ते उद्गच्छति । एवं त्वत्पदं पादपूरणम् रयिः त्वदुदीर्ते इति वा ॥ १२ ॥

एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ १३ ॥

(१) एहि । आग्नेयी गायत्री । अधस्तनमन्त्रस्तुतोऽग्निरिह सम्बोध्यते । एहि आगच्छ हे अग्ने । ऊकारोऽनर्थकः । को हेतुरिति चेत् । सुब्रवाणि साधुब्रवाणि ते तव हे भगवन्नग्ने । इत्थेतराः इत्थं त्वदीयैर्नामबन्धकर्मरूपैर्ग्रथिताः इतराः स्तु-

(१) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बई मु०पु० नास्ति। तद्यथा। एहि आग्नेयी गायत्री अधस्तनमन्त्रस्तुतोऽग्निरिह संबोध्यते एहि आगच्छ उकारोऽनर्थकः को हेतुरिति चेत् हे अग्ने ते तव इत्थ इत्थं त्वदीयैर्नामबन्धकर्मरूपैर्ग्रथिता इतराः अन्याः स्तुतिलक्षणा गिरोऽहं सुब्रवाणि सुष्ठु वदामि एभिः इन्दुभिः अध्वर्युणाभिषुतैः सोमैः त्वं वर्द्धासे वर्धस्व ॥ १३ ॥

तिलक्षणाः गिरो वाचः। यद्वा इत्थमुद्गातृस्तोत्रजनिताः इतरा अन्या गिरो या गीयन्ते। हेतुं न्यस्यति। एभिश्च इन्दुभिः अध्वर्युणाभिषुतैः सोमैः त्वं वर्द्धसे वर्द्धस्व ॥ १३ ॥

अग्निदेवत्या गायत्री भरद्वाजदृष्टा हे अग्ने। त्वमेहि आगच्छ उ पादपूरणः सुञि चेति संहितायामुकारस्य दीर्घः। इत्थ इत्थमनेन प्रकारेण न इतराः अन्याः गिरो वाणीः स्तुतिलक्षणाः ते तव सु प्रवाणि सुतरां वदानि ब्रूञो लोट्। किञ्च एभिरिन्दुभिः सोमैः वर्धासे वर्धस्व लेटोऽडाटौ ॥ १३ ॥

ऋतवस्ते यज्ञं वितन्वन्तु मासा रक्षन्तु ते हविः।
संवत्सरस्ते यज्ञं दधातु नः प्रजां च परिपातु नः ॥१४॥

(१) ऋतवस्ते। यजमानेनाग्निरुच्यते। अनया बृहत्या। ऋतवः ते तव यज्ञं वितन्वन्तु। मासाश्च ते हविः रक्षन्तु। संवत्सरश्च तव यज्ञं दधातु धारयतु नः इति निपातोऽनर्थकः। प्रजां च परिपातु नः इति यजमान आत्मानमाह। नोऽस्माकं प्रजां च परिपातु संवत्सर एव ॥ १४ ॥

अग्निदेवत्या बृहती ९, ८, ११, ८ वर्णपादा विषमपादा नवकाष्टैकादशाष्टिनो विषमपादेति वचनात्। हे अग्ने! ऋतवः ऋतूपलक्षिताः कालविशेषाः ते तव यज्ञं वितन्वन्तु विस्तारयन्तु मासाः चैत्राद्यधिष्ठातारो देवास्ते तव हविः पुरोडाशादिकं रक्षन्तु पान्तु। संवत्सरस्तदधिष्ठाता देवः ते तुभ्यं त्वदर्थं नोऽस्माकं यज्ञं दधातु पुष्णातु नोऽस्माकं प्रजां पुत्रादिकां च परिपातु रक्षतु संवत्सर एव ॥ १४ ॥

---

(१) ऋतवस्ते यजमानेनाग्निरुच्यते अनया बृहत्या ऋतवः ते तव यज्ञं वितन्वन्तु मासाश्च ते तव हविः रक्षन्तु सवत्सरं तव यज्ञं दधातु पुष्णातु नः इति निपातोऽनर्थकः यजमान आत्मानमाह नोऽस्माकं प्रजां परिपातु संवत्सर एव ॥ १४ ॥

उपह्वरे गिरीणाᳬं सङ्गमे च नदीनाम् धिया विप्रो अजायत ॥ १५ ॥

(२) उपह्वरे गिरीणाम् । चतस्रो गायत्र्यः सौम्यः । उपह्वरे गह्वरे गिरीणां पर्वतानाम् प्रसिद्धमेतत् । एकाहीनसत्राणि क्रियन्तामित्यनया । धिया बुद्ध्या विप्रः मेधावी सोमः अजायत । जगत् धारयितुमिच्छन् ॥ १५ ॥

सोमदेवत्या गायत्री वत्सदृष्टा । गिरीणां पर्वतानामुपह्वरे निकटे नदीनां गङ्गादीनां च संगमे विप्रो मेधावी सोमः अजायत उत्पन्नः जनेर्लङ् कया धिया बुद्ध्या विप्रादयो मया यज्ञं करिष्यन्तीति विचार्येत्यर्थः ॥ १५ ॥

उच्चा ते जातमन्धसो दिवि सद्भूम्याददे । उग्रᳬं शर्म महि श्रवः ॥ २६ ॥

(१) उच्चा ते । व्यवाहितपदप्रायो मन्त्रः हे सोम ते तव

---

(१) अत्रायं पाठक्रमः वाराणसी० लि॰पु० संमतः मुम्बईमु० पु० नास्ति । तद्यथा । उपह्वरे । चतस्रो गायत्र्यः सौम्यः । गिरीणाम् उपह्वरे निकटे नदीनां सङ्गमे च एकाहीनसत्राणि क्रियन्तां नित्यम् । अनया धिया बुद्ध्या विप्रो मेधावी सोमः अजायत जगद्धारयितुमिच्छन् ॥ १५ ॥

(२) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बईमु० पु० नास्ति तद्यथा । उच्चा ते हे सोम ते तव अन्धसः आध्यानीयात् रसात् जातम् उत्पन्नम् पक्वपरिणामभूतम् उच्चा उच्चैः दिवि द्युलोके सत् विद्यमानं पश्चाद् भूमिः आददे । गृहीतवती किं तद् द्युलोकस्थानं भूमिराददे उग्रमुद्गूर्णं महत् चौरादिभिरनाधृष्यं शर्म । शरणं गृहं महि महत् श्रवः श्रवणीयं धनं च पञ्चाहुतिपरिणामोद्घाटनमेतत् तत्कृतमाहुतिः प्रथमं दिवि गच्छति ततोऽन्तरिक्षे जलरूपेण ततो भूमौ अन्नरूपेण ततो नरे रेतोरूपेण ततो योनौ पुरुषरूपेणेति पञ्चधाहुतिपरिणामः ॥ १६ ॥

अन्धसः अध्यानीयात् रसीभूतात् । जातमुत्पन्नम् यज्ञपरिणामभूतम् उचा उच्चैः। दिविसत् । द्युलोके विद्यमानम् पश्चात् भूमिः आददे गृहीतवती।किं तत् द्युलोकमाप्तं भूमिराददे । उग्रम् उद्गूर्णं महाचौरादिभिरनाधृष्यम् शर्म शरणं गृहम् महिश्रवः महच्च श्रवणीयं धनम् । पञ्चाहुतिपरिणामोद्घाटनमात्रमेतत् कृतम् यथाहुतिः प्रथमं दिवि गच्छति ततोऽन्तरिक्षे जलरूपेण ततो भूमावन्नरूपेण ततो नरे रेतोरूपेण ततो योनौ पुरुषरूपेणेति पञ्चधाहुतिपरिणामः ॥ १६ ॥

सोमदेवत्यास्तिस्रो गायत्र्य आमहीयवदृष्टाः । हे सोम । ते तव अन्धसोऽन्नाद्रसरूपात् जातमुत्पन्नं होमतो जातमपूर्वम् उचा उच्चं गतं दिवि स्वर्गे सत् विद्यमानं भूमिः आददे गृह्णाति भूमिशब्दस्य विसर्गलोपे सन्धिश्छान्दसः । किं तत् द्युलोकस्थं भूमिर्गृह्णाति तदाह । उग्रमुत्कृष्टं शर्म सुखं गृहपुत्रादिजन्यं । महि महत् श्रवः कीर्तिर्धनं वा ॥ अनेन मन्त्रेण पञ्चाहुतिपरिणाम उक्तः । स यथा । हुताहुतिरादौ दिवि गच्छति ततोऽन्तरिक्षे जलरूपेण ततो भूमावन्नरूपेण ततो नरे रेतोरूपेण ततो योनौ नररूपेणागत्य तं नरं धनयशोभ्यां सुखिनं करोतीति भावः ॥ १६ ॥

स न॒ इन्द्रा॑य॒ यज्य॑वे॒ वरु॑णाय म॒रुद्भ्यः॑ वरि॒वोवि॒त्परि॑स्रव ॥ १७ ॥

(१) स नः । यस्त्वं वरिवोवित् । वरिवोधनम् । तद्विन्दति

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । स नः । यस्त्वं वरिवोधनं विन्दति वेत्ति वा स त्वं नोऽस्माकं यज्ञं यज्यवे यष्टव्याय इन्द्राय वरुणाय मरुद्भ्यश्चार्थाय परिस्रव परिक्षर अथवा स त्वं नः यज्ञं यज्यवे इन्द्राय वरुणाय मरुद्भ्यश्च परिस्रव वरिवोविदिति एतेषां विशेषणं कृतविभक्तिव्यत्ययं गृह्यते वरिवोविद्भ्यः । धनविद्भ्यः क्रियाविशेषणं वा एतेभ्यो देवेभ्यस्तथा परिस्रव यथा वरिवोविद् भवति ॥ १७ ॥

हे सोम ! स त्वं नोऽस्माकं परिस्रव क्षर रसरूपो भूत्वाहुतित्वमेहीत्यर्थः किमर्थमिन्द्राय वरुणाय मरुद्भ्यश्च इन्द्रादीनां तृप्तये परिस्रवेत्यर्थः । कीदृशायेन्द्राय यज्यवे यष्टुं योग्यो यज्युस्तस्मै यष्टव्याय इदं त्रयाणां विशेषणम् यज्युभ्य इति मरुताम् । कीदृशस्त्वं वरिवोवित् वरिवो धनं वेत्ति जानाति विन्दति लभते वा वरिवोवित् धनस्य ज्ञाता प्रापकश्च ॥ १७ ॥

ए॒ना विश्वा॑न्य॒र्य आ द्यु॒म्नानि॒ मानु॑षाणाम् ।
सिषा॑सन्तो वनामहे ॥ १८ ॥

(१) एना विश्वानि । एना एनानि विश्वानि सर्वाणि द्युम्नानि धनानि । अर्य ईश्वरः सोमः आ आदाय अस्मभ्यं ददात्विति शेषः । तानि च सोमदत्तानि । सिषासन्तः । षणु दाने । अस्य सन्यनुनासिकस्याकारः । दातुमिच्छन्तः दानाभिमुखीभूताः सन्तो वयन्धनानि वनामहे सम्भुजमहे ॥ १८ ॥

अर्यः ईश्वरः सोमः एना एनानि विश्वानि सर्वाणि मानुषाणां नराणां द्युम्नानि धनानि यशांसि वा आ नयत्विति शेषः अस्मभ्यं ददात्वित्यर्थः तानि सोमदत्तानि द्युम्नानि वयं वनामहे वन सम्भक्तिशब्दयोः लट् सम्भजामहे । कीदृशा वयं सिषासन्तः षणु दाने सनितुं दातुमिच्छन्ति सिषासन्ति ते सिषासन्तः सनेर्धातोः सन्नन्ताच्छतृप्रत्ययः जनसनखनां सञ्झलोरिति (पा० ६, ४, ४२) आत्वम् सन्यत इति (पा० ७, ४, ७९) अभ्यासेकारः दानं कुर्वाणा धनभाजः स्यामेत्यर्थः ॥ १८ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । एना विश्वानि अर्यः । ईश्वरः सोमः मानुषाणां सम्बन्धीनि एनाःएनानि विश्वानि सर्वाणि द्युम्नानि धनानि आ आदाय अस्मभ्यं ददात्विति शेषः तानि च सोमदत्तानि सिषासन्तः षणु दाने अस्य सनि अनुनासिकस्याकारः । दातुमिच्छन्तः दानाभिमुखीभूताः सन्तो वयं धनानि वनामहे सम्भुञ्ज्महे ॥ १८ ॥

अनु॑ वी॒रैरनु॑ पुष्यास्म॒ गोभि॒रन्वश्वै॒रनु॒ सर्वे॑ण पु॒ष्टैः । अनु॒ द्विप॒दानु॒ चतु॑ष्पदा व॒यं दे॒वा नो॑ य॒ज्ञमृ॑तु॒था न॑यन्तु ॥ १९ ॥

(१) किमर्थं धनमतो दातुमिच्छन्तो धनवन्त इत्याह । अनुवीरैः । आशीर्देवता त्रिष्टुप् । अनुपुष्यास्म वीरैः वयम् अनुपुष्यास्म च गोभिः वयम् । अन्वश्वैः अनुपुष्यास्म च वयमश्वैः । अनुसर्वेण पुष्टैः । अनुपुष्यास्म च वयं सर्वेण पुष्टेनेति वचनव्यत्ययः । अनुद्विपदा अनुपुष्यास्म च वयं द्विपदा द्विपादेन अनुपुष्यास्म च चतुष्पादेन । किञ्च । देवाः नो ऽस्माकं यज्ञम् ऋतुथा ऋतावृतौ काले काले नयन्तु ॥ १९ ॥

आशीरियं देवदेवत्या त्रिष्टुप् मुद्गलदृष्टा । वयं वीरैः पुत्रैः अनुपुष्यास्म पुष्टा भवेम पुषेराशीर्लिङि उत्तमबहुवचनम् गोभिर्धेनुभिः अनुपुष्यास्म उपसर्गावृत्त्या क्रियावृत्तिः अश्वैरनुपुष्यास्म सर्वेणान्येनापि कामेन पुष्यास्म पुष्टैः सर्वपदार्थैर्गृहादिभिः पुष्यास्म । द्वौ पादौ यस्येति द्विपात् तेन द्विपदा मनुष्येण दासादिना चतुष्पदा गजादिना च पुष्यास्म पादोऽन्यतरस्यामिति (पा० ४, १, ८,) अन्तलोपः पादः पदिति (पा० ६, ४, १३०) पदादेशः । किञ्च ऋतुथा ऋतावृतौ काले काले देवा नोऽस्माकं यज्ञं नयन्तु गमयन्तु प्राप्नुवन्तु ॥ १९ ॥

---

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अनुवीरैः। आशीर्देवी त्रिष्टुप् वयं वीरैः अनुपुष्यास्म गोभिः अनुपुष्यास्म अश्वैः अनुपुष्यास्म सर्वेण पुष्टैः पुष्टेनेति वचनव्यत्ययः । सर्वेण पुष्टेन अनुपुष्यास्म द्विपदा द्विपदेन अनुपुष्यास्म चतुष्पदा चतुष्पदेन च अनुपुष्यास्म पुष्टा भूयास्म किञ्च देवाः नोऽस्माकं यज्ञम् ऋतुथा ऋतावृतौ नयन्तु॥१९॥

अग्ने॒ पत्नी॑रि॒हाव॑ह दे॒वाना॑मुश॒तीरुप॑ । त्वष्टा॑रᳩ॒ सोम॑पीतये ॥ २० ॥

(१) अग्ने पत्नीः इत उत्तरं पञ्च नेष्टुर्याज्याः । आद्या गायत्री । देवानां पत्न्यः त्वष्टा च देवता । हे अग्ने देवानां पत्नीः इहास्मिन् यज्ञे उपावह आगमय कथंभूताः उशतीः कामयमानाः अस्मान् । त्वष्टारञ्च उपावह । किमर्थम् । सोमपीतये सोमपानाय ॥ २० ॥

अग्निदेवत्या गायत्री मेधातिथिदृष्टा । इतः पञ्च ऋचोऽग्निष्टोमे नेष्टुर्याज्याः आद्या प्रातःसवने नेष्टृचमसयागे याज्या । हे अग्ने ! देवानां पत्नीः इह यज्ञे त्वमुपावह आगमय । कीदृशीः पत्नीः उशतीः हविः कामयमानाः वशेः शत्रन्तात् उगितः इति (पा० ४, १६) ङीप् । किञ्च सोमपीतये सोमपानाय त्वष्टारं देवं चोपावह ॥ २० ॥

अ॒भि य॒ज्ञं गृ॑णीहि नो॒ ग्नावो॒ नेष्टः॒ पिब॑ ऋ॒तुना॑ । त्वᳩ॒ हि र॑त्न॒धा असि॑ ॥ २१ ॥

(२) अभियज्ञम् । द्वे गायत्र्यौ ऋतुग्रहाणां याज्ये ।

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अग्ने पत्नीः । इत उत्तरं पञ्च नेष्टुर्याज्या अग्निष्टोमे आद्या गायत्री देवानां पत्न्यः त्वष्टा च देवता हे अग्ने देवानां पत्नीः इह यज्ञे उपावह आगमय किम्भूताः उशतीः । अस्मान् कामयमानः त्वष्टारं च उपावह किमर्थं सोमपीतये सोमपानाय ॥ २० ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अभियज्ञम् । द्वे गायत्र्यौ ऋतुग्रहाणां नेष्टा स्वकीयामधिष्ठात्रीं देवतां ब्रवीति हे ग्रावः ग्नाः पत्न्यः विद्यन्ते यस्य स ग्नावान् तस्य सम्बोधनं हे ग्नावः मतुपसो रुः सम्बुद्धौ छन्दसीति रुत्वं हे नेष्टः नोऽस्माकं यज्ञम् अभिगृणीहि

नेष्टा स्वकीयामधिष्ठात्रीं देवतां ब्रवीति। अभिगृणीहि स्तुहि यज्ञं नोऽस्मत्संबन्धिनम्। हे ग्नावः। ग्नाः पत्न्यः ता विद्यन्तेऽस्य स ग्नावान् तत्संबोधनं हे ग्नावः। मतुवसोः रुः संबुद्धौ छन्दसीति रुत्वम्। हे नेष्टः पिब च ऋतुना कालेन सह। कस्मात्त्वमेवमुच्यसे इति चेत्। तत्राह। त्वं हि रत्नधा असि। यस्मात्त्वमेव रमणीयानान्धनानां दातासि ॥ २१ ॥

हे ऋतुदेवते गायत्र्यौ मेधातिथिदृष्टे ऋतुयागे नेष्टुर्याज्ये। ग्नाः पत्न्योऽस्य सन्तीति ग्नावा तदस्यास्तीति (पा० ५, २, ९४) मतुप्। मादुपधाया इति (पा० ८, २, ९) वत्वम् तस्य सम्बोधनं हे ग्नावः पत्नीवन्। हे नेष्टः। नोऽस्माकं यज्ञमभिगृणीहि स्तुहि गॄ शब्दे क्र्यादित्वात् श्ना ई हल्यघोरिति (पा० ६, ४ ११३) तस्येकारः प्वादीनां ह्रस्व इति (पा० ७, ३, ८०) धातोर्ह्रस्वः। किञ्च ऋतुना देवेन सह पिब सोममिति शेषः। हि यस्मात् त्वं रत्नधा असि रत्नानि दधाति ददाति रत्नधाः रमणीयधनानां दातासि ॥२१॥

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्राद्तुभिरिष्यत ॥ २२ ॥

(१) द्राविणोदाः। ऋत्विज उच्यन्ते। अयमग्निः। द्राविणो-

स्तुहि ऋतुना कालेन सह पिब च हि यतः त्वं रत्नधा रमणीयानां धानानां दाता असि ॥ २१ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। द्राविणोदाः ऋत्विज उच्यन्ते अयमग्निः द्रविणोदाः धनस्य बलस्य च या दाता द्रविणम् शब्दः संकारान्तो धनपर्यायः। पिपीषति पातुमिच्छति पिबतेः सनि ईकारादेशः सोममिति शेषः अतो यूयं जुहोत जुहुत प्रतिष्ठत च कर्मसु किञ्च नेष्ट्रात् नेष्टुरिदं नेष्ट्रं नेष्ट्रियाद् धिष्ण्यात् ऋतुभिः कालैः सह सोममिष्यत। पुनः पुनः पिबत ॥ २२ ॥

दाः । धनस्य बलस्य वा दाता । पिपीपति पातुमिच्छति पिबतेः सनीकारः । सोममिति शेषः । एवश्चेदतो ब्रवीमि । हे ऋत्विजः । जुहोत प्र च तिष्ठत जुहुत च प्रतिष्ठत च कर्मसु किञ्च । नेष्ट्रात् नेष्ट्रियात् ऋतुभिः कालैः सह सोमम् इष्यते पुनःपुनः पिबत ॥ २२ ॥

द्रविणस्शब्दः सान्तो धनवाची द्रविणो धनं ददाति द्रविणोदाः धनदाताग्निः पिपीषति पातुमिच्छति सोममिति शेषः पीङ् पानेऽस्माद्दिवादिकात्सन्प्रत्ययः । अतो हे ऋत्विजः । यूयं जुहोत जुहुत प्रतितिष्ठत च तप्तनबिति (पा० ७, १, ४५) तबादेशः कर्मसुद्युक्ता भवतेत्यर्थः । किञ्च नेष्टुरिदं नेष्ट्रम् वृद्ध्यभाव आर्षः नेष्टुर्धिष्ण्यात् ऋतुभिः देवैः सह इष्यत सोमं प्रतिगच्छत इष गतौ दिवादित्वात् श्यन् लोट् ॥ २२ ॥

तवाय सोमस्त्वमेह्यर्वाङ् शश्वत्तमꣳ सुमना अस्य पाहि । अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥ २३ ॥

(१) तवायम् । ऐन्द्री त्रिष्टुप् माध्यन्दिनीया । हे इन्द्र यतः तवाय माध्यन्दिनीयः सोमः अतः अस्माभिः प्रार्थ्यमानः त्वम् आ इहि आगच्छ । कथंभूतः । अर्वाङ् अर्वागञ्चनः अवरेणाञ्चितः । एत्य च शश्वत्तमं शाश्वतिकतमम् सोमं

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । तवायम् । ऐन्द्री त्रिष्टुप् माध्यान्दिनीया हे इन्द्र अयं तव सोमः माध्यान्दिनीयः अतः त्वम् अर्वाङ् अर्वागञ्चनः एहि आगच्छ आगत्य च शश्वत्तमं शाश्वतिकतमम् । अस्य सोमस्य भागं संगृह्य सुमना भूत्वा पाहि पिब पीत्वा च अस्मिन् यज्ञे बर्हिषि आनिषद्य अधिष्ठानं कृत्वा इन्दुं सोमं जठरे दधिष्व धारय ॥ २३ ॥

सोमभागं गृहाण संगृह्य च सुमना भूत्वा अस्य सोमस्य पाहि पिब। पीत्वा च । अस्मिन्यज्ञे बर्हिषि निषद्य अवस्थानं कृत्वा दधिष्व धारयस्व इमं जठरे इन्दुं सोमम् हे इन्द्र ॥ २३ ॥

इन्द्रदेवत्या त्रिष्टुप् विश्वामित्रदृष्टा । माध्यन्दिने सवने नेष्टृचमसयागे याज्या। हे इन्द्र! तव अयं सोमोऽस्ति अतः अर्वाङ् अस्मदभिमुखः त्वमेहि आगच्छ शश्वत्तमं सर्वकालमस्य पाहि कर्मणि षष्ठी इमं सोमं रक्ष पा रक्षणे लोट्। कीदृशः त्वं सुमनाः शोभनं मनो यस्य सः प्रसन्नचित्तः। किञ्च अस्मिन् यज्ञे बर्हिषि आस्तृतदर्भेषु निषद्य उपविश्य इममिन्दुं सोमं जठरे उदरे दधिष्व धारय धि धारणे तुदादिः व्यत्ययेन शपः श्लुस्तङ् च अभ्यासेकारस्याकार आर्षः ॥ २३ ॥

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन। अथा मदस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥ २४ ॥

(१) अमेव नः । देवपत्न्यः त्वष्टा चात्र दृश्यन्ते । जगती तार्तीयसवनीया याज्या । अमाशब्दो गृहवचनः । यथा

(१) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बईमु०पु० नास्ति। तद्यथा। अमेव नः। देवपत्न्यः त्वष्टा चात्र दृश्यन्ते जगती तार्तीयसवनीया यज्या अमाशब्दो गृहवचनः अमा इव स्वगृहमिव नोऽस्माकं यज्ञगृहाणि हे सुहवाः स्वाह्वाना देवपत्न्यः आगन्त न आगच्छत हिः पादपूरणः आगत्य च बर्हिषि निसदतन निषीदत उपविशत निषद्य अरणिष्टन रतिं कुरुत । तप्तनप्तनथनाश्चेति तस्य तनादेशः। एवमुपविष्टासु देवपत्नीषु अथ हे त्वष्टः अन्धस्य सोमस्य स्वमंशं जुजुषाणः सेवमानः मन्दस्व तृप्यस्व किं त्वं देवेभिर्देवैः जनिभिः जननहेतुभूताभिर्देवपत्नीभिः सुमद्गणः शोभमान मदा देवास्तेषां स्त्रैणगणाश्च यस्य स सुमद्गणः सुमदो गणाश्च यस्य ॥ २४ ॥

गृहाणि स्वानि एवं नः अस्माकं यज्ञगृहाणि । सुहवाः साध्वाह्वानाः आग्मिन्तन आगच्छत । हिः पादपूरणः । आगत्य च नि बर्हिषि सदतन निषीदत उपविशत बर्हिषि । निषद्य च रणिष्टन रतिं कुरुत । आदित्यासुपविष्टासु देवपत्नीषु । अथ मन्दस्व तृप्यस्व जुजुषाणः सेवमानः । अन्धसः सोमस्य स्वमंशम् हे त्वष्टः देवेभिर्देवैः जनिभिः जननहेतुभूताभिः देवपत्नीभिः सुमद्गणः सन् शोभनमदा देवास्तेषां स्त्रीणाञ्च गणः यस्य स सुमद्गणः ॥ २४ ॥

त्वष्टृदेवत्या जगती गृत्समदृदृष्टा । तृतीयसवने नेष्टृचमसयागे याज्या । देवपत्न्यः प्रार्थ्यन्ते । अमाशब्दो गृहवाचकः अमेव स्वगृहमिव नोऽस्माकं यज्ञगृहाणि हे देवपत्न्यः ! यूयमागन्तन आगच्छत गमेः शपो लुक् लोटि मध्यमबहुवचने । हि पादपूरणः बर्हिषि दर्भे निसदतन निषीदत उपविशत सद गतौ रणिष्टन रण शब्दे अस्य लुङि रूपम् अडागमाभावः परस्परं वार्त्तां कुरुतेत्यर्थः तप्तनप्तनेति (पा० ७, १, ४५) सर्वत्र तनबित्यादेशः । कीदृश्यो यूयं सुहवाः शोभनः सुकरो हव आह्वानं यासां ताः । एवं देवपत्नीरुक्त्वाथ त्वष्टारमाह हे त्वष्टः ! त्वमथानन्तरं देवपत्नीष्वागतासु मन्दस्व तृप्यस्वेत्यर्थः । कीदृशस्त्वम् अन्धसः अन्धः हविर्लक्षणमन्नं जुजुषाण. सेवमानः जुषी प्रीतिसेवनयोः व्यत्ययेन शानचि शपः श्लुः । अन्धसः इति कर्मणि षष्ठी । देवेभिः देवैः जनिभिः देवपत्नीभिश्च सुमद्गणः सुष्ठु माद्यन्ति हृष्यन्ति सुमदः मदेः क्विप् सुमदः सन्तुष्टा गणा देवाः स्त्रीगणाश्च यस्य स सुमद्गणः । जनयन्ति जनयो नार्यः ॥ २४ ॥

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
इन्द्राय पातवे सुतः ॥ २५ ॥

(१) स्वादिष्ठया । सौम्यौ पावमान्यौ गायत्र्यौ । जपा-

(१) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बईमु० पु० नास्ति । तद्यथा । स्वादिष्ठया । सौम्यौ पावमान्यौ गायत्र्यौ जपादिषु

दिषु विनियोगः उक्तश्च । रसीभूतो यदा सोमः पवित्रात्क्षरति ग्रहम्। ऋग्भिः स्वादिष्ठयाद्याभिः पवमानः स उच्यते । स्वादिष्ठया स्वादुतमया पवस्व दशापवित्रात् द्रोणकलशं प्रति गच्छ हे सोम धारया। यस्त्वम् इन्द्राय पातवे इन्द्रः पिबतु इत्यनेनाभिप्रायेण सुतः अभिषुतो ऽस्माभिः ॥ २५ ॥

सोमदेवत्ये द्वे गायत्र्यौ मधुच्छन्दोदृष्टे जपादिषु नियुक्ते। हे सोम! धारया कृत्वा पवस्व गच्छ दशापवित्राद् द्रोणकलशं प्रति गच्छ। कीदृश्या धारया स्वादिष्ठया स्वादो विद्यते यस्यां सा स्वादवती स्वादिष्ठा तया विन्मतोर्लुगिति (पा० ५, ३, ६५) इष्ठनि मतुपो लुक् स्वादुतमया। मदिष्ठया मदयति मदयित्री अत्यन्तं मदयित्री मदिष्ठा तया इष्ठनि तुरिष्ठेमेयःस्विति (पा० ६, ४, १५४) तृचो लोपः। यत इन्द्राय पातवे इन्द्रस्य पातुं त्वं सुतोऽभिषुतो ऽसि अस्माभिरतो धारया पवस्व ॥ २५ ॥

रक्षोहा विश्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्थमासदत् ॥ २६ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां
षड्विंशोऽध्यायः ॥ २६ ॥

---

(१) रक्षोहा विश्वचर्षणिः । अयमेव सोमः रक्षोहा

विनियोगः उक्तं च " रसीभूतो यदा सोमः पवित्रात् क्षरति ग्रहम् । ऋग्भिः स्वादिष्ठयाद्याभिः पवमानः स उच्यते "। हे सोम स्वादिष्ठया स्वादुतमया मदिष्ठया मदयितृतमया धारया पवस्व दशापवित्रात् द्रोणकलशे प्रतिगच्छ यस्त्वं इन्द्राय पातवे पातुमिन्द्रः त्वां पिबतु इति अभिप्रायेण सुतः अभिषुतोऽस्माभिः ॥ २५ ॥

(१) अत्रायं पाठक्रमः वाराणसी० लि०पु० संमतः मुम्बईमु० पु० नास्ति। तद्यथा। रक्षोहा। अयमेव सोमः रक्षोहा रक्षसां हन्ता विश्वचर्षणिः सर्वस्य जगतो द्रष्टा योनिं स्थानम्। अभि आसदत् आभिमु-

रक्षसामपहन्ता विश्वचर्षणिः सर्वस्य जगतो द्रष्टा । यथार्हम्प्रति अभि आसदत् आभिमुख्येन सन्तः सीदति वा । किमभ्यासदत् योनिं स्थानम् । कथंभूताम् । अयोहते । अयसा कृष्णलोहेन हतमुत्कीर्णम् सोमभाजनीकृतम् । हतमिति विभक्तिव्यत्ययः योनिसामानाधिकरण्यात् । किंनामानं योनिम् द्रोणे । अत्रापि विभक्तिव्यत्ययः द्रोणं द्रोणकलशलक्षणम् । सधस्थं सहस्थानलक्षणम् सोमानाम् ॥ २६ ॥

इति उव्वटकृतौ मन्त्रभाष्ये षड्विंशतितमोऽध्यायः ॥ २६ ॥

---

(१) अम्बरामरसभूमितवर्षे श्रावणासितमनोभवघस्रे ।
भूधराधिशिवपत्तनकृत्यमेतन्माष्यमलिखत् मनुसूनुः ॥ १ ॥
शिरसि चन्द्रकलाप्रतिभासितः सजलनीरदकान्तगलोऽनिशम् ।
धनविरामसितांशुसमप्रभोऽवतु रमापरिरम्भणसादरः ॥ २ ॥
इमं ग्रन्थं व्यधीयानं नृसिंहोऽव्याद्रमायुतः ।

सोमः द्रोणे विभक्तिव्यत्ययः द्रोणं द्रोणकलशलक्षणं योनिं स्थानमभि आसदत् आभिमुख्येन सीदति तिष्ठति । कीदृशः सोमः र-

---

क्ष्येन सीदति किम्भूतं योनिं अयोहतम् अयसा कृष्णलोहेन हतमुत्कीर्णं सोमभाजनीकृतं अय इत्यत्र सुपां सुलुगिति तृतीयैकवचनलोपः । हतमिति विभक्तिव्यत्ययः । योनिसामान्याधिकरण्यात् । किंनामानं योनिं द्रोणे अत्रापि विभक्तिव्यत्ययः द्रोणकलशलक्षणं सधस्थं सहस्थानलक्षणं सोमानाम् ॥ २६ ॥

इति मन्त्रभाष्ये षड्विंशोऽध्यायः २६ ॥

(१) अत्र सार्धश्लोकद्वयं वाराणसी० पुस्तके ऽधिकमस्ति ।

क्षोहा रक्षांसि हन्तीति रक्षोहा दुष्टनाशकः। विश्वचर्षणिः विश्वं सर्वं जगत् चष्टे पश्यति विश्वचर्षणिः सर्वस्य शुभाशुभद्रष्टा यद्वा चर्षणिरिति मनुष्यनामसु पठितम् विश्वे सर्वे चर्षणयो मनुष्या ऋत्विग्यजमानलक्षणा यस्य कण्डनाहरणादिषु सः। तथा कीदृशं द्रोणम् अयः सुपां सुलुगिति तृतीयैकवचनलोपः अयसा लोहेन ह समुत्कीर्णम् घास्या कृत्वा तक्ष्णा सोमभाजनीकृतम् हतमिति विभक्तिव्यत्ययः। तथा सधस्थं सह सार्धं, तिष्ठन्ति सोमा यत्र स सहस्थः सुपि स्थ इति (पा० ३, २, ४, कप्रत्ययः। आतोलोप इति (पा० ६,४,६४) आलोपः सध मादस्थयोश्छन्दसीति (पा० ६,३,९६) सहस्य सधादेशः। असदत् पुषादीति (पा० ६, १, ५५) लुङि च्लेरङ् छन्दसि लुङ्लङ्लिट इति (पा० ३, ४, ६) लट्यर्थे लुङ्॥२६॥

श्रीमन्महीधरकृते वेददीपे मनोहरे।
अनुक्रमन्त्रकथनः षड्विंशोऽध्याय ईरितः॥ २६॥

सप्तविंशोऽध्यायः।

समा॑स्त्वाग्न ऋ॒तवो॑ वर्धयन्तु संवत्स॒रा ऋष॑यो॒ यानि॑ स॒त्या। सं दि॒व्येन॑ दीदिहि रोच॒नेन॒ विश्वा॒ आभा॑हि प्र॒दिश॒श्चत॑स्रः॥ १॥

(१) समास्त्वा। आग्निकोऽध्यायः। सामिधेन्यो नव त्रिष्टुभः आग्नेय्योऽग्निना दृष्टाः। प्राकृपीवोम्नाया ऋषिरग्निः कर्माङ्गभूतमग्निं स्तौति समाशब्दो मासवचनः संवत्सर इति शब्दोपादानसामर्थ्यात्। समाः मासाश्च त्वां हे अग्ने ऋतवश्च वर्द्धयन्तु। संवत्सराश्च ऋषयश्च सप्त ऋषयो मन्त्रद्रष्टारो वा प्राणा वा। यानि च सत्या सत्यानि आर्षाः मन्त्राः त्वां वर्द्धयन्त्वित्यनुवर्तते। त्वमप्येतैर्वर्द्धमानः। सन्दिव्येन दीदिहि रोचनेन। सन्दीदिहि संदीप्यस्व दिव्येन दिविभवेन रोचनेन दीप्त्या। किञ्च विश्वाः सर्वा आभाहि दीपय दिशः प्रदिशश्च चतस्रः आभाहि॥ १॥

अयमध्यायः पञ्चचितिकस्याग्नेः सम्बन्धी प्रजापतिदृष्टः। नव ऋचोऽग्निदेवत्यास्त्रिष्टुभोऽग्निना दृष्टाः इष्टकापशौ समिध्यमानस-मिद्धयोरन्तराले आसां विनियोगः। अग्निर्ऋषिः कर्माङ्गभूतमग्निं

(१) समास्त्वा। आग्निकोऽध्यायः अग्नये समिध्यमानायानुब्रूहीत्युक्ते पच्यमानाः सामिधेन्यो नवत्रिष्टुभः आग्नेय्योऽग्निना दृष्टाः प्राकृपीवोम्नाया ऋषिरग्निः कर्माङ्गभूतमग्निं स्तौति समाशब्दो मासवचनः संवत्सर इत्युपादानात्। अग्ने समाः ऋतवः संवत्सराः ऋषयो मन्त्रद्रष्टारः यानि सत्याःसत्यानि आर्षा मन्त्रः त्वां वर्द्धयन्तु। त्वमप्येतैर्वर्ध्यमानः दिव्येन दिविभवेन रोचनेन दीप्त्या संदीदिहि संदीप्यस्व विश्वाः सर्वाः चतस्रः प्रदिशः आभाहि दीपय॥ १॥

स्तौति । हे अग्ने । एते त्वा त्वां वर्धयन्तु । के । समा मासाः संवत्सरस्य पृथगुक्तेः समाशब्दो मासवाचकः । ऋतवो वसन्ताद्याः संवत्सराः तदधिष्ठातारः ऋषयो मन्त्रद्रष्टारः यानि सत्या सत्यानि सत्यरूपा मन्त्रा इत्यर्थः । त्वमप्येतैर्वर्धमानो दिव्येन दिवि भवेन रोचनेन दीप्त्या सन्दीदिहि सन्दीप्यस्व दिवेः श्लौ लुकि रूपम् तुजादीनां दीर्घोऽभ्यासस्येति (पा० ६, १, ७) अभ्यासदीर्घः । किञ्च विश्वाः सर्वाः प्रदिशो विदिशः चतस्रो दिशश्च आभाहि दीपय अन्तर्भूतो ण्यर्थः भा दीप्तौ ॥ १ ॥

सं चे॒ध्यस्वा॑ग्ने॒ प्र च॑ बोधयैनमु॒च्च ति॑ष्ठ मह॒ते सौभ॑गाय । मा च॑ रिषदुपस॒त्ता ते॑ अग्ने ब्र॒ह्माण॑स्ते य॒शसः॑ सन्तु॒ मान्ये ॥ २ ॥

(१) सं च । समिद्ध्यस्व च हे अग्ने । प्रबोधय च अवगतार्थञ्च एनं यजमानङ्कुरु । यथाग्निश्चेतव्य इति । उत्तिष्ठ च महते सौभगाय ऐश्वर्याय । किञ्च मा च रिषत् मा च वि-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । सं च । हे अग्ने समिध्यस्व च एनं यजमानं प्रबोधय च अवगतार्थं कुरु यथाग्निश्चेतव्य इति महते सौभाग्याय । ऐश्वर्याय उत्तिष्ठ च किञ्च ते तव उपसत्ता उपसदनस्य कर्ता यजमानः मा रिषत मा विनश्यतु च स ह्यग्निमुपसीदति हे अग्ने ते तव संबन्धिनो ब्रह्माणः ऋत्विग्यजमानाः यशसः यशस्विनः सन्तु मत्वर्थीयप्रत्ययलोपः । मान्ये यशस्विनः मा सन्तु त्वामग्ने हे अग्ने इमे ब्राह्मणा ऋत्विजः त्वा वृणुते वृण्वन्ति वृङ् संभक्तौ यागाय अत एव हे अग्ने संवरणैः ब्राह्मणैः सहैकस्मिन् वरणे सति नोऽस्माकं शिवः शान्तो भव नः सपत्नहा अभिमातिजिच्च भव अभिमातिशब्दोऽपि शत्रुवचनः अत एवं व्याख्या सपत्नानां हन्ता भव हतावशिष्टानां जेता भवेति किञ्च स्वे गये निजे गृहे जागृहि अप्रयुच्छन् अप्रमाद्यन् तद्गतमना इत्यर्थः युच्छ प्रमादे ॥ २ ॥

नश्यतु उपसदनस्य कर्ता यजमानः स ह्यग्निमुपसीदति । ते तव । हे अग्ने । किञ्च । ब्रह्माणस्ते ब्राह्मणाश्च ऋत्विग्यजमानाः तव सम्बन्धिनः । यशसः सन्तु । मत्वर्थीयलोपः यशस्विनः सन्तु । मा अन्ये यशस्विनः सन्तु अयजमाना अलङ्करिष्णवः ॥ २ ॥

व्यवहिताश्चेति पाणिन्युक्तेः (१, ४, ८२) उपसर्गक्रिययोर्व्यवधानम् हे अग्ने ! समिध्यस्व च दीप्यस्व व्यत्ययेन श्यन् एनं यजमानं प्रबोधय च ज्ञातार्थं कुरु अभिप्रेतव्य इति । महते सौभगाय ऐश्वर्याय उत्तिष्ठ च ऐश्वर्यं दातुमुद्यमं कुर्वित्यर्थः । किञ्च हे अग्ने ! ते तव उपसीदतीत्युपसत्ता तृच् सेवको मा रिषत् च मा नश्यतु च यजमानो ह्यग्निमुपसीदति । ते तव ब्रह्माणः ब्राह्मणा ऋत्विग्यजमानाः यशसः यशस्विनः सन्तु मत्वर्थीयप्रत्ययलोपः । मा अन्ये अन्ये अयज्वानो मा यशसः सन्तु ॥ २ ॥

त्वाम॑ग्ने वृणते ब्राह्म॒णा इ॒मे शि॒वो अ॑ग्ने सं॒वर॑णे भवानः । स॒प॒त्न॒हा नो॑ अभिमाति॒जिच्च॒ स्वे गये॑ जागृ॒ह्यप्र॑युच्छन् ॥ ३ ॥

त्वामग्ने । हे अग्ने त्वाम् इमे ब्राह्मणाः ऋत्विजः वृणते वृण्वन्ति यागाय । यत एवमतः प्रार्थयामः । शिवः शान्तः हे अग्ने संवरणे ब्राह्मणैः सह एकस्मिन्वरणे । भव नः अस्माकम् । त्वन्देवो वयश्च मत्या इत्यभिप्रायः । सपत्नहा नो अभिमातिजिच्च । सपत्नानां हन्ता च भवास्माकम् अभिमातिशब्दोऽपि शत्रुवचनः । अत एवं व्याख्यायते । शपत्नानां हन्ता भव हतावशिष्टानां जेता च भवेति । किञ्च । स्वे गये स्वकीये गृहे जागृहि अप्रयुच्छन् । युच्छी प्रमादे । अप्रमाद्यन् उद्गतमना इत्यर्थः ॥ ३ ॥

हे अग्ने ! इमे ब्राह्मणाः ऋत्विजः त्वा त्वां वृणते वृङ् सम्भक्तौ यागाय भजन्ति अतो हे अग्ने ! संवरणे ब्राह्मणैः सहैकस्मिन् वरणे

सति नोऽस्माकं शिवः शान्तो भव । अस्माकं सपत्नहा अभिमातिजिच्च भव अभिमातिरपि शत्रुः तत एवं व्याख्या सपत्नानां हन्ता भव हतावशिष्टानां जेता च भव । किञ्च स्वे गये निजे गृहे जागृहि सावधानो भव किं कुर्वन् अप्रयुच्छन् अप्रमाद्यन् ॥ ३ ॥

इहैवाग्ने अधिधारया रयिं मा त्वा निक्रन् पूर्वचितो निकारिणः । क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥ ४ ॥

(१) इहैव । इह एव कर्मणि वर्तमानानामस्माकम् हे अग्ने अधिधारय रयिम् उपरि निक्षिप्तधनम् । किञ्च । मा त्वां निक्रन्नीचैः कुर्वन्तु अवज्ञया पश्यन्तु । पूर्वचितः पूर्वं ये अग्निश्चितवन्तः । निकारिणः । ज्ञानकर्मसमुच्चयातिशयेन येऽन्योन्यजन्मानि । नीचैः कुर्वन्ति । किञ्च । क्षत्रम् । हे अग्ने सुयमं साधु यन्तृ अस्तु तुभ्यन्तव । किञ्च उपसत्ता यजमानः सद्युपसदनं करोत्यग्नेः वर्द्धतान्ते तव । अनिष्टृतः । स्तृ हिंसायाम् अनुपहिंसितः सन् ॥ ४ ॥

हे अग्ने ! इहैवास्मास्वेव यजमानेषु रयिं धनं त्वमधिधारय अधिकं देहि । किञ्च पूर्वं चिन्वन्ति पूर्वचितः पूर्वमग्निं चितवन्तोऽत एव निकारिणः नितरां यज्ञकरणशीलाः त्वा त्वां मा निक्रन् मा

- (१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । इहैव । इह एव कर्मणि वर्तमानानाम् अस्माकं हे अग्ने रयिं धनम् अधिधारय उपरि निक्षिप किञ्च पूर्वचितः पूर्वं ये अग्निं चितवन्तः निकारिणे ज्ञानकर्मसमुच्चयेन नितरांकरणशीलाः त्वा मा निक्रन् मा नीचैः कुर्वन्तु अवज्ञया पश्यन्तु किञ्च हे अग्ने क्षत्रं ते तुभ्यं तव सुयमं साधुयन्तृ अस्तु । ते तव उपसत्ता यजमानः अनिष्टृत स्तृ हिंसायाम् । अनुपहिंसितः सन् वर्द्धताम् ॥ ४ ॥

नीचैः कुर्वन्तु मावजानन्त्वित्यर्थः करोतेः शपि लुते लङि प्रथमबहुवचने रूपम्। किञ्च हे अग्ने! क्षत्रं क्षत्रजातिः तुभ्यं तव सुयमस्तु सुखेन यन्तुं शक्यं सुयमं सुखेन वशीकर्तुं शक्यमस्तु ईषद्दुःसुष्विति (पा ३, ३, १२६) सुपूर्वाद् यमेः खल्। किञ्च ते तव उपसत्ता उपसदनकर्त्ता यष्टा अनिष्टृतः अनुपहिंसितः सन् वर्धताम् धनपुत्रादिभिरेधताम् स्तृञ् हिंसायां निष्ठान्तः॥ ४॥

क्षत्रेणा॑ग्ने स्वायुः सꣳर॑भस्व मि॒त्रेणा॑ग्ने मित्र॒धेये॑ यतस्व। स॒जा॒ताना॑म्मध्यम॒स्था ए॑धि राज्ञा॑मग्ने विह॒व्यो॑ दीदिही॒ह॥ ५॥

(१) क्षत्रेणाग्ने। क्षत्रेण सम्पाद्यात्मानम् हे अग्ने। स्वायुः साध्वायुः सन् संरभस्व यज्ञं वोढुम्। मित्रेण च सम्पाद्यात्मानं मित्रधेये यतस्व। यथा मित्राणि धार्यन्ते तथा यत्नङ्कुरु। किञ्च। सजातानां समानजन्मनां मध्यमस्था एधि मध्यमस्थानो भव। यथा सजाता अपि यज्वानो भवन्ति तथा स्यादित्यभिप्रायः। किञ्च। राज्ञां हे अग्ने विहव्यः विविधमाह्वातव्यः दीदिहि दीप्यस्व इह यज्ञगृहे। यथा राजानोऽपि यज्वानो भवेयुः तथास्त्वित्यभिप्रायः॥ ५॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। क्षत्रेणाग्ने। हे अग्ने क्षत्रेणात्मानं संपाद्य स्वायुः। साध्वायुः सन् संरभस्व समारभस्व यज्ञं वोढुं मित्रेणात्मानं संपाद्य मित्रधेये मित्राधाने यतस्व यथा मित्राणि धार्यन्ते तथा प्रयत्नं कुरु। किञ्च सजातानां समानजन्मनां मध्यमस्थाः मध्यस्था एधि भव सर्वैः सजातैः सेवितः यथा सजाता अपि यज्वानो भवन्ति तथा स्यादिति भावः। हे अग्ने राज्ञां विहव्यः विविधमाह्वातव्यः सन् इह यज्ञगृहे दीदिहि दीप्यस्व यथा राजानोऽपि यज्वानो भवेयुस्तथास्त्वित्यर्थः॥ ५॥

हे अग्ने! त्वं क्षत्रेण संरभस्व समारभस्व ण्यन्तो बोध्यः क्षत्रेण समारम्भय यज्ञमिति शेषः क्षत्रियान् यज्ञं कारयेत्यर्थः। कीदृशस्त्वं स्वायुः शोभनमायुः जीवनं यस्य सः यद्वा आयुः उकारान्तो मनुष्यवाची शोभन आयुर्मनुष्यो यजमानो यस्य स स्वायुः। किञ्च हे अग्ने! मित्रेण सूर्य्येण सह वर्तमानः सन् मित्रधेये यतस्व धातुं धारयितुं योग्यं धेयं मित्रस्य यजमानस्य धेयं कार्य्यं यागलक्षणं तत्र यत्नं कुरु यजमानेन यज्ञं कारय। किञ्च सजातानां समानजन्मनां मध्यमस्थाः मध्यमे तिष्ठतीति क्विप् मध्यमस्थ एधि भव सजाता अपि यज्वानो भवान्त्वित्यर्थः। किञ्च हे अग्ने? इह यज्ञगृहे दीदिहि दीप्यस्व दीव्यतेर्व्यत्ययेन शपः श्लुः श्लाविति (पा० ६, १, १०) द्वित्वम् तुजादीनां दीर्घ इति (पा० ६, १, ७) अभ्यासदीर्घः। कीदृशस्त्वम् राज्ञां विहव्यः कर्तरि षष्ठी राजभिर्विविधं हूयते आहूयते विहव्यः राजभिर्यज्ञे आह्वातव्यः॥ ५॥

अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳसहवीराꣳरयिं दाः॥ ६॥

(१)अतिनिहः। अतिक्रम्य निहन्तॄन् निपूर्वस्य हन्तेर्डः प्रथमैकवचनस्य स्थाने द्वितीयाबहुवचनं वाक्यसम्बन्धात्। अतिस्रिधः। स्रेधतिः कुत्सितकर्मा। अतिक्रम्य च कुत्सिताच-

(१) अत्र वाराणसी० लि पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। अतिनिहः। निहः निहन्तॄन् अतिक्रम्य निपूर्वस्य हन्तेः डप्रत्ययः। प्रथमैकवचनस्थाने द्वितीयाबहुवचनं वाक्यसम्बन्धात्। स्रिधः स्रिधति कुत्सितकर्मा कुत्सिताचरणानतिक्रम्य अति अचितिरम्यमानस्कता तामतिक्रम्य अरातिरनुपजीव्यो जनः तं चातिक्रम्य हे अग्ने विश्वातिदुरितानि सहस्व हिः। अनर्थकः अभिभव अथानन्तरम् अस्मभ्यं सह वीरान् पुत्रान् रयिं धनं दाः दधाः॥ ६॥

रणात् । अत्यचित्तिम् अचित्तिरन्यमनस्कता । अतिक्रम्य चान्यमनस्कताम् अत्यरातिम् । अरातिरनुपजीव्यो जनः तथातिक्रम्य हे अग्ने । विश्वा ह्यग्ने दुरितानि सहस्व । विश्वानि दुरितानि सहस्व अभिभव हिरनर्थकः अथानन्तरम् अस्मभ्यं सहवीरां सपुत्रां रयिन्धनं दाः दद्याः ॥ ६ ॥

हे अग्ने हि निश्चितं विश्वा विश्वानि सर्वाणि दुरिता दुरितानि पापानि त्वं सहस्व अभिभव निवर्त्तयेत्यर्थः । किं कृत्वा निहः निहन्ति निहः निपूर्वाद्धन्तेर्डप्रत्ययः सुपां सुलुगिति शसः सु आदेशः निहान् हन्तॄन् अतिक्रम्य । स्रेधतिःकुत्सितकर्मा स्रेधन्ति स्रिधः क्विप् कुत्सिताचारान् अतिक्रम्य । अचित्तिमन्यमनस्कतामतिक्रम्य । न रातिर्दानं यस्य सोऽरातिस्तमदातारमतिक्रम्य । दुष्टान् सर्वानतिक्रम्य । पापं नाशयेत्यर्थः । किञ्च अथानन्तरं हे अग्ने अस्मभ्यं सहवीरां वीरैः पुत्रैः सहितां रयिं दाः देहि लुङ् ॥ ६ ॥

अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह । विश्वा आशाः प्रमुञ्चन् मानुषीर्भियः शिवेभिरद्य परिपाहि नो वृधे ॥ ७ ॥

(१)अनाधृष्यः । यस्त्वमनाधृष्यः । अशक्यः खलीकर्तुम् । जातवेदाः जातप्रज्ञानश्च अनिष्टृतः अनुपहिंसितश्च । स्तृणातेरेत-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रितपुस्तके नास्ति । तद्यथा । अनाधृष्यः । हे अग्ने त्वम् इह कर्मणि वर्तमानः विश्वा आशाः सर्वा दिशः प्रति दीदिहि दीप्यस्व किंभूतः अनाधृष्यः अशक्यः जातवेदाः जातप्रज्ञानः अनिष्टृतः अनुपहिंसितः स्तृणातेरूपम् । विराट् राजृ दीप्तौ विराजनशीलः क्षत्रं बिभर्त्तीति क्षत्रभृत् किञ्च मानुषीः मनुष्यसंबन्धिनीः भियः प्रमुञ्चन् जन्मजरामृत्युदैन्यशोकादिकाः विक्षिपन् शिवेभिः शान्तैः अर्चिभिः अद्य नोऽस्मान् परिपाहि किमर्थं वृधे वर्द्धनाय ॥ ७ ॥

द्रूपम्। विराट् च राजृ दीप्तौ। विराजनशीलः विराट् क्षेत्रभृच। तन्त्वां ब्रवीमि हे अग्ने दीदिहि दीप्यस्व इह कर्मणि वर्तमानः विश्वाः सर्वा आशा दिशः। किञ्च प्रमुचन्मानुषीर्भियः। विक्षिपन्मानुषानि भयानि जन्मजरामृत्युशोकदैन्यादीनि। शिवेभिः शिवैः शान्तैः आर्चिभिः अथास्मिन्यवि। परिपाहि नः सर्वतो गोपायास्मान्। किमर्थम् वृधे वर्द्धनाय ॥७॥

हे अग्ने! इह कर्मणि वर्त्तमानस्त्वं विश्वा आशाः दीदिहि सर्वाः दिशः प्रकाशय। कीदृशस्त्वम् अनाधृष्यः पराभवितुमशक्यः। जातवेदाः जातं वेदा धनं ज्ञानं वा यस्मात्। अनिष्टृतः न हिंसितः केनापि स्तृ हिंसायां क्तान्तः। विराट् विविधं राजमानः क्षत्रभृत् क्षत्रं बिभर्त्ति पुष्णाति। किञ्च मानुषीः मनुष्यसम्बन्धिनीर्भियः जन्मजरामृतिदैन्यशोकादिकाः प्रमुञ्चन्निवर्त्तयन् सन् शिवेभिः शिवैः शान्तैस्तैभिरद्य वृधे वृद्ध्यै नोऽस्मान् परिपाहि। वर्धनं वृत् तस्मै वृधे सम्पदादित्वाद्भावे क्विप् ॥ ७ ॥

बृहस्पते सवितर्बोधयैनꣳसꣳशितं चित् संतराꣳसꣳशिं शाधि। वर्धयैनं महते सौभगाय विश्व एनमनुमदन्तु देवाः ॥ ८ ॥

(१) बृहस्पते सवितः। हे बृहस्पते हे सवितः। बोधय कामेष्ववगतार्थं कुरु। एनं यजमानम् किञ्च। संशितञ्चित्। चिच्छ-

(१) अत्र वाराणसी० लि पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पु० नास्ति तद्यथा। बृहस्पते। हे बृहस्पते हे सवितः एनं यजमानं बोधय कामेष्ववगतार्थं कुरु संशितं चित् चिच्छन्दोऽप्यर्थे संशितव्रतमपि यजमानं संतरा अतितरा संशि शाधि शिक्षय एनं महते सौभाग्याय वर्द्धय विश्वेदेवा एनं यजमानम् अनुमदन्तु उत्साहयन्तु बृहस्पतिसवितृशब्दाभ्यामग्निरेवोच्यते सामिधेन्यङ्गभूतः अथवा वाक्यद्वयम् एकेन बृहस्पतिरुक्तः। एकेन सविता ॥८॥

न्द्रोऽप्यर्थे संशितव्रतमपि यजमानम् सन्तरामतितराम् संशि शाधि शिक्षय । वर्द्धय च एनं यजमानम् महते सौभगाय ऐश्वर्याय । विश्वे च देवा एनं यजमानम् अनुमदन्तु । उत्साहयन्तु । बृहस्पतिशब्देन सवितृशब्देन चात्राग्निरेवोच्यते । अथवा वाक्यद्वयम् एकेन बृहस्पतिरुक्तः अपरेण सविता ॥८॥

हे बृहस्पते ! हे सवितः ! एनं यजमानं बोधय कर्मभिज्ञं कुरु किञ्च चिदप्यर्थे संशितं चित् संशितं शिक्षितमपि संतरामतितरां संशि शाधि शिक्षय शासेः शपः श्लौ द्वित्वम् छान्दसमभ्यासस्येत्वम् । किञ्च महते सौभगाय ऐश्वर्याय एनं वर्धय । विश्वे देवाः एनं यजमानमनुमदन्तु तृप्ता हृष्टा वा भवन्तु । बृहस्पतिसवितृशब्दाभ्यां सामिधेन्यङ्गभूतोऽग्निरेवोच्यते वाक्यद्वयं वा एकेन बृहस्पतिरुक्तोऽन्येन सविता ॥ ८ ॥

अमुत्र भूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्माद् देवानामग्ने भिषजा शचीभिः ॥ ९ ॥

(१)अमुत्र भूयात् । अमुत्रामुष्मिँल्लोके यत् शारीरम्भूयात् । अध अथ यत् यमस्य सदने च शारीरं भूयात् । तस्मात् च हे

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अमुत्र भूयात् । अमुत्र अमुष्मिन् लोके भवनम् अमुत्र भूयं भुवो भावे इति क्यप्प्रत्ययः तस्मात् परलोकगमनान्मरणादित्यर्थः अमुञ्चः विमुञ्च मरणाद्रक्षेत्यर्थः । यत् भयं तस्मादपि विमुञ्च अध अथ यत् यमस्य सदने यमलोके अभिशस्तेः अभिशंसनादपि अमुञ्चः विमुञ्च लकारव्यत्ययः किञ्च हे अग्ने देवानां भिषजौ अश्विनौ अस्मान् यजमानान् शचीभिः कर्मभिः मृत्युं प्रत्यौहतां प्रतिप्रेरयताम् अन्यत्र नयताम् अत्रापि बृहस्पतिरग्निरेव सामिधेनी प्रकरणस्याग्नेयत्वात् ॥ ९ ॥

बृहस्पते । अभिशस्तेः अभिशंसनाच्च अमुञ्चः । किञ्च प्रत्यौहतां प्रतिप्रेरयताम् अन्यत्र नयताम् अश्विनौ मृत्युम् अस्माद्यजमानात् कथंभूतावश्विनौ । देवानां भिषजौ हे अग्ने शचीभिः। अत्रापि बृहस्पतिशब्द आमन्त्रितोऽग्निशब्दस्य द्रष्टव्यः सामिधेनी प्रकरणस्याग्नेयत्वात् । ननु बृहस्पतिशब्दो नैघण्टुको नचाग्निशब्दे इति ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत् तेनाग्न्यो यत्प्रजापतिꣳ समैधत तेन प्राजापत्या इति श्रुतेः प्रजापतेः सर्वदेवात्मकत्वात् । तस्मादेनं प्रजापतिꣳ सन्तमग्निरित्याचक्षते इति श्रुतेरदोषः ॥ ९ ॥

हे बृहस्पते ! त्वममुत्र भूयादमुञ्चः अमुत्र परलोके भवनममुत्रभूयम् भुवो भाव इति (पा० ३, १. १०७) क्यप् परलोकगमनान्मरणात् मुञ्च मरणाद्रक्षेत्यर्थः लकारव्यत्ययः। अथ अथ यत् यमस्य भयं परलोकभयं नरकपातादि तस्मादपि मुञ्च । किञ्च अभिशस्तेःअभिशापादपि लोकापवादादपि मुञ्च । देवानां भिषजा भिषजौ अश्विना अश्विनौ अस्मात् यजमानात् मृत्युं प्रत्यौहतां निवर्त्तयतां कैः शचीभिः कर्मभिः कृत्वा । अत्र बृहस्पतिरग्निरेव सामिधेनीप्रकरणस्याग्नेयत्वात् ॥ ९ ॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥ १० ॥

उद्वयमिति व्याख्यातम् ॥ १० ॥

व्याख्याता (२०,२१) ॥ १० ॥

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ११ ॥

(१)ऊर्ध्वा अस्य । द्वादश आप्रियः प्रयाजदेवताः उष्णिहः

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित

अष्टम्याद्ये द्वे गायत्र्यौ । ता विषमा विषमाक्षरपादा इत्यादिश्रुतेः । ता आग्नेय्यः प्राजापत्याः । यदग्निरपश्यत्तेनाग्नेय्यः यत्प्रजापतिमप्रीणात्तेन प्राजापत्या इति च श्रुतिः । अग्निर्ऋषिः । प्रजापतिश्चाग्निरूपेण संस्तूयते ॥ अस्याग्नेः । प्रजापतिरूपेण संस्तूयमानस्य ऊर्ध्वाः प्रगुणाः देवमार्गेण यायिन्यः समिधो भवन्ति । ऊर्ध्वा शुक्रा । ऊर्ध्वानि च शुक्रा शुक्रानि शोचींष्यर्चींषि भवन्ति । द्युमत्तमा दीप्तमत्तमा च वीर्यवत्तमानि चेत्यर्थः । सुप्रतीकस्य सुमुखस्य यजमानस्य । सूनोः । स ह्येनञ्जनयति । य इत्थम्भूतोऽग्निस्तं वयं स्तुम इति वाक्यशेषः ॥ ११ ॥

द्वादशाप्रीदेवत्या उष्णिहो विषमपादा आग्नेय्योऽग्निना दृष्टाः । अग्निः प्रजापतित्वेन स्तूयते तेन प्राजापत्या अपि । ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिमप्रीणात्तेन प्राजापत्या इति श्रुतेः । अस्याग्नेः समिधः ऊर्ध्वाः देवगामिन्यो भवन्ति शोचींषि तेजांस्यपि ऊर्ध्वा ऊर्ध्वानि भवन्ति । कीदृशानि शोचींषि शुक्रा शुक्राणि शुद्धा शुद्धानि । द्युमत्तमा द्यौः दीप्तिः प्रकाशो येषां तानि द्युमन्ति अत्यन्तं द्युमन्ति द्युमत्तमानि विश्वप्रकाशकानि । कीदृशस्याग्नेः सुप्रतीकस्य सुष्ठु प्रतीकं मुखं यस्य । तथा सूनोः

पु० नास्ति । तद्यथा । ऊर्ध्वा । अस्य द्वादश आप्रियः प्रयाज देवताः उष्णिहः अष्टम्याद्ये द्वे गायत्र्यौ ता विषमपदा इत्यादिश्रुतिः । ता आग्नेय्यः प्राजापत्याः यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिमप्रीणात्तेन प्राजापत्या इति श्रुतिः । अग्निर्ऋषिः प्रजापतिश्चाग्निरूपेण स्तूयते अस्याग्नेः प्रजापतिरूपेण स्तूयमानसमिधः ऊर्ध्वाः प्रगुणा देवमार्गयायिन्यो भवन्ति द्युमत्तमा दीप्तिमत्तमानि शुक्रा शुक्लानि शोचींषि अर्चींषि ऊर्ध्वानि भवन्ति किंभूतस्यास्य सुप्रतीकस्य कल्याणमुखस्य यजमानस्य सूनोः । यदेनं जनयति तेनास्यैष सूनुः य ईदृशस्तं स्तुम इति शेष ॥ ११ ॥

यजमानपुत्रस्य स यदेनं जनयति तेनास्यैष सूनुरिति श्रुतेः । य ईदृशस्तं स्तुम इति शेषः ॥ ११ ॥

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥ १२ ॥

(१)तनूनपात् । आज्यस्य अग्नेर्वा यः तनूनाङ्क्त्वा नपात् आज्याभिप्रायमेतदुच्यते । अथवा योऽग्निःतनूनामपां नपात् पौत्रः । असुरः असुमान् प्राणवान् रो मत्वर्थीयः । यद्वा असुरः वसुरः धनवान् अस्मिन्पक्षे आदिलोपः । विश्ववेदाः । सर्वधनः सर्वज्ञो वा । देवो दानादिगुणयुक्तः । देवेष्वपि देवः दीप्तिमान् । य ईदृशः सः पथः यज्ञमार्गान् अनक्तु । मध्वा मधुस्वादुना घृतेन । इत्थन्नामप्रभूतं यज्ञे घृतमस्तु येन मार्गा अभ्यक्ताः स्युरित्यभिप्रायः ॥१२ ॥

देवोऽग्निः मध्वा मधुना मधुरेण घृतेन पथो यज्ञमार्गाननक्तु । मध्वेति नुमभावः अतित्यमागमशासनमित्युक्तेः । पथोऽनक्तु इत्यत्र प्रकृत्यान्तः पादमव्यपरे इति (पा० ६, १, ११५) सन्ध्यभावः यज्ञे बहु घृतमस्तु येन मार्गा घृताभ्यक्ताः स्युरिति भावः । कीदृशो देवः तनूनपात् तनूनामपां नपात् पौत्रः अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरिति अपां पौत्रः । असुरः असवोऽस्य सन्ति प्राणवान् रो मत्वर्थः । विश्ववेदाः सर्वधनः । देवेषु अपि देवः दीप्तिमान् श्रेष्ठः ॥ १२ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । तनूनपादसुरः । तनूनाम् अपां नपात् पौत्रः अग्निः अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरित्यभिप्रायेणाग्नेः पौत्रत्वम् असुरः प्राणवान् रो मत्वर्थे यद्वासुरः धनवान् अस्मिन् पक्षे आद्यलोपः विश्ववेदाः सर्वधनः सर्वयज्ञो वा देवो दानादिगुणयुक्तः देवेष्वपि देवः दीप्तिमान् ईदृशः सः मध्वा साधुना घृतेन पथः यज्ञमार्गान् अनक्तु यज्ञेऽतिप्रभूतं घृतमस्तु येन मार्गा आज्याभ्यक्ताः स्युरिति भावः ॥ १२ ॥

मध्वा यज्ञं नक्षसे प्रीणानो नराशᳬंसोअग्ने । सुकृद्देवः सविता विश्ववारः ॥ १३ ॥

(१) मध्वा यज्ञम् । हे अग्ने यस्त्वं मध्वा मधुस्वादुना घृतेन यज्ञं नक्षसे व्याप्नोषि । नक्षतिर्व्याप्तिकर्मा । कथंभूतः । प्रीणानः देवान् । नराशंसश्च । नरैर्ऋत्विग्भिर्यः शंस्यते स्तूयते स तथोक्तः । सुकृच्च साधुकृच्च । देवः सविता । विश्ववारः सर्वस्य वरणीयश्च भवसि । तं त्वां स्तुम इति शेषः ॥ १३ ॥

हे अग्ने ! त्वं मध्वा स्वादुना घृतेन यज्ञे नक्षसे व्याप्नोषि नक्षतिर्व्याप्तिकर्मा । कीदृशस्त्वम् प्रीणानः प्रीणीते प्रीणानः देवान् तर्पयन् । नराशंसः नरैर्ऋत्विग्भिराशस्यते स्तूयते नराशंसः । सुकृत् शोभनकारी । देवः दीप्तिमान् । सविता विश्वस्योत्पादकः । विश्वेन व्रियते सेव्यते विश्ववारः विश्वं वृणोति अङ्गीकरोतीति वा कर्मण्यण्, सर्वस्य वरणीयः सर्वाङ्गीकर्त्ता वा ॥ १३ ॥

अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्निᳬ स्रुचो अध्वरेषु प्रयत्सु ॥ १४ ॥

(२) अच्छायम् । अच्छाभेराप्तुमिति शाकपूणिः अच्छ एति

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । मध्वा यज्ञम् । हे अग्ने त्वं मध्वा स्वादुना घृतेन यज्ञं नक्षसे व्याप्नोषि । नक्षतिर्व्याप्तिकर्मा किं त्वं प्रीणानः देवान् नराशंसः नरैर्ऋत्विग्भिः शंस्यते स्तूयते इति नराशंसः । सुकृत् साधुकृत् देवो दीप्तिमान् सविता विश्वस्य विश्ववारः सर्वस्य वरणीयः ॥ १३ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । अच्छायम् । अयम् अध्वर्युःशवसा ज्ञानयलयुतः इडानः स्तुवन् वह्निर्वोढा घृतेन नमसा अन्नेन हविर्लक्षणेन अभ्युद्यतेन स्रुचो गृहीत्वा अध्वरेषु प्रयत्सु वर्तमानेषु अग्निम् अच्छ । एति अभ्येति ॥ १४ ॥

अभ्येति। अग्निम् अयमध्वर्युः। शवसा स्वकीयेन प्रज्ञानबलेन युक्तः। घृतेन च गृहीतेन इडानः स्तुवन्। वन्हिर्वोढा। नमसा चान्नेन हविर्लक्षणेनाभ्युद्यतेन स्रुचः बाहुभ्यां गृहीत्वा। अध्वरेषु प्रयत्सु यज्ञेषु वर्तमानेषु॥ १४॥

अयमध्वर्युः अध्वरेषु प्रयत्सु वर्त्तमानेषु सत्सु अग्निमच्छ एति अभ्येति अच्छाभेराप्तुमिति शाकपूणिः (निरु० ५; २८)। कीदृशः शवसा ज्ञानबलेन ईडानः इड स्तुतौ शानच् तथा वह्निः वहति यज्ञभारमिति वह्निः यज्ञनिर्वाहकः। किं कृत्वा घृतेन नमसा अन्नेन हविर्लक्षणेनोपलक्षिताः स्रुचो जुह्वाद्या गृहीत्वेति शेषः॥ १४॥

स यक्षदस्य महिमानमग्नेः स ईं मन्द्रा सुप्रयसः। वसुश्चेतिष्ठो वसुधातमश्च॥ १५॥

(१) स यक्षत्। स एवाध्वर्युः यक्षत्। यजतु। अस्याग्नेः सम्बन्धिमहिमानं महाभाग्यम्। स ईम् स एव च मन्द्रा मदनीयान्यन्नानि यजतु। कथंभूतस्याग्नेः सुप्रयसः। प्रय इत्यन्ननाम शोभनानि प्रयांस्यन्नानि हविर्लक्षणानि यस्य स सुप्रयाः तस्य सुप्रयसः। अथ कस्मादन्यदेवताः परित्यज्याग्नेर्महिमानं यक्षदित्युच्यत इति चेत् अत आह वसुश्चेतिष्ठो वसुधातमश्च। यतोऽसौ वसु वासयिता चेतिष्ठोऽतिशयेन चेतयिता। कृताकृतगुणविशेषः वसूनां धनानां दातृतमश्च अतः अग्निस्तूयते॥ १५॥

सोऽध्वर्युरस्याग्नेः महिमानं यक्षत् यजतु सिब्बहुलं लेटि (पा० ३, १, ३४) लेटोऽडाटौ इतश्च लोपः परस्मैपदेष्विति (पा० ३, ४, ९४, ९७) सुवैयक्षदिति रूपम्। सः ईम् स च मन्द्रा मन्द्राणि मदजनकानि हवींषि च यजतु ददातु। कीदृशस्याग्नेः सुप्रयसः

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति। तद्यथा। यक्षत्। स अध्वर्युः अस्याग्नेर्महिमानं भाग्यं यक्षत् यजतु स ईम् एव मन्द्रा मदनीयान्यन्नानि यजतु किम्भूतस्याग्नेः सु-

प्रयस् इत्यन्ननाम (निघ० २, ७, ५) शोभनानि प्रयांसि यस्य सुप्रयास्तस्य । कीदृशस्याग्नेर्महिमानं यजतु यो वसुः वासयिता । चेतिष्ठः अतिचेतयिता वसुधातमः वसूनां धनानां दातृतमः किवन्तास्तमप् ॥ १५ ॥

द्वारो॑ दे॒वीरन्व॑स्य॒ विश्वे॑ व्र॒ता द॑दन्ते अ॒ग्नेः । उ॒रु॒व्यच॑सो॒ धाम्ना॒ पत्य॑मानाः ॥ १६ ॥

(१) द्वारो देवीः । अस्याग्नेः प्रथमम् द्वारः देव्यः व्रता व्रतानि कर्माणि ददन्ते धारयन्ति । ताभ्यः अनु पश्चात् । विश्वे विश्वेदेवाः देवशब्दलोपः । व्यवहितपदप्रायोऽर्द्धर्चः । कथम्भूता द्वारः । उरुव्यचसः बहुव्यञ्जनाः । धाम्ना स्थानेन ऋत्विक्सम्बन्धिना पत्यमानाः । पत ऐश्वर्ये ऐश्वर्यं कुर्वाणाः । या इत्थम्भूता यज्ञगृहद्वारस्ता वयं स्तुम इति शेषः ॥ १६ ॥

द्वारो देव्योऽस्याग्नेर्व्रता व्रतानि कर्माणि ददन्ते धारयन्ति दद दाने धृतौ च । अनु पश्चात् विश्वे सर्वे देवा अग्निव्रतानि ददन्ते । कीदृश्यो द्वारः उरुव्यचसः उरु विशालं व्यचोऽवकाशो यासां ताः विशालान्तराः । तथा धाम्ना स्थानेन पत्यमानाः पत ऐश्वर्ये

प्रयसः प्रय इत्यन्ननाम शोभनानि प्रयांसि यस्य स सुप्रयाः तस्य । ननु कुतोऽन्यदेवान् परित्यज्याग्नेर्महिमानं यजत्वित्युच्यते इत्यत आह । सुरिति यतोऽसौ वसुः वासयिता ता चेतिष्ठः अतिशयेन चेतयिता । कृतगुणविशेषः । च पुनः वसुधातमः वसूनां धनानां दातृतमः ॥ १५ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । द्वारो देवी । द्वारो देव्यः अस्य अग्नेः व्रता व्रतानि कर्माणि प्रथमं ददन्ते धारयन्ति ताभ्यः अनु पश्चात् विश्वदेवा ददन्तेः देवशब्दलोपः । ददङ् दाने धृतौ च किंभूता द्वारः । उरुव्यचसः बहुव्यञ्जनाः धाम्ना स्थानेन ऋत्विक्संबन्धिना पत्यमानाः ऐश्वर्यं कुर्वाणाः पत ऐश्वर्ये । दिवादिरात्मनेपदी या ईदृश्यस्ताः स्तुम इति शेषः ॥ १६ ॥

दिवादिरात्मेनपदी पत्यन्ते ईशते ताः पत्यमानाः स्थानैरैदवर्यं कुर्वाणाः ऋत्विजां स्थानानि ददाना इत्यर्थः ताः स्तुमः ॥ १६ ॥

ते अस्य योषणे दिव्ये न योनौ उपासानक्ता । इमं यज्ञमवतामध्वरं नः ॥ १७ ॥

(१)ते अस्य । ते उपासा नक्ता उषाश्च नक्ता च रात्रिः । अस्याग्नेः योना योनौ आहवनीयाख्ये स्थितस्य योषणे भार्ये । दिव्ये दिविभवे नकारोऽनर्थकः । ते इमं यज्ञम् अवतां सुगुप्तं कुरुताम् । अध्वरं सोमश्च नोऽस्माकम् संपादयतामिति शेषः ॥ १७॥

उषाश्च नक्ता रात्रिश्च उषासानक्ता उषस उषासादेशो द्वन्द्वे ते प्रसिद्धे उषासानक्ता अहोरात्रिदेव्यौ नोऽस्माकमिमं यज्ञमवतां रक्षताम् । कीदृश्यौ ते अस्याग्नेः योषणे भार्ये । तथा दिव्ये दिवि भवे स्वर्गस्थे । कीदृशस्याग्नेः योनौ गार्हपत्यस्थाने स्थितस्येति शेषः नकारः पादपूरणः । कीदृशं यज्ञम अध्वरम् ध्वृ कौटिल्ये न ध्वरतीत्यध्वरस्तम् अकुटिलम् शास्त्रोक्तमित्यर्थः ॥ १७ ॥

दैव्या होतारा ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वामभिगृणीतम् । कृणुतं नः स्विष्टिम् ॥ १८ ॥

(२) दैव्यो होतारा । अयश्चाग्निरसौ च मध्यमः हे दैव्यौ

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । ते अस्य । ते उपासा नक्ता रात्रिः योनौ आहवनीयाख्ये स्थाने स्थितस्याग्नेर्दिव्ये दिवि भवे योषणे भार्ये नकारोऽनर्थकः ते इमं यज्ञम् अवतां गुप्तं कुरुतां नोऽस्माकमध्वरं सोमं संपादयतामिति शेषः ॥ १७ ॥

(२) दैव्या होतारा । अयं चाग्निरसौ च मध्यमः । हे दैव्यौ होतारौ नोऽस्माकमध्वरम् ऊर्ध्वं कृणुतं यज्ञं देवमार्गयायिनं कुरुतम् । अग्नेर्जिह्वा अभिगृणीतम् अग्निमुखं साधु वर्णयतम् नः स्विष्टिं साधु यजनं च कुरुतम् ॥ १८ ॥

होतारौ । ऊर्ध्वमध्वरं नः कुरुतम् देवयानयायिनं कुरुतमित्यभिप्रायः । अग्नेर्जिह्वामभिगृणीतम् अग्निमुखं साधु वर्णयतमित्यर्थः कृणुतं कुरुतञ्च नः अस्माकं स्विष्टिम् । साधुयजनम् ॥ १८ ॥

अयं चाग्निरसौ च मध्यमो वायुः हे दैव्या होतारौ अग्निवायू ! युवां नोऽस्माकं स्विष्टिं शोभनं यजनं कृणुतं कुरुतम् । किञ्च नोऽस्माकमध्वरं यज्ञमूर्ध्वं कृणुतं देवमार्गगामिनं कुरुतम् । अग्नेर्जिह्वां ज्वालामभिगृणीतं वर्णयतम् समीची वह्निज्वालेति स्तुतमित्यर्थः॥१८॥

तिस्रो देवीर्बर्हिरेदᳬ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥ १९ ॥

(१) तिस्रो देवीः । तिस्रः देव्यः । बर्हिः आ इदं सदन्तु । आसदन्तु आसीदन्तु इदं बर्हिः । कतमास्ताः । इडा पृथिवीस्थाना सरस्वती च मध्यस्थाना । मही स्तुवन्तीति । प्रत्येकन्तिसृभिरपि योज्यम् यद्वा एकमेव वाक्यम् । तिस्रो देव्यो बर्हिरिदमासदन्तु इडा शरस्वती भारत्यो महत्यो गृणाना इति॥१९॥

तिस्रो देव्यः इदं बर्हिरासदन्तु आसीदन्तु छान्दसः सीदादेशाभावः व्यवहिताश्चेति (पा० १, ४, ८२) आङा सह क्रियापदव्यवधानम् । कास्ता अत आह इडा पृथिवीस्थाना सरस्वती मध्यस्थाना सरस्वती भारती द्युस्थाना । मही महती गृणाना स्तुवन्तीति विशेषणद्वयं तिसृणाम् ॥ १९ ॥

तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् । राय-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । तिस्रो देवीः । तिस्रो देव्यः इदं बर्हि आसदन्तु आसीदन्तु । कास्ताः इडा पृथिवीस्थाना सरस्वती मध्यस्थाना भारती द्युस्थाना मही महती गृणाना स्तुवन्तीति विशेषणद्वयं तिसृणामपि योज्यम् ॥ १९ ॥

स्पोषं विष्यंतु नाभिंमस्मे ॥ २० ॥

(१) तन्नः। तत् रायस्पोषम् नः अस्मभ्यमस्मदर्थम्। तुरीपम् तूर्णमश्नुते। तूर्णश्चाप्नोति। अद्भुतं महत् अभूतपूर्वम्। पुरुक्षु पुरुषु बहुषु यत्क्षियति निवसति तत्पुरुक्षु त्वष्टा देवः सुवीर्यं साधुवीर्यम्। रायस्पोषविशेषणान्येतानि चत्वारि पदानि। विष्यतु। स्यतिरुपसृष्टो विमोचने विमुञ्चतु। नाभिमस्मे राष्ट्रमध्यम् प्रत्यस्मासु ॥ २० ॥

त्वष्टा देवः तं प्रसिद्धं रायो धनस्य पोषं पुष्टिमस्मे अस्माकं नाभिं प्रति विष्यतु विमुञ्चतु नाभौ मुक्तमुत्सङ्गे पततीति भावः षोऽन्तकर्मणि ओतः श्यनीति (पा० ७, ३, ७१) ओकारलोपः स्यतिरूपसृष्टो विमोचने इति यास्कः। कीदृशं रायः पोषम् नोऽस्माकं तुरीपम् तुरा वेगेन आप्नोति तुरीपं शीघ्रप्रापकम्। अद्भुतं महान्तम्। पुरुक्षु पुरुषु बहुषु क्षियति निवसति पुरुक्षु सुपां सुलुगिति (पा० ७, १, ३९) अमो लुक् क्षियतेरौणादिको डुप्रत्ययः। सुवीर्यं साधुवीर्यं सामर्थ्यं यं न तम्। ईदृशं धनं देहीत्यर्थः ॥ २० ॥

वनस्पतेऽवसृजा ररांणस्त्मना देवेषु। अग्निर्हव्यं शमिता सूदयाति ॥ २१ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा। तन्नः त्वष्टा देवः तं रायस्पोषम् अस्मे अस्मासु नाभि प्रति विष्यन्तु विमुञ्चन्तु स्यतिरुपसृष्टो विमोचने नाभिं प्रतियन्मुच्यते तदुत्संगे निपततीति भावः किंरायस्पोषं नोऽस्मभ्यं तुरीपं तूर्णमश्नुते आप्नोतीति तुरीपम् अद्भुतं महान्तम् अभूतपूर्वं पुरुक्षु पुरुषु क्षियतीति पुरुक्षु विभक्तिलोपः सुवीर्यं साधुवीर्यं यद्वा यवसंघातः प्रार्थ्यते त्वष्टा नोऽस्मदर्थं तं जलौघं तुरीपं तूर्णव्यापकम् अद्भुतं महत्त्वात् पुरुक्षु बहूनां निवासभूतं बहुगर्जितशब्दं वा सुवीर्यं रायस्पोषं हेतुभूतं नाभिं राष्ट्रमध्यं प्रति अस्मासु मुञ्चतु ॥ २० ॥

(१) वनस्पतेऽव । हे वनस्पते अवसृज । स्रुङ्मुखतोऽवाचीनं निक्षिप हवींषि रराणः । यद्वा रा दाने ददानः । त्मना मन्त्रेष्वाङ्यादेरात्मन इत्याकारलोपः देवेषु विषयभूतेषु । कस्मात्त्वमेवमुच्यसेऽस्माभिरित्यत आह । यतः अग्निः शमिता शामित्रमिति तद्धितलोपः । हव्यं हविर्जातम् सूदयाति षूद क्षरणे संस्करोति । अतो हे वनस्पते अवसृजेति संबन्धः ॥ २१ ॥

अग्निः शमिता हव्यं सूदयाति सूदयति संस्करोति यतः अतो हे वनस्पते ! तत्संस्कृतं हव्यमवसृज स्रुङ्मुखतोऽवाचीनां क्षिप । कीदृशस्त्वम् त्मना आत्मना देवेषु रराणः हविर्ददानः रा दाने कानच् । मन्त्रेष्वाङ्यादेरात्मन इति (पा० ६, ४, १४१) आलोपः॥२१॥

अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् ।
विश्वे देवा हविरिदं जुषन्ताम् ॥ २२ ॥ ॥

(२) अग्ने स्वाहा । हे जातवेदः स्वाहा कृणुहि स्वाहाकृतिं यज इन्द्राय । हव्यं हविः प्रयच्छेति शेषः । विश्वे देवाश्च इदं हविः जुषन्तां सेवन्ताम् ॥ २२ ॥

हे अग्ने ! हे जातवेदः जातप्रज्ञान ! हव्यमिन्द्राय स्वाहा कृणुहि

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । वनस्पते । हे वनस्पते अवसृज स्रुग्मुखतोऽवाचीनं हविः क्षिप किंभूतः त्मना देवेषु रराणः रममाणः यद्वा रा दाने ददानः त्मनेति मन्त्रेष्वाङ्यादेरात्मनः इति आकारलोपः यतोऽग्निः शमिता शामित्रमिति तद्धितलोपः हव्यं सूदयाति संस्करोति षूद क्षरणे ॥ २१ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । अग्ने स्वाहा । हे अग्ने हे जातवेदः इन्द्राय हव्यं स्वाहा कृणुहि स्वाहाकारेण प्रयच्छ विश्वे देवाश्च इदं हविर्जुषताम् ॥ २२ ॥

स्वाहाकारेण मयच्छ । किञ्च विश्वे देवा इदं हविर्जुषन्तां सेचन्ताम् ॥ २२ ॥

पीवो अन्ना रयिवृधः सुमेधा श्वेतः सिंषक्ति नियुतामभिश्रीः । ते वायवे समनसो वितस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ २३ ॥

अथैतं वायवे नियुत्वते शुक्लन्तूपरमालभत इत्यस्य पशोः पीवो अन्नारयिवृधः इत्याद्याः षड्याज्यानुवाक्यास्त्रिष्टुभो वायव्याः । तत्र च प्राजापत्यः पशुपुरोडाश इति पठ्यते । तस्य आपो ह यत् द्वे प्राजापत्ये । यान् नियुतः अश्वान् । पीवो अन्नान् पीवः पुष्टमन्नं येषामिति पीवोअन्नान् रयिन्धनं ये वर्द्धयन्ति ते रयिवृधः सुमेधाः कल्याणप्रज्ञानो वायुः । श्वेतः वायोर्वर्णवचनम् शुक्लो हि वायुरिति श्रुतिः । सिषक्ति सेचति । नियुता-

---

(७) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । अथैतं वायवे नियुत्वते शुक्लं तूपरमालभते । इत्यस्य पशोः पीवो अन्ना रयिवृध इत्याद्याः षड्याज्यानुवाक्याः त्रिष्टुभो वायव्यः तत्र च प्राजापत्यः पशुपुरोडाश इति पठ्यते तस्य आपो ह यत् इति द्वे प्राजापत्ये श्वेतो वायुः शुक्लो हि वायुरिति श्रुतिः । यान् नियुतोऽश्वान् सिषक्ति सेवते ते नियुतः वायवेऽर्थाय समनसः समनस्काः सन्तो वितस्थुः किंभूतान् नियुतः । पीवो अन्नापीवः पुष्टम् अन्नं येषां ते पीवो अन्नाः तान् । नकारलोपः । प्रकृत्यान्तः इति पीवो अन्नानित्यत्र प्रकृतिभावः । रयिवृधः रयिं धनं वर्द्धयन्ति तान् । किं भूतः श्वेतः सुमेधाः कल्याणप्रज्ञानः नियुताम् अश्वानाम् । अभिश्रीः अभ्याश्रयणीयः । अथैवं वाय्वश्वयोगे नरः मनुष्या ऋत्विजः विश्वा विश्वानि इत् पादपूरणः । स्वपत्यानि शोभनानामपत्यानां कर्माणि चक्रुः कुर्वन्ति । एतदुक्तं भवति वाय्वश्वयोर्योगे सति सर्वमिदं यज्ञादि वर्तत इति ॥ २३ ॥

मभिश्रीः नियुतामभ्याश्रयणीयः अथ यान्वायुः सिषक्ति ते नियुतोऽश्वा वायवेऽर्थाय । समनसः समनस्कास्सन्तः वितस्थुः तान् विश्वानि इत् पादपूरणे नरः मनुष्या ऋत्विग्यजमानाः स्वपत्यानि शोभनानामपत्यानां यानि कर्माणि तानि चक्रुः कुर्वन्ति । एतदुक्तं भवति । वाय्वश्वसंयोगे सति सर्वमिदं यज्ञादि प्रवर्तते इति ॥ २३ ॥

अथैतं वायवे नियुत्वते शुक्लं तूपरमालभते इति हुतस्य पशोः पीवो अन्ना रयिवृध इत्याद्याः षट् याज्यानुवाक्याः । द्वे वायुदेवत्ये त्रिष्टुभौ वसिष्ठदृष्टे । शुक्लो हि वायुरिति श्रुतेः श्वेतो वायुः यान्नियुतोऽश्वान् सिषक्ति सेवते ते नियुतः समनसः समनस्काः सन्तो वायवेऽर्थाय वितस्थुर्विशेषेण तिष्ठन्ति । कीदृशान्नियुतः पीवो अन्ना पीवः पुष्टमन्नं येषां तान् नकारलोपः प्रकृत्यान्तः पादमिति (पा० ६, १, ११५) पीवो अन्नानित्यत्र सन्ध्यभावः । तथा रयिवृधः रयिं धनं वर्धयन्ति तान् । कीदृशः श्वेतः सुमेधा शोभना मेधा बुद्धिर्यस्य । नियुतामभिश्रीः अश्वानामाश्रयणीयः । एवमश्वयोगे वायुना कृते नरो मनुष्या ऋत्विजः विश्वा इत् विश्वानि सर्वाण्येव स्वपत्यानि शोभनापत्यप्रापकानि चक्रुः कर्माणीति शेषः ॥ २३ ॥

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणां धाति देवम् । अधं वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥ २४ ॥

(१) राये नु । राये धनाय उदकलक्षणाय नु क्षिप्रम् यं वा

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा राये नु इमे रोदसी रोदस्यौ द्यावापृथिव्यौ राये धनायोदकलक्षणाय नु क्षिप्रं वायुं जज्ञतुः जनयतः द्यावापृथिव्योः संयोगेऽपि वायुमन्तरेण जगद्धारणं नोपपद्यते. इति वायुं

युजञ्जतुः जनयितुः रोदसी द्यावापृथिव्यौ इमे। जनयोर्द्यावापृथिव्योः संयोगेऽपि सति वायुमन्तरेण जगद्धारणं नोपपद्यते इति जनितवत्यौ द्यावापृथिव्यौ। यं वायुञ्च राये धनायोदकलक्षणाय। देवी धिषणा धियं बुद्धिं कर्म वा सनोति सम्भजते इति धिषणा वाक् मध्यस्थाना धाति धारयति। देवं दानादिगुणयुक्तम्। अध अथेत्यर्थः समनन्तरमेव। ते वायुं नियुतः अश्वाः सश्चत सचन्तः सेवन्तः स्वाः स्वकीयाः। उत अपि च श्वेतं वायुं वसुधितिं वसुनो धनस्योदकलक्षणस्य धारयितारम् निरेके। जनैराकीर्णप्रदेशेऽवस्थितम् वायुम् नियुतः सश्चत स्वा इत्यनुवर्तते ॥ २४ ॥

इमे रोदसी द्यावापृथिव्यौ यं वायुं जज्ञतुः उत्पादयामासतुः नु क्षिप्रम् किमर्थम् राये धनायोदकरूपाय। धियं सनोति ददाति धिषणा वाक् देवी देवं वायुं धाति धारयति शपो लुक् राये धनाय। रोदस्योः सद्भावेऽपि वायुं विना जगद्धारणाशक्तेर्वायुरुत्पादितः। धिषणेति ह्रस्वमार्षम्। अध अथ उत्पत्त्यनन्तरमेव उत निश्चितं स्वा नियुतो निजाश्वा वायुं सश्चत सश्चन्ते सेवन्ते षच् सेवने पुरुषव्यत्ययः। क निरेके निर्गतः रेकः रेचनं रेकः शून्यता यस्मात् तादृशे बहुजनाकीर्णे स्थाने। कीदृशं वायुं श्वेतं श्वेतवर्णम्। तथा वसुधितिं वसुनो धनस्य धितिर्धारणं यत्र तम् धनस्य धारयितारम् ॥ २४ ॥

आपो॑ ह॒ यद् बृ॑ह॒तीर्विश्व॒माय॒न् गर्भं॒ दधा॑ना

जनितवत्यौ धिषणा धियं बुद्धिं कर्म वा सनोति सतभजते सा धिषणा वाग्देवी यं देवं वायुं धाति धारयति। अध अथ समनन्तरमेव स्वाः स्वकीयाः नियुतोऽश्वाः निरेकेरेकः अन्यता तद्रहिते जनैराकीर्णे प्रदेशे स्थितं श्वेतं वायुं सश्चत सचन्ते सेवन्ते। उत निश्चयेन किं भूतं वसुधितिं वसोर्धनस्योदकलक्षणस्य धारयितारम् ॥ २४ ॥

जनयन्तीरग्निम् । ततो देवानाᳪ समवर्त्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ २५ ॥

(१) आपो ह । आपो ह वा इदमग्रे सलिलमेवासीदित्येतद्ब्राह्मणं निदानभूतमनयोः कण्डिकयोः । आपः । पुराकल्पद्योतको ह इति निपातः । यत् । यदा बृहती बृहत्यः महत्यः । विश्वं सर्वम् आत्मत्वेन । आयन्प्रापुः । गर्भं हिरण्यगर्भलक्षणन्दधानाः ।जनयन्तीः जनयिष्यन्त्यःअग्निम् अग्निरूपं हिरण्यगर्भम्। हिरण्यगर्भवचनो वा अग्निशब्दः । ततः गर्भात्संवत्सरोपितात् देवानां मध्ये समवर्तत समभवत् असुः प्राणात्मकः । एकः देवानां स हि लिङ्गशरीरः य इत्थम्भूतो हिरण्यगर्भः। तस्मै कस्मै प्रजापतये हविषा विधेम हविर्दद्म इति विभक्तिव्यत्ययः ॥२५॥

द्वे प्रजापतिदेवत्ये त्रिष्टुभौ हिरण्यदृष्टे प्रथमा द्व्यधिका । आपो ह वा इदमग्रे सलिलमेवासेति (११, १, ६, १) ब्राह्मणमेतयोः कण्डिकयोर्निदानभूतं बोध्यम् । ह प्रसिद्धौ यत् यदा पुरा आपो जलानि विश्वमायन् प्रापुः । कीदृश्य आपः बृहतीः बृहत्यो महत्यः बहुलाः । तथा गर्भं हिरण्यगर्भलक्षणं दधानाः धारयन्त्यः अत एवाग्निं जनयन्तीः अग्निरूपं हिरण्यगर्भं जनयन्त्यः उत्पादयिष्यन्त्यः । ततो गर्भात् संवत्सरोपितात् देवानामसुः प्राणरूप आ-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । आपो ह । आपो ह वा इदमग्रे सलिलमेवसीदित्येतद्ब्राह्मणं निदानभूतमनयोः कण्डिकयोः पुराकल्पद्योतको ह इति निपातः । यत् यदा पुरा आपो विश्वं सर्वम् आयन् आत्मत्वेन प्रापुः किम्भूताः बृहतीः बृहत्यः गर्भं हिरण्यगर्भलक्षणं दधानाः अग्निम् अग्निरूपं हिरण्यगर्भं जनयन्तीः जनयिष्यन्त्यः ततो गर्भात् संवत्सरोपितात् देवानां मध्ये एकः असुः प्राणात्मकः आत्मा लिङ्गशरीररूपो हिरण्यगर्भः समवर्तत तस्मै कस्मै प्रजापतये देवाय हविषा विधेम हविर्दद्मः ॥ २५ ॥

स्मा लिङ्गशरीररूपो हिरण्यगर्भः समवर्त्तत उदपद्यत । कस्मै प्रजापतिरूपाय देवाय हिरण्यगर्भाय हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः विदधातिर्दानार्थः ॥ २५ ॥

यश्चिदापो महिना पर्य्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् । यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ २६ ॥

(१) यश्चित् । योऽपि देवः अन्तर्यामी । आपः अप इति विभक्तिव्यत्ययः । महिना महाभाग्येन । पर्यपश्यत् परितो दृष्टवान् । दक्षम्प्रजापतिं दधानाः जनयन्तीः यज्ञं सृष्टियज्ञम् । यश्च देवेष्वपि अधिदेवः एक आसीत् तस्मै कस्मै प्रजापतये हविषा विधेम हविर्दद्म इति विभक्तिव्यत्ययः ॥ २६ ॥

चिदप्यर्थः यो देवोऽन्तर्यामी महिम्ना आपः विभक्तिव्यत्ययः अपः पूर्वोक्ताः पर्य्यपश्यत् सर्वतो ददर्श । कीदृशीः दक्षं कुशलं प्रजापतिं दधानाः । यज्ञं जनयन्तीः यज्ञशब्देन यज्ञकर्त्री प्रजा उच्यते सृष्टिकर्त्रीरित्यर्थः । यश्च देवेष्वधि अधिकः एको मुख्यो देव आसीत् । तस्मै देवाय हविर्दद्मः ॥ २६ ॥

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे । नि नो रयिंसुभोजसं युवस्व नि वीरं गव्यमश्व्यञ्च राधः ॥ २७ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । यश्चित् । योऽपि देवोऽन्तर्यामी महिना महाभाग्येन । आपः अप इति विभक्तिव्यत्ययः पर्यपश्यत् । सर्वतो दृष्टवान् किंभूताः अपः दक्षं प्रजापतिं दधानाः यज्ञं सृष्टिं जनयन्तीः । यो देवेष्वपि एकः अधि अधिको देवः आसीत् । तस्मै देवाय हविर्दद्मः ॥ २६ ॥

(१) मयाहि प्रयासि याभिर्नियुद्भिः । नियुच्छब्द उभय-लिङ्गः स्त्रियां पुंसि च । दाश्वांसं यजमानम् अच्छ अच्छाभेराप्तुमिति शाकपूणिः। हवींपि दत्तवन्तं यजमानमभि। हे वायो इष्टये यागाय एषणा यवा । दुरोणे यज्ञगृहे वर्तमानं यजमानम् । ताभिर्नियुद्भिरागत्य । नो रयिं सुभोजसं युवस्व । निपूर्वो यौतिर्दानार्थः । नियुवस्व देहि नोऽस्मभ्यं रयिन्धनम् किम्भूतम् सुभोजसम् साधु भुज्यत इति सुभोजाः तम् सुभोजसम् । किञ्च । वीरं पुत्रम् गव्यञ्च राधः अश्व्यं च राधो धनम् नियुवस्व इति ॥ २७ ॥

हे वायुदेवत्ये त्रिष्टुभौ वसिष्ठदृष्टे । हे वयो ! त्वं याभिर्नियुद्भिरश्वाभिः कृत्वा इष्टये यागाय दुरोणे यज्ञगृहे वर्तमानं दाश्वांसं हविर्दत्तवन्तं यजमानमच्छ अभिमुखं प्रयासि गच्छसि निपातस्य-चेति (पा० ६, ३, १३६) संहितायामच्छा इति दीर्घः । व्यवहिताश्चेति (पा० १, ४, ८२) प्रेण यासीत्यस्य व्यवधानं ताभिर्नियुद्भिरागत्य नोऽस्मभ्यं रयिं धनं नियुवस्व देहि नियौतिर्दानार्थः व्यत्ययेन शप्रत्ययः । कीदृशं रयिं सुभोजसं सुष्ठु भुज्यत इति सुभोजास्तम् भुजेरसुन्प्रत्ययः । किञ्च वीरं पुत्रं गव्यं गोसम्बन्धि अश्व्यमश्वसम्बन्धि गोऽश्वरूपं राधः धनं च नियुवस्व ॥ २७ ॥

आ नो॑ नियुद्भिः॑ शतिनी॑भिरध्वरꣳ स॑हस्रिणी॑भिरु-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति।तद्यथा।प्रयासि।याभिः। नियुच्छब्दः पुंस्त्रियोः। हे वायो त्वं याभिः नियुते इष्टये यागाय एषणा यवा दुरोणे यज्ञगृहे वर्तमानं दाश्वांसं यजमानम् अच्छ अभिप्रयासि। प्र अस्योपसर्गस्य यासीति तिङा सम्बन्धः। ताभिर्नियुद्भिः आगत्य नोऽस्मभ्यं रयिं धनं नियुवस्व देहि यौतिर्दानार्थः । किम्भूतं रयिं सुभोजसं साधु भुज्यत इति सुभोजाः तं किञ्च वीरं पुत्रं गव्यं अश्व्यं राधः गोऽश्वरूपं धनं च नियुवस्व ॥ २७ ॥

पयाहि यज्ञम् । वायो अस्मिन् सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ २८ ॥

(१) आ नः । आ उपयाहि नः अस्माकम् अध्वरं यज्ञम् । नियुद्भिः अश्वैः शतिनीभिः । शतानि विद्यन्ते यासु ताः शतिन्यः ताभिः शतिनीभिः सहस्रिणीभिश्च । एतदुक्तम्भवति । बहूनामपि वाहनानां वयन्तर्पयितुं क्षमाः एत्य च । हे वायो अस्मिन् सवने तृतीयसवने मादयस्व तृप्यस्व । इदानीमृत्विजः पादेनाह । यूयं पात पालयत स्वस्तिभिः अविनाशैः सदा नः अस्मान्॥२८॥

हे वायो । नियुद्भिरश्वाभिः नोऽस्माकमध्वरं यज्ञमुपयाहि । कीदृशीभिः शतिनीभिः सहस्रिणीभिः शतं सहस्रं च संख्या यासां ताभिः वयं बहुवाहनतर्पणे शक्ता इति भावः । एत्य चास्मिन् सवने तृतीये मादयस्व तृप्यस्व । अथ पादेन ऋत्विज आह हे ऋत्विजः । स्वस्तिभिः कल्याणैर्यूयं नोऽस्मान् पात रक्षत ॥ २८

नियुत्वान् वायवागह्ययंशुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥ २९ ॥

(२) नियुत्वान्वायो । षड् वायव्या याज्यानुवाक्याः । तत्र

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । आ नः । हे वायो नोऽस्माकमध्वरं यज्ञं नियुद्भिः । अश्वाभिः आ उपयाहि किंभूताभिः नियुद्भिः शतिनीभिः शतानि । विद्यन्ते यासु ताः शतिन्यः ताभिः एवं सहस्रिणीभिः बहूनां वाहनानामपि तर्पयितुं वयं क्षमा इति भावः । एत्य च अस्मिन् सवने तृतीये मादयस्व तृप्यस्व इदानीं पादेन ऋत्विजः प्रत्याह यूयं स्वस्तिभिः नोऽस्मान् सदा पात पालयत ॥ २८ ॥

(२) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । नियुत्वान् वायो । षड् वायव्या याज्यानुवाक्याः वायो शुक्र इत्यनुष्टुप् एकया चेति त्रिष्टुप् गायत्र्योऽन्याश्चतस्रः हे

वायो शुक्रो इत्यनुष्टुप् । एकया चेति त्रिष्टुप् । गायत्र्योऽन्याश्चतस्रः । तृतीयः पादः प्रथमं व्याख्यायते । यतो गन्ता गमनशीलः तृन्नन्तोऽयम् गन्ता उदात्तः तद्धर्मा वा तत्साधुकारी वा एते हि तृनोऽर्थाः । असि । सुन्वतः अभिषवं कुर्वतः यजमानस्य गृहान्प्रति । अतो ब्रवीमि । नियुत्वान् नियुद्गुणको भूत्वा हे वायो आगहि आगच्छ । अयञ्च शुक्रो ग्रहः अयामि आगच्छतिवति सकारपुरुषव्यत्ययः ते त्वां प्रति । त्वमेव हि शुक्रादीनां ग्रहाणां स्थानमित्यभिप्रायः ॥ २९ ॥

पञ्चो वायुदेवत्याः वायव्येष्टकापशुपक्षे यथादीनां याज्यानुवाक्यात्वेन नियुक्ताः आद्या गायत्री गृत्समदृष्टा । हे वायो ! यतः सुन्वतो यजमानस्य गृहं प्रति त्वं गन्ता गमनशीलोऽसि तृन्नन्त आद्युदात्तत्वात् अतो नियुत्वानश्वावान् सन् आगहि आगच्छ शपो लुक् । अयं शुक्रो ग्रहः ते त्वां प्रति अयामि अयतु प्राप्नोतु लकारपुरुषव्यत्ययः । शुक्रादिग्रहाणां पात्रं त्वमेवेति भावः ॥ २९ ॥

वायो॑ शु॒क्रो अ॑यामि ते॒ मध्वो॒ अग्रं॒ दिवि॑ष्टिषु ।
आ या॑हि॒ सोम॑पीतये स्पा॒र्हो दे॑व नि॒युत्व॑ता ॥ ३० ॥

(१) वायो शुक्रः । हे वायो शुक्रो ग्रहः अयामि स्वयमेवा-

वायो यतः त्वं सुन्वतो यजमानस्य गन्तासि गमनशीलः तृन्नन्तोऽयं गन्ता उदात्तः तद्धर्मा तत्साधुकारी एते तृनोऽर्थाः अतः नियुत्वान् अश्ववान् सन् आगहि आगच्छ अयं च शुक्रो ग्रहः ते त्वां प्रति आयामि आगच्छतु लकारपुरुषव्यत्ययः त्वमेव शुक्रादिग्रहाणां स्थानमिति भावः ॥ २९ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । वायो शुक्र । हे वायो शुक्रः ते त्वाम् आयामि आगच्छतु । किंभूतः शुक्रः दिविष्टिषु दिवि एषणेषु यज्ञेषु मध्वः अग्रं रसस्य सारभूतः हे देव त्वं च सोमपीतये सोमपानाय

गच्छतु ते त्वां प्रति कथम्भूतः । मध्वो अग्रम् रसस्य सारभूतः दिवि एषणेषु यज्ञेष्वित्यर्थः । त्वं च आयाहि सोमपीतये सोमपानाय । यतः स्पार्हः स्पृहणीयः हे देव । नियुत्वता नियुच्छन्दवता मन्त्रेण स्तूयसे ॥ ३० ॥

अनुष्टुप् पुरुमीढाजमीढदृष्टा हे वायो । शुक्रो ग्रहः त्वामयामि आगच्छतु । कीदृशः शुक्रः दिविष्टिषु मध्वः अग्रं द्यौरिष्यते प्रार्थ्यते याभिस्ता दिविष्टयो यज्ञाः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्युक्तेः मध्वः मधुनो रसस्याग्रं सारभूतः यज्ञरसेषु शुक्रो ग्रहः सारभूत इत्यर्थः किञ्च हे देव वायो नियुत्वता अश्वावता रथेन आयाहि आगच्छ किमर्थं सोमपीतये सोमपानाय । कीदृशस्त्वं स्पार्हः स्पृहायोग्यः यजमानादिभिः स्पृहणीयः ॥ ३० ॥

वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः ॥ ३१ ॥

(१) वायुरग्रेगाः । वायुः अग्रे गमनशीलः यज्ञप्रीः यज्ञेन प्रीयत इति यज्ञप्रीः । साकङ्गच्छ गच्छति मनसा यज्ञम् । यो ह्यादरेण विस्मित आगच्छति स मनसा सहागतो भवति । कथंभूतः । शिवः शान्तः नियुद्भिः अश्वैः शिवाभिरेव ॥ ३१ ॥

द्वे गायत्र्यौ । वायुः शिवाभिः कल्याणरूपाभिः नियुद्भिरश्वाभिः कृत्वा मनसा साकं चित्तेन सह सादरं यज्ञं गन् गच्छतु । कीदृशः अग्रेगाः अग्रे गच्छत्यग्रेगाः विड्वनोरनुनासिकस्यादिति (पा० ६,

---

आयाहि स्पार्हः स्पृहणीयः सोमः नियुत्वता नियुच्छन्दवता मन्त्रेण संस्कृतोऽस्तीति शेषः ॥ ३० ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पु० नास्ति तद्यथा । वायुरग्रेगाः । वायुः मनसा साकं सह शिवाभिः नियुद्भिरश्वाभिः यज्ञं गन् आगच्छतु यो ह्यादरेण गच्छति स मनसा सहागतो भवतीति किम् वायुः अग्रेगाः अग्रेगमनशीलः यज्ञप्रीः यज्ञेन प्रीयत इति शिवः शान्तः ॥ ३१ ॥

४, ४१) आकारः । यज्ञप्रीः यज्ञेन प्रीयते, तुष्यति यज्ञप्रीः । शिवः कल्याणकरः ॥ ३१ ॥

वा॒यो ये ते॑ सह॒स्रिणो॒ रथा॑स॒स्तेभि॒रा ग॑हि । नि॒युत्वा॑न् सोम॑पीतये ॥ ३२ ॥

(१) वायो ये । हे वायो ये ते तव सहस्रिणः सहस्रसंख्याभियुक्ताः रथासः रथा एव रथासः तेभिः तैः आगहि आगच्छ नियुत्वान् भूत्वा सोमपीतये सोमपानाय ॥ ३२ ॥

हे वायो । ये ते तव सहस्रिणः सहस्रसंख्याका रथासः रथाः तेभिस्तैः रथैः आगहि आगच्छ किमर्थं सोमपानाय । कीदृशस्त्वं नियुत्वान् अश्वयुक्तः नियुतो वायोरित्युक्तेः (निघ० १, १५, २) ॥ ३२ ॥

एक॑या च द॒शभि॑श्च स्वभूते॒ द्वाभ्या॑मि॒ष्टये॑ वि॒ꣳश॒ती च॑ । ति॒सृभि॑श्च॒ वह॑से त्रि॒ꣳश॒ता च॑ नि॒युद्भि॑र्वायवि॒ह ता वि मु॑ञ्च ॥ ३३ ॥

(२) एकया च । एकस्यां वायव्यायामृचि पात्राणि विमुच्यन्ते । हे वायो स्वभूते । स्वकीया विभूतिर्यस्य जगत्सर्वं

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । वायो ये ते । हे वायो ये ते तव सहस्रिणः सहस्रसंख्याः रथासः तैः रथैर्नियुत्वान् सन् सोमपीतये आगहि ॥ ३२ ॥

(२) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । एकया च । एकस्यां वायव्यायामृचि पात्राणि विमुच्यन्ते हे वायो हे स्वभूते स्वकीया विभूतिर्यस्य जगदात्मिका स स्वभूतिः । एकया दशभिः द्वाभ्यां विंशती विंशत्या विंशतिशब्दस्य पूर्वसवर्णदीर्घ आदेशः । तिसृभिः त्रिंशता च नियुद्भिः अश्वाभिः इष्टये यज्ञाय त्वं यानि पात्राणि वहसे ता तानि इह विमुञ्च ॥ ३३ ॥

स स्वभूतिः । यानि पात्राणि वहसे इष्टये देवयज्यायै । एकया च नियुता दशभिश्च नियुद्भिः द्वाभ्याञ्च नियुद्भ्याम् विंशती च । विंशतिशब्दस्य पूर्वसवर्णदीर्घ आदेशः । विंशत्या च नियुद्भिः । तिसृभिश्च त्रिंशता च नियुद्भिरेव । ता तानि पात्राणि इह विमुञ्च ॥ ३३ ॥

त्रिष्टुप् अनयर्चा पात्राणि मुच्यन्ते । स्वा निजा भूतिः समृद्धिर्जगद्रूपा यस्य स स्वभूतिः हे स्वभूते ! हे वायो ! एकया दशभिः द्वाभ्यां विंशती विंशत्या पूर्वसवर्णः तिसृभिः त्रिंशता च नियुद्भिः अश्वाभिः कृत्वा इष्टये यज्ञाय त्वं यानि पात्राणि वहसे ता तानि पात्राणि इह यज्ञे विमुञ्च । पञ्च चकाराः समुच्चयार्थाः ॥ ३३ ॥

तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवा॑ꣳस्यावृणीमहे ॥ ३४ ॥

(१) तव वायो । हे वायो ऋतस्पते । सत्योदक यज्ञवचन ऋतशब्दः । सत्यपते । त्वष्टुरादित्यस्य जामातः । स ह्यादित्यादप आदाय गर्भयति ततो विप्रुषो जायन्ते अतो वायुर्जामाता त्वष्टुः अद्भुत । अभूतपूर्व । तव संबन्धीनि अवांसि अन्नानि आवृणीमहे आयाचामः ॥ ३४ ॥

गायत्री व्यश्वदृष्टा । हे वायो ! ऋतस्पते सत्यस्य पालक ! ऋतस्य पतिपरे सुडागमः । हे त्वष्टुर्जामातः । आदित्यादप आदाय वायुर्गर्भयति ततो वृष्टिर्भवतीति वायुरादित्यस्य जामाता । हे

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पु० नास्ति तद्यथा । तव वायो । हे वायो हे ऋतस्पते सत्योदक यज्ञवाचक ऋतशब्दः । तस्य पतिशब्दे सुडागमः । हे सत्यपते हे त्वष्टुरादित्यस्य जामातः आदित्यादप आदाय गर्भयति ततो विप्रुषो जायन्ते अतो वायुर्जामाता त्वष्टुः हे अद्भुत अभूतपूर्व तव अवांसि अन्नानि वयम् आवृणीमहे याचामः ॥ ३४ ॥

अद्भुत आश्चर्यरूप ! तवावांसि धनानि वयमावृणीमहे भा- येयामः ॥ ३४ ॥

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ३५ ॥

(१) अभि त्वा रथन्तरं दक्षिणे पक्ष इति श्रुतिः । नान्यो ऽध्वर्योर्गायेदिति यतोऽत एषां साम्नां योनयः पठ्यन्ते । तत्रेन्द्र प्रगाथौ रथन्तरस्य योनिः । तत्र प्रथमा बृहती । द्वितीया सतो बृहती । अभि त्वा शूर नोनुमः । आभिमुख्येन त्वां हे शूर नोनुमः नमामः । कथमिव अदुग्धा इव धेनवः । यथा वत्सान्प्रति अदुग्धा धेनवः नमन्ति एवं त्वां प्रति हविर्भिः स्तोत्रैः शस्त्रैश्चाभिमुख्येन नमामः । यद्वा णु स्तुतौ । अयमत्र धातुः शब्दसारूप्यात् अभिनोनुमः अभिष्टुमः त्वां कृतकृत्याः सन्तः स्तुतस्तोत्राः कृतशास्त्राः उद्यतहविष्काः । कथमिव । अदुग्धा इव धेनवः । यथा अदुग्धा अकृतकृत्या धेनवः वत्समभिष्टुवुः एवम् । कथंभूतं त्वामभि नोनुमः ईशानमस्य जगतः । जङ्गमस्य स्वर्दृशम् स्वः पश्यतीति स्वर्दृक् तं स्वर्दृशम् । यद्वा स्वरादित्यः तद्वत् यो दृश्यते स स्वर्दृक् तं स्वर्दृशम् । ईशानं च हे इन्द्र तस्थु-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । अभि त्वा । रथन्तरं दक्षिणे यज्ञे इति श्रुतिः । नान्योऽध्वर्योर्गायेदिति यतोऽत एषां साम्नां योनयः पठ्यन्ते तत्रेन्द्र प्रगाथो रथन्तरस्य योनिः तत्र प्रथमा बृहती द्वितीया सतोबृहती हे इन्द्र हे शूर वयं त्वाम् अभितो नोनुमः आभिमुख्येनात्यन्तं स्तुमः । नु स्तुतौ यङ्लुगन्तम् कथमिव अदुग्धा धेनव इव ता यथा वत्सानभिष्टुवन्ति किंभूतं त्वाम् अस्य जगतो जङ्गमस्य ईशानं स्वर्दृशं स्वः पश्यतीति स्वर्दृक् । तं यद्वा स्वः आदित्यः तद्वत् दृश्यते इति स्वर्दृक् तं तस्थुषः स्थावरस्य ईशानम् ॥ ३५ ॥

पः स्थितवतः स्थावरस्येत्यर्थः ॥ ३५ ॥

बृहतीसतोबृहतीद्वयं प्रगाथं वसिष्ठदृष्टमिन्द्रदेवत्यम् । रथन्तरं दक्षिणे पक्षे इति श्रुतेः । नान्योऽध्वर्योर्गायेदित्यध्वर्योर्गानं विहितम् । अतः साम्नो योनय ऋचः पठ्यन्ते तत्रैन्द्रः प्रगाथो रथन्तरस्य योनिः । हे शूर ! हे इन्द्र ! वयं त्वा त्वामभिनोनुमः आभिमुख्येनात्यन्तं स्तुमः नु स्तुतौ यङ्लुगन्तम् । तत्र दृष्टान्तः अदुग्धाः धेनवः इव यथा अदुग्धा गावो वत्सान् स्तुवन्ति । कीदृशं त्वाम् जगतो जङ्गमस्येशानं प्रभुम् स्वर्दृशं स्वः पश्यतीति स्वर्दृक् तम् । यद्वा स्वः आदित्य इव दृश्यते स्वर्दृक् तस्थुषः स्थावरस्य ईशानम् विश्वनियन्तारमित्यर्थः ॥ ३५ ॥

न त्वावाँ२॥ अन्यो दि॒व्यो न न पार्थि॑वो जा॒तो न जनिष्यते । अ॒श्वा॒यन्तो॑ मघवन्निन्द्र वा॒जिनो॑ ग॒व्यन्त॑स्त्वा हवामहे ॥ ३६ ॥

(१)नत्वावान् । ये न त्वावान् त्वत्सदृश अन्यः दिव्यः दिविभवः न च पार्थिवः अस्तीति शेषः । नच जातः नच जनिष्यत उत्पत्स्यति अतः अश्वायन्तः अश्वान्कामयमानाः हे मघवन् धनवन् इन्द्र । वाजिनः वाजोऽन्नम् तदेषामस्ति ते वाजिनः हविषा संयुक्ताः सन्तः गव्यन्तः गाः कामयमानाः त्वां हवामहे आह्वयामः ॥ ३६ ॥

हे मघवन् धनवन् ! हे इन्द्र ! दिवि भवो दिव्यः पार्थिवः पृथिवीभवश्च त्वावान् त्वत्सदृशोऽन्यो नास्तीति शेषः न च जातः

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । न त्वावान् । हे मघवन् धनवन् हे इन्द्र अन्यः दिवि भवः पार्थिवश्च त्वावान् त्वत्सदृशः नास्तीति शेषः नच जातः नच जनिष्यते उत्पत्स्यते अतो वयं त्वां हवामहे आह्वयामः किं वयम् अश्वायन्तः अश्वान् कामयमानाः वाजिनः वाजोऽन्नं तद्वन्तः हविषा संयुक्ताः सन्त इत्यर्थः । गव्यन्तः गाः कामयमानाः ॥ ३६ ॥

न जानिष्यते उत्पत्स्यते । त्वत्सदृशोऽस्तीति त्वावान् सादृश्यार्थे घतुप्रत्ययः । अतो वयं त्वा त्वां हवामहे । कीदृशा वयम् अश्वायन्तः अश्वान् कामयमानाः अश्वाघस्यादिति (पा० ७, ४, ३७) क्यचि आत्वम् ततः शतृप्रत्ययः । वाजिनोऽन्नवन्तः हविर्युताः । गव्यन्तः गा इच्छन्ति गव्यन्तः गोकामाः गवाश्वान् देहीत्यर्थः ॥ ३६ ॥

त्वामिद्धि हवा॑महे सा॒तौ वाज॑स्य का॒रवः । त्वां वृ॒त्रेष्वि॑न्द्र॒ सत्प॑तिं॒ नर॒स्त्वां काष्ठा॒स्वर्व॑तः ॥ ३७ ॥

(१ त्वामित् । बृहती योनिः देवतादितुल्यम् इच्छब्द एवार्थे हिर्निरर्थकः । त्वामेव हवामहे आह्वयामः । सातौ वाजस्य सातिर्लाभः लाभे अन्नस्य विषयभूते । अपि च कारवः कर्तारः स्तोमानां वयम् त्वामेव च वृत्रेषु शत्रुषु हन्तव्येषु हे इन्द्र सत्पतिं सतां पालयितारम् श्रुतिस्मृतिविहितानुष्ठातारो निषिद्धकर्मपरित्यागिनः सन्तः तत्पतिम् । नरः मनुष्याः आह्वयन्ति । त्वामेव काष्ठासु जेतव्यासु अर्वतः अर्ववन्तः अश्ववन्तः रथिनो वा आह्वयन्ति । नहि त्वदृते पुरुषाणां किञ्चित्सिध्यतीत्यभिप्रायः ॥ ३७ ॥

ऋग्द्वयमैन्द्रः प्रगाथः शम्युदृष्टः बृहत्साम्नो योनिः अध्वर्योर्गानस्योक्तेः आद्या बृहती द्वितीया सतोबृहती बृहदुत्तरे पक्षे इति श्रु-

---

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । त्वामित् । बृहती योनिः देवतादितुल्यम् इत् एवार्थे हि निरर्थकः । हे इन्द्र कारवो कर्तारो यज्ञानां वयं त्वामेव हवामहे वाजस्य सातौ सातिर्लाभः । अन्नस्य लाभे विषयभूते अपि च वृत्रेषु शत्रुहन्तव्येषु काष्ठासु च जेतव्यासु अर्वतः अर्ववन्तः अश्ववन्तो रथिनो वा नरो मनुष्याः त्वाम् आह्वयन्ति किं त्वां सत्पतिं सतां पालयितारं श्रुतिस्मृतिविहितानुष्ठातारो निषिद्धकर्मपरित्यागिनः सन्तः । अर्वत इति मतुपो लोपः विभक्तिव्यत्ययश्च नहि त्वदृते पुरुषाणां किञ्चित् सिध्यतीति भाव ॥ ३७ ॥

तेः। हे इन्द्र। कारवः कर्त्तारः यज्ञानाम् नरः ऋत्विजो वयं त्वामेव ह्वयामहे आह्वयामः इत् एवार्थे हि निश्चये। किंनिमित्तम् वाजस्याऽन्नस्य सातौ लाभनिमित्तम्। कीदृशं त्वां सत्पतिं सतां पालयितारम्। श्रुतिस्मृत्युक्ताचाररता निषिद्धत्यागिनः सन्तः कथ्यन्ते। तथा अर्वतः अश्वप्राप्तिनिमित्तं च विभक्तिव्यत्ययः। त्वांशब्दावृत्तिरादरार्था ॥ ३७ ॥

स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः। गामश्वꣳ रथ्यमिन्द्र संकिर सत्रावाजं न जिग्युषे ॥ ३८ ॥

(१) स त्वम्। स त्वं नः अस्मभ्यम् हे चित्र चायनीय हे वज्रहस्त धृष्णुया प्रसहनेन महः महत्त्वेन च स्तवानः स्तुवानः। इति विकरणव्यत्ययः। हे अद्रिवः अद्रिवन्। आद्रिसारमयं वज्रन्तयस्यास्तीति सम्बोध्यते अद्रिव इति। गाम् अश्वञ्च रथ्यं रथे साधुम् हे इन्द्र सङ्किर। सङ्किरतिर्दानातिशये अनेकदेशमकीर्णन्देहि कथमिव। सत्रा वाजन्न जिग्युषे नकार उपमार्थीयः। यथा जिग्युषे विजितवते। अश्वाय हस्तिने वा। सत्रा त्राणस-

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति तद्यथा। स त्वम्। हे चित्र चायनीय हे वज्रहस्त हे अद्रिवः अद्रिवन् आद्रिसारमयं वज्रं तदस्यास्तीति संबोध्यते। यद्वा अद्रयः जेयत्वेन यस्य सन्ति अद्रिवान् तत्संबुद्धिः त्वं धृष्णुया प्रसहनेन महः महत्त्वेन च स्तवानः स्तूयमानः सन् इति विकरणव्यत्ययः। गाम् अश्वं रथ्यं रथे साधुं हे इन्द्र नोऽस्मभ्यं संकिर देहि संकिरतिर्दानार्थः। अनेकदेशप्रकीर्णं देहीत्यर्थः। कथमिव न इवार्थे जिग्युषे जितवते अश्वाय हस्तिने वा सत्रा त्रा रक्षणं त्राणं तत्सहितं वाजं न वाजमिव वाजं यवसं दूर्वादि यथा दद्युरेवं नोऽस्मभ्यं देहि ॥ ३८ ॥

हितम् वाजं यवसम् सस्नेहमपरिमितं संकिरेयुर्दद्युः एवमस्मभ्यन्देहि ॥ ३८ ॥

हे चित्र आश्चर्य्यकारिन् ! हे वज्रहस्त ! वज्रं हस्ते यस्य हे अद्रिवः ! अद्रयोऽजय्यत्वेन सन्तीत्यद्रिवान् तत्सम्बुद्धिः मतुवसोरिति (पा० ८, ३, १) रुत्वम् हे इन्द्र ! स त्वं नोऽस्मभ्यं गामश्वं च साद्रिं देहि सम्पूर्वः किरतिर्दानार्थः । कीदृशमश्वम् रथ्यं रथे साधुं रथवहनसमर्थम् । कीदृशस्त्वम् धृष्णुया प्रागल्भ्येन महः महसा तेजसा च स्तवानः स्तूयमानः । धृषेः क्नुः ततो विभक्तेर्यादेशः धृष्णुना धृष्णुत्वेन भावप्रधानो निर्देशः । महः विभक्तिलोपः । स्तवान इत्यत्र विकरणव्यत्ययः । कथमिव वाजं न वाजमिव न इवार्थे यथा जिग्युषे जितवतेऽश्वाय हस्तिने वा यथा सत्रा त्राणं त्रा रक्षणम् तत्सहितं वाजमन्नं यवं यथा ददति तथास्मभ्यं देहि ॥ ३८ ॥

कया॑ नश्चि॒त्र आ भु॑वदू॒ती स॒दावृ॑धः॒ सखा॑ । कया॒ शचि॑ष्ठया वृ॒ता ॥ ३९ ॥

(१) कया नः । वामदेव्यस्य योनिः तिस्र ऐन्द्र्यो गायत्र्यः अन्त्या पादनिवृत् । कया नश्चित्र आभुवदूती कया पुनः ऊती ऊत्या केन पुनरवनेन तर्पणेन । नः अस्माकं चित्रः चायनीयः इन्द्रः आभुवत् भूयात् आकारो वृता सह संबध्यते । सदा वृधः सदाकालं वर्द्धयिता । सखा च कया च नाम शचिष्ठया शचीति कर्मनाम मतुब्लोपः । अतिशयेन कर्मवत्या आवृता कर्मणा सदावृधः सखा भूयादिति वर्तते ॥ ३९ ॥

---

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति तद्यथा । कया नः । वामदेव्यस्य योनिः तिस्रः ऐन्द्र्यः गायत्र्यः अन्त्या पादनिवृत् सदावृधः सदा वर्द्धयितुर्विष्णोः सखा इन्द्रः कया ऊत्या केन तर्पणेन नोऽस्माकं चित्रः चायनीयः आभुवत् भूयात् कया शचिष्ठया शचीति कर्मनाम इतुब्लोपः अतिशयेन कर्मवत्या कया आवृता कर्मणा च चित्रो भूयात् ॥ ३९ ॥

तिस्रो गायत्र्य इन्द्रदेवत्या वामदेवदृष्टाः वामदेव्यसाम्नो योनिः वामदेव्यमात्मासीति श्रुतेः अन्त्या पादनिवृत् सप्ताक्षरत्रिपादा । पूर्वर्चः इन्द्रपदमनुपञ्जनीयम् । इन्द्रः कया ऊती ऊत्या अवनेन तर्पणेन प्रीणनेन वा नोऽस्माकं सखा सहायः आभुवत् आभिमुख्येन भवति । तथा वृता वर्तत इति वृत् तया वृता वर्त्तमानया शचिष्ठया अतिशयेन शची शचिष्ठा तया अतिशयवत्या यागक्रिययास्माकं सखा भवति शचीतिकर्मनाम तत इष्ठन् प्रत्ययः । कीदृशः इन्द्रः चित्रः विचित्रः पूज्यो वा । सदावृधः सदा वर्धत इति सदावृधः इगुपधेति(पा० ३, १, १३५) कप्रत्ययः सदा वर्धमानः । ऊती तृतीयैकवचनस्य सुपां सुलुगिति (पा० ७, १, ३९) पूर्वसवर्णः । आभुवत् इतश्च लोपः सुलुगिति (पा० ७, १, ९७) तिप इलोपः शपश्छान्दसे ङित्वे धातोरुवङ्ङादेशः पा० ६, ४, ७७) ॥ ३९ ॥

कस्त्वा सत्यो मदानां मᳪंहिष्ठो मत्सदन्धसः ।
दृढा चिदारुजे वसु ॥ ४० ॥

कस्त्वा । को नाम त्वाम् मत्सत्मादयति । सत्यः अवितथः मदानां मध्ये मंहिष्ठः अतिशयेन मदजनकः । अन्धसः सोमस्य स्वभूतोंऽशः येन मत्तः सन् त्वम् । दृढाचित् दृढान्यप्यसुरवृन्दानि । आरुजे आरुजसि चूर्णयसि वसु च ददासीति शेषः । यद्वा दृढान्यपि सुवर्णप्रभृतीनि चिरकालस्थायीनि वसूनि आरुजासि चूर्णयसि दानाय ॥ ४० ॥

(१) अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति तद्यथा । कस्त्वा । अन्धसः सोमस्य कः अंशः सत्यः अवितथः त्वाम् मत्सत् मादयति मत्तं करोति । किम्भूतः मदानां मध्ये मंहिष्ठः अतिशयेन मदजनकः येन मत्तः त्वां दृढाचित् दृढान्यपि असुरवृन्दानि आरुजे आरुजासि चूर्णयसि वसु च ददासीति शेषः यद्वा दृढान्यपि कालस्थायीनि सुवर्णादीनि वसु वसूनि आरुजासि चूर्णयसि दानाय च ॥ ४० ॥

हे इन्द्र ! अन्धसोऽन्नस्य सोमरूपस्य कः अंशः त्वा त्वां मत्सत् मादयति मत्तं करोति मदी हर्षे लेटोऽडाटाविति (पा० ३, ४, ९४) अडागमः सिब्बहुलं लेटीति (पा० ३, १, ३४) सिप्प्रत्ययः तिप इलोपः कीदृशः मदानां मंहिष्ठः मदयन्ति तानि मदानि पचाद्यच् मदजनकानि द्रव्याणि तेषां मध्ये मंहिष्ठः श्रेष्ठः अत्यन्तमदजनकः मंहि कान्तौ चुरादिः मंहयति द्योतते मंही अत्यन्तं मंही मंहिष्ठः यद्वा महि वृद्धौ भ्वादिः मंहते वर्धते मंही अत्यन्तं मंही मंहिष्ठः । येनांशेन मत्तः सन् दृढा चित् दृढान्यपि वसु वसूनि धनानि कनकादीनि त्वमारुजे रुजो भङ्गे पुरुषपदव्यत्ययः आरुजसि चूर्णयसि दातुं भनक्षि भङ्क्त्वा ददासीत्यर्थः ॥ ४० ॥

अभी षु णः सखीनामविता जरितृणाम् । शतं भवास्यूतये ॥ ४१ ॥

(१) अभी षु णः । आभिमुख्येन च सुष्ठु च । नः अस्माकं सखीनाम् अविता पालयिता । जरितृणां स्तोतृणाञ्च अस्माकं पालयिता किञ्च । शतं भवासि शतधा भवसि हे इन्द्र ऊतये अवनाय रक्षणाय । प्रकृतत्वादस्माकमेव सखीनां जरितृणाञ्च ॥ ४१ ॥

हे इन्द्र ! त्वमूतयेऽवनाय पालनाय सुष्ठु सम्यक् अभि आभिमुख्येन शतं भवसि आडागमः शतशब्दो बहुवाची बहुरूपो भवसि पालनाय नानारूपाणि दधासीत्यर्थः । कीदृशस्त्वम् सखीनां मित्राणां जरितॄणां स्तोतॄणां नोऽस्माकमृत्विजामविता पालयिता । संहितायामभीत्यस्य दीर्घः । सुञ इति (पा० ८, ३, १०७) सुशब्दस्य षत्वम् । नश्च धातुस्थोरुषुभ्य इति (पा० ८, ४, २७) षुशब्दात् परस्य नः इत्यस्य णत्वम् ॥ ४१ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । अभी षुणः । आभिमुख्येन सुष्ठु च नोऽस्माकं सखीनां जरितृणाम् अविता पालयिता त्वमूतये अवनाय शतं भवसि शतधा भवसि ॥ ४१ ॥

यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे। प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥४२॥

यज्ञायज्ञा वः। आग्नेयस्त्र्यचः। तत्र द्वे बृहत्यौ तृतीया सतोबृहती। यज्ञायज्ञस्य साम्नो योनिः यज्ञे यज्ञे इति सप्तम्येकवचनस्य आ-आदेशः वीप्सायाम्। वः इति यजमानविषयम् युष्मदर्थम् अग्नये अग्निमिति विभक्तिव्यत्ययः वाक्यसंबन्धात्। गिरा गिरा च। तया तया च गिरा वाचा स्तुतिलक्षणया दक्षसे। दक्षसमिति सन्नतिः। दक्षवन्तमुत्साहवन्तम् अग्निविशेषणञ्चैतत्। प्र प्रः प्रसमुपोदः पादपूरणामित्यभ्यासः शंसिषामित्याख्यातेन संबन्धः प्रशंसिषं वयम् अहमिति वचनव्यत्ययः। अमृतममरणधर्माणम् जातवेदसं जातप्रज्ञानम्। प्रियं मित्रन्न मित्रमेव। अथ वाक्यार्थवशादानुपूर्वी। अहं यज्ञेयज्ञे वः युष्मदर्थे अग्निन्दक्षवन्तं तया तया च स्तुत्या प्रशंसिषम् अमृतञ्जातवेदसं प्रियं मित्रमिव ॥ ४२ ॥

तृचः प्रगाथः आग्नेयः शम्युदृष्टः यज्ञायज्ञियस्य साम्नो योनिः यज्ञायज्ञियं पुच्छमिति श्रुतेः। द्वे बृहत्यौ तृतीया सतोबृहती। यज्ञा-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा यज्ञायज्ञावः। आग्नेय्य स्त्र्यृचः द्वे बृहत्यौ तृतीया सतो बृहती यज्ञायज्ञियस्य साम्नो योनिः यज्ञे यज्ञे इति सप्तम्येकवचने आ आदेशः व इति यजमानविषयः अग्नये अग्निमिति च विभक्ति व्यत्ययः दक्षसे दक्षसमिति च प्रप्र प्रसमुपोद इति द्वित्वं तस्य शंसिषमिति आख्यातेनान्वयः वयम् अहमिति वचनव्यत्ययः। तथा च एवं योजना अध्वर्युवाक्यं यजमानं प्रति अहं वः युष्मदर्थं यज्ञे यज्ञे गिरा तया वाचा स्तुतया अग्निं प्रियं मित्रं न मित्रमिव प्रशंसिषं स्तौमि किम्भूतमग्निं दक्षसं दक्षिवन्तम् उत्साहवन्तम् अमृतममृतधर्माणं जातवेदसं जातप्रज्ञानम् ॥ ४२ ॥

यद्वा वीप्सायां द्वित्वम् सप्तम्येकवचनस्याकारः । व इति द्वितीयाबहुवचनमेकवचनार्थे यजमानविषयं वा । अग्नये चतुर्थ्येकवचनं द्वितीयैकवचनार्थे । गिरागिरा वीप्सायां द्वित्वम् । चः पादपूरणः । दक्षसे चतुर्थी द्वितीयार्थे । प्र प्र प्रसमुपोदः पादपूरण इति (पा० ८, १, ६) द्वित्वम् तस्य च शंसिषमिति क्रियया सम्बन्धः । वयमिति प्रथमाबहुवचनमेकवचनार्थे । तथा चैवं योजना । यज्ञेयज्ञेऽनेकयज्ञेषु गिरागिरान्ययान्यया स्तुत्या वः त्वाम् यद्वा वो युष्माकमर्थे अग्निं प्रशंसिष स्तौमि शंस स्तुतौ लुङ् अडभाव आर्षः । कीदृशमग्निं दक्षसम् दक्षतेरुत्साहार्थस्य धातोरसुन्प्रत्ययः दक्षते उत्सहते दक्षाः तम् उत्साहिनम् यद्वा दक्ष इति बलनाम अन्तर्नीतमत्वर्थं द्रष्टव्यम् दक्षसं बलवन्तम् । अमृतममरणधर्माणम् । जातवेदसम् जातं वेदो ज्ञानं धनं वा यस्मात्तम् । प्रियं प्रीतिजनकम् । नशब्द उपरिष्टादुपचारादुपमार्थीयः मित्रं न मित्रमिव यथा कश्चित्प्रियं मित्रं स्तौति तद्वदग्निं स्तुमह इत्याशास्महे ॥ ४२ ॥

पाहि नो॑ अग्न॒ एक॑या पा॒ह्यु॒त द्वि॒तीय॑या । पाहि गी॒र्भिस्ति॒सृभि॑रूर्जां पते पा॒हि च॑त॒सृभि॑र्वसो ॥ ४३ ॥

(१)पाहि नः । गोपाय नः अस्मान् । हे अग्ने एकया गिरा ऋग्लक्षणया । पाह्युत गोपाय च द्वितीयया द्वाभ्यां गीर्भ्यामृग्यजुर्लक्षणाभ्याम् । पाहि च गीर्भिः तिसृभिः स्तुतिभिः । हे ऊर्जामन्नानां पते पाहि च चतसृभिः गीर्भिः । ऋगाद्यास्तिस्रः गद्यपद्यकाव्यलक्षणा चतुर्थी गीः । हे वसो वासयितः ॥ ४३ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पु० नास्ति । तद्यथा । पाहि नः । हे ऊर्जामन्नानां पते हे वसो वासयितः हे अग्ने एकया गिरा ऋग्लक्षणया नः पाहि उत द्वितीयया द्वाभ्यां गीर्भ्यां ऋग्यजुर्भ्यां पाहि तिसृभिर्गीर्भिः ऋग्यजुःसामभिः पाहि चतसृभिर्गीर्भिश्च पाहि गद्यपद्यकाव्यलक्षणा चतुर्थी गीः ॥ ४३ ॥

गर्भेदृष्टा। हे अग्ने! ऊर्जां पते! अन्नानां पालक! हे वसो वासयितः। यद्वा लुप्तमत्वर्थं द्रष्टव्यम् हे वसो। वसुमन्। धनवन् एकया गिरा इति पदस्यानुषङ्गः एकया गिरा ऋग्लक्षणया तृतीयानिर्देशात् स्तुतः सन्निति वाक्यशेषः नोऽस्मान् पाहि रक्ष। उत अपि च द्वितीयया यजुर्लक्षणया स्तुतः सन् पाहि। तिसृभिर्गीर्भिः ऋग्यजुःसामलक्षणाभिः स्तुतो नः पाहि। चतसृभिः ऋग्यजुःसामनिगदलक्षणाभिः स्तुतो नः पाहि गद्यपद्यकाव्यादिरूपा चतुर्थी गीः॥ ४३॥

ऊर्जो नपातꣳ स हिनायमस्मयुर्दाशेम हव्यदातये। भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम्॥ ४४॥

(१)ऊर्जो नपातम्। स त्वं हे अध्वर्यो ऊर्जो नपातम् ऊर्जशब्देनाप उच्यन्ते। ताभ्य ओषधिवनस्पतयो जायन्ते तेभ्य एष जायते इत्यपां पौत्रोऽग्निः। तम्। हिन। हिनु। तर्पय। अयम् अस्मयुः। अयं हि अग्निः अस्मान्कामयते। अतो वयञ्च। दाशेम संकल्पं कुर्याम्। हव्यदातये। हविषो दानाय। भुवद्वाजेष्वविता। यतोऽयम् वाजेष्वन्नेषु विषयभूतेषु अविता गोप्ता। भुवत् भवति। भुवद्वृधे वर्द्धनाय च भवति। उत अपि च।

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पु० नास्ति। तद्यथा। ऊर्जो नपातम्। हे अध्वर्यो सः त्वम् ऊर्जोनपातम् अपां पौत्रम्। अग्निं हिन हिनु तर्पय अद्भ्यो वनस्पतयो जायन्ते तेभ्योऽग्निरित्यपां पौत्रोऽग्निः। अयमग्निः अस्मयुः अस्मान् कामयते अतो वयं हव्यदातये हविषो दानाय दाशेम संकल्पं कुर्याम् यतोऽयं वाजेषु अन्नेषु अविता भुवत् भवति दधे वर्धनाय च भवति उत तनूनां शरीराणां त्राता भवति बहुवचनं भार्यादिशरीरार्थम्॥ ४४॥

त्राता तनूनां शरीराणाम् बहुवचनोपदेशात् भार्यादिशरीरग्रहणम् यत एवम् अतः ऊर्जोनपातं हिन इति संबन्धः । एवमादूरविप्रकर्षेण विषमपन्त्रा व्याख्येयाः ॥ ४४ ॥

यजमानोऽध्वर्युं प्रार्थयते । हे अध्वर्यो ! ऊर्जो नपातमपां पौत्रमग्निं स त्वं हिन हिनु तर्पय हि गतौ वृद्धौ स्वादिः लोट् उलोपश्छान्दसः ऊर्जशब्देनाप उच्यन्ते अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरित्यपां पौत्रोऽग्निः । यतोऽयमग्निरस्मयुः अस्मानिच्छति अस्मयुः क्याच्छन्दसीति (पा० ३, २, १७०) उप्रत्ययः अतो हव्यदातये हविषो दानाय दाशेम सङ्कल्पयामः दाशृ दाने अत्र सङ्कल्पार्थः । यतोऽयं वाजेष्वन्नेषु अविता रक्षिता भुवत् भवति वृधेवृद्धेषु च भुवत् भवति उतापि च तनूनां शरीराणां त्राता रक्षिता भवति बहुवचनं भार्यादिशरीररक्षार्थमुपात्तम् । अग्निरन्नतनुरक्षिता वर्धयितास्मान् कामयतेऽतो हविर्दानाय तं सङ्कल्पयामः ॥ ४४ ॥

स॒ं॒व॒त्स॒रो॑ऽसि परिवत्स॒रो॑ऽसीदावत्स॒रो॑ऽसीद्वत्स॒रो॑ऽसि वत्स॒रो॑ऽसि। उ॒षस॑स्ते कल्पन्तामहोरा॒त्रास्ते॑ कल्पन्तामर्धमा॒सास्ते॑ कल्पन्तां॒ मासा॑स्ते कल्पन्तामृ॒तव॑स्ते कल्पन्ताᳬ संव॒त्स॒रस्ते॑ कल्पताम् प्रेत्या॒ एत्यै॒ सञ्चाञ्च॒ प्र च॑ सारय । सु॒प॒र्ण॒चिद॑सि॒ तया॑ दे॒वत॑याङ्गिर॒स्वद्ध्रु॒वः सी॑द ॥ ४५ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां सप्तविंशोऽध्यायः ॥ २७ ॥

---

(१) संवत्सरोऽसि । सञ्चितोऽग्निरनेन यजुषा अभिमृश्यते ।

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिमिति। यदुक्तं ज्योतिःशास्त्रे त-दिहोच्यते। हे अग्ने यस्त्वं संवत्सरोऽसि। सर्वस्य सरितासि नच त्वामन्यः सारयति। यश्च त्वम्परिवत्सरोऽसि यश्च इदा वत्सरोऽसि इदा-इदानीमिति समानार्थौ यश्च इद्वत्सरोऽसि इदिति नि-पातः। यश्च वत्सरोऽसि निर्विशेषेण तस्य ते भवतः उषसः क-ल्पन्तां क्लृप्ता भवन्त्ववयवत्वेन। एवम् अहोरात्राः अर्द्धमासा मासा ऋतवश्च संवत्सरश्च कल्पताम्। त्वञ्च प्रेत्यै प्रगमनाय एत्यै आगमनाय सञ्चाञ्च प्रसारय च। समं च प्रचसारय च। स्वेच्छया संकोचविकाशधर्मा भवेत्यभिप्रायः। सुवर्णचिदसीत्या-कृतिवचनम् तया देवतया वाचा सहितः। अङ्गिरस्वत् प्राण इव ध्रुवः शाश्वतिकः सीद अवस्थानं कुरु॥ अभित्वा शूर नोनुम इत्यादि परमेष्ठ्यपश्यत्॥ ४५॥

इति उव्वटकृतौ मन्त्रभाष्ये सप्तविंशोऽध्यायः॥ २७॥

पु० नास्ति। तद्यथा। संवत्सरोऽसि। संचितोऽग्निरनेन यजुषा अभि-मृश्यते पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिमिति यज्ज्योतिःशास्त्रे उक्तं तदिहोच्यते। हे अग्ने त्वं संवत्सरोऽसि सर्वस्य सरितासि नच त्वामन्यः सरिता यः त्वं परिवत्सरोऽसि। यश्च इदावत्सरोऽसि यश्च इद्वत्सरोऽसि इदा इदानीमिति समानार्थौ इदिति निपातः। यश्च वत्सरोऽसि निर्विशेषणः तस्य भवतः उषसः कल्पन्ताम् अवयवत्वे-न क्लृप्ता भवन्तु एवमहोरात्राः अर्धमासाः मासाः ऋतवश्च कल्पन्तां संवत्सरश्च कल्पताम्। हे अग्ने त्वं च प्रेत्यै प्रगमनाय एत्यै आगम-नाय च समं च प्रसारय च स्वेच्छया संकोचविकाशधर्मा भवेति भावः सुपर्णचिदसीति आकृतिवचनं सुपर्णवद्धीयत इति तया दे-वतया वाचा सहितः। अङ्गिरस्वत् प्राणा इव ध्रुवः शाश्वतिकः सीद अवस्थानं कुरु अभित्वा शूर नोनुम इत्यादिपरमेष्ठ्यपश्यत्॥ ४५॥

इति मन्त्रभाष्ये सप्तविंशोऽध्यायः॥ २७॥

अष्टाविंशोऽध्यायः।

होता॑ यक्षत् स॒मिधे॒न्द्रमि॒डस्प॒दे नाभा॑ पृथि॒व्या अधि॑। दि॒वो वर्ष्म॒न्त्समि॑ध्यत॒ ओजि॑ष्ठश्चर्षणी॒सहां॒ वेत्वाज्य॑स्य॒ होत॒र्यज॑॥ १॥

(१) होता यक्षत्समिधेन्द्रम्। सौत्रामण्यामैन्द्रस्य पशोः प्रयाजप्रैषाः। एकादश ऐन्द्रानेके प्रथमस्येत्यैन्द्राः। आप्रीदेवतास्तु इन्द्रस्यैव विभूतय इति॥ होता यक्षत् दैव्यो होता यजतु समिधा इध्मकाष्ठेन हविर्भूतेन। समिधा वा सहितम् इन्द्रम् य इन्द्रः त्रिषु स्थानेषु समिध्यते। प्रथमन्तावत् इडस्पदे पृथिव्या यजनाय प्रदेशे समिध्यते अग्न्यात्मना द्वितीयं विद्युदात्मना समिध्यते। नाभौ पृथिव्या अधि पृथिवीशब्देनान्तरिक्षमुच्यते नाभिभूते अन्तरिक्षप्रदेशे अधे उपरि ततः तृतीयमादित्यात्मना दिवः द्युलोकस्य वर्ष्मन् वर्षिष्ठे प्रदेशे समिध्यते एवं त्रिस्थान

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा। होता यक्षत्समिधेन्द्रम्। सौत्रामण्याम् ऐन्द्रस्य पशोः प्रयाजप्रैषाः प्रयाजप्रैषाः एकादश ऐन्द्रानेके प्रथमस्येत्यैन्द्रा आप्रीदेवतास्तु इन्द्रस्यैव विभूतय इति दैव्यो होता समिधा इध्मकाष्ठेन हविर्भूतेन समिधा वा सहितम् इन्द्रं यक्षत् यजतु य इन्द्रः त्रिषु स्थानेषु समिध्यते प्रथमम् इडस्पदे पृथिव्या यजनीये प्रदेशे अग्न्यात्मना समिध्यते पृथिवीशब्देनान्तरिक्षं पृथिव्याः नाभा नाभौ अन्तरिक्षमध्ये द्वितीयं विद्युदात्मना समिध्यते तृतीयम् अधि उपरि दिवो वर्ष्मन् वर्षिष्ठे प्रदेशे आदित्यात्मना समिध्यते किंभूतः चर्षणीसहां चर्षणयो मनुष्यास्तान् सहन्ते अभिभवन्ति ते चर्षणीसहः देवाः तेषां मध्ये ओजिष्ठः अतिशयेन बली स चेज्यमानः आज्यस्य स्वं भागं वेतु पिबतु हे मनुष्यहोतः त्वमपि यज॥ १॥

इन्द्रः स्तूयते। यश्च ओजिष्ठः अतिशयेन बली। केषां मध्ये। चर्षणीसहाम् चर्षणयो मनुष्याः तान् ये सहन्ते अभिभवन्ति ते चर्षणीसहः देवाः तेषां चर्षणीसहां देवानां मध्ये। स नेज्यमानो वेतु पिबतु स्वमंशमाज्यस्य। त्वमपि हे मनुष्यहोतः यज ॥ १ ॥

इन्द्रमिडः सौत्रामणिकोऽध्याय इति कात्यायनोक्तेः (अनुक्रमण्याम्) अयमध्यायः सौत्रामणीसम्बन्धी सौत्रामण्यङ्गभूतयोरैन्द्रवायोधसयोराद्यन्तपश्वोः प्रयाजानुयाजप्रैषरूपः ततश्च प्रजापत्यदिवसरस्वत्योऽध्यायस्य ऋषयः। आद्येऽनुवाके एकादशैन्द्रपशोः सम्बन्धिन आप्रीदेवनाः समित्तनूनपादित्यादिदेवताकाः प्रयाजानां प्रैषाः होता यक्षत्समिधेन्द्रमित्यादयो होता यक्षदिन्द्रमित्यन्ताः (११ क०)। अथ मन्त्रार्थः। आर्षी त्रिष्टुप्। दैव्यो होता समिधा समित्काष्ठेन हविर्भूतेन सामिधाप्रीदेवतया सहितं या इन्द्रं यक्षत् यजतु। य इन्द्रः त्रिषु स्थानेषु समिध्यते दीप्यते। प्रथमम इडः पृथिव्याः पदे यजनीये प्रदेशे अग्न्यात्मना समिध्यते। द्वितीयम् पृथिव्याः नाभौ पृथिवीशब्देनान्तरिक्षम अन्तरिक्षस्य मध्ये विद्युदात्मना समिध्यते अधि उपरि। तृतीयम् दिवो वर्ष्मन् स्वर्गस्य वर्ष्मणि वर्षिष्ठे प्रदेशे आदित्यात्मना समिध्यते। कीदृशः चर्षणिसहामोजिष्ठः चर्षणयो मनुष्यास्तान् सहन्तेऽभिभवन्ति चर्षणिसहो मनुष्याभिभावुकास्तेषां मध्ये ओजस्वितमः अत्यन्तमोजस्वी ओजिष्ठः इष्ठनि परे विन्मतोर्लुगिति (पा० ५, ३, ६५) विनो लुकि टिलोपे ओजिष्ठ इति रूपम्। संहितायां चर्षणिशब्दस्य दीर्घः। एवंविध इन्द्रः आज्यस्य वेतु घृतं पिबतु। हे मनुष्यहोतः! त्वमपि यज ॥ १ ॥

होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम्। इन्द्रं देवꣳ स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज ॥ २ ॥

(१)होता यक्षत्तनूनपातम् आग्नीदेवताभिप्रायमिन्द्राभिप्रायं वा स हि मरीचेः पौत्रः । दैव्यो होता यजतु तनूनपातमिन्द्रम् ऊतिभिरवनैः सहितम् जेतारम् अयज्वनाम् अपराजितम् इन्द्रं देवं दानादिगुणयुक्तम् स्वर्विदम् । स्वर्गं वेत्ति जानाति स्वर्गं वा विद्यते इति स्वर्वित् तं स्वर्विदम् । केन यजतु । पथिभिर्मधुमत्तमैः । पथिशब्देनात्र हवींष्युच्यन्ते तैर्हि स्वर्गं लोकं प्रतिपतन्ति यजमानाः । हविर्भिः मधुमत्तमैरतिशयेन रससंयुक्तैः । कथंभूतमिन्द्रम् । नराशंसेन यज्ञेन सहितम् तत्र तनूनपात् नराशंसावेकस्मिन्प्रयाजे पठितावत उभयवानयं प्रयाजः । तेजसा च सहितमिन्द्रयं यजतु । स चेज्यमानो वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ २ ॥

अतिजगती । नराशंसेन देवेन युतं तनूनपातमिन्द्रं च देवं होता यजतु । कैः पथिभिः पतन्ति गच्छन्ति स्वर्गं यजमाना यैस्ते पन्थानो हवींषि तैः । कीदृशैः ऊतिभिः अवन्ति तर्पयन्ति ते ऊतयस्तैः ऊतियूतीत्यादिना (पा० ३, ३, ९७) कर्त्तरि निपातः । तथा मधुमत्तमैः मधुर्मधुरस्वादोऽस्ति येषु ते मधुमन्तः अत्यन्तं मधुमन्तो मधुमत्तमाः तैः । कीदृशमिन्द्रं जतारं शत्रूणाम् अपराजितं केनापि न पराभूतम् । स्वर्विदं स्वः स्वर्गं वेत्ति स्वीयं जानाति स्वर्वित् यद्वा स्वः स्वर्गो विद्यते स्वर्वित्तम् विद

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति तद्यथा । होता यक्षत् तनूनपातम् । आग्नीदेवताभिप्रायं मित्राभिप्रायं वा स हि मरीचेः पौत्रः तनूपातम् इन्द्रदेवं च ऊतिभिरवनैः होता यजतु किंभूतं जेतारम् अयज्वनाम् अपराजितं स्वर्विदं स्वर्गं वेत्ति जानातीति स्वर्वित् स्वर्गो वा विद्यत इति स्वर्वित् कैर्यजतु मधुमत्तमैः अतिशयेन रससंयुक्तैः पथिभिर्हव्यैः पथिशब्देन हवींष्युच्यन्ते तैर्हि स्वर्गं प्रति पतन्ति यजमानाः नराशंसेन यज्ञेन तेजसा च सहितम् इन्द्रम् अत्र तनूनपान्नराशंसावेकस्मिन्प्रयाजे पठितावत उभयवानयं प्रायजः वेत्विति पूर्ववत् ॥ २ ॥

सत्तायाम् । कीदृशेन नराशंसेन तेजसा तेजस्विना । एवं देवद्वयुत इन्द्रः आज्यस्य वेतु । शेषं पूर्ववत् । अत्र तनूनपान्नराशंसावेकत्र प्रयाजे पठितावित्युभयवानयं प्रयाजः ॥ २ ॥

होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् । देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥ ३ ॥

(१)होता यक्षदिडाभिरिन्द्रम् । दैव्यो होता यजतु इडाभिः प्रयाजदेवतया सहितमिन्द्रम् ईडितं स्तुतम् आजुह्वानमाहूयमानं यजमानैरनेकशः । अमर्त्यममरणधर्माणम् । स चेज्यमानः देवः द्युस्थान इन्द्रः । देवैः द्युस्थानैः सवीर्यः समानवीर्यः । वज्रहस्तः । पुरन्दरः पुरान्दारयिता । वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ ३ ॥

ब्राह्मी उष्णिक् । होता इडाभिः प्रयाजदेवताभिः सह इन्द्रं यजतु । कीदृशमिन्द्रम् ईडितम् ऋत्विग्भिः स्तुतम् आजुह्वानमाहूयमानम् यजमानैः देवानाह्वयन्तं वा । अमर्त्यममरणधर्माणम् । ईदृशो देव इन्द्रः आज्यस्य वेतु कीदृशो देवः सवीर्य्यः समानं वीर्य्यं यस्य सः सर्वदेवेषु यादृशं वीर्य्यं तदेकस्मिन्निन्द्रे इत्यर्थः । वज्रहस्तः वज्रं हस्ते यस्य । पुरन्दरः पुरं शत्रूणां नगरं दारयति पुरन्दरः । उक्तमन्यत् ॥ ३ ॥

होता यक्षद् बर्हिषीन्द्रं निषद्वरं वृषभं नर्या-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । होता यक्षदिडाभिरिन्द्रम् । इडाभिः प्रयाजदेवतया सह इन्द्रं होता यजतु किमिन्द्रम् ईडितं स्तुतम् आजुह्वानम् आह्वयमानं यजमानैः अमर्त्यम् अमरणधर्माणं स चेज्यमानः अज्यस्यांशं वेतु कीदृशः देवः द्युस्थानः देवैः सवीर्यः समानवीर्यः वज्रहस्तः पुर शत्रूणां दारयतीति पुरन्दरः ॥ ३ ॥

पसम् । वसुंभी रुद्रैरांदित्यैः सयुगभिर्बर्हिरासंदद्वे-त्वाज्यंस्य होतर्यजं ॥ ४ ॥

होता यक्षद्बर्हिषीन्द्रम् । दैव्यो होता यजतु बर्हिषीन्द्रम् बर्हिषि प्रयाजदेवतायां स्थितमिन्द्रम् । यज्ञसाधनमेवात्र प्रयाजदेवता बर्हिः । कथंभूतमिन्द्रम् निषद्वरं निषदनं कुर्वतां वरमुत्कृष्टम् । वृषभं वर्षितारञ्च नर्यापसम् । नृभ्यो मनुष्येभ्यो हितं नर्यं नर्यम् अपः कर्म यस्य स नर्यापाः तं नर्यापसमिन्द्रं । स चेज्यमानः वसुभिः रुद्रैः आदित्यैः । सयुग्भिः समानयोजनैः बर्हिः आसदत् । आसीदत्विति लकारव्यत्ययः । वेतु पिबतु आज्यस्य स्वमंशम् त्वमपि हे मनुष्यहोतर्यज ॥ ४ ॥

आर्षी त्रिष्टुप् । बर्हिषि प्रयाजदेवतायां स्थितमिन्द्रं होता यजतु । कीदृशमिन्द्रं निषद्वरं निषीदन्ति निषद उपवेष्टारः तेषां वरं श्रेष्ठम् वृषभं वर्षितारम् नर्यापसं नरेभ्यो यजमानेभ्यो हितं नर्यमपः कर्म यस्य स नर्यापाः तम् नराणां हितकारिणम् स इन्द्रो वसुभिः रुद्रैः आदित्यैः सवनत्रयदेवैः सहितः बर्हिरासदत् आसीदतु आज्यस्य वेतु च । कीदृशैर्वस्वादिभिः सयुग्भिः सह युञ्जन्ति ते सयुजः तैः समानयोगैः ॥ ४ ॥

होतां यक्षदोजो न वीर्यंᳬ सहो द्वार इन्द्रंमवर्ध-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । होता यक्षद् बर्हिषीन्द्रम् । बर्हिषि प्रयाजदेवतायां स्थितम् इन्द्रं होता यजतु यज्ञसाधनमेवात्र प्रयाजदेवता किमिन्द्रं निषद्वरम् निषीदन्तीति निषदः तेषां वरं निषदनं कुर्वताम् उत्कृष्टं वृषभं वर्षितारं नर्यापसं नरेभ्यो हितं नर्यं तत् अपः कर्म यस्य स नर्यापाः तम् स इज्यमानः वसुभिः रुद्रैः आदित्यैः सयुग्भिः समानयोजनैः बर्हिः आसदत् आसीदतु लकारव्यत्ययः वेतु च ॥ ४ ॥

यन् । सुप्रायणा अस्मिन् यज्ञे विश्रयन्तामृतावृधो द्वार इन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥

(१)होता यक्षदोजो न । देव्यो होता यजतु । ओजः न इति समुच्चयार्थीयो निपातः । ओजश्च वीर्यश्च सहश्च द्वारश्च इन्द्रियशरीरमनोबलान्यपि समुच्चितानि । कस्माद्धेतोरेतानि यजतु । यत एतानि इन्द्रमवर्द्धयन् वर्द्धयन्ति । इदानीं नवस्तुत्यद्वारः स्तौति । एवमनेन कर्मणा कृतकृत्याः द्वारः । सुप्रायणाः सुगमनाः अस्मिन्यज्ञे विश्रयन्ताम् विश्रिता भवन्तु । ऋतावृधः सत्यवृधो वा । यज्ञवृधो वा इन्द्राय इन्द्रार्थम् कथम्भूताय । मीढुषे सेक्त्रे व्यन्तु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ ५ ॥

अतिजगती । नकारश्चार्थः । या द्वारः प्रयाजदेवा इन्द्रमिन्द्रे ओजो वीर्यं सहश्चावर्धयन् ओज इन्द्रियबलं वीर्यं शरीरं बलं सहो मनोबलम् ता द्वारो होता यजतु । ताश्च द्वारः इन्द्राय इन्द्रार्थं विश्रयन्तां विवृता भवन्तु अस्मिन् यज्ञे आज्यं व्यन्तु च । कीदृश्यो द्वारः सुप्रायणाः सुखेन प्रकृष्टमयनं गमनं यासु ताः विवृतत्वादित्यर्थः । ऋतं यज्ञं वर्धयन्ति ऋतुवृधः संहितायामृतुशब्दस्य दीर्घः । इन्द्राय कीदृशाय मीढुषे मेहति मीढ्वान् तस्मै सेक्त्रे क्वसन्तो निपातः ॥ ५ ॥

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । होता यक्षदोजो न । नकारः समुच्चयार्थः । ओजः वीर्यं सहः क्रमात् इन्द्रियशरीरमनोबलानि द्वारश्च एतानि होता यजतु कुतः यत एतानि इन्द्रम् अवर्द्धयत् इदानीं नवस्तुत्यद्वारः स्तौति सुप्रायणाः सुगमनाः ऋतावृधः सत्यस्य यज्ञस्य वा वर्द्धयित्र्यो द्वारः अस्मिन् यज्ञे मीढुषे सेक्त्रे इन्द्राय इन्द्रार्थं विश्रयन्तां विवृता भवतु ताश्च व्यन्तु पिबन्तु ॥ ५ ॥

होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यस्य होतर्यज ॥ ६ ॥

(१) होता यक्षदुषे। दैव्यो होता यजतु। उषे नक्तोषासाविति प्राप्ते पूर्वपदलोपश्छान्दसः। इन्द्रस्य धेनू सुदुघे शोभनदोहने मातरा मातरौ। मही महत्यौ। ते चेज्यमाने सवातरौ वातृशब्दो-वत्सवचनः समानो वाता वत्सः ययोस्ते सवातरौ। नकार उपमार्थीयः। एकशिशुके इव गावौ तेजसा - वत्समिव इन्द्रम् अवर्द्धताम्। वीताम्पिबताम् आज्यस्य स्वयंशं त्वमपि हे मनुष्यहोतर्यज ॥ ६ ॥

आर्षी त्रिष्टुप्। उषे अत्र पूर्वपदलोपः होता उषे नक्तोषे यजतु ते च तेजसा इन्द्रमवर्धताम् आज्यं वीतां पिवतां च। तत्र दृष्टान्तः सवातरौ न न इवार्थे समानो धाता वत्सतरो ययोस्ते सवत्सतरौ एकशिशुके गावौ वत्सं यथा वर्धयेते तथेन्द्रं वर्धयताम्। कीदृश्यौ उषे इन्द्रस्य धेनू धनुतस्ते धेनू प्रीणयित्र्यौ। सुदुघे सुष्ठु दुग्धस्ते सुदुघे दुग्धं पूरयन्त्यौ। मातरा मातरौ विभक्तेराकारः मातृवत्पालिके। मही मह्यौ महत्यौ विभक्तिलोपः ॥ ६ ॥

होता यक्षद्दैव्या होतारा भिषजा सखाया हवि-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति। तद्यथा। होता यक्षदुषे नक्तोषासाविति प्राप्ते पूर्वपदलोपश्छान्दसः। होता उषे नक्तोषे यजतु कीदृश्यौ इन्द्रस्य धेनू सुदुघे सुदोहने मातरा मातरौ मही महत्यौ ते चेज्यमाने ते सवातरौ वातृशब्दो वत्सवचनः समानो वाता वत्सो ययोस्ते सवातरौ एकशिशुके गावौ वत्सं न वत्समिव तेजसा इन्द्रम् अवर्द्धतां वर्द्धयेताम् आज्यस्य वीतां पिवतां च ॥ ६ ॥

पेन्द्रं भिषज्यतः। कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज॥ ७॥

(१)होता यक्षद्दैव्या होतारा। दैव्यौ होतारौ। भिषजा भिषजौ देवानां वैद्यौ सखाया सखायौ समानख्यानौ। यौ च हविषा इन्द्रम् भिषज्यतः। यौ च कवी क्रान्तदर्शनौ यौ च देवौ द्युस्थानौ यौ च प्रचेतसौ प्रकृष्टज्ञानौ यौ च इन्द्राय इन्द्र इति विभक्तिव्यत्ययः। धत्तः स्थापयतः इन्द्रियं वीर्यम्। तौ चेज्यमानौ वीताम्पिबताम् आज्यस्य स्वमंशन्त्वमपि हे मनुष्यहोतर्यज॥ ७॥

अतिजगती। दैव्यौ होतारौ अयं चाग्निरसौ च मध्यमस्तौ होता यजतु यौ च हविषा इन्द्रं भिषज्यतः चिकित्सतः भिषज् रुग्जये कण्ड्वादिभ्यो यक्। इन्द्राय इन्द्रियं वीर्यं धत्तः च तौ आज्यं वीताम्। कीदृशौ भिषजा भिषजौ चिकित्साकुशलौ। सखाया सखायौ अन्योन्यं स्नेहवन्तौ। कवी क्रान्तदर्शनौ देवौ दीप्यमानौ। प्रचेतसौ प्रकृष्टं चेतो ज्ञानं ययोस्तौ॥ ७॥

होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडा सरस्वती भारती महीः। इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज॥ ८॥

(२)होता यक्षत्तिस्रो देवीः। न भेषजं त्रयस्त्रिधातवोऽपसः

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पु० नास्ति। तद्यथा। होता यक्षद्दैव्या। अयं चाग्निरसौ च मध्यमः वायौ भिषजौ सखायौ दैव्यौ होतारौ होता यजतु यौ हविषा इन्द्रं भिषज्यतः कवी क्रान्तदर्शनौ प्रचेतसौ प्रकृष्टज्ञानौ यौ देवौ इन्द्राय इन्द्रे विभक्तिव्यत्ययः इन्द्रियं वीर्यं धत्तः स्थापयतः तौ च वीताम्॥७॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु-

शमितारं हविषा संस्कर्तारम् शतक्रतुम्बहुकर्माणम्। धियो जोष्टारम् बुद्धेः कर्मणो वा सेवितारम्। इन्द्रियं वीर्यात्मकम् स चेज्यमानः। मध्वा समञ्जन् मधुस्वादुना घृते समञ्जन् यज्ञं संमृष्टीकुर्वन्। पथिभिः सुगेभिः मार्गैः शोभनगमनैः। स्वदाति यज्ञम्। स्वदातिः प्रापणार्थः। प्रापयतु यज्ञे देवाननु मधुना मधुस्वादुना घृतेन सहितम्। वेतु च पिबतु चाज्यस्य स्वमंशं त्वमपि हे मनुष्य होतर्यज॥ १०॥

शाकरी। होता वनस्पतिं प्रयाजदेवतां यजतु। कीदृशं वनस्पतिं शमितारम् उलूखलादिरूपेण हविषां संस्कर्त्तारम्। शतक्रतुं शतं क्रतवः कर्माणि यस्य तं बहुकर्माणम्। धियो जोष्टारं बुद्धेः सेवितारम्। इन्द्रियमिन्द्रस्यात्मनो हितं वीर्यं रूपं वा। स त्वष्टा मध्वा मधुना स्वादुना घृतेन समञ्जन् यज्ञं संम्रक्षयन् सन् सुगेभिः सुगैः सुगमनैः पथिभिर्मार्गैः मधुना स्वादुना घृतेन युतं यज्ञं स्वदाति देवान् प्रापयति स्वदातिः प्रापणार्थः स आज्यं वेतु। सुखेन गम्यते येषु ते सुगाः सुदुरोरधिकरण इति (पा० ३, २, ४८ वा० ३) गमेर्डप्रत्ययः॥ १०॥

होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम्। स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज॥ ११॥

यजतु किम्भूतं शमितारं हविषां संस्कर्तारं शतक्रतुं बहुकर्माणं धियो जोष्टारं बुद्धेः सेवितारम् इन्द्रियं वीर्यात्मकं स चेज्यमानः मध्वा मधुस्वादुना घृतेन समञ्जन् यज्ञं संम्रक्षयन् सुगेभिः सुगमनैः पथिभिर्मार्गैः मधुना स्वादुना घृतेन सहितं यज्ञं स्वदाति देवान् प्रति प्रापयति स्वदातिः प्रापणार्थः वेतु च॥ १०॥

(१)होता यक्षदिन्द्रम् । दैव्यो होता यजतु इन्द्रम् । स्वाहाकारेणाज्यदेवतानाञ्च संस्थाङ्करोतु । स्वाहा मेदसः । स्वाहाकारेण मेदो देवतानाञ्च संस्थाङ्करोतु । स्वाहा स्तोका विन्दवः । स्वाहाकारेण च स्तोकदेवतानां संस्थां करोतु । स्वाहा स्वाहाकृतीनाम् स्वाहाकारेण च स्वाहाकृतिदेवतानां संस्थां करोतु । स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य । प्रयाजानुयाजा वै देवा आज्यपाः । स्वाहाकारेण वै देवा आज्यपाः जुषाणाः सेवमानाः प्रीयमाणा वा इन्द्र आज्यस्य वेतु स्वमंशं पिबतु स्वमपि हे मनुष्य होतर्यज ॥ ११ ॥

शाकरी । होता इन्द्रं यजतु । स्वाहाकारेणाज्यस्य देवान् यजतु । स्वाहाकारेण मेदसो देवान् यजतु । स्वाहाकारेण स्तोकानां सोमाविन्दूनां देवान् यजतु । स्वाहाकारेण स्वाहाकृतीनां देवानां स्वाहाकृतीः प्रयाजदेवताः यजतु । स्वाहाकारेण हव्यसूक्तीनां हव्यसम्बन्धिसुवचनानां देवान् यजतु । स्वाहाकारेणाज्यपा देवाः प्रयाजाः जुषाणाः प्रीयमाणा भवन्तः सन्तः इन्द्रश्चाज्यं व्यन्तु पिबन्तु ॥ ११ ॥

देवं बर्हिरिन्द्रꣳ सुदेवं देवैर्वीरवत् स्तीर्णं वेद्यामवर्धयत् । वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतोऽत्यगाद् वसुवने वसुधेयस्य वेतु यज ॥ १२ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । होता यक्षदिन्द्रम् । होता इन्द्रं यजतु आज्यस्य देवतानां स्वाहाकारेण संस्थां करोतु स्वाहाकारेण मेदसः मेदो देवतानां संस्थां करोतु स्वाहाकारेण स्तोकानां स्तोकदेवतानां संस्थां करोतु स्तोका विन्दवः स्वाहाकारेण स्वाहाकृतिदेवतानां संस्थां करोतु स्वाहाकारेण च हव्यसूक्तीनां हव्यसाधुवचनानां संस्थां करोतु स्वाहा देवाः स्वाहाकारेण आज्यपाः देवाः प्रयाजाः जुषाणाः प्रीयमाणा भवन्ति इन्द्र आज्यस्य यदण होतर्यज ॥ ११ ॥

(१) देवं बर्हिः। एकादशानुयाजमैषाः ऐन्द्राः मैत्रावरुणो ब्रवीति यज्ञसाधनभूतं बर्हिरिह देवता। यद्देवं बर्हिः। इन्द्रमवर्द्धयदिति सम्बन्धः कथम्भूतमिन्द्रम्। सुदेवम् शोभना देवा मरुदादयो यस्य स सुदेवः तं सुदेवम्। देवैर्वीरवत् बर्हिषो विशेषणमेतत्। देवः हविषा दातृभिः ऋत्विग्भिः वीरवद् वीरयुक्तम्। यच्च स्तीर्णं वेद्याम् यच्च बर्हिः वस्तोर्वृतम् अहनि लूनम् यच्च अक्तो रात्रौ प्रभृतम् प्रधारितम्। वस्तोरहर्वचनः अक्तो रात्रिवचनः इत्यव्ययद्वयम्। इन्द्रमवर्द्धयदिति सर्वत्र संबध्यते यच्च राया धनेन हविर्लक्षणेन अन्यान्यजमानान् बर्हिष्मतः बर्हिषा संयुक्तान् अत्यगात् अतिक्रम्य गतं संस्कारोत्कर्षात् तद्बर्हिः वसुवने वसुवननाय च वसुधेयस्य वसुधानाय धननिखननाय च वेतु पिबतु। त्वञ्च हे होतः यज ॥ १२ ॥

एकादश ऐन्द्रपशोः सम्बन्धिन एवानुयाजप्रैषाः। देवता बर्हिरादयः॥ अतिजगती। मैत्रावरुणो वदति। बर्हिः देवं बर्हिः संज्ञानुयाजदेवता इन्द्रमवर्धयत् पुष्णाति। किम्भूतं बर्हिः सुदेवं शोभना देवा मरुदादयो यत्र तत। तथा देवैः दातृभिः ऋत्विग्भिः

(१) अत्र वाराणसो० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति। तद्यथा। देवं बर्हिः। एकादशानुयाजप्रैषाः एन्द्राः मैत्रावरुणो ब्रवीति बर्हिरिह देवता यत् बर्हिर्देवः शोभना देवा मरुदादयो यस्य तमिन्द्रमवर्द्धयत् किम्भूतं बर्हिः देवैर्दातृभिर्ऋत्विग्भिः कृत्वा वीरवत्। वीरयुतं तथा वेद्यां स्तीर्णं वस्तोः अहनि वृतं लूनम् अक्तोः रात्रौ प्रभृतं प्रधारितं वस्तोः अक्तोः इत्यव्ययद्वयं क्रमादहर्निशावाचकं यच्च बर्हिः राया धनेन बर्हिषा बर्हिष्मतः बर्हिषा युक्तानन्यान् यजमानान् अत्यगात् अतिक्रम्य गतं संस्कारोत्कर्षात् तद्बर्हिः वसुवने वसुवननाय वसुधेयस्य वसुधानाय धननिखननाय वेतु पिबतु हे होतः त्वं च यज एवमग्रेऽपि ॥ १२ ॥

वीरवत् वीरयुतम् । वेद्यां स्तीर्णमाच्छादितम् । वस्तोरह्नि धृतं लूनम् धातूनामनेकार्थत्वात् अक्तोः रात्रौ प्रभृतं प्रकर्षेण धृतम् वस्तोरक्तोरित्यव्ययद्वयं क्रमादहर्निशावाचकम् । यत् बर्हिः राया हविर्लक्षणेन धनेन बर्हिष्मतः बर्हिषा युक्तानन्यान् यागानत्यगात् अतिक्रम्य गतं संस्कारोत्कर्षात् तत् बर्हिः वसुवने वसुवनाय धनदानाय वसुधेयस्य वसुधेयाय वसुनो धानाय निधानाय यजमानगृहे निखननाय वेतु आज्यं पिबतु । वसुवने वसुधेयस्येति सप्तमीषष्ठ्यौ चतुर्थ्यर्थे । हे मनुष्यहोतः ! त्वमपि यज । एवमग्रेऽपि कण्डिकाशेषो व्याख्येयः ॥ १२ ॥

देवीर्द्वार इन्द्रꣳ संघाते वीड्वीर्यामन्नवर्धयन् । आ वत्सेन तरुणेन कुमारेण च मीवतापार्वाणꣳ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥ १३ ॥

(१) देवीर्द्वारः यज्ञगृहद्वार उच्यते या देव्यो यज्ञगृहद्वारः इन्द्रम् यामन् यामनि कर्मप्राप्तौ सत्याम् अवर्द्धयन् । याश्च संघाते देहलीकपाटपुटार्गलादिसंघाते सति वीड्वीः दृढाः । नहि संघातमन्तरेण तासां दृढत्वमुपपद्यते । ता इदानीम् आ आभिमु-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुद्रित पुस्तके नास्ति तद्यथा । देवीर्द्वारः । अत्र द्वारः गृहद्वारः याः द्वारो देव्यो यामन् यामनि कर्माणि इन्द्रमवर्द्धयन् किम्भूताः सङ्घाते देहलीकपाटार्गलादिसङ्घाते सति वीड्वीः दृढाः नहि सङ्घातमन्तरा तासां दृढत्वं तरुणेन कर्मक्षमेण वत्सेनात् ता द्वारः आ आभिमुख्येन स्थित्वा रेणुककाटं काटः कूपः ककारः कुत्सितार्थः रेणुभिः कः कुत्सितो यः काटस्तम् अपनुदन्ताम् अपनयन्तु कीदृशं कूपं तरुणेन कर्मक्षमेण वत्सेन मीवता मीङ् हिंसायाम् मयनं मीः शत्रूणां हिंसावता कुमारेण च अर्वाणम् अर्यते गम्यते यस्मिन्निति अर्वा तं वत्सैः पुत्रैश्च यत्र पत्यते तं कूपम् उपलक्षणमेतत् यज्ञभ्रंशकराणि कूपादीनि यज्ञमार्गादपनयन्त्वित्यर्थः व्यन्तु च ॥ १३ ॥

त्त्येन स्थित्वा वत्सेन तरुणेन कर्मक्षमेण कुमारेण च भीवता मीङ् हिंसायाम् । शत्रूणां हिंसावतामप अर्वाणम् रेणुककाटम् समासपदमेतत् नुदन्ताम् । इति पदानि अपनुदन्तामपनयन्तु । वत्सैः पुत्रैश्च अर्वते गम्यते पत्यते यस्मिन्नित्यर्वा तमर्वाणम् । रेणुककाटम् । काटः कूपः । ककाराभ्यासः कुत्सार्थः । रेणुः पूर्णः कुत्सितः कूपः रेणुककाटः । तं रेणुककाटम् उपलक्षणमेतत् यज्ञभ्रंशकराणि कूपादीनि यज्ञमार्गादपनयन्त्वित्यर्थः । वसुवननाय वसुनिधानाय च व्यन्तु पिबन्तु त्वमपि हे होतर्यज ॥१३॥

एकाधिका शक्वरी । यज्ञगृहद्वारोऽत्र देवताः । यच्छन्ति नियता भवन्ति ऋत्विजो यत्रेति याम कर्म यमेरनिण्प्रत्ययो वृद्धिश्च सप्तम्या लुक् यामनि कर्मणि या द्वारो देव्यः इन्द्रमवर्धयन् । कीदृश्यो द्वारः सघाते देहलीकपाटद्वारशाखार्गलादिसमूहे सति, वीड्वीः वीड्व्यः दृढाः सङ्घातं विना न द्वारां दृढत्वं स्यात् । ता द्वारो रेणुककाटमपनुदन्ताम् काटः कूपः कुत्सितः काटः ककाटः रेणुभिः कृत्वा ककाटो रेणुककाटः तम् अपनुदन्तां निवर्तयन्तु । किमित्यतो विशेषणे । कीदृशं कूपं वत्सेन गोपुत्रेण तरुणेन कुमारेण च आ आभिमुख्येन अर्वाणम् अर्यते गम्यते यत्रेत्यर्वा तम् ऋ गतावित्यतोऽन्येभ्योऽपि दृश्यन्त इति (पा० ३, २, ७५) वनिप्प्रत्ययः । कीदृशेन भीवता भीञ् हिंसायां भयनं भीः क्विप् भीरस्यास्ति भीवान् तेन हिंसाशीलेन । हिंसाशीलाश्चञ्चला उच्चलन्तो वत्साः कुमाराश्च यत्र पतन्ति तं कूपमपनुदन्त्वित्यर्थः उपलक्षणमेतत् यज्ञप्रजाविघ्नकराणि कूपादीनि मार्गादपनयन्त्वित्याशयः । ता व्यन्तु च ॥ १३ ॥

देवी उषासानक्तेन्द्रं यज्ञे प्रयत्यह्वेताम् । दैवीर्विशः प्रायांसिष्टाᳪं सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज ॥ १४ ॥

(१) देवी उपासा नक्ता । ये देव्यौ उपाश्च नक्ता रात्रिश्च इन्द्रं यज्ञे प्रयति गच्छति वर्तमाने अह्वेताम् आहूतवत्यौ वर्द्धनाय । ये च देव्यौ दैवीर्विशः । वसवो रुद्रा आदित्या विश्वेदेवा मरुत इत्यादिकाः प्रति अयासिष्टाम् गतवत्यौ स्वेन सम्भोगेन । यद्वा । देव्यौ वा एता विशो यत्पशव इति श्रुतिः दैवीर्विशः यज्ञाङ्गभूतान्पशून्प्रति अयासिष्टां गतवत्यौ अनुयाजेषु हि तयोर्भाग इत्यभिप्रायः । ये च सुप्रीते साधुप्रीते । ये च सुधिते साधुहिते । तं वसुवननाय वसुनिधानाय च वीतां पिबतां त्वमपि हे होतर्यज ॥ १४ ॥

ब्राह्मी उष्णिक् । उपाश्च नक्ता च उपासानक्ता समासे उषः शब्दस्य उपसादेशः अहोरात्राधिष्ठात्र्यौ देवी देव्यौ यज्ञे प्रयति प्रवर्तमाने सति इन्द्रमह्वेतामाहूतवत्यौ । प्रैति प्रयन् प्रपूर्वादिणः शतृ । ये च दैवीः देवसम्बन्धिनीर्विशः प्रजाः प्रायासिष्टां प्रगतवत्यौ यातेर्लुङ् वसवो रुद्रा आदित्या विश्वे देवा मरुत इत्यादयो देवप्रजाः । ते च वीतां पिबताम् । कीदृश्यौ सुप्रीते अतितुष्टे सुधिते सुतरां हिते ॥ १४ ॥

देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धताम् । अयाव्यन्याघा द्वेषाᳪस्यान्या वक्षद्वसु वार्याणि यजमाना-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पुस्तके नास्ति तद्यथा । देवी उपासा नक्ता । उपाश्च नक्ता रात्रिः ये एते देव्यौ यज्ञे प्रयति प्रगच्छति प्रवर्तमाने सति इन्द्रम् आह्वेताम् आहूतवत्यौ ये च देव्यौ दैवीः विशः वसवो रुद्रा आदित्याः विश्वे देवा मरुत इत्यादिकाः प्रति प्रयासिष्टां गतवत्यौ स्वेन सम्भोगेन यद्वा देव्यो वा एता विशो यत् पशव इति श्रुतेः । यज्ञाङ्गभूतान् पशून् प्रति अयासिष्टाम् अनुयाजेषु हि तयोर्भागः । कीदृश्यौ सुप्रीते साधुप्रीते सुधिते साधुहिते ते च वीताम् ॥ १४ ॥

य शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १५ ॥

(१)देवी जोष्ट्री। देव्यौ जोपयित्र्यौ। इदानीन्देवताविकल्पः। द्यावापृथिव्याविति वाहो रात्रे इति वा । सस्यञ्च समा चेति कात्यक्यः ये देव्यौ जोपयित्र्यौ। वसुधिती वसुधान्यं याते वसुनो धारयित्र्यौ वा । ये च देवमिन्द्रम् अवर्द्धताम् अवर्द्धयताम् । अयाव्यन्याघा द्वेषांसि ययोश्च मध्ये अयावि। यु पृथग्भावे पृथक्करोति लकारव्यत्ययः । अन्या एका अघा अघानि पापानि द्वेषांसि च दौर्भाग्यानि आ अन्यावक्षत् वसु वार्याणि यजमानाय। अन्या एका आवक्षत् आवहति वसूनि वरणीयानि यजमानार्थम् । कथम्भूते शिक्षिते विदितवेद्ये तत्त्वज्ञे। ते च वसुवननाय वसुधानाय च वीतां पिबतान्त्वमपि हे होतर्यज ॥ १५ ॥

एकाधिकातिजगती । जोष्ट्री जुषेते ते जोष्ट्र्यौ प्रीतियुक्ते देवी देव्यौ वसुधिती वसुनो धनस्य धितिर्धारणं याभ्यां ते द्यावापृथिव्यौ अहोरात्रे वा सस्यं च समा चेति कात्यक्यः (निरु० ९; ४१)। ते इन्द्रं देवमवर्धतामवर्धयताम् तयोर्मध्ये अन्या एका अघा अघानि पापानि द्वेषांसि दौर्भाग्यानि च अयावि यु पृथग्भावे दूरीकरोति यौतेश्छिग् लकारव्यत्ययः। अन्या द्वितीया

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पुस्तके नास्ति तद्यथा। देवी जोष्ट्री। जोष्ट्री जोपयित्र्यौ प्रीते वसुधिती वसुनो धारयित्र्यौ देवी देव्यौ द्यावापृथिव्यौ अहोरात्रे वा इन्द्रं देवम् अवर्द्धताम् अवर्द्धयतां तयोर्मध्ये अन्या एका आघा अघानि पापानि द्वेषांसि दौर्भाग्यानि च अयावि यु पृथग्भावे पृथक् करोति लकारव्यत्ययः। अन्या द्वितीया यजमानाय वार्याणि वरणीयानि वसु वसूनि आवक्षत् आवहति । किम्भूते ते विदितवेद्ये तत्त्वज्ञे ते च वीतां पिबताम् ॥ १५ ॥

वार्याणि वरणीयानि भोगयोग्यानि वसु वसूनि धनानि आवक्षत् आवहति । कीदृश्यौ ते शिक्षिते विदितवेद्ये तत्त्वज्ञे । ते वीताम् ॥ १५ ॥

देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्धताम् । इषमूर्जमन्या वक्षत् सग्धिꣳ सपीतिमन्या नवेन पूर्वं दयमाने पुराणेन नवमधातामूर्जमूर्जाहुती ऊर्जयमाने वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १६ ॥

(१)देवी ऊर्जाहुती । अधस्तनप्रैषोक्त एव देवताविकल्पः । ये देव्यौ ऊर्जाहुती ऊर्जाह्वान्यौ दुघे दोग्ध्र्यौ अन्योऽन्यम् । अनयोरनुसम्भोगमिमाः सर्वाः प्रजाः अनुसम्भुञ्जत इति श्रुतिः । सुदुघे साधुदोहने ये च पयसा इन्द्रम् अवर्द्धतामवर्द्धयताम् । ययोश्च । इषमन्नम् ऊर्जश्च तदुपसेचनन्दध्यादि अन्या एका आवक्षत् आवहति यजमानाय । सग्धिं सपीतिमन्या अ-

(१)अत्र वाराणसीं०लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु० पुस्तके नास्ति तद्यथा। देवी उर्जाहुती। अधस्तनप्रैषोक्तो देवताविकल्पः। ये देव्यौ उर्जाहुती उर्जाह्वान्यौ दुघे दोग्ध्र्यौ अन्योन्यम् अनयोरसंभोगमिमाः सर्वाः प्रजा अनुभुञ्जत इति श्रुतेः सुदुघे साधुदोहने सत्यौ पयसा इन्द्रमवर्द्धताम् ययोश्च अन्या एका इषमन्नमुर्जं दध्यादि च आवक्षत् आवहति यजमानाय अन्या सग्धिं । सपीतिं चावक्षत् सामानां अग्धिं पुत्रादिभिः । समानां पीतिं पानं च देव्यौ दयमाने रक्षन्त्यौ कृपयन्त्यौ सत्यौ नवेन ऊर्जा धान्येन पूर्वं पुरातनम् ऊर्जाम आधातां धारितवन्त्यौ पुराणेन ऊर्जा नवमूर्जम् अधाताम् अक्षयं कृतवत्यावित्यर्थः । कीदृश्यौ आहुती ऊर्जयमाने स्वीकुर्वाणे तथा यजमानाय वीर्याणि वरणीयानि वसु वसूनि ऊर्जयमाने शिक्षिते तत्त्वज्ञे ते च वीताम् ॥ १६ ॥

न्या अपरा च सग्धिं समानां जग्धिं पुत्रपौत्रादिभिः। सपीतिं समानाम्पीतिं पानञ्च आवक्षत्। आवहति यजमानाय न वेन पूर्वं दयमाने पुराणेन नवमधाताम्। ये च देव्यौ नवेन ऊर्जान्धान्येन पूर्वं पुरातनम् ऊर्जन्धान्यम्। दयमाने दयतिः रूपदयाकर्मा। रक्षितवत्यौ सत्यौ अधाताम् पुराणेन च ऊर्जा धान्येन नवमूर्जन्धानम् अधाताम्। धारितवत्यौ। ये च ऊर्जाहुती ऊर्जयमाने स्वीकुर्वाणे। वसूनि वरणीयानि यजमानाय। शिक्षिते विदितवेद्ये च वसुवननाय वसुधानाय च वीताम्पिबताम् त्वमपि हे होतर्यज ॥ १६ ॥

विकृतिः। अधस्तनमन्त्रोक्तो देवताविकल्पः। देवी देव्यौ पूर्वप्रैषोक्ते पयसा दुग्धेनेन्द्रमवर्धताम् अवर्धयताम् छन्दस्युभयथेति (पा० ३, ४, ११७) शप आर्धधातुकत्वाण्णिचो लोपः। कीदृश्यौ ऊर्जाहुती ऊर्जा बलं तद्युक्तो आहुतिराह्वानं ययोस्ते। दुघे दुग्धस्ते दुघे दुहः कप्घश्चेति (पा० ३, २, ७०) कप् घादेशश्च दोग्ध्र्यो अनयोरनु सम्भोगामिमाः सर्वाः प्रजा अनुसम्भुञ्जत इति श्रुतिः। सुदुघे साधुदोहने। तयोर्मध्ये अन्या एका इषमन्नमूर्जं दध्यादि च वक्षत् वहति यजमानाय। अन्या द्वितीया सग्धिं सपीतिं च वक्षत् समाना ग्धिर्भोजनं सग्धिः ताम् समाना पीतिः सपीतिः पुत्रादिभिः सह पानभोजने वहति। ये देव्यौ नवेनान्नेन पूर्वं पुराणमन्नमधाताम् पुराणेनान्नेन नवमन्नमधाताम् यजमानाय वार्याणि वसु वसूनि चाधाताम् अन्नं धनं चाक्षयं कृतवत्यावित्यर्थः कीदृश्यौ दयमाने रक्षन्त्यौ कृपयन्त्यौ वा। ऊर्जाहुती ऊर्जा युता आहुतिर्होमो ययोस्ते। ऊर्जं रसमूर्जयमाने वर्धयन्त्यौ। शिक्षिते तत्पन्ने। ते वीतां पिबताम् ॥ १६ ॥

दे॒वा दैव्या॒ होता॑रा दे॒वमिन्द्र॑मवर्धताम्। ह॒ताघ॑शꣳसावा॒भार्ष्टां॒ वसु॒ वार्या॑णि॒ यज॑मानाय॒ शिक्षि॒तौ व॑सु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑ ॥ १७ ॥

(१)देवा दैव्या । यौ देवौ दैव्यौ होतारौ । एकः पार्थिवोऽग्निः एकश्च मध्यमः । देवमिन्द्रमवर्द्धताम् यौ च हताघशंसाव भार्ष्टां वसु वार्याणि यजमानाय शिक्षितौ । अघं पापं ये शंसन्ति ते अघशंसा हता अघशंसा याभ्यान्तौ हताघशंसौ । आभार्ष्टाम् आहार्ष्टाम् हृतवन्तौ वसूनि वरणीयानि यजमानाय । शिक्षितौ अवगतार्थौ तौ च वसुवननाय वसुधानाय च वीतां पिवतां त्वमपि हे होतर्यज ॥ १७ ॥

अतिजगती । एकः पार्थिवोऽग्निः अन्यो मध्यमः । देवा देवी दैव्या दैव्यौ होतारौ इन्द्रं देवमवर्धताम् यजमानाय वार्याणि वसु वसूनि च आभार्ष्टाम् आहार्षामाहृतवन्तौ आङ्पूर्वाद्धरतेर्लुङ् हस्य भः । कीदृशौ हताघशंसौ अघं पापं शंसतीच्छति अघशंसः पापी हतोऽघशंसो याभ्यां तौ पापिनिवर्त्तकौ । तौ वीताम् ॥ १७ ॥

देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन् । अस्पृक्षद्भारती दिवꣳ रुद्रैर्यज्ञꣳ सरस्वतीडा वसुमती गृहान् वसुवने वसुधेयस्य व्यन्तु यज ॥ १८ ॥

(१)देवीस्तिस्रः । आदरार्थोऽभ्यासः पतिन्देवानाम्पालयि-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवा दैव्या होतारा । एकः पार्थिवोऽग्निः एको मध्यमश्च दैव्यौ होतारौ देवौ इन्द्रं देवम् अवर्द्धताम् । किम्भूतौ हताघशंसौ अघं पापं शंसतीति अघशंसः हतोऽघशंसो याभ्यां तौ शिक्षितौ अवगतार्थौ यौ च यजमानाय वीर्याणि वसूनि आ भार्ष्टाम् आहार्ष्टाम् आहृतवन्तौ तौ च वीताम् ॥ १७ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पुस्तके नास्ति तद्यथा । देवीः तिस्रः यास्तिस्रो देव्यः तास्तिस्रो देव्यः । आदरार्थोऽभ्यासः । पतिं देवानां पालयितारम्

तारम् इन्द्रमवर्द्धयन् । तासां मध्ये भारती भरत आदित्यः तस्य इयम्भारती दिवम् अक्षत् स्पृशति । रुद्रैर्यज्ञं सरस्वतीं सरस्वती च रुद्रैः सहिता यज्ञम् अस्पृक्षत् । इडा च वसुमती वसुभिः तद्वती गृहान् अस्पृक्षत् । गृहशब्देनात्रायं लोकोऽभिधीयते लक्षणया पृथिवीस्थानत्वादिडायाः । ताः वसुवननाय वसुधानाय च व्यन्तु पिबन्तु त्वमपि हे होतर्यज ॥ १८ ॥

अतिजगती । तिस्रो देवीः देव्यः पतिं पालकमिन्द्रमवर्धयन् आदरार्थं पुनरुक्तिः । ता एवाह भारती दिवं स्वर्गमस्पृक्षत् स्पृशति भरतो रविस्तत्कान्तिर्भारती । सरस्वती रुद्रैः युता यज्ञमस्पृक्षत् । वसुमती वसुयुता इडा गृहानस्पृक्षत् गृहशब्देन भूलोकः । ता व्यन्तु ॥ १८ ॥

दे॒व इन्द्रो॒ नरा॒शꣳस॑स्त्रिवरू॒थस्त्रि॒बन्धु॒रो दे॒वमि॒न्द्र॑मवर्धयत् । श॒तेन॑ शितिपृ॒ष्ठाना॒माहि॑तः स॒हस्रे॑ण॒ प्रव॑र्तते मि॒त्रावरु॑णे॒दस्य होत्र॒मर्ह॑तो॒ बृह॒स्पति॑ स्तो॒त्रम॒श्विना॒ध्व॑र्य॒वं व॒सु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑ ॥ १९ ॥

(१) देव इन्द्रः । यज्ञो देवता देवः दानादिगुणयुक्तः यज्ञः-

इन्द्रमवर्द्धयन् तासां मध्ये भारती भरत आदित्यस्तस्य भाः दिवमस्पृक्षत् । स्पृशति सरस्वती रुद्रैः सहिता यज्ञमस्पृक्षत् इडा वसुमती वसुभिः सहिता गृहान् अस्पृक्षत् गृहशब्देनायं लोकोऽभिधीयते । पृथिवीस्थानत्वादिडायाः ताश्च व्यन्तु ॥ १८ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रितपुस्तके नास्ति । तद्यथा । देव इन्द्रो नराशꣳसः । नरा अस्मिन्नासीनाः शंसन्तीति नराशंसो यज्ञः इन्द्रं देवमवर्द्धयत् । कीदृशः । देवः दानादीपनाद्या इन्द्रः परमेश्वरः त्रिवरूथः । वरूथं गृहं त्रीणि वरूथानि सदोहविर्धानाग्नीध्राणि यस्य त्रिबन्धुरः । बन्धुरं सारथिस्थानं त्रीणि बन्धुराणि ऋग्यजुःसामलक्षणानि यस्य

इन्द्रः । इदि परमैश्वर्ये परमेश्वरः । नराशंसः नरा अस्मिन्नासीनाः शंसन्तीति नराशंसः । त्रिवरूथः । वरूथशब्दो गृहवचनः त्रीणि वरूथानि गृहाणि सदोहविर्धानाग्नीध्राणि यस्य स त्रिवरूथः । त्रिवन्धुरः वन्धुरशब्दः सारथिस्थानवचनः । त्रीणि वन्धुराणि सारथिस्थानानि ऋग्यजुःसामलक्षणानि यस्य स त्रिवन्धुरः । देवमिन्द्रमवर्द्धयत् । यश्च शतेन शितिपृष्ठानामाहितः । शतगुणो हि अग्निराधेयः तदभिप्रायमेतत् । सहस्रेण गवां प्रवर्तते । सहस्रेण गवां यष्टव्यमित्युक्तेः । यस्य चास्य मित्रावरुणा इत् मित्रावरुणावेव होत्रमर्हतः । बृहस्पतिश्च स्तोत्रमौद्गात्रमर्हति । अश्विनौ च आध्वर्यवमर्हतः । स वसुवननाय वसुधानाय च वेतु पिबतु त्वमपि हे होतर्यज ॥ १९ ॥

कृतिः । नरा अस्मिन्नासीनाः शंसन्ति नराशंसः यशो देवः इन्द्रं देवमवर्धयत् । कीदृशो नराशंसः इन्द्रतीतीन्द्रः ऐश्वर्यवान् त्रिवरूथः वरूथं गृहम् त्रीणि वरूथानि सदोहविर्धानाग्नीध्राणि यस्य सः । त्रिवन्धुरः त्रीणि बन्धुराणि ऋग्यजुःसामलक्षणानि बन्धनानि यस्य स नराशंसः शितिपृष्ठानां शतेनाहितः सन् सहस्रेण गोसहस्रेण प्रवर्त्तते । शिति श्यामं पृष्ठं यासां ताः शितिपृष्ठा गावः । मित्रावरुणा इत् मित्रावरुणावेवास्य नराशंसस्य होत्रमर्हतः होतृकर्मणि योग्यौ भवत बृहस्पतिः स्तोत्रमौद्गात्रमर्हति अश्विना अश्विनौ अस्याध्वर्यवमर्हतः । स वेतु ॥ १९ ॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्प-

यश्च शितिपृष्ठानां पशूनां शतेन आहितः सन् सहस्रेण प्रवर्त्तते सहस्रगवा यष्टव्यम् इत्युक्तेः । अस्य मित्रावरुणा इत् मित्रावरुणावेव होमर्हतः बृहस्पतिस्तोत्रम औद्गात्रमर्हति अश्विनौ आध्वर्यवम् अर्हतः स वेतु ॥ १९ ॥

स्तो देवमिन्द्रमवर्धयत् । दिवमग्रेणास्पृक्षदान्तरिक्षं पृ॰ थिवीमदृंहीद् वसुवने वसुधेयस्य वेतु यज ॥ २० ॥

(२)देवो देवैः। यूप उच्यते यो देवो वनस्पतिः देवैरेव हिरण्यपर्णः देवाः सौवर्णानि पर्णानि यस्य स तथोक्तः। मधुशाखः मधुरसवती शाखा यस्य स मधुशाखः देवैरेव । सुपिप्पलः साधुफलो देवैरेव । देवमिन्द्रमवर्द्धयत् यश्च दिवम् अग्रेण अस्पृक्षत् स्पृशति । आ अन्तरिक्षम् स्पृक्षदित्यनुषङ्गः । मध्येनेति शेषः साकाङ्क्षत्वात् । पृथिवीमदृंहीत् पृथिवीम् उपरेणेति शेषः अदृंहीत् दृढामकरोत् स वनस्पतिः वसुवननाय वसुधानाय च वेतु पिबतु । त्वमपि हे होतर्यज ॥ २० ॥

अतिशक्करी । यूप उच्यते वनस्पतिर्देवो देवैः सह इन्द्रमवर्धयत् । कीदृशः हिरण्यपर्णः हिरण्यमयानि पर्णानि यस्य । मधुशाखः मधुर्मधुरा रसवती शाखा यस्य । सुपिप्पलः शोभनानि पिप्पलानि फलानि यस्य । यो वनस्पतिरग्रेण दिवं स्वर्गमस्पृक्षत् स्पृशति स्पृशेर्लुङि शल इगुपधादनिटः क्स इति (पा० ३, १, ४५) क्सप्रत्ययः । अन्तरिक्षं मध्येनेति शेषः आ स्पृशति । पृथिवीमुपरेणेति शेषः अदृंहीत् दृढामकरोत् । स वेतु ॥ २० ॥

देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत् । स्वास-

(१) अत्र वाराणसी॰ लि॰ पु॰ संमतोऽयं पाठक्रमः मुम्बई मुद्रितपुस्तके नास्ति । तद्यथा। देवो देवैः । यूप उच्यते यो वनस्पतिर्देवः देवैः इन्द्रः अवर्द्धयत् । कीदृशः हिरण्यपर्णः सौवर्णानि पर्णानि यस्य मधुशाखः रसवती शाखा यस्य सुपिप्पलः साधुफलः यश्च अग्रेण दिवम् अस्पृक्षत् स्पृशति अन्तरिक्षं मध्येनेति शेषः । आ अस्पृक्षत् पृथिवीम् उपरेणेति शेषः । अदृंहीत् दृढामकरोत् । स वेतु ॥ २० ॥

स्थमिन्द्रेणासन्नमन्या बर्ह्हीᳪष्यभ्यभूद्वसुवने वसुधेय-
स्य वेतु यज ॥ २१ ॥

(१)देवं बर्हिः। यद्देवं बर्हिः वारितीनाम्। वाः उदकम्
इण् गतौ वाःउदकमितिः स्थानं यस्य ता वारितय ओषधयः तासां
मध्ये देवं वरिष्ठम्। यद्वा वारि जले इतिः दर्भरूपेणावस्थानं येषां
ते वारितयः दर्भाः। अत्र श्रुतिः। तद्देवाभ्यामुपुनातीत्युपक्रम्य।
तस्मादु हैका आपो वीभत्साञ्चक्रिरे इति अभिधीयते। त इमे
दर्भा इत्यादि। वारितीनान्दर्भाणां सङ्घातभूतम् देवमिन्द्रमवर्द्ध-
यत्। यच्च स्वासस्थम् साधु आस्थेयं देवमनुष्यैः। यत्र च
इन्द्रेण आसन्नम् आश्रितम् यच्च अन्या अन्यानि हवींषि
अभ्यभूत् अभिभवतीति कालव्यत्ययः। तत् वसुवननाय
वसुधानाय च वेतु पिबतु त्वमपि हे होतः यज ॥ २१ ॥

आर्षी त्रिष्टुप्। बर्हिः अनुयाजदेव इन्द्रं देवमवर्धयत् अ-
न्या अन्यानि बर्ह्हींष्यभ्यभूत् अभिभवति तद्वेतु। कीदृशं बर्हिः
वारितीनामोषधीनां मध्ये देवं दीप्यमानं श्रेष्ठम् वारि जले इ-
तिर्गतिर्यासां ता वारितयो जलाश्रिता ओषधयः। स्वासस्थं
सुखेनासनेन स्थीयते यत्र तत् स्वासस्थम्। इन्द्रेणासन्नमाश्रि-
तम् ॥ २१ ॥

देवो अग्निः स्विष्टकृद् देवमिन्द्रमवर्धयत्। स्विष्ट

---

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मु-
द्रितपुस्तके नास्ति। तद्यथा। देवं बर्हिः। वाः उदकम् इतिः इण्
गतौ गतिः उपस्थानं यासां ताः वारितयः ओषधयः तासां मध्ये
देवं श्रेष्ठम् ईदृशं बर्हिः इदं देवम् अवर्द्धयत यच्च स्वासस्थं दे-
वमनुष्यैः साधु आस्थेयम् इन्द्रेण आसन्नम् आस्थितं सत् अन्या
अन्यानि बर्हींषि अभ्यभूत् अभिभवति तत् वेतु ॥ २१ ॥

कुर्वन् स्विष्टकृत् स्विष्टमद्य करोतु नो वसुवने वसु-धेयस्य वेतु यज ॥ २२ ॥

(१) देवो अग्निः । स्विष्टकृत् शोभनमिष्टं कर्तव्यमिति यस्या यमधिकारः देवं च इन्द्रमवर्द्धयत् । यश्च स्विष्टं कुर्वन् स्विष्टकृत-नामभूतः सः । स्विष्टं साध्विष्टम् अद्य अस्मिन्कर्मणि करोतु नो ऽस्माकम् अपि च वसुवननाय वसुधानाय च वेतु पिबतु त्वमपि हे होतर्यज ॥ २२ ॥

आर्षी त्रिष्टुप् । स्विष्टकृद्देवः अग्निः इन्द्रं देवमवर्धयत् स नोऽस्माकं स्विष्टं साधु इष्टं करोतु वेतु च । कीदृशः स्विष्टं कुर्वन् सन् स्विष्टकृत् नाम शोभनमिष्टं कर्त्तव्यमिति तस्याधिकारः ॥ २२ ॥

अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशं बध्नन्निन्द्राय छागम् । सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय छागेन । अघत्तं मेदस्तः प्रति पचताग्रभीदवीवृधत् पुरोडाशेन ॥ त्वामद्य ऋषे ॥ २३ ॥

(२)अग्निमद्य । व्याख्यातः प्रैषः ऐन्द्र एकः पशुरिति वि-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवो अग्निः । शोभनमिष्टं कर्तव्यमिति यस्याधिकारः स स्विष्टकृत् अग्निर्देवः इन्द्रं देवमवर्द्धयत् यश्च स्विष्टं कुर्वन् स्विष्टकृन्नामैवाभूत् सः । अद्य नोऽस्माकं स्विष्टं साधु इष्टं करोतु वसुवननाय वसुधानाय च वेतु हे होतस्त्वमपि यज ॥ २२ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अग्निमद्य व्याख्यातः । प्रैषः ऐन्द्रः एकः पशुरिति शेष. ॥ २३ ॥

ज्ञेयः॥ २३॥

त्वामद्य ऋषे प्रतीकः उभयत्रापि। ऐन्द्रापशुसम्बन्धी सूक्तावाकप्रैषः त्वामद्य ऋषे इत्ययं मन्त्र उभयत्रापि ऐन्द्रानुवाके धायोधसानुवाके च प्रतीकोक्तेः आदिमात्रेणोक्तः सकलो ज्ञेयः। अग्निमद्य एकाधिका प्राजापत्या जगती। सूपस्थाः ब्राह्मी उष्णिक्। त्वामद्य एकाधिका विकृतिः। व्याख्यातः प्रैषः (२१, ५९—६१)॥ २३॥

होता यक्षत्समिधानं महद्यशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम्। गायत्रीं छन्द इन्द्रियं त्र्यविं गां वयो दधद्वेत्वाज्यस्य होतर्यज॥ २४॥

(१)होता यक्षत्। इन्द्राय वयोधसे। पशुसंस्कारश्चैन्द्रः तत्रैते प्रैषाः अतः प्रयाजदेवताऽविरोधेन यथेन्द्राः संपद्यन्ते तथा व्याख्यायन्ते। दैव्यो होता यजतु। समिधानमग्निम्। महच्च यशः अग्निसम्बन्धि। सुसमिद्धं चाग्निमेव। वरेण्यं वरणीयं चाग्निम्। इन्द्रं च वयोधसम् वयः अधातव्यमस्मिन्निति वयोधास्तं वयोधसम् वयसः आयुषो वा धारयितारम्। किं कुर्वन्

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मु० मुद्रित पु० नास्ति। तद्यथा। होता यक्षत्। इन्द्राय वयोधसे पशुः संस्कार्यश्चैन्द्रः। तत्रैते प्रयाजप्रैषाः अतः प्रयाजदेवताविरोधेन यथेन्द्राः सपद्यन्ते तथा व्याख्यायन्ते दैव्यो होता अग्निं वयोधसम् इन्द्रं च यजतु वय आधातव्यमस्मिन्निति वयोधाः तं वयस आयुषो धारयितारं वा अग्निसंबन्धि महत् यशश्च यजतु यद्वा यशः यशसा सामर्थ्यं सु आदेशः। किंभूतमग्निं समिधानं दीप्यमानं समिद्धं दीप्तं वरेण्यं वरणीयं किं कुर्वन् होता यजतु गायत्री छन्दः इन्द्रियं वीर्यं त्र्यविं गां वय आयुश्च दधत् धारयन् इन्द्रे इत्यध्याहारः। प्रकरणात् प्रयाजदेवता च इन्द्रसहिता आज्यस्य स्वमंशं वेतु पिबतु हे मनुष्यहोतः त्वमपि यज॥ २४॥

दैव्यो होता यजतु। गायत्री च छन्दः इन्द्रियम् वीर्यं च त्र्यविं च गां वयश्च आयुः दधत् धारयन् इन्द्रे इत्यध्याहारः प्रकरणात्। प्रयाजदेवता च इन्द्रसहिता वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ २४ ॥

एकादशः पायोधसे पशौ प्रयाजैषाः समिन्तनूनपादाद्याः प्रीदेवताः। अतिजगती। दैव्यो होता अग्निं वयोधसमिन्द्रञ्च यजतु वयः आयुर्दधाति वयोधाः तम् आयुषो दातारं धारयितारं वा। कीदृशमग्निं समिधानं दीप्यमानम्। महद्यशः सुपां सुलुगिति तृतीयैकवचनस्य सुआदेशः महता यशसा समिद्धं दीप्तम्। वरेण्यं वरणीयम्। किं कुर्वन् यजतु गायत्रीं छन्दः इन्द्रियं वीर्य्यम् त्र्यविं गाम् वयः आयुश्च दधत् स्थापयन् इन्द्रे इति शेषः। षण्मासात्मकः कालोऽविः त्रयोऽवयो यस्याः सा त्र्यविः सार्धसंवत्सरा गौः ताम्। प्रयाजदेवतेन्द्रयुता आज्यं वेतु। हे मनुष्यहोतः! त्वमपि यज। एवमग्रेऽपि ॥ २४ ॥

होता॑ यक्ष॒त्तनू॒नपा॑तमु॒द्भिदं॒ यं गर्भ॒मदि॑ति॒र्द॒धे शुचि॑मिन्द्रं॑ वयो॒धसं॑म्। उ॒ष्णिहं॒ छन्द॑ इन्द्रि॒यं दि॑त्य॒वाहं॒ गां वयो॒ दध॒द्वेत्वाज्य॑स्य॒ होत॒र्यज॑ ॥ २५ ॥

(१)*होता यक्षत्तनूनपातम्*। दैव्यो होता यजतु तनूनपातम् उद्भिदम् उद्भेत्तारं यज्ञफलानाम्। यं च गर्भम् अदितिः दधे धारितवती। शुचिं पवित्रम्। इन्द्रं च यजतु वयोधसम् वय

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। होता यक्षत्तनूनपातम्। तनूनपातं वयोधसम् इन्द्रं च होता यजतु किंतनूनपातम्। उद्भिदं यज्ञफलानामुद्भेत्तारं शुचिं पवित्रम् अदितिः यं गर्भं दधे धारितवती किं कुर्वन् यजतु उष्णिहं छन्दः इन्द्रियं दित्यवाहं गां वयश्च इन्द्रे दधत् प्रयाजदेवता सेन्द्रा वेतु ॥ २५ ॥

आयुर्धीयते यस्मिन् तं वा वयसो धारयितारं वा । किङ्कुर्वन्दैव्यो होता यजतु । उष्णिहं छन्दः इन्द्रियं वीर्यं च दित्यवाहं च गां वय आयुश्च इन्द्रे दधत् धारयन् । प्रयाजदेवता च इन्द्रसहिता वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ २५ ॥

एकाधिका जगती । होता तनूनपातं प्रयाजदेवं वयोधसमिन्द्रं च यजतु अदितिर्यं गर्भे दधे तम् इन्द्रमित्यर्थः । कीदृशं तनूनपातम् उद्भिदम् उद्भिनत्ति प्रकटयति फलमित्युद्भित् तं यज्ञफलानामुद्भेत्तारम् । शुचिं पवित्रम् । किं कुर्वन् उष्णिहं छन्दः इन्द्रियम् दित्यवाहं गाम् वयश्च इन्द्रे दधत् । द्विवर्षा गौर्दित्यवाट् । स सेन्द्रो वेतु ॥२५॥

होता यक्षदीडेन्यमीडितं वृत्रहन्तममिडाभिरीड्यꣳ सहः सोममिन्द्रं वयोधसम् । अनुष्टुभं छन्द इन्द्रियं पञ्चाविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥२६॥

(१)होता यक्षदीडेन्यम् । दैव्यो होता यजतु । ईडेन्यं स्तुत्यम् ईडतेरेन्यप्रत्ययः । ईडितम् ऋषिभिः स्तुतम् । वृत्रहन्तमम् अतिशयेन वृत्रस्य हन्तारम् । इडाभिः प्रयाजदेवताभिः ईड्यं स्तुत्यम् । इन्द्रविशेषणान्येतानि । सहः सोमं च यजतु । सहः सोमशब्दौ नैघण्टुकौ इन्द्रसम्बन्धात् पठ्येते । इन्द्रं च वयोधसं वयस आयुषो धारयितारम् । किंकुर्वन्यजतु । अनुष्टुभं च छन्द इन्द्रियम् वीर्यं च पञ्चाविं च गां वय आयुश्च इन्द्रे दधत् धार-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रितपुस्तके नास्ति । तद्यथा । होता यक्षदीडेन्यम् । वयोधनमिन्द्रं सहः सोमं च यजतु सहःसोमशब्दौ नैघण्टुकौ इन्द्रसम्बन्धात्पठ्यते । किम्भूतमिन्द्रम् ईडेन्यं स्तुत्यम् । ईडतेरेन्यप्रत्ययः । ईडितम् ऋषिभिः स्तुतं वृत्रहन्तमम् अतिशयेन वृत्रस्य हन्तारम् । इडाभिः । प्रयाजदेवताभिः ईड्यं स्तुत्यं किंकुर्वन् यजतु अनुष्टुभं छन्दः । इन्द्रियं पञ्चाविर्णं वयश्च इन्द्रे दधत् ॥ २६ ॥

यन् । प्रयाजदेवता च इन्द्रसहिता वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ २६ ॥

व्यूहेन शक्वरी । होता इडाभिः प्रयाजदेवताभिः सह वयोधसमिन्द्रं यजतु । कीदृशमिन्द्रम् ईडेन्यम् ईडितुं योग्य ईडेन्यः ईडेरेन्यप्रत्ययः । ईडितमृषिभिः स्तुतम् । वृत्रहन्तमम् नाद् घस्येति (पा० ८, २, १७) नुडागमः । ईड्यं सर्वैः स्तुत्यम् । सहः सोमं सहसा बलेन सोमवदाह्लादकम । किं कुर्वन् अनुष्टुभं छन्दः इन्द्रियम् पञ्चाविं गाम् वयश्चेन्द्रे दधत् । पञ्चावयो यस्याः सा सार्धद्विवर्षा गौः स वेतु ॥ २६ ॥

होता यक्षत् सुबर्हिषं पूषण्वन्तममर्त्यꣳ सीदन्तं बर्हिषि प्रियेऽमृतेन्द्रं वयोधसम् । बृहतीं छन्द इन्द्रियं त्रिवत्सं गां वयो दधद् वेत्वाज्यस्य होतर्यज ॥२७॥

(१)होता यक्षत् । दैव्यो होता यजतु । सुबर्हिषं शोभनबर्हिष्कम् । पूषण्वन्तं पूष्णा संयुक्तम् अमर्त्यममरणधर्माणम् । सीदन्तं बर्हिषि प्रिये अवस्थानं कुर्वन्तं बर्हिष्यभिरुचिते अमृते इन्द्रं वयोधसम् । किंकुर्वन् यजतु । बृहतीं च छन्दः इन्द्रियं वीर्यं च त्रिवत्सं च गां वय आयुश्च इन्द्रे दधत् धारयन् । प्रयाजदेवता चेज्यमाना इन्द्रेण सह वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रितपुस्तके नास्ति । तद्यथा । होता यक्षत्सुबर्हिषम् । होता वयोधसमिन्द्रं यजतु किम्भूतं सुबर्हिषम् । शोभनबर्हिष्कं पूषण्वन्तं पूष्णा संयुक्तम् अमर्त्यम् अमरणधर्माणं प्रिये रुचिते अमृता अमृते बर्हिषि सीदन्तमवस्थानं कुर्वन्तं किं कुर्वन् बृहतीं छन्दः इन्द्रियं त्रिवत्सं गां वयश्च इन्द्रे दधत् मन्वत्र प्रयाजदेवताया अधिकरणता केवलमुपलभ्यते नतु देवतात्वमिति यद्योदयेत्तं प्रत्याह भूतमेव बर्हिषो देवता स्वमित्यदोषः । तथा द्वारामपि ॥ २७ ॥

मनुष्यहोतर्यज । ननु प्रयाजदेवताया अत्राधिकरणभावः केवलमुपलभ्यते न तु देवतात्वमिति यश्चोदयेत् तम् प्रत्याह । इत्थंभूतमेव बर्हिषो देवतात्वमित्यदोषः । तथा द्वारामपि देवतात्वम् ॥ २७ ॥

शक्वरी । होता वयोधसमिन्द्रं यजतु । कीदृशम् सुबर्हिषं शोभनं बर्हिः प्रयाजदेवता यस्य तम् । पूषण्वन्तम् पूषास्यास्ति पूषण्वांस्तम् पूष्णा युक्तम् । अमर्त्यममरणधर्माणम् प्रिये वाचिते अमृता अमृते अनश्वरे बर्हिषि सीदन्तं तिष्ठन्तम् । किं कुर्वन् बृहतीं छन्दः इन्द्रियम् त्रिवत्सं गां वयश्चेन्द्रे दधत् । वत्सः संवत्सरः त्रयो वत्सा यस्य त्रिवत्सो गौः त्रिवर्षो वृषः । स वेतु ॥ २७ ॥

होता यक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् । पङ्क्तिं छन्द इहेन्द्रियं तुर्यवाहं गां वयो दधद् व्यन्त्वाज्यस्य होतर्यज ॥ २८ ॥

(१)होतायक्षद्व्यचस्वतीः । दैव्यो होता यजतु व्यचस्वतीर्व्यञ्जनवतीर्गमनवतीः । सुप्रायणाः साधुप्रगमनाः ऋतावृधः सत्यवृधो वा । द्वारः यज्ञगृहद्वारः द्वितीयबहुवचनान्तान्येतानि पदानि । देवीर्यज्ञफलदात्रीः हिरण्मयी अविनाशिनीः । तथा । ब्रह्माणं परिवृढम् इन्द्रं वयोधसम् आयुषो धारयितारं च यजतु पङ्क्तिं च छन्दः । इहेत्यभिनयदर्शनम् । इहास्मिन्निन्द्रे इन्द्रियं

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । होता यक्षत् व्यचस्वतीः । ब्रह्माणं परिवृढं वयोधसम् इन्द्रं द्वारो देवीश्च होता यजतु किम्भूता द्वारः व्यचस्वतीः व्यञ्जनवतीः गमनवतीः सुप्रायणाः साधुप्रगमनाः ऋतावृधः सत्यवृधः हिरण्ययीः हिरण्मयीः अविनाशिनीः किंकुर्वन् पङ्क्तिं छन्दः इन्द्रियं तुर्यवाहं गां वयश्च इह इन्द्रे दधत् ॥ २८ ॥

वीर्यं च तुर्यवाहं गां च आयुश्च दधत् धारयन् सेन्द्रा द्वारश्चे-ज्यमाना व्यन्तु पिबन्तु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ २८ ॥

अतिशक्करी। होता द्वारो देवीः प्रद्माणं परिवृढं वयोधसमिन्द्रं च यजतु। कीदृशीर्द्वारः व्यचस्वतीः व्यचो व्यञ्जनं गमनावकाशो विद्यते यासु ताः। अत एव सुप्रायणाः शोभनं प्रकर्षेणायनं गमनं यासु ताः। ऋतावृधः सत्यस्य वर्धयित्रीः। हिरण्ययीः हिरण्मयीः दृढाः। किं कुर्वन् पङ्क्तिं छन्दः इन्द्रियम् तुर्यवाहं गाम् वयश्च इह इन्द्रे दधत्। सार्धत्रिवर्षो गोस्तुर्यवाट् तुर्ये चतुर्थे वर्षे वहतीति॥२८॥

होता यक्षत् सुपेशसा सुशिल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम्। त्रिष्टुभं छन्द इहेन्द्रियं पष्ठवाहं गां वयो दधद् वीतामाज्यस्य होतर्यज ॥ २९ ॥

(१)होता यक्षत्सुपेशसा। दैव्यो होता यजतु सुपेशसा सुपेशसौ पेश इति रूपनाम। सुरूपे। सुशिल्पे। यद्वै प्रतिरूपं तच्छिल्पम् अन्योऽन्यं प्रतिरूपे। बृहती महत्यौ उभे नक्तोषासा न। समुच्चयार्थीयो नकारः उभे अपि नक्तोषासा। नक्ता च रात्रिः उषाश्च रात्रेरपरकालः। दर्शते दर्शनीये। विश्वं सर्वात्मकमिन्द्रं

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पुस्तके नास्ति। तद्यथा। होता यक्षत्सुपेशसा विश्वं। सर्वात्मकं वयोधसम् इन्द्रमुभे नक्तोषासा च होता यजतु नक्ता रात्रिः उषा रात्रेरपरः कालः नकारश्चार्थे कीदृश्योषासौ सुपेशसौ पेश इति रूपनाम सुरूपे सुशिल्पे यद्वै प्रतिरूपं तच्छिल्पम् अन्योऽन्यं प्रतिरूपे बृहती महत्यौ दर्शनीये किं कुर्वन् त्रिष्टुभं छन्दः इन्द्रियं पष्ठवाहं गां वयश्च इह इन्द्रे दधत् इज्यमाने सेन्द्रे नक्तोषासौ आज्यस्य वीतां पिबताम् ॥ २९ ॥

वयोधसम् आयुषो धारयितारञ्च यजतु । किंकुर्वन् यजतु । त्रिष्टुभं च छन्दः इह इन्द्रे इन्द्रियं च वीर्यं पष्ठवाहं गां च वय आयुश्च दधत् धारयन् । नक्तोषासा सेन्द्रे चेज्यमाने वीतां पिबतामाज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ २९ ॥

सातिशक्वरी । होता उभे नक्तोषासा नक्तोषसौ विश्वं सर्वात्मकं वयोधसमिन्द्रं च यजतु । नक्ता रात्रिः उषा रात्रेरपरभागः । नक्तारश्चार्थः । कीदृश्यौ नक्तोषसौ सुपेशसा सुपेशसौ पेशः रूपनाम शोभनं पेशो ययोस्ते सुरूपे । सुशिल्पे यद्वै प्रतिरूपं तच्छिल्पमिति श्रुतेः सुष्ठु शिल्पं ययोस्ते अन्योऽन्यं प्रतिरूपे । बृहती बृहत्यौ । दर्शते दर्शनीये दृशेरतच्प्रत्ययः । किं कुर्वन् त्रिष्टुभं छन्दः इन्द्रियम् पष्ठवाहं गाम् वयश्च इहेन्द्रे दधत् । ते वीतां पिबताम् ॥ २९ ॥

होता॑ यक्षत् प्रचे॑तसा दे॒वाना॑मुत्त॒मं यशो॒ होता॑रा॒ दैव्या॑ क॒वी स॒युजेन्द्रं॑ वयो॒धस॑म् । जग॑तीं॒ छन्द॑ इन्द्रि॒यम॑न॒ड्वाहं॒ गां वयो॒ दध॑द् वी॒तामाज्य॑स्य॒ होत॒र्यज॑ ॥ ३० ॥

(१)होतायक्षत्प्रचेतसा । दैव्यो होता यजतु प्रचेतसा प्रकृष्टज्ञानौ । यौ च देवानामुत्तमं यशः । पुञ्जीकृतयशोरूपौ होतारौ दैव्यौ अयं चाग्निरसौ च मध्यमः । कवी क्रान्तदर्शनौ । सयुजा सहयोगिनौ इन्द्रं च वयोधसम् आयुषो धारयितारम् । किङ्कुर्वन्

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मु० मुद्रित पु० नास्ति । तद्यथा । होता यक्षत्प्रचेतसा । वयोधसमिन्द्रं दैव्यौ होतारौ च होता यजतु अयं चाग्निरसौ च मध्यमः । किम्भूतौ प्रचेतसौ प्रकृष्टज्ञानौ देवानामुत्तमं यशः । पुञ्जीकृतयशोरूपौ कवी क्रान्तदर्शनौ सयुजौ सहयोगिनौ किं कुर्वन् जगतीं छन्दः इन्द्रियम् अनड्वाहं गां वयश्च इन्द्रे दधत् सेन्द्रौ तौ वीताम् ॥ ३० ॥

दैव्यो होता यजतु। जगतीञ्छन्दः इन्द्रियं वीर्यं च। अनड्वाहं च गां वयः आयुश्च इन्द्रे दधत् धारयन्। तौ च दैव्यो होतारौ सेन्द्रावीज्यमानौ वीतां पिबतामाज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ ३० ॥

एकाधिका शक्वरी। होता दैव्यौ होतारौ वयोधसमिन्द्रं च यजतु अयं चाग्निरसौ च मध्यम इति होतारौ। कीदृशौ प्रचेतसा प्रकृष्टं चेतो ययोस्तौ प्रचेतसौ। देवानामुत्तमं यशः पुंस्त्रीकृतदेवयशोरूपौ। कवी क्रान्तदर्शनौ। सयुजा सह युक्तौ समानयोगौ। किं कुर्वन्। जगतीं छन्दः इन्द्रियम् अनड्वाहं गाम् वयश्च इन्द्रे दधत्। अनः शकटं वहतीत्यनड्वान् शकटक्षमो वृषः तौ वीताम्॥३०॥

होता॑ यक्षत् पेश॑स्वतीस्ति॒स्रो दे॒वीर्हि॑र॒ण्ययी॒र्भार॑तीर्बृह॒तीर्म॒हीः पति॒मिन्द्रं॑ वयो॒धस॑म्। वि॒राजं॒ छन्द॑ इ॒हेन्द्रि॒यं धे॒नुं गां न वयो॒ दध॒द् व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥ ३१ ॥

(१)होता यक्षत् पेशस्वतीः। दैव्यो होता यजतु पेशस्वतीः रूपसमृद्धाः तिस्रो देवीः हिरण्ययीः हिरण्यालङ्कृतशरीराः। भारतीः भरत आदित्यः तस्य भारतीः बहुवचनमिडासरस्वत्युपलक्षणार्थम्। बृहतीः प्रभावतः महत्यः आदित्येन्द्राग्निसंबन्धा-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। होता यक्षत्पेशस्वतीः। वयोधसं पतिं पालयितव्यम् इन्द्रं तिस्रो देवीश्च होता यजतु किम्भूतास्तिस्रः पेशस्वतीः रूपसमृद्धाः। हिरण्ययीः हिरण्मयीः हिरण्यालङ्कृतदेहाः बृहतीः प्रभावतः महीः महतीः आदित्येन्द्राग्निसम्बन्धात्। कास्ताः भारतीः। बहुवचनम् इडासरस्वत्युपलक्षणार्थम्। किं कुर्वन् विराजं छन्दः इन्द्रियं धेनुं गां वयश्च इह इन्द्रे दधत् नकारश्चार्थे सेन्द्राः ताश्च व्यन्तु ॥ ३१ ॥

तु । पतिम् पालयितारम् इन्द्रश्च वयोधसम् आयुषो धारयितारम् । यजतु । किं कुर्वन्यजतु विराजञ्छन्दः इहास्मिन्निन्द्रे इन्द्रियं वीर्यञ्च । धेनुञ्च न नकारः समुच्चयार्थीयः । धेनुश्च गां वय आयुश्च दधत् धारयन् । तिस्रो देव्यश्च सेन्द्रा ईज्यमानाः, व्यन्तु पिबन्तु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ ३१ ॥

एकाधिका शक्वरी । होता तिस्रो देवीः पतिं पालकं वयोधसमिन्द्रं च यजतु । कीदृशीस्तिस्रः पेशो रूपमस्ति यासां ताः रूपसमृद्धाः । हिरण्ययीः हिरण्यालङ्कृतदेहाः । बृहतीः प्रभावेन । महीः महतीः तेजसा आदित्येन्द्राग्निसम्बन्धात् । कास्ताः भारतीः बहुवचनमिडासरस्वत्युपलक्षणम् इडासरस्वतीभारत्यस्तिस्र इत्यर्थः । किं कुर्वन् । विराजं छन्दः इन्द्रियम् धेनुं दोग्ध्रीं गाम् वयश्चेहेन्द्रे दधत् । नकारश्चार्थः । सेन्द्रास्ता व्यन्तु ॥ ३१ ॥

होता यक्षत् सुरेतसं त्वष्टारं पुष्टिवर्धनं रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम् । द्विपदं छन्द इन्द्रियमुक्षाणं गां न वयो दधद् वेत्वाज्यस्य होतर्यज ॥३२॥

(१) होता यक्षत्सुरेतसम् । दैव्यो होता यजतु सुरेतसं त्वष्टारम् । शोभनं हि रेतस्त्वष्टुर्जगदुत्पत्तिबीजत्वात् । पुष्टिं वर्द्धयितारम् । रूपाणि बिभ्रतं पृथक्पुष्टिम् । जातिषु रूपाणि पुष्टिश्च पृथक् धारयन्तम् । इन्द्रश्च वयोधसम् आयुषो धारयितारं यजतु

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । होता यक्षत् सुरेतसम् । वयोधसमिन्द्रं तं त्वष्टारं च होता यजतु । किन्त्वष्टारं सुरेतसं शोभनं हि रेतस्त्वष्टुर्जगदुत्पत्तिबीजत्वात् पुष्टिवर्द्धनं पुष्टेर्वर्द्धयितारं पृथग्जातिषु रूपाणि पुष्टिं च बिभ्रतम् । किं कुर्वन् यजतु द्विपदं छन्दः इन्द्रियमुक्षाणं गां वयश्च इन्द्रं दधत् । नकारश्चार्थः । सेन्द्रस्त्वष्टा वेतु॥३२॥

किं कुर्वन्यजतु द्विपदश्च छन्दः इन्द्रियं वीर्यम् उक्षाणञ्चा न नकारः समुच्चयार्थीयो भिन्नक्रमः । उक्षाणञ्च गाम् वय आयुश्च इन्द्रे दधत् धारयन् । त्वष्टा च सेन्द्रः इज्यमानः वेतु पिवतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ ३२ ॥

एकाधिका शक्वरी । होता त्वष्टारं वयोधसमिन्द्रं च यजतु । कीदृशं त्वष्टारं सुरेतसं शोभनं रेतो यस्य तम् जगदुत्पादकत्वात्त्वष्टुः शोभनं रेतः । पुष्टिवर्धनं पुत्रादिपुष्टेर्वर्धयितारम् । पृथक् नानाजातिषु रूपाणि पुष्टिं च विभ्रतम् । किं कुर्वन् द्विपदं छन्दः इन्द्रियम् उक्षाणं रेतः सेकक्षमं गां वृषम् वयश्चेन्द्रे दधत् । नश्चार्थः । सेन्द्रस्त्वष्टा वेतु ॥ ३२ ॥

होता यक्षद् वनस्पतिंꣳ शमितारंꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनंꣳ रशनां विभ्रतं वशिं भगमिन्द्रं वयोधसम् । ककुभं छन्द इहेन्द्रियं वशां वेहतं गां वयो दधद् वेत्वाज्यस्य होतर्यज ॥ ३३ ॥

(१)होता यक्षद्वनस्पतिम् । दैव्यो होता यजतु वनस्पतिं शमितारं हविषः संस्कर्तारम् शतक्रतुं बहुकर्माणम् । हिरण्यपर्णम् सुवर्णमयपत्रम् । उक्थिनम् । वच परिभाषणे अस्य उक्थम् वचनवन्तं यज्ञवन्तं वा । रशनां विभ्रतम् स्वरूपानुवादः । यूपे हि

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । होता यक्षद्वनस्पतिम् । वयोधसमिन्द्रं वनस्पतिं च होता यजतु किं वनस्पतिं शमितारं संस्कर्तारं हविषः शतक्रतुं बहुकर्माणं हिरण्यपर्णं सुवर्णमयपत्रम् उक्थिनम् । वच परिभाषणे । अस्य रूपम् उक्थः । वचनवन्तं यज्ञवन्तं वा रशनां विभ्रतं स्वभावानुवादः यूपे हि पशुबन्धार्थं रज्जुर्बध्यते । वशिं कान्तं भगं भजनीयं किं कुर्वन् यजतु ककुभ छन्दः इन्द्रियं वशां वन्ध्यां वेहतं गर्भपातिनीं गां वयश्च इहेन्द्रे दधत् । सेन्द्रे वनस्पतिर्वेतु ॥३३॥

पशुबन्धनार्थं रज्जुर्बध्यते । वशिं कान्तम्भगम्भजनीयम् । इन्द्रश्च वयोधसमायुषो धारयितारं यजतु । किं कुर्वन् दैव्यो होता यजतु । ककुभश्च छन्दः इहेन्द्रे इन्द्रियं वीर्यञ्च वशां वन्ध्यां वेहतङ्गर्भघातिनीञ्च गां वय आयुश्च दधत् धारयन् । वनस्पतिश्च सेन्द्रे इज्यमानः वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज ॥ ३३ ॥

अत्यष्टिः । होता वनस्पतिं वयोधसमिन्द्रं च यजतु । कीदृशं वनस्पतिं शमितारं संस्कर्त्तारं हविषाम् । शतक्रतुं बहुकर्माणम् । हिरण्यपर्णं हिरण्मयानि पर्णानि यस्य तम् । उक्थिनम् उक्थानि शस्त्राणि शन्स्यस्य यत्तवन्तं वा । रशनां रज्जुं बिभ्रतम् स्वभावानुवादः यूप हि पशुबन्धाय रज्जुर्बध्यते । वशिं कान्तम् । भगं भजनीयम् । किं कुर्वन् ककुभं छन्दः इन्द्रियम् वशां वन्ध्यां वेहतं गर्भोपघातिनीं च गाम् वयश्च इह इन्द्रे दधत् । सेन्द्रो वनस्पतिर्वेतु॥३३॥

होता यक्षत् स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् । अतिच्छन्दसं छन्द इन्द्रियं बृहदृषभं गां वयो दधद् व्यन्त्वाज्यस्य होतर्यज ॥ ३४ ॥

(१)होता यक्षत्स्वाहाकृतीः । दैव्यो होता यजतु स्वाहाकृतीः प्रयाजदेवताः । अग्निश्च गृहपतिं पृथक् यजतु । वरुणश्च भेष-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । होता यक्षत्स्वाहाकृतीः । स्वाहाकृतीः प्रयाजदेवताः गृहपतिमग्निं पृथग् भेषजं वरुणं कविं क्रान्तदर्शनं क्षत्रं महाराष्ट्रं रक्षितारं वयोधसमिन्द्रं च होता यजतु किं कुर्वत् अतिच्छन्दसं छन्दः बृहद् इन्द्रियम ऋषभं गां वयश्च इन्द्रे दधत् । इज्यमानाः सेन्द्राः स्वाहाकृतयः आज्यस्य व्यन्तु हे मनुष्यहोतस्त्वमपि यज ॥ ३४ ॥

जम्। तथा कविं क्रान्तदर्शनं क्षत्रम्महाराद्रक्षितारम् इन्द्रियञ्च वयोधसमायुषो धारयितारम् यजतु। किं कुर्वन्यजतु अतिछन्दसञ्च छन्दः इन्द्रियञ्च वीर्यं बृहत्महत् ऋषभञ्च गां वय आयुश्च इन्द्रे दधत् धारयन्। सेन्द्रश्च प्रयाजदेवता इज्यमाना व्यन्तु पिबन्तु आज्यस्य स्वमंशं त्वमपि हे मनुष्यहोतर्यज॥ ३४॥

अतिशक्वरी। होता स्वाहाकृतीः प्रयाजदेवताः इन्द्रं च यजतु। कीदृशमिन्द्रम् अग्निमङ्गतीत्यग्निः अग्रे गन्तारम्। पृथक् प्रत्येकं यज्ञेषु गृहपतिं गृहस्य पालकम्। वरुणम् व्रियतेऽसौ वरुणस्तम् ऋत्विग्भिर्वरणीयम्। भेषजं रोगनाशकम्। कविं क्रान्तदर्शनम्। क्षत्रं क्षतान्महारात्त्रातारम्। वयो वीर्य्यं बृहत् महत् ऋषभं पुष्टं गां वयश्चेन्द्रे दधत्। सेन्द्राः स्वाहाकृतयः आज्यं व्यन्तु। मनुष्यहोतस्त्वमपि यज॥ ३४॥

दे॒वं ब॒र्हिर्व॑यो॒धसं॑ दे॒वमिन्द्र॑मवर्धयत्। गा॒य॒त्र्या छन्द॑सेन्द्रि॒यं चक्षु॒रिन्द्रे॒ वयो॒ दध॑द्वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑॥ ३५॥

(१)अथ वयोधसोऽनुयाजप्रैषाः। देवं बर्हिः यत् देवं द्योतनं बर्हिः। वयोधसमायुषो धारयितारं देवं दानादिगुणयुक्तम् इन्द्रम् अवर्द्धयत् किं कुर्वन्। गायत्र्या छन्दसा इन्द्रियं वीर्यञ्च चक्षुश्च इन्द्रे वय आयुश्च दधत् धारयत्। तत् वसुवननाय वसुधानाय च वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे होतर्यज॥ ३५॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा [अथ वयोधसोऽनुयाजप्रैषाः। देवं बर्हिः यत् देवं द्योतनं बर्हिः वयोधसमिन्द्रं देवमवर्द्धयत्। तत् गायत्र्या छन्दसा चक्षुः इन्द्रियं वयश्च इन्द्रे दधत् सत् वसुवननाय वसुधानाय च वेतु पिबतु। हे मनुष्यहोतस्त्वं यज॥ ३५॥

वयोधसे एताश्चैवैकादशानुयाजानां प्रैषाः बर्हिरादिदेवताः । एकाधिके आर्ष्यौ त्रिष्टुभौ द्वे । बर्हिः देवं वयोधसमिन्द्रं देवमवर्धयत् । कीदृशं बर्हिः गायत्र्या छन्दसा कृत्वा चक्षुरिन्द्रियं वयश्चेन्द्रे दधत् । तत् वसुवनाय वसुधानाय चाज्यं वेतु षष्ठीसप्तम्यौ चतुर्थ्यर्थे । हे मनुष्यहोतस्त्वमपि यज । एवमग्रेऽपि व्याख्येयम् ॥ ३५ ॥

दे॒वीर्द्वारो॑ वयो॒धस॒ꣳ शुचि॒मिन्द्र॑मवर्धयन् । उ॒ष्णिहा॒ छन्द॑सेन्द्रि॒यं प्रा॒णमिन्द्रे॒ वयो॒ दध॑द्व॒सुव॑ने वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥ ३६ ॥

(१)देवीर्द्वारः । या देव्यः द्वारः वयोधसमायुषो धारयितारम् शुचिं पवित्रम् इन्द्रम् अवर्द्धयन् किं कुर्वन्त्यः । उष्णिहा छन्दसा इन्द्रियं वीर्यं प्राणश्च इन्द्रं वय आयुश्च दधत् । दधत्य इति लिङ्गवचनव्यत्ययः धारयन्त्य इत्यर्थान्तरम् । ताः वसुवननाय वसुधानाय च व्यन्तु पिबन्तु त्वमपि हे होतर्यज ॥ ३६ ॥

द्वारो देव्यः वयोधसं शुचिं पवित्रमिन्द्रमवर्धयन् । कीदृश्यो द्वारः उष्णिहा छन्दसा कृत्वा सह या प्राणमिन्द्रियं प्राणेन्द्रियं वयश्चेन्द्रे दधत् दधत्यः लिङ्गवचनव्यत्ययः । ता व्यन्तु ॥ ३६ ॥

दे॒वी उ॒षासा॒नक्ता॑ दे॒वमिन्द्रं॑ वयो॒धसं॑ दे॒वी दे॒वम॑वर्धताम् । अ॒नु॒ष्टुभा॒ छन्द॑सेन्द्रि॒यं बल॒मिन्द्रे॒ वयो॒ दध॑द्व॒सुव॑ने वसु॒धेय॑स्य वीतां॒ यज॑ ॥ ३७ ॥

---

(१) अयं वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवीर्द्वारः । याः द्वारो देव्यः शुचिं पविन्नं वयोधसमिन्द्रम् अवर्द्धयन् ताः उष्णिहा छन्दसा । प्राणमिन्द्रियं वयश्च इन्द्रे दधत् दधत्य इति लिङ्गवचनव्यत्ययः सत्यः व्यन्तु ॥ ३६ ॥

(१)देवी उषासा नक्ता । ये देव्यौ उषासा नक्ता उषाश्च रात्रेरपरकालः नक्तेति रात्रिनाम । देवमिन्द्रं वयोधसमायुषो धारयितारम् । देवी देव्यौ देवम् एको देवीशब्दो दीप्तिवचनोऽपरो दानादिगुणयुक्तवचनः देवशब्दोऽप्येवमेव । अवर्द्धताम् किं कुर्वन्त्यौ । अनुष्टुभा छन्दसा इन्द्रियं बलं च इन्द्रे वय आयुश्च दधत् धारयन्त्यौ । ते वसुवननाय वसुधानाय च वीतां पिवतामाज्यस्य स्वमंशं त्वमपि हे होतर्यज ॥ ३७ ॥

द्वे ब्राह्मयौ बृहत्यौ । उपासानक्तौ देवी देव्यौ वयोधसमिन्द्रं देवमवर्धताम् उषाश्च नक्तं च उषासानक्ता उषासोषस इति (पा० ६, ३, ३१) उषःशब्दस्य देवताद्वन्द्वे उषासा आदेशः विभक्तेराकारश्च । कीदृश्यौ ते देवी दीप्यमाने । कीदृशमिन्द्रं देवं दीप्यमानम् । एको देवीदेवशब्दौ दीप्तिवाचकौ अन्यौ सुखवाचकौ । अनुष्टुभा छन्दसा बलमिन्द्रियं वयश्च इन्द्रे दधत् दधत्यौ । दधदित्यव्ययम् लिङ्गवचनव्यत्ययो वा । ते वीताम् ॥ ३७ ॥

दे॒वी जोष्ट्री॒ वसु॑धिती दे॒वमिन्द्रं॑ वयो॒धसं॑ दे॒वी दे॒वम॑वर्धताम् । बृ॒ह॒त्या छन्द॑सेन्द्रि॒यꣳ श्रोत्र॒मिन्द्रे॒ वयो॒ दध॑द् वसु॒वने॑ वसु॒धेय॑स्य वीतां॒ यज॑ ॥ ३८ ॥

(२)देवी जोष्ट्री । ये देव्यौ जोष्ट्र्यौ जोषयित्र्यौ । वसुधिती

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रितपुस्तके नास्ति । तद्यथा । देवी उषासा नक्ता । ये देवी दीप्ते उषा नक्तं देव्यौ देवं दीप्तं वयोधसमिन्द्रं देवमवर्द्धताम् । एकौ देवीदेवशब्दौ दीप्तिवाचकौ अपरावमरवाचकौ ते अनुष्टुभा छन्दसा बलमिन्द्रियं वयश्च इन्द्रे दधत् दधत्यौ सत्यौ वीतामव्ययं दधच्छब्दः । नह्यस्य लिङ्गवचनव्यत्ययो दृश्यते । कारणेष्वपि सत्सु ॥ ३७ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई

वसुधात्र्यौ देवं दीप्तं वयोधसमायुषो धारयितारमिन्द्रम् देव्यौ देवम् अवर्द्धताम् । ते बृहत्या छन्दसा इन्द्रियं वीर्यं श्रोत्रं च इन्द्रे वय आयुश्च दधत् धारयन्त्यौ वसुवननाय च वीतां पिबतामाज्यस्य स्वमंशं त्वमपि हे होतर्यज ॥ ३८ ॥

देवी देव्यौ दीप्यमाने देवी देव्यौ अनुयाजदेवते देवं दीप्तं वयोधसमिन्द्रं देवमवर्धताम् । देवीदेवशब्दौ पूर्ववत् । कीदृश्यौ जोष्ट्र्यौ जुषेते ते जोष्ट्र्यौ प्रीतियुक्ते जुषेस्तृच् । वसुधिती वसुनो धनस्य धारयित्र्यौ । बृहत्या छन्दसा श्रोत्रमिन्द्रियं वयश्च इन्द्रे दधत्यौ॥३८॥

देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्धताम् । पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३९ ॥

(१)देवी ऊर्जाहुती । ये देवी दात्र्यौ ऊर्जाहुती ऊर्जाह्वान्यौ दुघे दोग्ध्र्यौ सुदुघे सुदोहने पयसा इन्द्रं वयोधसं देवी देव्यौ द्युते स्थाने देवं द्युस्थानम् अवर्द्धताम् । पङ्क्त्या छन्दसा इन्द्रियं वीर्यं शुक्रं च इन्द्रे वय आयुश्च दधत् धारयन्त्यौ वसुवननाय वसुधानाय च वीतां पिबतामाज्यस्य स्वमंशं त्वमपि हे होतर्यज ॥ ३९ ॥

मुद्रित पु० नास्ति । तद्यथा । देवी जोष्ट्री । देव्यौ दीप्ते जोष्ट्र्यौ जोषयित्र्यौ वसुधिती वसुनो धात्र्यौ देव्यौ देवं दीप्तं वयोधसमिन्द्रं देवमवर्द्धताम । बृहत्या छन्दसा इन्द्रियं श्रोत्रं वयश्च दधत् दधत्यौ सत्यौ वीताम ॥ ३८ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवी ऊर्जाहुती । देवी दात्र्यौ ऊर्जाहुती ऊर्जाह्वान्यौ दुघे दोग्ध्र्यौ सुदुघे सुदोहने देव्यौ पयसा वयोधसमिन्द्रं देवमवर्द्धतां ते च पङ्क्त्या छन्दसा इन्द्रियं शुक्रं वयश्च इन्द्रे दधत्यौ सत्यौ वीताम् ॥ ३९ ॥

शक्करी । देवी दात्र्यौ उर्जाह्वान्यौ देव्यौ पयसा वयोधसं देवमिन्द्रमवर्धताम् । कीदृश्यौ दुघे दोग्ध्र्यौ । सुदुघे सुखेन दोग्धुं शक्ये । पङ्क्त्या छन्दसा शुक्रं वीर्यमिन्द्रियं वयः चेन्द्रे दधत्यौ ॥ ३९ ॥

देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्धताम् । त्रिष्टुभा छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद् वसुवने वसुधेयस्य वीतां यज ॥ ४० ॥

(१) देवा दैव्या । यौ देवौ दातारौ दैव्यो होतारौ । अयं चाग्निरसौ च मध्यमः । देवं दातारमिन्द्रं वयोधसमायुषो धारयितारम् देवौ द्युस्थानौ देवं द्युमस्थानम् अवर्द्धताम् । तौ त्रिष्टुभा छन्दसा इन्द्रियं वीर्यन्त्विषिं दीप्तिश्च इन्द्रे वयश्चायुः दधत् धारयन्तौ वसुवननाय वसुधानाय च वीतां पिबतामाज्यस्य स्वमंशं हे होतर्यज ॥ ४० ॥

अतिजगती । दैव्या दैव्यौ देवा देवौ दीप्तौ देवसम्बन्धिनौ होतारा होतारौ देवौ वयोधसं देवं दीप्तमिन्द्रं देवमवर्धताम् । त्रिष्टुभा छन्दसा त्विषिं कान्तिमिन्द्रियं त्वगिन्द्रियं वयश्चेन्द्रे दधतौ ॥ ४० ॥

देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्धयन् । जगत्या छन्दसेन्द्रियꣳ शूषमिन्द्रे वयो दधद् वसुवने वसुधेयस्य व्यन्तु यज ॥ ४१ ॥

(२)देवीस्तिस्रः । याः तिस्रो देव्यः सरस्वतीडाभारत्यः ।

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवा दैव्या होतारा । देवौ दातारौ देव्यौ होतारौ देवौ वयोधसमिन्द्रं देवमवर्द्धताम् त्रिष्टुभा छन्दसा इन्द्रियं त्विषिं वयश्च इन्द्रे दधत् दधतौ सन्तौ वीताम् ॥ ४० ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवीस्तिस्रः । तिस्रो देव्यः सरस्वतीडा

आदरार्थमभ्यासः । वयोधसमायुषो धारयितारम् पतिं पालयितव्यम् इन्द्रमवर्द्धयन् । ता जगत्या छन्दसा इन्द्रियं वीर्यम् । शूषम् शूषशब्दो बलवचनः । बलम् इन्द्रे वय आयुश्च दधत् दधत्यः वसुवननाय वसुधानाय च व्यन्तु पिबन्तु आज्यस्य स्वमंशं हे होतर्यज ॥ ४१ ॥

एकाधिका ब्राह्मी अनुष्टुप् । तिस्रो देव्यो भारतीडासरस्वत्यः पतिं पालकं वयोधसमिन्द्रमवर्धयन् अभ्यास आदरार्थः । कीदृश्यः जगत्या छन्दसा शूषं बलमिन्द्रियं वयश्चेन्द्रे दधत्यः ॥ ४१ ॥

दे॒वो न॑रा॒शꣳसो॑ दे॒वमिन्द्रं॑ वयो॒धसं॑ दे॒वो दे॒वम॑वर्धयत् । वि॒राजा॒ छन्द॑से॒न्द्रि॒यꣳ रू॒पमिन्द्रे॒ वयो॒ दध॑द्वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑ ॥ ४२ ॥

(१)देवो नराशंसः । यो देवो द्युस्थानो नराशंसो यज्ञः देवं द्युस्थानम् इन्द्रम् वयोधसमायुषो धारयितारम् । देवो देवम् दानादिगुणयुक्त इत्युभयत्र । अवर्द्धयत् । स इदानीं विराजा छन्दसा इन्द्रियं वीर्यं रूपञ्च इन्द्रे वयं आयुश्च दधत् धारयन् वसुवननाय वसुधानाय च वेतु पिबतु आज्यस्य स्वमंशं हे होतर्यज ॥ ४२ ॥

अतिजगती । देवो दाता नराशंसो देवः देवं दीप्तं वयोधसमि-

भारती आदरार्थमभ्यासः । पतिं पालयितव्यं वयोधसमिन्द्रमवर्द्धयन् ताः जगत्या छन्दसा इन्द्रियं शूषं बलं वयश्च इन्द्रे दधत् दधत्यः सत्यः व्यन्तु ॥ ४१ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवो नराशꣳसः । देवो दाता नराशंसो यज्ञो देवः देवं द्योतनं वयोधसमिन्द्रं देवमवर्धयत् । सः द्विपदा छन्दसा इन्द्रियं भगं वयश्च इन्द्रे दधत् सन् वेतु ॥ ४२ ॥

न्द्रमवर्धयत् । कीदृशः विराजा छन्दसा रूपमिन्द्रियं वयश्चेन्द्रे दधत् ॥ ४२ ॥

देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धयत्। द्विपदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद् वसुवने वसुधेयस्य वेतु यज ॥ ४३ ॥

देवो वनस्पतिः। यो देवो वनस्पतिर्यूपः देवं द्युस्थानम् इन्द्रं वयोधसमायुषो धारयितारम् देवो देवम् दीप्त इत्युभयत्र। अवर्द्धयत्। स इदानीम् द्विपदा छन्दसा इन्द्रियं वीर्यं भगमैश्वर्यं च इन्द्रे वय आयुश्च दधत् धारयन् वसुवननाय च वसुधानाय च वेतु पिबतु त्वमपि हे होतर्यज ॥ ४३ ॥

अतिजगती । देवो दाता वनस्पतिर्यूपः देवं द्योतनं वयोधसमिन्द्रं देवमवर्धयत्। कीदृशः द्विपदा छन्दसा भगं सौभाग्यरूपमिन्द्रियं वयश्चेन्द्रे दधत् ॥ ४३ ॥

देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धयत्। ककुभा छन्दसेन्द्रियं यश इन्द्रे वयो दधद् वसुवने वसुधेयस्य वेतु यज ॥ ४४ ॥

(१) देवं बर्हिः। यद्देवं श्रेष्ठम् बर्हिः। वारितीनाम् वार्भ्यः अद्भ्यः इतीनामुद्गतानाम्। ओषधीनामित्यर्थः। देवं द्युस्थानम् इन्द्रं वयोधसमायुषो धारयितारम् देवन्देवम् दानादिगुणयुक्त

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। देवं बर्हिः वारितीनां वार्भ्यः अद्भ्यः इतीनां उद्गतानाम्। ओषधीनां देवं श्रेष्ठं बर्हिर्देवं कर्तृ वयोधसं देवं दीप्तमिन्द्रं देवमवर्द्धयत् ककुभा छन्दसा इन्द्रियं यशः वयश्च इन्द्रे दधत् सन् वेतु ॥ ४४ ॥

इत्युभयत्र । अवर्द्धयत् । तत् ककुभा छन्दसा इन्द्रियं वीर्यं यशश्च इन्द्रे वय आयुश्च दधत् धारयन् वसुवननाय वसुधानाय च वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे होतर्यज ॥ ४४ ॥

ब्राह्मी बृहती । बर्हिः देवमिन्द्रमवर्धयत् । कीदृशमिन्द्रं देवं दीप्यमानम् वयोधसं वयसो दातारम् । कीदृशं बर्हिः वारितीनां वार्भ्यः सकाशात् इतिरुत्पत्तिर्यासां ता वारितय ओषधयस्तासां मध्ये देवं दीप्तं श्रेष्ठमित्यर्थः । ककुभा छन्दसा यशोरूपमिन्द्रियं वयश्चेन्द्रे दधत् ॥ ४४ ॥

दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद् दे॒वमिन्द्रं॑ वयो॒धसं॑ दे॒वो दे॒वम॑वर्धयत् । अति॑च्छन्दसा छन्द॑से॒न्द्रियं॑ क्ष॒त्रमिन्द्रे॒ वयो॒ दध॑द् वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑ ॥ ४५ ॥

(१)देवो अग्निः । यो देवो द्युस्थानः अग्निः स्विष्टकृत् साधु इष्टं कर्तव्यमिति यस्यायमधिकारः । देवं द्युस्थानम् इन्द्रं वयोधसमायुषो धारयितारम् । देवो देवम् दीप्त इत्युभयत्र । अवर्द्धयत् अतिच्छन्दसा छन्दसा स इदानीम् इन्द्रियं वीर्यम् क्षत्रं क्षतात् त्राणम् इन्द्रे वय आयुश्च दधत् धारयन् वसुवननाय वसुधानाय च वेतु पिबतु आज्यस्य स्वमंशं त्वमपि हे होतर्यज ॥ ४५ ॥

ब्राह्मी बृहती । देवो दाता स्विष्टकृत् अग्निः देवो वयोधसं देवं दीप्तमिन्द्रं देवमवर्धयत् । कीदृशः अतिच्छन्दसा छन्दसा क्षत्रं क्षतात्त्राणरूपमिन्द्रं वयश्चेन्द्रे दधत् । स वसुवननाय च वेतु । हे होतः ! त्वमपि यज ॥ ४५ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । देवो अग्निः । यो देवो दाता स्विष्टकृत् अग्निर्देवः वयोधसं देवं दीप्तमिन्द्रं देवमवर्द्धयत् स स्विष्टकृत् अतिछन्दसा छन्दसा इन्द्रियं क्षत्रं क्षतात् त्राणं वयश्च इन्द्रे दधत् सन् वसुवननाय वसुधानाय च वेतु पिबतु त्वमपि होतर्यज ॥ ४५ ॥

अ॒ग्निम॒द्य होता॑रमवृणीता॒यं यज॑मान॒ः पच॒न् प॒क्तीः पच॑न् पुरो॒डाशं॑ ब॒ध्नन्निन्द्रा॑य व॒यो॒ध॒से छाग॑म् । सू॒प॒स्था अ॒द्य दे॒वो वन॒स्पति॑रभव॒दिन्द्रा॑य व॒यो॒ध॑से छाग॑ न । अघ॑त्तं॒ मेद॑स्त॒ः प्रति॑ पच॒ताग्र॑भी॒दवी॑वृधत् पुरो॒डाशे॑न ॥ त्वाम॒द्य ऋ॑षे० ॥ ४६ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां अष्टाविंशोऽध्यायः ।

---

(१) अग्निमद्येति व्याख्यातम् इन्द्राय वयोधसे इति विशेषः ॥ ४६ ॥

इति उव्वटकृतौ मन्त्रभाष्येऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥

अग्निमद्य एकाधिका ब्राह्मी गायत्री । सूपस्थाः ब्राह्म्यनुष्टुप् । एते व्याख्याते (२३ क०) ॥ त्वामद्य प्रतीकोक्तः सर्वोऽपि पाठ्यः एकाधिका विकृतिः अयमपि व्याख्यातः (२३ क०) इन्द्राय वयोधसे इति विशेषः ॥ ४६ ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
अष्टाविंशोऽयमध्यायोऽगमत् सौत्रामणीभवः ॥
इति सौत्रामणीसम्बन्धिप्रयाजानुयाजप्रैषनिरूपणं
नामाष्टाविंशोऽध्यायः ॥ २८ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अग्निमद्येति व्याख्यातम् इन्द्राय वयोधसे इति विशेषः ॥ ४६ ॥

इति मन्त्रभाष्येऽष्टाविंशोऽध्यायः ॥ २८ ॥

ऊनत्रिंशोऽध्यायः ।

समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः । वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥ १ ॥

(१) एकादश त्रिष्टुभः आप्र्यो नराशंसा बृहदुक्थो वामदेव्यः । अश्वो वा समुद्रिरपश्यत् । अश्वस्तुतिः आश्वमेधिकं प्रागाग्नेयः कृष्णग्रीव इत्येतस्मात् हे भगवन्नग्ने समिद्धः संदीप्तः । अञ्जन् व्यक्तीकुर्वन् आज्ये हि सर्वासां देवतानां मनांस्योतानि ममेदं स्यात् ममेदं स्यादिति । घृतं मधुमत् मधु स्वादु । पिन्वमानः आत्मानं प्रति सिञ्चन् स्वेच्छया पिबन्नित्यर्थः । वाजी वेजनवान् चलनवान् वहन्वाजिनं हविः । हे जातवेदः । देवानां वक्षि वह प्रापय । प्रियम् आसधस्थं सहस्थानम् ॥ १ ॥

आश्वमेधिकोऽध्यायः ततोऽस्य प्रजापतिर्ऋषिः । आद्या एकादश त्रिष्टुभः आप्रीसंज्ञाः अश्वस्तुतयो वामदेवपुत्रेण बृहदुक्थेन समुद्रपुत्रेणाश्वेन वा दृष्टाः समित्तनूनपादिडादिदेवताकाः ।

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । समिद्धो अञ्जन् । एकादश त्रिष्टुभः आप्र्यो नाराशंसा बृहदुक्थो वामदेव्योऽश्वो वा सामुद्रिरपश्यत् । अश्वस्तुतिः आश्वमेधिकं प्रागाग्नेयः कृष्णग्रीव इत्येतस्मात् । हे भगवन् हे अग्ने हे जातवेदः त्वं देवानां प्रियं सधस्थं सहस्थानम् आवक्षि आवह प्रापय किं त्वं समिद्धः संदीप्तः अञ्जन् जगत् व्यक्तीकुर्वन् मतीनां कृदरं प्रज्ञानानामुदरम् आज्यविशेषणम् आज्येन हि सर्वासां देवतानां मनांस्योतानि भवन्ति ममेदं स्यादिति तथा मधुमत् स्वादु ईदृशं घृतं पिन्वमानः आत्मानं प्रति सिञ्चन् स्वेच्छया पिबन्नित्यर्थः वाजी वेजनवान् चलनवान् वाजिनं हविः वहन् ॥ १ ॥

हे अग्ने ! हे जातवेदः जातप्रज्ञान ! त्वं देवानां सधस्थं सह तिष्ठन्ति यत्रेति सहस्थानं प्रति प्रियं प्रीतिमानक्षि आवह देवान् प्रीणयेत्यर्थः वहतेः शपो लुकि मध्यमैकवचने रूपम्। कीदृशस्त्वं समिद्धः दीप्तः मतीनां कृदरं बुद्धीनामुदरं गर्भमञ्जन् व्यक्तीकुर्वन् बुद्धिरहस्यं प्रकाशयन्नित्यर्थः। मधुमत् स्वादु घृतं पिन्वमानः देवेषु सिञ्चन्। वाजी वजति वाजी वज गतौ चलनवान्। वाजिनं हविः वहन् देवान् प्रापयन् सन् प्रीणय ॥ १ ॥

घृतेनाञ्जन्त्सं पथो देवयानान् प्रजानन्वाज्यप्येतु देवान्। अनु त्वा सप्ते प्रदिशः सचन्ताᳪं स्वधामस्मै यजमानाय धेहि ॥ २ ॥

(१) घृतेनाञ्जन्। प्रथमोऽर्द्धर्चः परोक्षकृतः। उत्तरः प्रत्यक्षकृतः। यतस्तयोरेकवाक्यता नोपपद्यते अतः पुरुषव्यत्ययः। घृतेन अञ्जन् समञ्जन्। पथः देवयानान्। हवींषि देवयानाः पन्थान उच्यन्ते। तैर्हि ते जीवन्ति। प्रजानन् अहं देवानां हविरिति जानन् वाजी अपि तु अभ्यागच्छतु देवान्। किञ्च। अनुसचन्ताम् अनुसेवन्ताम् त्वां हे सप्ते सरण। प्रदिशः दिगाश्रयाणि भूतानि। किञ्च स्वधामन्नम् अस्मै यजमानाय धेहि प्रयच्छ अत्र घृतशब्दस्तनूनपाच्छब्दपर्यायः ॥ २ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। घृतेनाञ्जन् प्रथमोऽर्धर्चः परोक्षकृतः उत्तरः प्रत्यक्षकृतः वाजी देवान् अप्येतु अभ्यागच्छतु कीदृशः घृतेन देवयानान् पथः अञ्जन् समञ्जन् हवींषि देवयानाः पन्थान उच्यन्ते तैर्हि ते जीवन्ति प्रजानन् प्रकृष्टज्ञानः अहं देवानां हविरिति जानन् किञ्च हे सप्ते सरण प्रदिशः दिगाश्रयाणि भूतानि त्वाम् अनुसचन्तां सेवन्ताम्। किञ्च अस्मै यजमानाय स्वधामन्नं धेहि प्रयच्छ अत्र तनूनपाच्छब्दपर्यायो घृतशब्दः ॥ २ ॥

वाजी अश्वो देवानप्येतु । कीदृशः घृतेन देवयानान् पथः समञ्जन् देवा यान्ति यैस्ते देवयानाः पन्थानो हवींष्युच्यन्ते । प्रजानन् देवानां हविरहमिति जानन् । एवं परोक्षमुक्त्वा प्रत्यक्षमाह । हे सप्ते अश्व ! प्रदिशो दिगाश्रयाणि भूतानि त्वा त्वामनुसचन्ताम् एष सम्बन्धे सपति कर्मणा सम्बध्यते स सप्तिः । किञ्च अस्मै यजमानाय स्वधामन्नं धेहि प्रयच्छ । अत्र घृतशब्दस्तनूनपाद्वाची ॥ २ ॥

ईड्यश्चासि वन्द्यंश्च वाजिन्नाशुश्चासि मेध्यंश्च सप्ते । अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ ३ ॥

(१) ईड्यश्चासि । यस्त्वम् इड्यश्चासि स्तुत्यश्चासि । वन्द्यश्च । हे वाजिन् आशुश्च शीघ्रश्च मेध्यश्च यज्ञसंपादी च असि हे सप्ते । तं त्वाम् अग्निः देवैः वसुभिः सजोषाः समानजोषणः प्रीतम् आशीभिः प्रीतं वन्हिं वोढारम् वहतु प्रापयतु जातवेदाः ॥ ३ ॥

हे वाजिन् ! हे सप्ते ! इड्यः स्तुत्योऽसि वन्द्यः नमनीयोऽसि आशुः शीघ्रः मेध्यः मेधायाश्वमेधाय योग्यः चकाराः समुच्चयार्थाः । किञ्च जातवेदाः अग्निः त्वा त्वां वहतु देवान् प्रापयतु । कीदृशोऽग्निः वसुभिः देवैः सजोषाः जोषसा प्रीत्या सहितः । कीदृशं त्वाम् प्रीतं तुष्टं वह्निं हविषो वोढारम् ॥ ३ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । इड्यश्च । हे वाजिन् हे सप्ते यः त्वमीड्यः स्तुत्योऽसि वन्द्यश्च आशुः शीघ्रः मेध्यः यज्ञसंपादी च असि तं त्वां जातवेदा अग्निर्वहतु प्रापयतु किमग्निः वसुभिर्देवैः सजोषाः समानजोषणः । किं भूतं त्वां प्रीतं वह्निं वोढारम् ॥ ३ ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् । देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ ४ ॥

(१) स्तीर्णं बर्हिः । स्तीर्णमपि बर्हिः सुष्टरीम साधुस्तृणाम आजुषाणा विभक्तेर्डादेशः । सेवमानम् । ततस्तीर्यमाणम् उरु-वहु पृथु विस्तीर्णम् प्रथमानम् । पृथिव्यां वेद्याम् । देवेभिः देवैः युक्तम् । अदितिः सजोषा समानजोषणा सह । प्रीयमाना स्योनं सुखं कृण्वाना कुर्वाणा । सुविते सुगते स्वर्गे प्रजायां वा । दधातु स्थापयतु ॥ ४ ॥

वयं बर्हिः सुष्टरीम साधु स्तरीम स्तृणाम अदितिर्देवी स्तीर्णं तत् बर्हिः सुविते सु इते साधु गते स्वर्गलोके दधातु स्थापयतु । कीदृशी अदितिः सजोषाः जोषसा प्रीत्या युक्ता । स्योनं कृण्वाना सुखं कुर्वती । जुषाणा प्रीयमाणा । कीदृशं बर्हिः उरु बहु पृथु विस्तीर्णम् पृथिव्यां प्रथमानं विस्तार्यमाणम् देवेभिर्युक्तं देवैः सहितम् ॥ ४ ॥

एता उ वः सुभगा विश्वरूपा विपक्षोभिः श्रयमाणा उदातैः । ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥ ५ ॥

---

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । स्तीर्णं बर्हिः । स्तीर्णमपि बर्हिः वयं सुष्टरीम साधु स्तृणाम जुषाणा विभक्तेर्डादेशः । सेवमानं तत्र स्तीर्यमाणं सजोषा समानजोषणा सहप्रीयमाणा स्योनं कृण्वाना सुखं कुर्वन्ती अदितिःसुविते सु इते सुगते स्वर्गलोके प्रजायां वा दधातु स्थापयतु । किं बर्हिः उरु बहु पृथु विस्तीर्णं पृथिव्यां प्रथमानं देवेभिर्युक्तम् ॥ ४ ॥

(१)एता उ वः एताश्च यज्ञगृहद्वारः हे ऋत्विग्यजमानाः वः युष्माकं सुभगाः विश्वरूपाः अनेकरूपचित्रिताः । विपक्षोभिः श्रयमाणा उदातैः । पक्षोभिः उदातैः ऊर्ध्वमायातैः । सततमायातैः सततगमनैः विश्रयमाणा विस्तीर्यमाणाः । पक्षसूशब्दः सान्तः कपाटवचनः । ऋष्वाः महत्यः सतीः सत्यः कवषः कुपिता ससुपिराः । शुम्भमानाः आत्मानं शोभयन्त्यः । द्वारो देवीः दीप्तिमत्यः । सुप्रायणाः सुप्रगमनाः भवन्तु ॥ ५ ॥

हे ऋत्विग्यजमानाः ! यो युष्माकमेता द्वारो देवीः यज्ञगृहद्वारो देव्यः ईदृश्यो भवन्तु उ पादपूरणः । कीदृश्यः सुभगाः शोभनं भगं श्रीर्यासां ताः । विश्वरूपाः नानारूपचित्राः । पक्षोभिः पक्षसूशब्दः सान्तः पक्षवाची पक्षैः पक्षप्रायैः कपाटैः विश्रयमाणाः विस्तार्य्यमाणाः । कीदृश्यैः पक्षोभिः उत् ऊर्ध्वम् आतैः अत्यन्तं विस्तार्यन्ते आताः अत सातत्यगमने ऊर्ध्वं प्रवृत्तैरित्यर्थः । पुनः कीदृश्यो द्वारः ऋष्वाः ऋषन्ति ऋष्वाः ऋष गतौ इतस्ततो गमनशीलाः महत्यः । सतीः सत्यः समीचीनाः । कवषः कु शब्दे कुवन्ति शब्दं कुर्वन्ति कवषः कुवतेरसुन्प्रत्ययः षत्वमार्षम कपाटपिधानसमये शब्दं कुर्वाणाः ससुपिरा वा । शुम्भमानाः शोभमानाः । सुप्रायणाः सुखेन प्रकृष्टमयनं गमनं यासु सुगमनाः ॥ ५ ॥

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि-

---

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । एताः उ वः । हे ऋत्विग्यजमानाः वः युष्माकम् । एताः द्वारो देवीः यज्ञगृहद्वाराः एवं विधा भवन्तु किम्भूताः सुभगाः विश्वरूपाः अनेकरूपाः चित्रिताः उदातैः ऊर्ध्वमायतैः पक्षोभिः पक्षैः कपाटैः विश्रयमाणः विस्तीर्यमाणाः पक्षस् शब्दः सान्तः । ऋष्वाः महत्यः सतीः सत्यः कवषः कुपिताः ससुपिराः शुम्भमानाः आत्मानं शोभयन्त्यः सुप्रगमनाः ॥ ५ ॥

सं विदाने । उपसा वाᳬं सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥ ६ ॥

(१) अन्तरा मित्रावरुणा । ये अन्तरा मध्येन मित्रावरुणा चरन्ती । अयं लोको मित्रोऽसौ वरुण इति श्रुतिः द्यावापृथिव्योर्मध्येन सञ्चरन्त्यौ । मुखं यज्ञानामभिसंविदाने यज्ञानां मुखमग्निहोत्रं तस्य कालम् अभिसंविदाने प्रकथयन्त्यौ । उत्तिष्ठतामयमग्निहोत्रहोमकालः प्राप्त इतीव लक्ष्यते । ते उपासा द्विवचनोपदेशात्सहचरितत्वाच्च द्वितीया रात्रिः । नक्तोपासौ वां युवयोः हे दम्पतियजमानौ सुहिरण्ये साधुहिरण्यालङ्कारभूषिते । सुशिल्पे साध्वन्योऽन्यं प्रतिरूपे ऋतस्य यज्ञस्य योनौ इह सादयामि स्थापयामि ॥ ६ ॥

हे पत्नीयजमानौ ! वां युवयोर्ऋतस्यः यज्ञस्य योनौ इह उपासा उपसौ नक्तोपसौ सादयामि स्थापयामि द्विवचनात् सहचरित्वाच्च द्वितीया रात्रिः । कीदृश्यौ उपसा मित्रावरुणा मित्रावरुणौ अन्तरा द्यावापृथिव्योर्मध्ये सञ्चरन्तीं सञ्चरन्त्यौ वर्त्तमाने अयं वै लोको मित्रोऽसौ वरुण इति श्रुतेर्मित्रवरुणशब्देन द्यावापृथिव्यावुच्येते । यज्ञानां मुखमग्निहोत्रहोमकालमभिसंविदाने कथयन्त्यौ उत्तिष्ठतायमग्निहोत्रहोमकाल इति प्रातर्विप्रा व-

---

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अन्तरा मित्रावरुणा । हे दम्पती यजमानौ वां युवयोर्ऋतस्य यज्ञस्य इह योनौ उपासा द्विवचनोपदेशात् सहचरितत्वाच्च द्वितीया रात्रिः नक्तोपासौ सादयामि स्थापयामि किम्भूते उपासौ मित्रावरुणा अन्तरा चरन्ती द्यावापृथिव्योर्मध्येन सञ्चरन्त्यौ अयं वै लोको मित्रोऽसौ वरुणः यज्ञानां मुखम् अग्निहोत्रहोमकालमभिसंविदाने कथयन्त्यौ उत्तिष्ठतायमग्निहोत्रहोमकालः संप्राप्तः सुहिरण्ये साधुहिरण्यालङ्कारैर्भूषिते सुशिल्पे साधु अन्योऽन्यं प्रतिरूपे ॥ ६ ॥

दन्ति तदुपस्युपचर्य्यते । सुहिरण्ये साधु हिरण्यं भूनं ययोस्ते सुशिल्पे अन्योऽन्यं प्रतिरूपे शिल्पं प्रतिरूपं भवतीति वचनात् ॥ ६ ॥

प्रथमा वां॑ सर॒थिना॑ सु॒वर्णा॑ दे॒वौ पश्य॑न्तौ॒ भुव॑नानि॒ विश्वा॑ । अपि॑प्रयं॒ चोद॑ना वां॒ मिमा॑ना॒ होता॑रा॒ ज्योति॑ः प्र॒दिशा॑ दि॒शन्ता॑ ॥ ७ ॥

(१) प्रथमा वाम् । यौ प्रथमौ होतारौ अयश्चाग्निरसौ च मध्यमः । वां युवयोः हे दम्पती यजमानौ । सरथिना एकरथारूढौ सुवर्णा शोभनवर्णौ । देवौ दानादिगुणयुक्तौ पश्यन्तौ भुवनानि भूतजातानि । विश्वानि सर्वाणि मध्यस्थतया । अपिप्रयम् प्रीणातेरेतद्रूपम् । प्रीणितवानहमस्मि तौ चोदनासु प्रमाणकं कर्म । वां युवयोः हे दम्पती यजमानौ मिमाना निर्मिमाना होतारौ ज्योतिः प्रदिशा दिशन्ता । आहवनीयाख्यं ज्योतिः यष्टव्यमिति प्रदिशा प्रदेशेन अभिनयेन दिशन्ता दर्शयन्तौ । आशते इति वाच्यम् ॥ ७ ॥

हे यजमानौ । वां युवयोः प्रथमा प्रथमौ मुख्यौ होतारा होतारौ अहमपिप्रयं प्रीणितवानस्मि प्रीणातेर्णिजन्तस्य लुङि उत्तमैकत्वे रूपम् अयं चाग्निरसौ च मध्यम इति होतारौ ।

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । प्रथमा वाम् । हे यजमानौ वां युवयोः प्रथमौ होतारौ अयं चाग्निरसौ च मध्यमः तौ अपिप्रयं प्रीणितवानस्मि । प्रीणातेर्णिजन्तस्य लुङि उत्तमैकवचने रूपम् । किम्भूतौ सरथिनौ एकरथारूढौ सुवर्णा शोभनवर्णौ देवौ दानादिगुणयुक्तौ विश्वा सर्वाणि भुवनानि पश्यन्तौ मध्यस्थतया वां युवयोः चोदनाचोदनातिकर्माणि मिमानौ निर्मिमानौ प्रदिशा प्रदेशेनाभिनयेन ज्योतिः दिशन्तौ दर्शयन्तौ आहवनीयाख्यं ज्योतिर्यष्टव्यमिति ७॥

कीदृशौ सरथिना सरथिनौ समानो रथो ययोस्तौ एकरथारूढौ सुवर्णा सुवर्णौ शोभनो वर्णो द्युतिर्ययोस्तौ देवौ दीप्यमानौ दातारौ । विश्वा सर्वाणि भुवनानि पश्यन्तौ । वां युवयोः चोदना चोदनानि कर्माणि मिमाना निर्मिमाणौ । प्रदिशा प्रदेशेनाभिनयेन ज्योतिः दिशन्तौ आहवनीयाख्यं ज्योतिर्यष्टव्यमिति दर्शयन्तौ ॥ ७ ॥

आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत् । इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ ८ ॥

(१) आदित्यैर्नः । अत्र त्रयः पादाः परोक्षकृताः चतुर्थः पादः प्रत्यक्षकृतः । नचैवं सामञ्जस्यम् अतश्चतुर्थस्य पादस्य सङ्गतिः । आदित्यैः सहिता नोऽस्माकं भारती वष्टु कामयतां यज्ञम् । सरस्वती च रुद्रैः सहिता नः अस्मान् आवीत् अवतु । इडा च उपहूता कृतोपाह्वाना वसुभिः सजोषा समानप्रीतिः नः आवीदित्यनुवर्तते । एवमनेन प्रकारेण यज्ञं नोऽस्माकं तिस्रो देव्यः अमृतेषु देवेषु धत्त दधत्विति पुरुषव्यत्ययः परोक्षीकृत्य स्तुताः ता इदानीं प्रत्यक्षकृताः स्तौति । यज्ञं नो देवीरमृतेषु धत्तेति ॥ ८ ॥

आदित्यैः युता भारती नोऽस्माकं यज्ञं वष्टु कामयताम् । सरस्वती रुद्रैः सह नोऽस्माकं यज्ञमावीत् अवतु । इडा चा-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । आदित्यैर्नः । अत्र त्रयः पादाः परोक्षकृताः चतुर्थः प्रत्यक्षकृतः नचैवं सामञ्जस्यमतश्चतुर्थपादस्य सङ्गतिः । आदित्यैः सहिता भारती नोऽस्माकं यज्ञं वष्टु कामयतां सरस्वती च रुद्रैः सह नोऽस्मान् आवीत उपहूता कृतोपहवा वसुभिः सजोषाः समानप्रीतिः इडा नः अवत्विति पुरुषव्यत्ययः ॥ ८ ॥

धत्त। कीदृशी उपहूता कृतोपह्वा वसुभिः देवैः सजोषाः प्रीतियुता। एवं परोक्षमभिधाय प्रत्यक्षमाह हे देवीः देव्यो भारतीसरस्वतीडाः! नोऽस्माकं यज्ञममृतेषु देवेषु धत्त यूयं स्थापयत ॥ ८ ॥

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः। त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥ ९ ॥

(१) त्वष्टा वीरम्। यः त्वष्टा वीरं पुत्रम् देवकामम् ऋणत्रयापाकरणसमर्थं जजान जनयति। यस्माच्च त्वष्टुः अर्वा अरणः आशुः शीघ्रः अश्वः जायते। यश्च त्वष्टा इदं विश्वं सर्वं भुवनं भूतजातं जजान जनयति। तं त्वष्टारं बहोः भूतग्रामस्य कर्तारम् इह यज्ञे यक्षि यज हे होतः ॥ ९ ॥

त्वष्टा वीरं पुत्रं जजान जनयति। कीदृशं वीरं देवकामं देवान् कामयते देवकामस्तम् यष्टारमृणत्रयापाकरणसमर्थमित्यर्थः। त्वष्टुः सकाशात् अश्वः जायते उत्पद्यते। कीदृशोऽश्वः अर्वा इयर्त्ति गच्छति अर्वा अन्येभ्योऽपि दृश्यन्त इति (पा० ३, २, ७५) अर्तेर्वनिप् आशुः अश्नुते दिशो व्याप्नोति अश्नाति भक्षयति वा आशुः उणप्रत्ययः। किञ्च त्वष्टा इदं विश्वं सर्वं भुवनं भूतजातं जजान उदपादयत्। हे होतः! एवं बहोः कार्यस्य कर्तारं त्वष्टारमिह यज्ञे त्वं यक्षि यज यजतेः शपि लुप्ते रूपम् ॥ ९ ॥

अश्वो घृतेन त्मन्या समक्त उप देवाँ२॥ ऋतुशः

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। त्वष्टा वीरम्। त्वष्टा देवकामं ऋणत्रयापाकरणसमर्थं वीरं पुत्रं जजान जनयति यस्माच्च त्वष्टुः अर्वं अरणः आशुः शीघ्रः अश्वः जायते यश्च त्वष्टा इदं विश्वं भुवनं जजान हे होतः बहोर्भूतग्रामस्य कर्तारं तं त्वष्टारम् इह यक्षि यज ॥ ९ ॥

पाथ एतु । वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १० ॥

(१)अश्वो घृतेन। यः अश्वः पत्नीभिः घृतेन त्मन्या आत्मना स्वयमेव समक्तः समुक्षितः सन्। उप एतु उपगच्छतु देवान् प्रति ऋतुशः ऋतावृतौ कालेकाले पाथः अन्नं भूत्वा। कथं देवलोकमजानन्नश्वो देवान् प्रति यायादित्यत आह। वनस्पतिः देवलोकं प्रजानन् अश्वस्य दर्शयत्विति शेषः। अग्निना च तन्मित्रेण हव्या हवींषि स्वदितानि मृष्टीकृतानि वक्षत् वहतु देवान् प्रति ॥ १० ॥

पाथ इत्यन्ननाम। अश्वः पाथः अश्वरूपं हविः ऋतुशः ऋतौ-ऋतौ यज्ञकाले त्मन्या आत्मन्या स्वयं देवान् उप एतु प्राप्नोतु। विभक्त्यादेशे मन्त्रेष्वाङ्यादेरात्मन इति (पा० ६, ४, १४१) आलोपः। कीदृशोऽश्वः घृतेन समक्तः पत्नीभिः समुक्षितः। किञ्च वनस्पतिर्देवः हव्या हव्यानि वक्षत् वहतु देवान् प्रति। कीदृशो वनस्पतिः देवलोकं प्रजानन् विदन् अत एव वहतु। कीदृशानि हव्यानि अग्निना स्वदितानि आस्वादितानि आस्वाद्य मिष्टीकृतानि ॥ १० ॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने। स्वाहाकृतेन हविषा पुरोगा याहि साध्या

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। अश्वो घृतेन पत्नीभिः घृतेन त्मना आत्मना स्वयमेव घृतेन समक्तः समुक्षितः सन् अश्वः ऋतुशः ऋतौ ऋतौ पाथः अन्नं भूत्वा देवान् उप एतु उपगच्छतु कथं देवलोकमजानन्नश्वो देवान् यायादित्यत आह वनस्पतिर्देवलोकं प्रजानन् अश्वस्य दर्शयत्विति शेषः अग्निना स्वदितानि मृष्टीकृतानि हव्या हवींषि वक्षत् वहतु देवान् प्रति ॥ १० ॥

हविरदन्तु देवाः ॥ ११ ॥

(१)प्रजापतेस्तपसा। यस्त्वं प्रजापतेस्तपसा वावृधानः वर्द्धमानः सद्योजातः अरण्यात् शकासादुत्पन्नः दधिषे धारयासि यज्ञं हे अग्ने । तं त्वां ब्रवीमि स्वाहाकृतेन हविषा । स्वाहाकारोपलक्षितेन हविषा पुरोगाः पुरोगामी सन् । याहि साध्या साधु शब्दविभक्त्यर्थे ड्यादेशे टिलोपः । साधु हविः अदन्तु देवाः ॥ ११ ॥

हे अग्ने ! त्वं यज्ञं दधिषे धारयसि लडर्थे लिट् । कीदृशस्त्वम् प्रजापतेस्तपसा वावृधानः वर्धमानः । सद्यो जातःअरण्यादुत्पन्नः । किञ्च स्वाहाकृतेन स्वाहाकारमुक्ता हुतेन हविषा सह पुरोगाः पुरो गच्छतीति अग्रगामी सन् याहि देवान् गच्छ त्वयि गते सति देवाः हविरदन्तु कीदृशं हविः साध्या साधु श्रेष्ठम् विभक्तेर्ड्यादेशे टिलोपे रूपम् ॥ ११ ॥

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १२ ॥

(२)यदक्रन्दः । त्रयोदश त्रिष्टुभोऽश्वाभिष्टवो होतुः । यत्

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । प्रजापतेः । हे अग्ने त्वं प्रजापतेः तपसा वावृधानः वर्द्धमानः सन् सद्यो जातः अरण्याः सकाशादुत्पन्नः यज्ञं दधिषे धारयसि स्वाहाकृतेन स्वाहाकारेणोपलक्षितेन हविषा पुरोगाः पुरोगामी सन् याहि साध्या साधुशब्दस्य विभक्तेर्याडादेशे अन्तलोपः साधु हविः देवाः अदन्तु भक्षयन्तु ॥ ११ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । यदक्रन्दः । त्रयोदश त्रिष्टुभोऽश्वाभिष्टवो होतुः हे अर्वन् त्वं यत् यदा प्रथमं जायमानः सन् तथा समुद्रात्

पाथ एतु । वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १० ॥

(१)अश्वो घृतेन। यः अश्वः पत्नीभिः घृतेन त्मन्या आत्मना स्वयमेव समक्तः समुक्षितः सन्। उप एतु उपगच्छतु देवान् प्रति ऋतुशः ऋतावृतौ कालेकाले पाथः अन्नं भूत्वा। कथं देवलोकमजानन्नश्वो देवान् प्रति यायादित्यत आह। वनस्पतिः देवलोकं प्रजानन् अश्वस्य दर्शयत्विति शेषः। अग्निना च तन्मित्रेण हव्या हवींषि स्वदितानि मृष्टीकृतानि वक्षत् वहतु देवान् प्रति ॥ १० ॥

पाथ इत्यन्ननाम। अश्वः पाथः अश्वरूपं हविः ऋतुशः ऋतौ-ऋतौ यज्ञकाले त्मन्या आत्मन्या स्वयं देवान् उप एतु प्राप्नोतु। विभक्तेर्यादेशे मन्त्रेष्वाङ्यादेरात्मन इति (पा० ६, ४, १४१) आलोपः। कीदृशोऽश्वः घृतेन समक्तः पत्नीभिः समुक्षितः। किञ्च वनस्पतिर्देवः हव्या हव्यानि वक्षत् वहतु देवान् प्रति। कीदृशो वनस्पतिः देवलोकं प्रजानन् विदन् अत एव वहतु। कीदृशानि हव्यानि अग्निना स्वदितानि आस्वादितानि आस्वाद्य मिष्टीकृतानि ॥ १० ॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने। स्वाहाकृतेन हविषा पुरोगा याहि साध्या

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। अश्वो घृतेन पत्नीभिः घृतेन त्मना आत्मना स्वयमेव घृतेन समक्तः समुक्षितः सन् अश्वः ऋतुशः ऋतौ ऋतौ पाथः अन्नं भूत्वा देवान् उप एतु उपगच्छतु कथं देवलोकमजानन्नश्वो देवान् यायादित्यत आह वनस्पतिर्देवलोकं प्रजानन् अश्वस्य दर्शयत्विति शेषः अग्निना स्वदितानि मृष्टीकृतानि हव्या हवींषि वक्षत् वहतु देवान् प्रति ॥ १० ॥

हविरदन्तु देवाः ॥ ११ ॥

(१)प्रजापतेस्तपसा। यस्त्वं प्रजापतेस्तपसा वावृधानः वर्द्धमानः सद्योजातः अरण्यात् अकाशादुत्पन्नः दधिषे धारयासि-यज्ञं हे अग्ने। तं त्वां ब्रवीमि स्वाहाकृतेन हविषा । स्वाहाकारोपलक्षितेन हविषा पुरोगाः पुरोगामी सन् । याहि साध्या साधु शब्दविभक्त्यर्थे ड्यादेशे टिलोपः । साधु हविः अदन्तु देवाः ॥ ११ ॥

हे अग्ने ! त्वं यज्ञं दधिषे धारयसि लडर्थे लिट् । कीदृशस्त्वम् प्रजापतेस्तपसा वावृधानः वर्धमानः । सद्यो जातःअरण्यादुत्पन्नः । किञ्च स्वाहाकृतेन स्वाहाकारमुक्त्वा हुतेन हविषा सह पुरोगाः पुरो गच्छतीति अग्रगामी सन् याहि देवान् गच्छ त्वयि गते सति देवाः हविरदन्तु कीदृशं हविः साध्या साधु श्रेष्ठम् विभक्तेर्ड्यादेशे टिलोपे रूपम् ॥ ११ ॥

यदक्र॑न्दः प्रथ॒मं जाय॑मान उ॒द्यन् स॑मु॒द्रादु॒त वा॒ पुरी॑षात् । श्ये॒नस्य॑ प॒क्षा ह॑रि॒णस्य॑ बा॒हू उ॑प॒स्तुत्यं॒ महि॑ जा॒तं ते॑ अर्वन् ॥ १२ ॥

(२)यदक्रन्दः । त्रयोदश त्रिष्टुभोऽश्वाभिष्टवो हौतुः । यत्

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । प्रजापतेः । हे अग्ने त्वं प्रजापतेः तपसा वावृधानः वर्द्धमानः सन् सद्यो जातः अरण्याः सकाशादुत्पन्नः यज्ञं दधिषे धारयसि स्वाहाकृतेन स्वाहाकारेणोपलक्षितेन हविषा पुरोगाः पुरोगामी सन् याहि साध्या साधुशब्दस्य विभक्तेर्याडादेशो अन्तलोपः साधु हविः देवाः अदन्तु भक्षयन्तु ॥ ११ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । यदक्रन्दः । त्रयोदश त्रिष्टुभोऽश्वाभिष्टवो हेतुः हे अर्वन् त्वं यत् यदा प्रथमं जायमानः सन् तथा समुद्रात्

यदा अक्रन्दः हेषाशब्दमकार्षीः । प्रथमञ्जायमानः यच्च उद्यन् उद्गच्छन् समुद्रात् अन्तरिक्षलोकात् पार्थिवाद्वा समुद्रात् । उत वा अपि च पुरीषात् अन्यस्माज्जलजसंघातात्पशोर्वा । उद्यन् अक्रन्दः तदा श्येनस्य पक्षौ शीघ्रतया अजैषीः हरिणस्य बाहू शीघ्रतया अजैषीः इति शेषः । उपस्तुत्यम् उपसक्रम्य स्तुत्यं स्तवनीयमृषिभिः महि महत् जातमुत्पन्नं ते तव हे अर्वन् अरण अश्व ॥ १२ ॥

अथोद्दशाश्वस्तुतिरूपास्त्रिष्टुभो जमदग्निदीर्घतमोभ्यां दृष्टाः अश्वस्तुतौ विनियुक्ताः । हे अर्वन् अश्व ! यत् यदा तमक्रन्दः क्रन्दितवान् हेषारवमकार्षीः तदा ते तव महि माहात्म्यम् उपस्तुत्यं स्तोतुं योग्यं जातम् । कथं स्तुत्यं तदाह श्येनस्य पक्षौ हरिणस्य बाहू अनेन क्रन्दनेन जितावियिति शेषः श्येनपक्षौ शौर्य्येण हरिणबाहू वेगेनेत्यर्थः । कीदृशस्त्वम् समुद्रात् अन्तरिक्षात् उदधेर्वा प्रथमं जायमानः उत वा अथवा पुरीषात् पशोः सकाशात् उद्यन् उत्पद्यमानः ॥ १२ ॥

यमेनं दृत्तं त्रित एनमायुनगिन्द्रं एणं प्रथमो अध्यंतिष्ठत । गन्धर्वो अस्य रशनामंगृभ्णात सूरादश्वं वसवो निरंतष्ट ॥ १३ ॥

(२) यमेन दत्तम् । अत्र चतुर्थः पादः प्रथमं व्याख्यायते

अन्तरिक्षात् पार्थिवात् समुद्रात् वा उत वा अथवा पुरीषत् पशोः उद्यन् सन् अक्रन्दः हेषाशब्दमकार्षीत् तदा श्येनस्य पक्षौ शीघ्रतया अजैषीः इति शेषः हरिणस्य बाहू च अजैषीः यद्वा श्येनस्य पक्षौ हरिणस्य बाहू ते जातौ ते तव महि माहात्म्यम् उपस्तुत्यम् ऋषिभिस्तव जातमुत्पन्नम् ॥ १२ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । यमेन दत्तम् । अत्र चतुर्थपादप्रभृतिव्या-

योग्यत्वात् । सूरादश्वं वसवो निरतष्ट हे वसवः यूयं सूरात् आदित्यमण्डलात् अश्वं निरतष्ट । तक्षतिः करोतिकर्मा निष्कृष्य कृतवन्तः । सं यमेन दत्तम् त्रितः त्रिस्थानो वायुः एवम् आयुनक् युक्तवान् । इन्द्रश्च एनं प्रथमः अध्यतिष्ठत् । गन्धर्वश्च विश्वावसुः अस्य रशनाम् अगृभ्णात् अगृह्णात् । य इत्थंभूतोऽश्वः तं वयं स्तुम इति वाक्यशेषः ॥ १३ ॥

वसवोऽष्टगणदेवाः सूरादादित्यमण्डलादश्वं निरतष्ट निष्कृष्टवन्तः तक्षतेर्लुङि मध्यमबहुवचनम् । ततः त्रितः त्रिस्थानो वायुः यमेन दत्तमेनमश्वम् आयुनक् युक्तवान् युजेर्लङ् संहितायामश्रो दीर्घः । इन्द्रश्चैनमश्वं प्रथमः अध्यतिष्ठत् आरूढवानधिष्ठितवान् । गन्धर्वः विश्वावसुरस्याश्वस्य रसनामगृभ्णात् गृहीतवान् । ईदृशस्तं स्तुमः । एणामिति पत्वं छान्दसम् ॥ १३ ॥

असि॑ य॒मो अस्या॑दि॒त्यो अ॑र्व॒न्नसि॑ त्रि॒तो गुह्ये॑न व्र॒तेन॑ । असि॒ सोमे॑न स॒मया॒ विपृ॑क्त आहु॒स्ते त्रीणि॑ दि॒वि बन्ध॑नानि ॥ १४ ॥

(१) असि यमः । भवासि च आदित्यः हे अर्वन् अरण

स्या । हे वसवः यूयं सुरात् आदित्यमण्डलात् अश्वं निरतष्ट निष्कृष्य कृतवन्तः तक्षतिः करोतिकर्मा लुङि मध्यमबहुवचनं त्रितः त्रिस्थानो वायुः यमेन दत्तम् एनमश्वम् आयुनक् युक्तवान् युजेर्लङ् संहितायामश्रो दीर्घः इन्द्रश्च एनं प्रथमः अध्यतिष्ठत् गन्धर्वश्च विश्वावसुः अस्याश्वस्य रशनाम् अगृभ्णन् गृहीतवान् य ईदृशस्तं वयमिति वाक्यशेषः ॥ १३ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । असि यमः हे अर्वन् त्वं यमोऽसि भवासि आदित्यश्चासि गुह्येन व्रतेन गोप्येन कर्मणा त्रितः त्रिस्थानः इन्द्रो॰

अश्व । भवसि च त्रितास्त्रिस्थान इन्द्रः गुह्येन गुप्तव्रतेन कर्मणा । भवसि च सोमेन समया मध्यतः विपृक्तः संपृक्तः एकीभूतः । एताभिर्देवताभिस्तव सायुज्यञ्जातमित्यभिप्रायः । किञ्च आहुः बुधाः ते तव । त्रीणि दिवि द्युलोके आदित्यस्यात्मनाऽवस्थितस्य बन्धनानि ऋग्यजुःसामलक्षणानि । मण्डलान्तरपुरुषार्चीपि ॥ १४ ॥

हे अर्वन् ! त्वं यमोऽसि आदित्यश्चासि गुह्येन गोप्येन व्रतेन कर्मणा त्रितः त्रिस्थान इन्द्रोऽसि । सोमेन समया सह विपृक्तः सम्पृक्तः एकीभूतोऽसि । एवं यमादिभिः सायुज्यं प्राप्तस्य तव दिवि नभसि आदित्यरूपेण स्थितस्य त्रीणि बन्धनानि बुधा आहुः । ऋग्यजुःसामरूपाणि मण्डलान्तरपुरुषार्चीपि त्रीणि बन्धनानि स्वरूपाणि । यदेतं मण्डलं तपति तन्महदुक्थमित्यादिश्रुतेः ॥ १४ ॥

त्रीणि॑ त आहुर्दि॒वि बन्ध॑नानि॒ त्रीण्य॒प्सु त्रीण्य॒न्तः स॑मु॒द्रे । उ॒तेव॑ मे॒ वरु॑णश्छन्त्स्यर्व॒न् यत्रा॑ त आ॒हुः प॑र॒मं ज॒नित्र॑म् ॥ १५ ॥

(१) त्रीणि ते । त्रीणि ते आहुर्दिवि बन्धनानि इति व्या-

ऽसि सोमेन समया मध्यतः विपृक्तः संपृक्तः एकीभूतोऽसि एताभिर्देवताभिस्तव सायुज्यं सञ्जातमिति भावः किञ्च दिवि आदित्यात्मना स्थितस्य ते तव त्रीणि बन्धनानि ऋग्यजुःसामलक्षणानि मण्डलान्तरपुरुषार्चीपि बुधा आहुः ॥ १४ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । त्रीणि ते व्याख्यातम् अप्सु त्रीणि बन्धनानि वृष्टिर्वृष्टिर्बीजम् इति अन्तः समुद्रे अन्तरिक्षमध्ये त्रीणि बन्धनानि मेघो विद्युत्स्तनयित्नुरिति उत इव अपि च हे अर्वन् यत्र ते तव परमं जनित्रं जन्म वायुरूपेण आहुः वरुणः वरुणरूपः त्वं तत्कर्म मे मम छंसि छन्दतिरर्चतिकर्मा शंससि कथयसि ॥ १५ ॥

ख्यातम् । त्रीणि अप्सु बन्धनानि कूपिर्द्रुप्तिर्वीजमिति । त्रीण्यन्तःसमुद्रे समुद्रशब्देनान्तरिक्षमभिधीयते । अन्तरिक्षस्य मध्ये तत्र त्रीणि बन्धनानि । मेघो विद्युत् अशनिरिति उत इव अपि च । मे मम वरुणः छन्त्सि छन्दतिरर्चतिकर्मा शंसति कथयति हे अर्वन् अरण अश्व । यत्र ते तव आहुः परमञ्जनित्रं जन्म वायुरूपेण ॥ १५ ॥

हे अर्वन् ! यत्र ते तव परमं जनित्रं बुधा आहुः आदित्यरूपेण तत्र ते तव त्रीणि बन्धनानि पूर्वमन्त्रोक्तान्याहुः । अप्सु उदकेषु त्रीणि बन्धनानि आहुः कूपिर्द्रुप्तिर्वीजमिति । अन्तःसमुद्रे अन्तरिक्षमध्ये त्रीणि बन्धनानि आहुः मेघो विद्युत् स्तनयित्नुरिति । उतेव उतापि च वरुणः वरुणरूपः त्वं मे मां छन्त्सि प्रशंससि कर्मणि षष्ठी छन्दतिरर्चतिकर्मा अर्चनं प्रशंसनम् ॥ १५ ॥

इमा ते॑ वाजिन्नवमार्जना॑नीमा श॒फाना॑ᳪ सनि॒तुर्नि॒धाना॑ । अत्रा॑ ते भ॒द्रा र॑श॒ना अ॑पश्यमृ॒तस्य॒ या अ॑भि॒रक्ष॑न्ति गो॒पाः ॥ १६ ॥

(१)इमा ते । इमानि ते तव हे वाजिन् अश्व । अवमार्जनानि यैस्त्वावमार्जनङ्कृतन्तान्यवमार्जनानि नूतनवेतसकटप्रभृतीनि अहमपश्यम्पश्यामि । इमानि च शफानां खुराणां सनितुः स-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । इमा ते । हे वाजिन् ते तव इमानि अवमार्जनानि अहमपश्यं पश्यामि यैस्ते अवमार्जनं कृतं तान्यवमार्जनानि वेतसकटप्रभृतीनि इमा इमानि शफानां खुराणां सनितुः संभक्तुः पादन्यासस्य निधानानि अपश्यम् अत्र ते तव भद्राः भन्दनीयाः स्तुत्याः रशनाः अहमपश्यं याः रशनाः ऋतस्य यज्ञस्य गोपाः गोपायितव्यान् पशून् अभिरक्षन्ति ॥ १६ ॥

म्भक्तुः पादवाससः निधाना निधानानि यत्र पादवासः प्रभृतीनि धीयन्ते तानि अहमपश्यम्। अपि च अत्र ते तव भद्रा भन्दनीयाः स्तुत्याः रशना अहमपश्यम्। ऋतस्य यज्ञस्य या रशना अभिरक्षन्ति गोपाः गोपायितव्यान्पशून्॥ १६॥

हे वाजिन्! ते तव इमा इमानि अवमार्जनानि अहमपश्यं पश्यामि अवमार्ज्यन्ते यैस्तानि अवमार्जनानि वेतसकटादीनि। शफानां खुराणां सनितुः सम्भक्तुर्नियन्तुः पादवासस्य इमा इमानि निधाना, निधानानि स्थानानि अपश्यम्। अत्र यज्ञे ते तव रशनाः मध्यबन्धनरज्जूः अपश्यम्। कीदृशी रशनाः भद्राः कल्याणरूपाः स्तुत्याः। गोपाः गोपायन्ति गोपाः रक्षणकर्त्र्यः। याः रशनाः ऋतस्यः ऋतं यज्ञमभिरक्षन्ति कर्मणि षष्ठी। निपातस्य चेति (पा० ६, ३, १३६) अत्रपदस्यदीर्घ॥ १६॥

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम्। शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ १७॥

(१)एतैरधस्तनैरश्वचरित्रैरश्वमभिष्टुत्य अथेदानीं भविष्यत्क-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। एतैरधस्तनैरश्वचरित्रैरश्वमभिष्टुत्येदानीं भविष्यत्कालकर्मणाभिष्टौति आत्मानं ते हे अश्व पशुसंमर्शनोत्तरकालं ते तव आत्मानं दिव्यम् अहं मनसा आरात् दूरे अजानां जानामि जानातेर्लङ्युत्तमैकवचनम् किम्भूतमात्मानम् अवः अधस्तात् प्रदेशात् दिवा दिवं प्रतिपतयन्तम् उत्पतयन्तं पतगमादित्यम् शिरश्च आदित्यरूपम् अहं तव अपश्यं पश्यामि किम्भूतं शिरः सुगेभिः सुगमैः अरेणुभिरुपद्रवरहितैः पथिभिः मार्गैः जेहमानं गच्छत् पतत्रि उत्पतनशीलम्॥ १७॥

मेभिरभिप्रीति । आत्मानन्ते । पशुसंशनोत्तरकालम् आत्मानन्ते तव दिव्यमहं मनसा आरात् दूरात् अजानाम् जानामि । जानातेरेतद्नुदात्तत्वाद्रूपं लुङ्येकवचने । अवः अधस्तात् । प्रदेशात् । दिवा दिवं प्रति पतयन्तम् उत्पतयन्तम् पतङ्गम् आदित्यरूपिणम् । शिरश्चाहं तव अपश्यम् । पथिभिः मार्गैः सुगेभिः सुगमनैः अरेणुभिः उपद्रवरहितैः जेहमानङ्गच्छत् पतत्रि उत्पतनशीलम् ॥ १७ ॥

एवमश्वं स्तुत्वा भविष्यत्कर्मणा स्तौति । हे अश्व ! ते तवात्मानं मनसा आराद् दूरे अहमजानां जानामि जानातेर्लङ्युत्तमैकवचनम् । कीदृशमात्मानम् अवः अधस्तात् प्रदेशात् दिवा नभोमार्गेण पतङ्गं सूर्यं प्रति पतयन्तमुत्पतन्तम् पत पैश्वर्यगत्योश्चुरादिरदन्तः । किञ्च ते शिरः सूर्यरूपं पश्यामि । कीदृशं शिरः पथिभिः नभोमार्गैः जेहमानं गच्छत् कीदृशैः पथिभिः सुगेभिः सुगैः सुखेन गम्यते येषु ते सुगास्तैः सुदुरोरधिकरण इति (पा० ३, २, ४८ वा० १) गमेर्डः अरेणुभिः नास्ति रेणुर्येषु ते अरेणवस्तैः उपद्रवरहितैरित्यर्थः । पुनः कीदृशं शिरः पतत्रि पतनशीलं गन्तृ ॥ १७ ॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः । यदा ते मर्तो अनु भोगमानडादिद् ग्रसिष्ठ ओषधीरजीगः ॥ १८ ॥

(१)अत्राते । अत्र द्युलोके ते तव रूपमुत्तमम् अहमपश्यम्प

---

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अत्राते । अत्र द्युलोके ते तव उत्तमं रूपमपश्यं पश्यामि कीदृशम् इषः अन्नानि जिगीषमाणं जेतुमिच्छन् गोः गन्तुर्मण्डलस्य पदं आस्थितम् एवं द्युलोकस्थितस्याहमुत्तमं रूपमपश्यम् अथ पुनः पृथिवीस्थितस्य ते तव यदा मर्त्यो मनुष्यः भो-

श्यामि. कथम्भूतम् । जिगीपमाणं जेतुमिच्छति इषः अन्नानि आ आस्थितं पदे गोः गन्तुर्मण्डलस्य । एवं द्युलोकावस्थितस्य तवाहं रूपमपश्यम् । अथ पुनः पृथिवीस्थितस्य यदा ते तव मर्तो मनुष्यः भोगम् वाहनादिकम् अनु आनट् अनुव्याप्नोत् आत् इत् इति पादपूरणार्थौ तदा ग्रसिष्ठः ग्रसु अदने । ग्रसितृतमः अतिशयेन भक्षयिता सन् ओषधीः अजीगः गृह्णासि गिरसि वा । अन्यो हि वाहितश्चलितुमपि न शक्नोति त्वं वीर्यवत्तरोऽसीति भावः ॥ १८ ॥

हे अश्व ! अत्रास्मिन् गोः सूर्य्यस्य पदे मण्डले ते तवोत्तमं रूपमहम् आ अपश्यम् समन्तात् पश्यामि गौर्नादित्ये बलीवर्दे इत्यभिधानाद् गौरादित्यः । कीदृशं रूपम् इषः अन्नानि हवींषि जिगीषमाणं जेतुमिच्छत् जयतेः सन्नन्तात्छानच् सन्लिटोर्जेरिति (पा० ७, ३, ५७) गः । किञ्च मर्त्तः मनुष्यो यदा ते तव भोगमनु आनट् अनुव्याप्नोति हवीरूपं भोगं समर्पयति आत् इत् अनन्तरमेव त्वमोषधीः हवीरूपाः अजीगः गॄ निगरणे गिरसि भक्षयसि । कीदृशस्त्वम् ग्रसिष्ठः ग्रसते इति ग्रसिता अतिशयेन ग्रसिता ग्रसिष्ठः अत्यन्तं भक्षयिता इष्ठनि तृचो लुक् । गृणातेर्णिजन्तस्याजीगः ॥ १८ ॥

अनु॑ त्वा॒ रथो॒ अनु॒ मर्यो॑ अर्व॒न्ननु॒ गावोऽनु॒ भगः॑ क॒नीना॑म् । अनु॒ व्राता॑स॒स्तव॑ स॒ख्यमी॑यु॒रनु॑ दे॒वा म॑मिरे वी॒र्यं॑ ते ॥ १९ ॥

गमनु आनट् वाहनरूपेण अनुव्याप्नोत् आत् इत् पादपूरणौ तदा ग्रसिष्ठः ग्रस अदने ग्रसितृतमः अतिशयेन भक्षयिता सन् ओषधीः अजीगः गृह्णासि गिरसि वा अन्योऽतिवाहितश्चलितुमपि न शक्नोति त्वं तु वीर्यवत्तरोऽसीति भावः ॥ १८ ॥

(१)अनु त्वा । अनु इति परभावमाचष्टे । हे अर्वन् यस्य सुकृतिनो गृहे त्वञ्चेष्टसे तस्य गृहे त्वामनुरथः त्वामनु मर्यो मनुष्यः त्वामनु भगः सौभाग्यं कनीनां कन्यकानाम् । तत्रैते पदार्था भवन्तीत्यर्थः किं च । व्रातासः पुरुषसङ्घा अपि तव सख्यं सखिभावमन्वीयुः । किमन्यद् बहु वदामः । अनुदेवा ममिरे वीर्यन्ते अनुममिरे अनुमितवन्तः देवा वीर्यं वीरकर्म ते तव । अचिन्त्यशक्तिस्त्वमसीत्यभिप्रायः ॥ १९ ॥

हे अर्वन् अश्व । रथः त्वा त्वामनु वर्त्तत इति शेषः । मर्यः मनुष्यः त्वामनु । त्वामनु । कनीनां कन्यानां भगः सौभाग्यं त्वामनु । यत्र त्वम् तत्र रथादयः स्युरित्यर्थः । किञ्च व्रातासः व्राताः मनुष्यसङ्घाः तव सख्यं मैत्रीम् अन्वीयुः प्रापुः । किं बहुना देवाः तव वीर्यं सामर्थ्यमनु ममिरे अनुमितवन्तः ॥ १९ ॥

हिर॑ण्यशृ॒ङ्गोऽयो॑ अस्य॒ पादा॒ मनो॑जवा॒ अव॑र॒ इन्द्र॑ आसीत् । दे॒वा इद॑स्य हवि॒रद्य॑माय॒न् यो अर्व॑न्तं प्रथ॒मो अ॒ध्यति॑ष्ठत् ॥ २० ॥

(२)हिरण्यशृङ्गः । हिरण्यं शृङ्गस्थानीयमस्येति हिरण्यशृङ्गः ।

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । अनु त्वा । हे अर्वन् यस्य गृहे त्वं चेष्टसे तं त्वामनुरथः मर्त्यो मनुष्यः कनीनां कन्यानां भगः सौभाग्यं च त्वामनु एव तत्रैते पदार्था भवन्तीत्यर्थः किञ्च व्रातासः मनुष्यसंघाः तव सख्यं मैत्रीम् अन्वीयुः किञ्चान्यद् बहु वदामः देवाः ते तव वीर्यम् अनुममिरे अनुमितवन्तः अचिन्त्यशक्तिस्त्वमिति भावः ॥१९॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । हिरण्यशृङ्गः योऽश्वः हिरण्यशृङ्गः हिरण्यं शृङ्गस्थानीयं यस्य स यस्यास्याश्वस्य अयः लोहं हिरण्यं वा पा-

श्यामि कथम्भूतम् । जिगीपमाणं जेतुमिच्छति इषः अन्नानि आ आस्थितं पदे गोः गन्तुर्मण्डलस्य । एवं द्युलोकावस्थितस्य तवाहं रूपमपश्यम् । अथ पुनः पृथिवीस्थितस्य यदा ते तव मर्तो मनुष्यः भोगम् वाहनादिकम् अनु आनट् अनुव्याप्नोत् आत् इत् इति पादपूरणार्थौ तदा ग्रसिष्ठः ग्रसु अदने । ग्रसितृतमः अतिशयेन भक्षयिता सन् ओषधीः अजीगः गृह्णासि गिरसि वा । अन्यो हि वाहितश्चलितुमपि न शक्नोति त्वं वीर्यवत्तरोऽसीति भावः ॥ १८ ॥

हे अश्व ! अत्रास्मिन् गोः सूर्य्यस्य पदे मण्डले ते तवोत्तमं रूपमहम् आ अपश्यम् समन्तात् पश्यामि गौर्नादित्ये बलीवर्दे इत्यभिधानाद् गौरादित्यः । कीदृशं रूपम् इषः अन्नानि हवींषि जिगीषमाणं जेतुमिच्छन् जयतेः सन्नन्ताच्छानच् सन्लिटोर्जेरिति (पा० ७, ३, ५७) गः। किञ्च मर्त्तः मनुष्यो यदा ते तव भोगमनु आनट् अनुव्याप्नोति हवीरूपं भोगं समर्पयति आत् इत् अनन्तरमेव त्वमोषधीः हवीरूपाः अजीगः गॄ निगरणे गिरसि भक्षयसि । कीदृशस्त्वम् ग्रसिष्ठः ग्रसते इति ग्रसिता अतिशयेन ग्रसिता ग्रसिष्ठः अत्यन्तं भक्षयिता इष्ठनि तृचो लुक्। गृणातेर्णिजन्तस्याजीगः ॥ १८॥

अनु॑ त्वा॒ रथो॒ अनु॒ मर्यो॑ अर्व॒न्ननु॒ गावोऽनु॒ भगः॑ क॒नीना॑म् । अनु॒ व्राता॑स॒स्तव॑ स॒ख्यमी॑यु॒रनु॑ दे॒वा म॑मिरे वी॒र्यं॑ ते ॥ १९ ॥

गमनु आनट् वाहनरूपेण अनुव्याप्नोत् आत् इत् पादपूरणी तदा ग्रसिष्ठः ग्रस अदने ग्रसितृतमः अतिशयेन भक्षयिता सन् ओषधीः अजीगः गृह्णासि गिरसि वा अन्योऽतिवाहितश्चलितुमपि न शक्नोति त्वं तु वीर्यवत्तरोऽसीति भावः ॥ १८ ॥

मश्वः स्तूयते । ईर्मे ईरितः अन्तो येषान्ते ईर्मान्ता ईर्मान्ता एव ईर्मान्तासः तेषां हि सप्तानामश्वानां समीरितान्ताः विक्षिप्ताः प्रान्ताः विक्षिप्ता विरला इत्यर्थः । दृष्टान्ता वा ते हि पृथुरस्काः पृथुजघनाश्चेत्यर्थः । सिलिकमध्यमासः संलग्नमध्यमाः कृशोदरा इत्यर्थः । सप्तानामपि संश्लिष्टा उदरप्रदेशा निरुदरास्तेऽश्वा इत्यर्थः । तथापि हि स्तुतिरुपपद्यते एव संशूरणासः । संहिताः शूरणेन भगवतादित्येन दिव्यासः दिविजाः । अत्याः सततगमनाः ते हि सकृद्युक्ता ब्राह्मयं सहस्रयुगपर्यन्तमहर्वहन्ति। य इत्थम्भूता अश्वाः ते हंसा इव श्रेणिशो यतन्ते यथा हंसाः श्रेणीभूता एकया रीत्या प्रथमगमनाद्यान् कुर्वन्ति एवमश्वा अपीत्युपमार्थः । कदा इत्याह यदा यस्मिन्काले अक्षिपुः अशूङ् व्याप्ताविन्यस्यैतद्रूपम् व्याप्नुवन्ति दिव्यं दिविभवम् अज्मम् अजनम आजिम् अश्वाः ॥ २१ ॥

सूर्योदयरूपेणायमश्वः स्तूयते । यत् यदा अश्वाः सप्त रविरथस्थाः श्रेणिशः श्रेणीभूता हंसा इव संयतन्ते सम्यक् प्रयत्नं कुर्वन्ति

कास्तद्द्वारेणायमश्वः स्तूयते यत् यदा अश्वाः सप्तसंख्याकाः दिव्यं दिवि भवमज्मम् अजनं गमनं आजिं संग्रामं वा आक्षिपुः अश् व्याप्तौ लुङि रूपं व्याप्नुवन्ति तदा संयतन्ते सम उपसर्गस्य यतन्ते अनेन योगः यथा हंसाः श्रेणीभूता एकया रीत्या । गमनाय प्रयत्नं कुर्वन्ति एवमश्वा अपि किम्भूताः ईर्मान्तासः ईर्मः ईरितः अन्ते येषां ते ईर्मान्ता विक्षिप्तान्ताः विस्तृतप्रान्ताः पृथुजघनाः पृथूरस्का इत्यर्थः सिलिकमध्यमाः संश्लिष्टमध्यमाः संलग्नमध्यमाः कृशोदरा दरा इत्यर्थः शूरणासः शू शीघ्रं रणो रवो युद्धं वा येषां यद्वा शूरणेन आदित्येन संहिताः दिव्यासः दिव्याः अत्याः अन्तति इति अत्याः सततगमनाः ते हि सकृद्युक्ता ब्राह्मयं सहस्रयुगपर्यन्तम् अहर्वहन्ति ॥ २१॥

अयो अस्य पादाः यस्य चास्य अयः अय इति सर्वेषां रजतादीनामुपलक्षणम् पादा इत्यवयवानाम्। रजतादिविशिष्टा अवयवाः। मनोजवाः मनो वेगयुक्ताः। यस्माच्च अवरः कनिष्ठः इन्द्रः आसीत् अभवत्। वायुरूपेणाश्वस्यावस्थानात्। देवा इत् देवा अपि यस्यास्याश्वस्य हविरद्यं हविर्लक्षणमदनीयम् आगच्छन्। यश्च अर्वन्तम्प्रथमः अध्यातिष्ठत् स च इन्द्रः यस्य हविरद्यमागतम् तं वयं स्तुम इति शेषः॥ २०॥

यः प्रथमः मुख्यः अर्वन्तमश्वमध्यतिष्ठत् अधिष्ठितवान् सोऽपि इन्द्रः अवरः इन्द्रापेक्षया न्यून आसीत् कीदृश इन्द्रः हिरण्यशृङ्गः हिरण्यवत् शृङ्गं दीप्तिर्यस्य शृङ्गमिति ज्वलन्नामसु (निघ० १, १७) पठितम। अस्याश्वस्य पादा अयः लोहं हिरण्यं वा अयोरूपाः पादा इत्यर्थः कीदृशाः पादाः मनोजवाः मनोवत् जवो वेगो येषां ते। किञ्च देवा अस्याश्वस्य हविरद्यमायन् अत्तुं योग्यमद्यं हविश्च तदद्यं च हविरद्यम् हविर्लक्षणं भक्ष्यं प्रति आयन् आगच्छन् इत् एवार्थे अप्यर्थे वा॥ २०॥

ईर्मान्तासः सिलिकमध्यमासः सᳬं शूरणासो दिव्यासो अत्याः। हᳬंसा इव श्रेणिशो यतन्ते यदाक्षिपुर्दिव्यमज्ममश्वाः॥ २१॥

(१)ईर्मान्तासः आदित्यस्य रथे येऽश्वा युक्तास्तद्द्वारेणाय-

दाः अयोरूपाः पादाः मनोजवाः मनोवद्वेगयुक्ताः इन्द्रः यस्मादवर आसीत्। वायुरूपेणाश्वस्यावस्थाना देवाः इत् देवा अपि अस्याश्वस्य हविरद्यं हविश्च तदद्यं च हविरद्यम् अद्यम् अदनीयं हविः आगच्छत यः प्रथमः अर्वन्तम् अध्यतिष्ठत् स च इन्द्रः अस्य हविः आगतः तं वयं स्तुम इति शेषः॥ २०॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। ईर्मान्तासः आदित्यस्य रथे ये अश्वा यु-

मश्वः स्तूयते । ईर्म ईरितः अन्तो येषान्ते ईर्मान्ता ईर्मान्ता एव ईर्मान्तासः तेषां हि सप्तानामश्वानां समीरितान्ताः विक्षिप्ताः मान्ताः विक्षिप्ता विरला इत्यर्थः । दृष्टान्ता वा ते हि पृथुरस्काः पृथुजघनाश्चेत्यर्थः । सिलिकमध्यमासः संलग्नमध्यमाः कृशोदरा इत्यर्थः । सप्तानामपि संश्लिष्टा उदरप्रदेशा निरुदरास्तेऽश्वा इत्यर्थः । तथापि हि स्तुतिरुपपद्यते एव संशूरणासः । संहिताः शूरणेन भगवतादित्येन दिव्यासः दिविजाः । अत्याः सततगमनाः ते हि सकृद्युक्ता ब्राह्मचं सहस्रयुगपर्यन्तमहर्वहन्ति। य इत्थम्भूता अश्वाः ते हंसा इव श्रेणिशो यतन्ते यथा हंसाः श्रेणीभूता एकया रीत्या प्रथमगमनाद्यत्न् कुर्वन्ति एवमश्वा अपीत्युपमार्थः । कदा इत्याह यदा यस्मिन्काले आक्षिषुः अशूङ् व्याप्ताविल्यस्यैतद्रूपम व्याप्नुवन्ति दिव्यं दिविभवम् अज्मम् अजनम आजिम् अश्वाः ॥ २१ ॥

सूर्यादश्वरूपेणायमश्वः स्तूयते । यत् यदा अश्वाः सप्त रविरथस्थाः श्रेणिशः श्रेणीभूता हंसा इव संयतन्ते सम्यक् प्रयत्नं कुर्वन्ति

कास्तद्वारेणायमश्वः स्तूयते यत् यदा अश्वाः सप्तसंख्याकाः दिव्यं दिवि भवमज्मम् अजनं गमनं आजि संग्रामं वा आक्षिषुः अशू व्याप्तौ लुङि रूपं व्याप्नुवन्ति तदा संयतन्ते सम उपसर्गस्य यतन्ते अनेन योगः यथा हंसाः श्रेणीभूता एकया रीत्या । गमनाय प्रयत्नं कुर्वन्ति एवमश्वा अपि किम्भूताः ईर्मान्तासः ईर्मः ईरितः अन्ते येषां ते ईर्मान्ता विक्षिप्तान्ताः विस्तृतप्रान्ताः पृथुजघनाः पृथूरस्का इत्यर्थः सिलिकमध्यमाः संश्लिष्टमध्यमाः संलग्नमध्यमाः कृशोदरा दरा इत्यर्थः शूरणासः शू शीघ्रं रणो रवो युद्धं वा येषां यद्वा शूरणेन आदित्येन संहिताः दिव्यासः दिव्याः अत्याः अन्तति इति अत्याः सततगमनाः ते हि सकृद्युक्ता ब्राह्मचं सहस्रयुगपर्यन्तम् अहर्वहन्ति ॥ २१॥

तदा द्विव्यं दिवि भवमज्मं गमनं संग्रामं वा आक्षिषुः व्याप्नुवन्ति अक्ष व्याप्तौ लुङि रूपम्। हंसा यथा गमनाय यतन्ते तथाश्वा अपि कीदृशा अश्वाः ईर्मान्तासः ईर्मान्ताः ईर्यते ईर्मः ईर प्रेरणे मप्रत्ययः ईर्मः प्रेरितः अन्तः शरीरप्रान्तो येषां ते पृथुजघनोरस्का इत्यर्थः। सिलिकमध्यमासः सिलिकः श्लिष्टः संलग्नो मध्यमो मध्यप्रदेशो येषां ते शिलिकमध्यमाः कृशोदरा इत्यर्थः पिल संश्लेषे इकप्रत्ययः। शूरणासः शु शीघ्रं रणो रवो युद्धं वा येषां ते शूरणाः यद्वा शूरणो रविस्तदीयाः शूरणाः। दिव्यासः दिवि भवा द्विव्याः। अत्याः अतन्ति सततं गच्छन्ति अत्याः सकृद्युक्ता ग्रहाहः पर्यन्तं रविरथं वहन्ति ॥ २१ ॥

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान्। तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ २२ ॥

(१)तव शरीरम्। हे अर्वन् तव शरीरं पतयिष्णु उत्पतनशीलम्। तव चित्तञ्च वात इव ध्रजीमान् गतिमान् वेगवत् सूक्ष्मानर्थान्प्रति गच्छेदित्यर्थः। तव शृङ्गाणि शृङ्गाणीति ज्वलन्नामसु पठितम्। तवार्चींषि विष्ठिता विविधं स्थितानि पुरुत्रा बहुधा विद्युच्चन्द्रार्काग्न्यादिषु। अरण्येषु वनेषु जर्भुराणा जर्भुराणानि देदीप्यमानानि दावाग्निरूपेण चरन्ति ॥ २२ ॥

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति। तद्यथा। तव शरीरम्। हे अर्वन् तव शरीरं पतयिष्णु उत्पतनशीलं ध्रजीमान् गतिमान् वात इव तव चित्तं वेगप्रदित्यर्थः सूक्ष्मानर्थान् प्रतिगच्छेदित्यर्थः तव शृङ्गाणि ज्वलितानि दीप्तय इत्यर्थः शृङ्गाणीति ज्वलन्नामसु पठितम् अरण्येषु जर्भुराणानि देदीप्यमानानि दावाग्निरूपेण चरन्ति किम्भूतानि शृङ्गाणि पुरुत्रा बहुधा विद्युच्चन्द्राग्न्यादिषु विष्ठिता विविधं स्थितानि ॥ २२ ॥

हे अर्वन् । तव शरीरं पतयिष्णु उत्पतनशीलम् । तव चित्तं ध्रजीमान् गतिमान् वात इव वेगवत् सूक्ष्मार्थान् गच्छतीत्यर्थः । तव शृङ्गाणि दीप्तयः अरण्येषु वनेषु दवाग्निरूपेण चरन्ति प्रसरन्ति कीदृशानि शृङ्गाणि पुरुत्रा बहुधा विष्ठिता विविधं स्थितानि विद्युच्चन्द्रार्काग्निषु स्थितानि । जर्भुराणा जर्भुराणानि जृम्भ विकसने विकसितानि ॥ २२ ॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः । अजः पुरो नीयते नाभिरस्यानु पश्चात् कवयो यन्ति रेभाः ॥ २३ ॥

(१) उप प्रागात् । उप प्र अगात् शसनं विशसनम् । वाजी वेजनवान् अर्वा अरणोऽश्वः देवद्रीचा देवान्प्रत्यञ्चितेन मनसा दीध्यानः ध्यायन् हिरण्यगर्भपदम् । किञ्च अजः पुरो नीयते । तदुक्तम् कृष्णग्रीव आग्नेयो रराटे पुरस्तादिति । नाभिरस्य अश्वस्य । तदुक्तम् सौमापौष्णः श्यामो नाभ्यामिति । किञ्च अनुलग्नाः पश्चात् कवयः क्रान्तदर्शनाः यन्ति गच्छन्ति रेभाः स्तोतारः ॥ २३ ॥

अर्वा अश्वः शसनं विशसनस्थानमुपप्रागात् आगतः । कीदृशोऽर्वा वाजी वजति वाजी गमनशीलः अन्नवान् वा । देवद्रीचा

---

(१)अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति। तद्यथा उपप्रागात्। वाजी वेजनवान्। अर्वा अश्वः शसनं विशसनम् उपप्रागात् किम्भूतः देवद्रीचा देवान् प्रत्यञ्चितेन मनसा दीध्यानः ध्यायन् हिरण्यगर्भपदं विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये इत्यद्र्यादेशः किञ्च अस्याश्वस्य पुरः अजः नीयते तदुक्तं कृष्णग्रीव आग्नेयो रराटे पुरस्तादिति अस्य नाभिः अजेनाश्वीयते तदुक्तं सौमापौष्णः श्यामो नाभ्यामिति अस्य पश्चात् रेभाः रेभृ शब्दे रेभन्ते इति रेभाः स्तोतारः कवयः अनुयन्ति॥२३॥

तदा दिव्यं दिवि भवमज्मं गमनं संग्रामं वा आक्षिषुः व्याप्नुवन्ति अक्ष व्याप्तौ लुङि रूपम् । हंसा यथा गमनाय यतन्ते तथाश्वा अपि कीदृशा अश्वाः ईर्मान्तासः ईर्मान्ताः ईर्यते ईर्मः इर प्रेरणे मप्रत्ययः ईर्मः प्रेरितः अन्तः शरीरप्रान्तो येषां ते पृथुजघनोरस्का इत्यर्थः । सिलिकमध्यमासः सिलिकः श्लिष्टः संलग्नो मध्यमो मध्यप्रदेशो येषां ते शिलिकमध्यमाः कृशोदरा इत्यर्थः पिल संश्लेषे इकप्रत्ययः। शूरणासः शू शीघ्रं रणो रवो युद्धं वा येषां ते शूरणाः यद्वा शूरणो रविस्तदीयाः शूरणाः । दिव्यासः दिवि भवा दिव्याः । अत्याः अतन्ति सततं गच्छन्ति अत्याः सकञ्चुका ग्रहाह्वः पर्यन्तं रविरथं वहन्ति ॥ २१ ॥

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान् । तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ २२ ॥

(१)तव शरीरम् । हे अर्वन् तव शरीरं पतयिष्णु उत्पतनशीलम् । तव चित्तञ्च वात इव ध्रजीमान् गतिमान् वेगवत् सूक्ष्मानर्थान्प्रति गच्छेदित्यर्थः । तव शृङ्गाणि शृङ्गाणीति ज्वलन्नामसु पठितम् । तवार्चींषि विष्ठिता विविधं स्थितानि पुरुत्रा बहुधा विद्युच्चन्द्रार्काग्न्यादिषु । अरण्येषु वनेषु जर्भुराणा जर्भुराणानि देदीप्यमानानि दावाग्निरूपेण चरन्ति ॥ २२ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । तव शरीरम् । हे अर्वन् तव शरीरं पतयिष्णु उत्पतनशीलं ध्रजीमान् गतिमान् वात इव तव चित्तं वेगवदित्यर्थः सूक्ष्मानर्थान् प्रतिगच्छदित्यर्थः तव शृङ्गाणि ज्वलितानि दीप्तय इत्यर्थः शृङ्गाणीति ज्वलन्नामसु पठितम् अरण्येषु जर्भुराणानि देदीप्यमानानि दावाग्निरूपेण चरन्ति किम्भूतानि शृङ्गाणि पुरुत्रा बहुधा विद्युच्चन्द्राग्न्यादिषु विष्ठिता विविधं स्थितानि ॥ २२ ॥

हे अर्वन् ! तव शरीरं पतयिष्णु उत्पतनशीलम् । तव चित्तं ध्रजीमान् गतिमान् वात इव वेगवत् सूक्ष्मार्थान् गच्छतीत्यर्थः । तव शृङ्गाणि दीप्तयः अरण्येषु वनेषु दवाग्निरूपेण चरन्ति प्रसरन्ति कीदृशानि शृङ्गाणि पुरुत्रा बहुधा विष्ठिता विविधं स्थितानि विद्युच्चन्द्रार्काग्निषु स्थितानि । जर्भुराणा जर्भुराणानि जृम्भ विकसने विकसितानि ॥ २२ ॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः । अजः पुरो नीयते नाभिरस्यानु पश्चात् कवयो यन्ति रेभाः ॥ २३ ॥

(१) *उप प्रागात्* । उप प्र अगात् शसनं विशसनम् । वाजी वेजनवान् अर्वा अरणोऽश्वः देवद्रीचा देवान्प्रत्याश्रितेन मनसा दीध्यानः ध्यायन् हिरण्यगर्भपदम् । किञ्च अजः पुरो नीयते । तदुक्तम् कृष्णग्रीव आग्नेयो रराटे पुरस्तादिति । नाभिरस्य अश्वस्य । तदुक्तम् सौमापौष्णः श्यामो नाभ्यामिति । किञ्च अनुलग्नाः पश्चात् कवयः क्रान्तदर्शनाः यन्ति गच्छन्ति रेभाः स्तोतारः ॥ २३ ॥

अर्वा अश्वः शसनं विशसनस्थानमुपप्रागात् आगतः । कीदृशोऽर्वा वाजी वजति वाजी गमनशीलः अन्नवान् वा । देवद्रीचा

(१)अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति। तद्यथा उपप्रागात्। वाजी वेजनवान्। अर्वा अश्वः शसनं विशसनम् उपप्रागात् किम्भूतः देवद्रीचा देवान् प्रत्याश्रितेन मनसा दीध्यानः ध्यायन् हिरण्यगर्भपदं विष्वग्देवयोश्च टेरद्रयञ्चनाव-प्रत्यये इत्यद्र्यादेशः किञ्च अस्याश्वस्य पुरः अजः नीयते तदुक्तं कृष्णग्रीव आग्नेयो रराटे पुरस्तादिति अस्य नाभिः अजेनाध्यीयते तदुक्तं सौमापौष्णः श्यामो नाभ्यामिति अस्य पश्चात् रेभाः रेभृ शब्दे रिभन्ते इति रेभाः स्तोतारः कवयः अनुयन्ति॥२३॥

मनसा दीध्यानः । देवान् प्रत्यञ्चति देवद्यङ् तेन विष्वग्देवयोश्च टेरघ्यञ्चतावप्रत्यय इति (पा० ६, ३, ९२) देवशब्दस्य टेरञ्चतौ परेऽद्र्यादेशः । दीधीते दीध्यानः दीधी दीप्तिदेवनयोः शानच्प्रत्ययः देवान् प्रति गतेन चित्तेन दीप्यमानः । किञ्च अस्याश्वस्य पुरोऽग्रे अजो नीयते स्थाप्यते । तदुक्तम् कृष्णग्रीव आग्नेयो रराटे पुरस्तादिति । अस्य नाभिः अजो नीयते नाभौ स्थाप्यते तदुक्तम् सामापौष्णः श्यामो नाभ्यामिति । अस्य पश्चात् कवयः ऋत्विजः अनुयन्ति अनुगच्छन्ति । कीदृशाः कवयः रेभाः रेभन्ते रेभाः रेभृ शब्दे स्तोतार इत्यर्थः ॥ २३ ॥

उप प्रागात् परमं यत्सधस्थमर्वाँ२॥ अच्छा पितरं मातरं च । अद्या देवान् जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥ २४ ॥

(१) उपप्रागात् । एवमश्वमभिष्टुत्य अथेदानीं यजमानं कृतकृत्यतया सम्बोधयन्नाह । उपप्रागात्प्राप्तवान् परममुत्कृष्टम् यत् यस्मात् सधस्थं सहस्थानन्देवमनुष्याणाम् । अर्वान् अर्वा अश्वः नकार उपजनः । अच्छा पितरं मातरञ्च अच्छाभेराप्तुमिति शाकपूणिः । अभ्यगाच्च यस्मात् पितरं मातरञ्च द्यावापृथिव्यौ अश्वः । तस्माद्ब्रवीमि हे यजमान अद्या अद्य कृतकृत्यः सन् देवान् गम्याः गच्छेः जुष्टतमः सन् हिर्निश्चये । अथैवं गताय भवते दाशुषे दत्तवते हवींषि यजमानाय । आशास्ते

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । उपप्रागात् । एवमश्वमभिष्टुत्येदानीं यजमानं कृतकृत्यतया सम्बोधयन्नाह अर्वान् नकार उपजनः । अर्वाश्वः पितरं मातरं च द्यावापृथिव्यौ अच्छ अभियत् परमं सधस्थं सहस्थानं तत् उपप्रागात् प्राप तस्मात् ब्रवीमि हे यजमान अद्य जुष्टतमः प्रियतमः सन् हि निश्चितं देवान् गम्याः गच्छेः अथैवं गताय ते दाशुषे हवींषि दत्तवते वार्याणि वरणीयानि अश्व एव आशास्ते ॥२४॥

अश्व एव वार्याणि वरणीयानि ॥ २४ ॥

एवमश्वं स्तुत्वा यजमानमाह । अर्वान् अर्वाद्यः पितरं मातरं च अच्छ द्यावापृथिव्यौ अभि समीपे परममुत्कृष्टं यत् सधस्थं सहस्थानं तत् उपप्रागात् अर्वन्शब्दस्य नलोपाभावश्छान्दसः अश्वे एव देवलोकं गते हे यजमान ! जुष्टतमः प्रीततमः सन् अद्य त्वं देवान् गम्याः देवलोकं गच्छेः गमेराशीर्लिङि मध्यमैकवचने गम्या इति रूपम् अथैवं देवत्वं गताय दाशुषे हविर्दत्तवते तुभ्यं वार्याणि वरणीयानि भोग्यवस्तूनि हि नूनम् आशास्ते देवगणोऽश्वो वा ददात्वित्यर्थः ॥ २४ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः । आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः ॥ २५

(१) समिद्धो अद्य । द्वादशाप्र्यस्त्रिष्टुभः भार्गवो जमदग्निरपश्यत् । यस्त्वं समिद्धः अद्यास्मिन्यजनीयेऽहनि । मनुषः मनुष्यस्य यजमानस्य । दुरोणे यज्ञगृहे देवो दानादियुक्तः । देवान्दानादियुक्तान् यजसि हे जातवेदः जातप्रज्ञान । तं त्वां प्रार्थयामि आच वह देवान्यज च । हे मित्रमहः मित्राणां पूजयितः । यस्त्वं चिकित्वान् चेतनावान्परिदृष्टकारी । अपि चैतदेव चित्रं यत्त्वमस्माकमस्मिन्कर्मणि वर्तेथाः । किं कारणं

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु० नास्ति । तद्यथा । समिद्धो अद्य । द्वादशाप्र्यास्त्रिष्टुभो भार्गवो जमदग्निरपश्यत् । हे जातवेदः अद्य यजनीयेऽहनि मनुषो मनुष्यस्य यजमानस्य दुरोणे यज्ञगृहे देवो दानादिगुणयुक्तः समिद्धः त्वं देवान् यजसि हे मित्रमहः मित्राणां पूजयितः स त्वं देवान् आवह च यज च यतः त्वं चिकित्वान् चेतनावान् परिदृष्टकारी दूतः कविः क्रान्तदर्शनः । प्रचेताः प्रकृष्टचेताश्चासि ॥ २५ ॥

यतो ब्रवीमि। त्वं दूतः देवानां कविः क्रान्तदर्शनश्चासि प्रचेताः प्रवृद्धचेताश्च ॥ २५ ॥

द्वादशाप्रीसंज्ञास्त्रिष्टुभो जमदग्निदृष्टाः समित्तनूनपादादयो देवताः हे जातवेदः जातज्ञान ! मनुषो मनुष्यस्य यजमानस्य दुरोणे यज्ञगृहे अद्य त्वं देवान् यजसि। कीदृशस्त्वम् समिद्धः दीप्तः देवः दानादिगुणयुक्तः। हे मित्रमहः। मित्रान् यजमानान्महति पूजयति मित्रमहाः तत्सम्बुद्धौ हे मित्रमहः! आवह च देवानावह यज चेत्यर्थः। यतः त्वमीदृशोऽसि कीदृशः चिकित्वान् चेतनावान् दूतः कविः क्रान्तदर्शी प्रचेताः प्रकृष्टं चेतो यस्य सोऽत एव यज ॥ २५ ॥

तनूनपात् पथ ऋतस्य यानान्मध्वा समञ्जन् स्वदया सुजिह्व। मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ २६ ॥

(१) तनूनपात्पथः। तनूनपाच्छब्देनाज्यमभिधेयमग्निर्वा। हे तनूनपात् गवामपां वा पौत्र। पथः ऋतस्य यानान् ऋतस्य यज्ञस्य गमनान्पथः हवींषि। हविर्भिर्हि यज्ञो याति प्रवर्ततेऽतो यज्ञमार्गा हवींष्युच्यन्ते। मध्वा मधुरसेन समञ्जन्

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति। तद्यथा तनूनपात्पथ। तनूनपाच्छब्द उदात्त आमन्त्रितः आज्यमभिधेयमग्निर्वा हे तनूनपात् गवां अपां च पौत्र हे सुजिह्व कल्याणजिह्व कल्याणी ह्यग्नेर्जिह्वा या नानादेवत्यानि हवींष्यभ्यवहरति नच किञ्चनोच्छेषयति ऋतस्य यज्ञस्य यानान् गमनान् पथः मार्गान् हवींषि हविर्भिर्यज्ञो याति प्रवर्तते अतो यज्ञगमनपन्थानो हवींषि तानि मध्वा मधुरसेन समञ्जन् संप्रक्षयन् स्वदय देवानां रोचय किञ्च नोऽस्माकं धीभिः बुद्धिभिः सहितानि मन्मानि मननानि उत अपि च यज्ञं ऋन्धन् समर्द्धयन् सन् अध्वरं देवत्रा कृणुहि देवान् प्रति गमय करोतिर्गत्यर्थः ॥ २६ ॥

भक्षयन्स्वदय देवेभ्यः रोचय । हे सुजिह्व कल्याणजिह्व । कल्याणी ह्यग्नेर्जिह्वा या नानादेवत्यानि हवींषि अभ्यवहरते न किञ्चनोच्छेषयति । किञ्च मन्मानि मननानि धीभिः बुद्धिभिः सहितानि उत अपि च यज्ञम् ऋन्धन् समर्द्धयन् देवत्रा च कृणुहि देवान्प्रति गमय । करोतिर्गमनार्थः अध्वरं नः अस्माकम् ॥ २६ ॥

तनूनामपां नपात् पौत्रोऽग्निः अद्भ्यो वृक्षाः जायन्ते तेभ्योऽग्निरित्यपां पौत्रत्वमग्नेः । हे तनूनपात् अग्ने । हे सुजिह्व । शोभना जिह्वा यस्य स सुजिह्वः नानादेवत्यानि हवींषि भक्षयन्नपि नोच्छिष्टानि करोतीति बुद्धेः शोभनजिह्वत्वम् हे सुजिह्व । ऋतस्य यानान् पथः स्वदय रोचय भक्षयेत्यर्थः । यायन्ते यैर्येषु वा ते यानास्तान् करणाधिकरणयोरिति (पा० ३, ३, ११७) ल्युप्रत्ययः ऋतो यज्ञः तस्य गमनसाधनमार्गा हवींषि तान् भक्षयेत्यर्थः । हविर्भिर्यज्ञः प्रवर्त्तते इति यज्ञगमनपन्थानो हवींषि । किं कुर्वन् मध्वा समञ्जन् मधुरेण रसेन संप्रक्षयन् । किञ्च नोऽस्माकमध्वरं यज्ञ देवत्रा कृणुहि देवान् गमय करोतिर्गत्यर्थः । किं कुर्वन् धीभिः बुद्धिभिः सह मन्मानि ज्ञानानि उत अपि च यज्ञमृन्धन् समर्धयन् अस्माकं ज्ञानं यज्ञं च वर्धयन् यज्ञं देवलोकं नयेत्यर्थः ॥ २६ ॥

नराशꣳसस्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः । ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या ॥ २७ ॥

(१) नराशंसस्य । नरा अस्मिन्नासीनाः शंसन्तीति न-

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । नराशꣳसस्य । नराशंसो यज्ञः । प्रजापतिर्वा नरा अस्मिन्नासीनाः शंसन्तीति । अग्निर्वा नरैः प्रशस्यो भवतीति नराशंसस्य महिमानं महाभाग्यम् एषां देवानां मध्ये उपस्तोषाम उप-

राशंसो यज्ञः । प्रजापतिर्वाग्निर्वा । नरैः प्रशस्यो भवतीति नराशंसः तस्य महिमानं महाभाग्यम् एषां देवगणानां मध्ये उपस्तोषाम उपस्तुमः कथम्भूतस्य नराशंसस्य । यजतस्य यष्टव्यस्य यज्ञैराहुतिभिः । तस्य च महिमानमासाद्य ये देवाः सुक्रतवः सुकर्माणः । शुचयः निषिक्तपाप्मानः अणिमाद्यैश्वर्ययुक्ताः धियन्धाः प्रज्ञायाः कर्मणो वा धारयितारः स्वदन्ति भक्षयन्ति उभयानि हव्या हवींषि । सोमश्च इतराणि च हवींषि तान्त्राणि प्रयाजयभागस्विष्टकृत्प्रभृतीनि आवापिकानि प्रधानान्युभयानीति ॥ २७ ॥

नरा अस्मिन्नाशंसन्तीति नराशंसोऽग्निः प्रजापतिर्वा नरैःप्रशस्यो भवतीति वा । नराशंसस्य प्रजापतेरग्नेर्वा महिमानं महाभाग्यमेषां देवानां मध्ये वयमुपस्तोषाम उपस्तुमः स्तौतेर्लेटि उत्तमैकवचने सिब्बहुलं लेटीति (पा० ३, १, ३४) सिप्प्रत्यये रूपम् । कीदृशस्य नराशंसस्य यज्ञैः यजतस्य यजेरतच्प्रत्ययः । एषां केषाम् ये देवाः उभयानि हव्या हवींषि सोमम् इतराणि च स्वदन्ति भक्षयन्ति । कीदृशाः देवाः सुक्रवतः शोभनः क्रतुः कर्म येषां ते । शुचयः शुद्धाः निष्पापाः । धियन्धाः धियं बुद्धिं कर्म वा दधतीति अक्षरार्थः ॥ २७ ॥

आ॒जुह्वा॑न॒ ईड्यो॒ वन्द्य॒श्चाया॑ह्यग्ने वसु॑भिः स॒जोषाः॑ । त्वं दे॒वाना॑मसि यह्व॒ होता॒ स ए॑नान् यक्षीषि॒तो यजी॑यान् ॥ २८ ॥

स्तुमः किम्भूतस्य नराशंसस्य यज्ञैः आहुतिभिः यज तस्य यष्टव्यस्य एषां केषां ये देवाः उभयानि हव्या हव्यानि सोममितराणि च स्वदन्ति भक्षयन्ति किन्देवाः सुकृतयः सुकर्माणः शुचयः निक्षिप्तपाप्मानः अणिमाद्यैश्वर्ययुक्ता धियन्धाः ।धियं दधन्तीति प्रज्ञायाः कर्मणो वा धारयितारः ॥ २७ ॥

(१) आजुह्वानः। यस्त्वम् आजुह्वानः आहूयमानः सन् ईड्यः स्तुत्यः वन्द्यः नम्यश्च भवासि तं त्वां याह्यागच्छ हे अग्ने वसुभिः सजोषाः सहप्रीतिः। यश्च त्वा देवानां होतासि हे यह्व महन् स एतान्देवानाहूय यक्षि यज। इषितः प्रेषितः अभीष्टो वा। यजीयान् यष्टृतरः सन् ॥ २८ ॥

हे अग्ने! त्वमायाहि आगच्छ। कीदृशस्त्वम् आजुह्वानः आह्वयते आह्वयति देवानित्याजुह्वानः ह्वयतेः शपः श्लुः ह्वः सम्प्रसारणमिति (पा० ६, १, ३२) अभ्यासस्य सम्प्रसारणं शानच्। ईड्यः स्तुत्यः। वन्द्यः नमनीयः। वसुभिः देवैः सजोषाः समानप्रीतिः। किंच हे यह्व महन्! यः त्वं देवानां होता आह्वाता असि स त्वमेनान् यक्षि यज। कीदृशस्त्वम् इषितः प्रेषितः अभीष्टो वा। यजीयान् यजतीति यष्टा अत्यन्तं यष्टा यजीयान् ईयसुनि तुरिष्ठेमेयःस्विति (पा० ६, ४, १५४) तृचो लोपः ॥ २८ ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्। व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ २९ ॥

(२) प्राचीनं बर्हिः प्राचीनं प्रागग्रं वृज्यते प्रस्तीर्यते। किं

---

(१) अत्र वाराणसी० लि पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति। तद्यथा। आजुह्वानः। हे अग्ने आजुह्वानः आहूयमानः सन् त्वमायाहि किं त्वमीड्यः स्तुत्यः वन्द्यो नम्यश्च वसुभिः सजोषाः सहप्रीतिः हे यह्व हे महन् त्वं देवानां होतासि सः इषितः प्रेषितः अभीष्टो वा यजीयान् यष्टृतरः सन् एतान् देवान् यक्षि यज ॥ २८ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमुऽपु० नास्ति। तद्यथा प्राचीनं बर्हिः। अह्नामग्रे पूर्वाह्णे स हि यागकालः प्रशस्तः यत् प्राचीनं प्रागञ्चनं बर्हिः प्रागग्रं वृज्यते प्रस्तीर्यते किं स्वमनीषया नेत्याह प्रदिशा प्रदिक् शब्देन श्रुतिवाक्यमभिधीयते प्रागग्रं बर्हि-

स्वमनीषयानेत्याह । प्रदिशा । प्रदिक्शब्देन श्रुतिवाक्यमभिधीयते । प्रागग्रं बर्हिस्तृणातीति । पृथिव्या वस्तोरस्याः । अस्याः पृथिव्याः वेदेः वस्तोः वसनायाच्छादनाय । अग्रे अन्हाम् । पूर्वाह्णे दिवसानाम् । स हि यागकालः प्रशस्तः । तत् वृज्यमानं बर्हिः वि उ प्रथते विप्रथते विविधमाच्छादयति । उकारः पादपूरणः । वितरमतितराम् वरीयः वरतरमुरुतरं वा । किं कारणमपेक्ष्य व्युप्रथते इत्यत आह । देवेभ्यश्च अदितये च स्योनं सुखं कर्तुमिति शेषः ॥ २९ ॥

अह्नां दिनानामग्रे पूर्वाह्णे बर्हिः प्राचीनं प्रागग्रं वृज्यते प्रस्तीर्यते प्रातर्यागकालस्य प्रशस्तत्वादह्नामग्रे इत्युक्तम् । किं स्वबुद्ध्या चेत्याह प्रदिशा प्रागग्रं बर्हिः स्तृणातीति श्रुतिवाक्येन प्रदिक्शब्देन श्रुतिवाक्यम् अस्याः पृथिव्या वेदेः वस्तोः वसितुमाच्छादयितुमित्यर्थः । तद्बर्हिः वृज्यमानं सत् विप्रथते विविधं विस्तीर्णं भवति । उकारः पादपूरणः । कीदृशं बर्हिः वितरं वरीयः अत्यन्तं वितरमतितराम् वरीयः अत्यन्तमुरु वरीयः प्रस्थस्फवरित्यादिना (पा० ६, ४, १५७) उरोर्वरादेशः । देवेभ्यः अदितये च स्योनं सुखकरम् ॥ २९ ॥

व्यचस्वतीरुर्विया विश्रयन्तां पतिभ्यो न जनयः शुम्भमानाः । देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ३० ॥

(१) व्यचस्वतीः । यज्ञगृहद्वारोऽभिधेयाः । अत्र च प्रथमो-

स्तृणातीति किमर्थम् । अस्याः पृथिव्याः वेदेर्वस्तोः वसनाय आच्छादनाय तत् वृज्यमानं बर्हिः विप्रथते विविधमाच्छदयति उकारः पादपूरणः किम्भूतं वितरम् अतितरम् वरीयः उरुतरं किमर्थं विप्रथते इत्यत आह देवेभ्यः अदितये च स्योनं सुखं कर्तुमिति शेषः ॥ २९ ॥

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । व्यचस्वतीः यज्ञगृहद्वारोऽभिधेयाः अत्र प्रथमोऽर्धर्चः

ऽर्द्धर्चः परोक्षकृतो द्वितीयः प्रत्यक्षकृतः न च तयोरेकवाक्यतासं- पद्यते अतः प्रथमस्य सन्नतिः । व्यचस्वतीः व्यञ्जनवत्यः ग- मनवत्यः । उर्विया उरुत्वेन विश्रयन्ताम् विवृता भवत । कथ- मिव । पतिभ्यो न जनयः शुम्भमानाः यथा मैथुन्ये धर्मे पति- भ्योऽर्थाय जनयः जाया आत्मानं शोभयन्त्यः । उरू विश्रयेयुः विवृता कुर्वन्ति यथा हि विवृता जाया उपसर्पन्ति पतिन्न तथा इति इतीदमुक्तं पतिभ्यो न जनयः एवं विवृताश्च भूत्वा हे देव्यः द्वारः बृहत्यः महत्यः । विश्वमिन्वाः विश्वमारेभिरे ताभिः वि- श्वामिन्वाः । यूयं देवेभ्यः ऋत्विग्यजमानेभ्यः भवत सुप्रायणाः सुप्रगमनाः ॥ ३० ॥

द्वारो देवीः देव्यो विश्रयन्तां विवृता भवन्तु । कीदृश्यो द्वारः उर्विया उरुत्वेन व्यचस्वतीः व्यञ्जनवत्यो गमनवत्यः कथमिव पतिभ्यो जनयो न जनय इव यथा जनयः जायाः पत्यर्थम् ऊरू विश्रयन्ति । एवं परोक्षमुक्त्वा प्रत्यक्षमाह हे द्वारो देव्यः ! यूयं देवेभ्यो देवार्थं सुप्रायणाः सुप्रगमना भवत । कीदृश्यः बृहतीः बृह- त्यः विश्वमिन्वाः विश्वमेति गच्छति यासु ताः एतेर्व्वक्प्रत्ययः अलुक्समासः । शोभमानाः । उर्विया इति द्वार्विशेषणं वा उरवो विशालाः इयाडियाजीकाराणामिति विभक्तेरियाजादेशः चित्त्वादन्तोदा- त्तः ॥ ३० ॥

परोक्षकृतः । द्वितीयः प्रत्यक्षः अतः प्रथमस्य संनतिः हे द्वारो देव्यः व्यचस्वतीः व्यञ्जनवत्यः गमनवत्यः यूयम् उर्विया उरुत्वेन विश्र- यन्तां विश्रयध्वम् । विवृता भवत कथमिव पतिभ्यः जनयो न जनय इव यथा शुम्भमानाः आत्मानं शोभयन्त्यः जनयो जायाः पत्यर्थम् उरू विश्रयेयुः विवृतौ कुर्वन्ति यथा हि विवृता जाया उपसर्पन्ति न तथा इतरा अत एवमुक्तं पतिभ्यो न जनय इति विवृताश्च भूत्वा बृहतीः बृहत्यः विश्वामिन्वाः विश्वमारेभिरे इति विश्वमिन्वाः ईदृशा यूयं देवेभ्यः ऋत्विग्यजमानेभ्यः सुप्रायणाः सुप्रगमनाः भवत ॥ ३० ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ । दिव्ये योपणे बृहती सुरुक्मे अधि श्रियंꣳ शुक्रपिशं दधाने ॥ ३१ ॥

(१)आसुष्वयन्ती। स्मयतेर्वा निरुपसर्गात् स्वपतेर्वा सूपसर्गात्। सेस्मीयमाने परस्परं हसन्त्यौ साधु स्वपन्त्यौ वा। यजते यज्ञिये उपाके उपाक्रान्ते परस्परमेकदेशसवलीभूते । उपासानक्ता उपाश्च नक्ता रात्रिश्च । सदतान्नियोनौ । आसीदताम् निरनर्थक उपसर्गः । यद्वा निरिति सदतामित्याख्यातेन युज्यते । निषीदताम् । योनौ यज्ञगृहे , कथंभूते । दिव्ये दिवि भवे योपणे प्रीतिमत्यौ स्त्रीरुपिण्यौ वा । बृहती बृहत्यौ महत्यौ सुरुक्मे सुरोचने । अधिश्रियं शुक्रपिशं दधाने । शुक्रपिशं शुक्ररूपं श्रियम् अधिदधाने स्थापयन्त्यौ ॥ ३१ ॥

आ नि एतयोः सदतामिति सम्बन्धः अधीत्यस्य दधाने इत्यनेन सम्बन्धः ।उपासानक्ता अहोरात्रे देवते योनौ यज्ञगृहे आनिसदताम् सम्यक् उपविशताम् । कीदृश्यौ ते सुष्वयन्ती स्मयतेः स्वपतेर्वा सुपूर्वस्य रूपम् पूर्वपक्षे मकारस्य वकारश्छान्दसः उत्तरपक्षे पकारस्य यकारः परस्परं हसन्त्यौ साधु स्वपन्त्यौ वा । यजते यजनीये उपाके उप समीपमकतस्ते उपाके अक गतौ परस्परं समीप-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति तद्यथा।आ सुष्वयन्ती ।उपासा नक्ता उपाश्च नक्ता रात्रिश्च ते योनौ यज्ञगृहे आनिसदतां सीदतामित्यनेन सम्बन्धः किम्भूते सुष्वयन्ती स्मयतेर्वा निउपसर्गात् स्वपतेर्वा सुपसर्गात् सेस्मीयमाने परस्परं हसन्त्यौ साधु स्वपन्त्यौ वा यजते यज्ञिये उपाके आक्रान्ते परस्परम् एकदेशसवलीभूते दिव्ये दिवि भवे योषणे योषे स्त्रीरूपिण्यौ बृहती बृहत्यौ महत्यौ सुरुक्मे रोचने शुक्रं पिशं शुक्ररूपां कपिशां श्रियम् आधिदधाने स्थापयन्त्यौ ॥ ३१ ॥

स्थिते । दिव्ये दिवि भवे । योषणे योषे स्त्रीरूपिण्यौ । बृहती बृहत्यौ महत्यौ । सुरुक्मे शोभनं रुक्मं सुवर्णं ययोस्ते साभरणे इत्यर्थः । शुक्रपिशं शुक्लां कपिशां च श्रियं शोभामधिदधाने अधिकं धारयन्त्यौ । शुक्लमहः कपिशा रात्रिः ॥ ३१ ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै । प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ३२ ॥

(१)दैव्या होतारा । यौ दैव्यौ होतारौ अयं चाग्निरसौ च मध्यमः प्रथमा आद्यौ सुवाचा । सुवाचौ नहि तौ पाठं विनाशयतः । मिमाना । निर्मिमाणौ यज्ञम् मनुषो मनुष्यस्य यजध्यै यजनाय प्रचोदयन्तौ च विदथेषु यज्ञेषु अन्यानृत्विजः स्वयं च कारू कर्तारौ । प्राचीनं पूर्वस्यां दिशि भवम् । आहवनीयाख्यं ज्योतिः यष्टव्यमिति प्रदिशा अभिनयेन श्रुतिवाक्येन वा । दिशन्ता । कथयन्तौ । आशास्तावस्मदीयं प्रसाधयेतामिति शेषः ॥ ३२ ॥

दैव्यौ होतारा ईदृशौ आसाते इति शेषः । कीदृशौ प्रथमा आद्यौ । सुवाचा शोभना वाक् ययोस्तौ । मनुषो मनुष्यस्य यजध्यै यष्टुं यज्ञं मिमाना निर्मिमाणौ । तुमर्थे शध्यै प्रत्ययः । वि-

(१)अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । दैव्या होतारा । यौ यथाविधौ दैव्यौ होतारौ आसाते तावस्मदीयं कर्म साधतामिति शेषः । अयं चाग्निरसौ च मध्यमः *कीदृशौ प्रथमौ आद्यौ सुवाचौ शोभनवचनौ मनुषो मनुष्यस्य यज* ध्यै यजनाय यज्ञं मिमाना निर्मिमाणौ विदथेषु यज्ञेषु प्रचोदयन्ता ऋत्विजः प्रेरयन्तौ कारू कर्तारौ स्वयं प्राचीनं पूर्वस्यां दिशि भवं ज्योतिः आहवनीयाख्यं यष्टव्यमिति प्रदिशा अभिनयेन श्रुतिवाक्येन च दिशन्ता कथयन्तौ ॥ ३२ ॥

दधेषु यज्ञेषु प्रचोदयन्ता प्रचोदयन्तौ ऋत्विजः प्रेरयन्तौ । कारू कुरुतस्तौ कारू उणादयो बहुलमिति (पा० ३, ३, १) उण् स्वयं कर्त्तारौ । प्राचीनं पूर्वदिशि भवं ज्योतिः आहवनीयाख्यं प्रदिशा अभिनयेन श्रुतिवाक्येन दिशन्ता यष्टव्यमिति कथयन्तौ । सर्वत्र विभक्तेराकारः ॥ ३२ ॥

आ नो॑ य॒ज्ञं भार॑ती॒ तूय॑मे॒त्विडा॒ मनु॒ष्वदि॒ह चे॒तय॑न्ती । ति॒स्रो दे॒वीर्ब॒र्हिरे॒दᳪ स्यो॒नᳪ सर॑स्वती॒ स्वप॑सः सदन्तु ॥ ३३ ॥

(१) आ नो यज्ञम् । आङ् उपसर्गः सदन्त्वित्याख्यातेन सम्बध्यते । आ एतु आगच्छतु नः अस्माकं यज्ञम् भारती भरत आदित्यस्तस्य भारती । तूयं क्षिप्रम् इडा च आगच्छतु । मनुष्वत् मनुष्यवत् इह चेतयन्ती परिदृष्टकारिणी । सरस्वती च । य इत्थम्भूतास्तिस्रोः देव्यः ताः बर्हिः आङ् उपसर्गः सदन्त्वित्याख्यातेन सम्बध्यते आसदन्तु आसीदन्तु इदं स्योनं सुखरूपम् स्वपसः अप इति कर्मनाम । साधुकर्मणः ॥ ३३ ॥

भारती इडा सरस्वती च नोऽस्माकं यज्ञं तूयं क्षिप्रमा एतु आगच्छतु । कीदृशी मनुष्वत् मनुष्यवदिह कर्मणि चेतयन्ती ज्ञापयन्ती कर्मज्ञानं बोधयन्ती इदं तिसृणां विशेषणम् । एतास्तिस्रो देवीः देव्यः स्योनं सुखरूपमिदं बर्हिः आसदन्तु आसी-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । आ नः । आकार एत्वित्यनेन संबध्यते भारती इडा सरस्वती च नोऽस्माकं यज्ञं तूयं क्षिप्रम् आ एतु आगच्छतु। कीदृशी मनुष्वत् मनुष्यवत् इह चेतयन्ती परिदृष्टकारिणीति तिसृणामपि विशेषणम् एतास्तिस्रो देव्यः स्योनं सुखरूपम् इदं बर्हिः आसदन्तु आसीदन्तु बर्हिः । आ इदमिति पदं किम्भूतास्तिस्रः स्वपसः अप इति कर्मनाम शोभनकर्माणः शोभनमपो यासां ताः ॥ ३३ ॥

वन्तु । कीदृश्यः स्वपसः शोभनमपः कर्म यासां ताः शुभकर्माणः अप इति (निघ० २, १, १) कर्मनाम ॥ ३३ ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा । तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ ३४ ॥

(१) य इमे । यस्त्वष्टा इमे द्यावापृथिव्यौ जनित्री जनयित्र्यौ सर्वभूतानाम् । रूपैः अपिंशत् सुचित्रिते अकरोत् । भुवनानि विश्वा । भूतजातानि च सर्वाणि रूपैरपिंशत् । आपूतान्यकरोत् तम् अद्यास्मिन्नहनि । हे होतः इषितः प्रेषित इति वा अभीष्ट इति वा । यजीयान् यष्टृतरः । देवं दानादिगुणयुक्तम् त्वष्टारम् इह यज्ञे यक्षि यज । विद्वान् स्वमधिकारं जानानः ॥ ३४ ॥

हे होतः अद्य इषितः प्रेषितः सन् तं त्वष्टारं देवमिह यज्ञे यक्षि यज । कीदृशः त्वम् यजीयान् अत्यन्तं यष्टा तुरिष्ठेमेयःस्वियाति (पा० ६, ४, १५४) ईयसुनि तृचो लोपः । विद्वान् स्वाधिकारज्ञः । तं कम् यः त्वष्टा इमे द्यावापृथिवी द्यावाभूमी रूपैः अपिंशदवयवैर्विचित्रे अकरोत् पिशः अवयवे तुदादिः लङि शे मुचादीनामिति (पा० ७, १, ५९) नुम् । विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । य इमे । यः त्वष्टा जनित्री सर्वभूतानां जनयित्र्यौ इमे द्यावापृथिव्यौ रूपैः अपिंशत् । सुचित्रिते अकरोत् पिश अवयवे अस्य लुङि रूपम् । शे मुचादीनामिति नुम् विश्वा सर्वाणि भुवनानि भूतजातानि च यस्त्वष्टा रूपैः अपिंशत् आपूतान्यकरोत् हे होतः त्वमिषितः प्रेषितः सन् अद्य तं त्वष्टारं देवमिह यन्ति यज किं त्वं यजीयान् अतिशयेन यष्टा तुरिष्ठेमेयस्स्विति तृचो लोपः । यष्टृतमः विद्वान् स्वमधिकारं जानानः ॥ ३४ ॥

रूपैः अपिंशत् विविधरूपाण्यकरोत्। कीदृश्यौ द्यावापृथिव्यौ जनित्री जनयतस्ते जनित्र्यौ प्राण्युत्पादिके॥ ३४॥

उपावसृज त्मन्या समञ्जन् देवानां पाथं ऋतुथा हवींषिं। वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन॥ ३५॥

(१) उपावसृज। द्वितीयोऽर्द्धर्चः प्रथमं व्याख्यायते सामर्थ्यात्। यजमान आह। वनस्पतिः यूपः शमिता देवः अग्निः शामित्रः स्वदन्तु मृष्टीकुर्वन्तु। हव्यं हविः मधुना मधुरसेन घृतेन त्वमपि हे अध्वर्यो उपावसृज (उत्पिष्टांयासुकमवदानम्?) अवसृज निक्षिप। त्मन्या आत्मना। आदरार्थं वचनं मन्त्रेष्वाङ्यादेरात्मन इत्याकारलोपः॥ समञ्जन् संम्रक्षयन् देवानाम् पाथः अन्नम् ऋतुथा ऋतावृतौ च हवींषि अवसृज॥ ३५॥

यजमानो वदति। हे होतः! त्मन्या आत्मन्या हवींषि ऋतुथा ऋतौ ऋतौ यज्ञकाले त्वमुपावसृज देहि। किं कुर्वन् देवानां पाथः हविः मधुना मधुररसेन घृतेन समञ्जन् संम्रक्षयन्। देवानामित्युक्तं तानाह वनस्पतिर्यूपः शमिता देवः अग्निः एते त्रयो हव्यं होता सम्मृज्य दत्तं स्वदन्तु भक्षयन्तु। आत्मन्शब्दस्य विभक्तेर्यादेशो मन्त्रेष्वाङ्यादेरात्मन इति (पा० ६, ४, १४१) आकारलोपः॥ ३५॥

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति। तद्यथा। उपावसृजः। द्वितीयोऽर्धर्चः प्रथमं व्याख्यायते सामर्थ्यात्। यजमान आह वनस्पतिर्यूपः शमिता देवः अग्निः एते मधुना मधुरसेन घृतेन हव्यं हविः स्वदन्तु मृष्टीकुर्वन्तु हे अध्वर्यो त्वमपि हवींषि ऋतुथा ऋतावृतौ त्मन्या आत्मना आदरार्थे वचनं तृतीयैकवचनस्य यादेशे कृते मन्त्रेष्वाङ्यादेरात्मनः इति आलोपः उपावसृज निक्षिप किं कुर्वन् देवानां पाथः अन्नं समञ्जन् संम्रक्षयन्॥ ३५॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः । अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ ३६ ॥

(१)सद्यो जातः। योऽग्निः सद्यो जातः जायमानः सन् व्यमिमीत निरमिमीत यज्ञम् । यश्च देवानाम् अभवत् पुरोगाः अग्रतो गामी । तस्यास्य होतुः प्रदिशि प्राच्यां दिशि ऋतुथा ऋतावृतौ आहवनीयात्मना व्यवस्थितस्य । वाचि आस्ये मुखे वाग्ग्रहणेन लक्षणया मुखमभिधीयते तदुक्तं वार्तिककारेण । "अभिधेयाविनीभावप्रतीतिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तिरिष्टा तु गौणतेति" । स्वाहाकृतम् स्वाहाकृत्युपलक्षितं हविः अदन्तु देवाः ॥ ३६ ॥

देवा हविरदन्तु भक्षयन्तु । कीदृशं हविः अस्याग्नेः वाचि वागिन्द्रियोपलक्षिते मुखे स्वाहाकृतं स्वाहाकारेण हुतम् । कीदृशस्यास्य होतुः देवानामाह्वातुः प्रदिशि पूर्वदिशि ऋतस्य ऋ गतौ आहवनीयात्मना स्थितस्य । अस्य कस्य योऽग्निः सद्यो जातः उत्पन्नः सन् यज्ञं व्यमिमीत विशेषेण निरमात् यश्च देवानां पुरोगाः अग्रगामी मुख्योऽभवत् पुरो गच्छति पुरोगाः विटि प्रत्यये विड्वनोरनुनासिकस्यादिति (पा० ६, ४. ४१) मस्याकारः ॥ ३६ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । सद्यो जातः । योऽग्निः सद्यो जातः सन् अमिमीत निरमिमीत यज्ञं यश्च देवानां पुरोगः अग्रगामी अभवत् । सर्वकार्येषु तस्यास्य होतुः प्रदिशि प्राच्यां दिशि ऋतस्य गतस्य आहवनीयात्मना स्थितस्याग्नेः वाचि मुखे स्वाहाकृतं स्वाहाकृत्युपलक्षितं हविः देवाः अदन्तु वाग्ग्रहणेनात्र लक्षणया मुखमभिधीयते । तदुक्तं वार्त्तिककृता " अभिधेयाविनीभूतप्रतीतिर्लक्षणोच्यते लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति " ॥ ३६ ॥

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भि-रजायथाः ॥ ३७ ॥

(१) इत उत्तरमश्वरक्षिणा योद्धारः युद्धोपकरणानि च स्तूयन्ते प्रागाग्नेय इति श्रुतेः ॥ केतुं कृण्वन्। आग्नेयी गायत्री अनिरुक्ता केतुं प्रज्ञानं कृण्वन्कुर्वन्। अकेतवे न विद्यते केतु प्रज्ञानं यस्य तस्मै अकेतवे पेशः सुवर्णं रूपं वा मर्याः मर्यायेति विभक्तिव्यत्ययः। मर्याय मनुष्याय अपेशसे न विद्यते पेशः यस्य तस्मै अविद्यमानसुवर्णाय अविद्यमानरूपाय वा पेशः कुर्वन्। समुषद्भिरजायथाः हे अग्ने उषद्भिः। उष दाहे अग्निहोत्रादीनि कर्माणि कुर्वद्भिः। जायमानः सन् जन्मना जातेर्वा। वसतेर्वा कृतसंप्रसारणस्यैतद्रूपम् उषद्भिः अग्निं प्रति निवसद्भिः जायमानः सन् समजायथाः उत्पद्यसे ॥ ३७ ॥

अग्निदेवत्या गायत्री मधुच्छन्दोदृष्टा निरुक्ता। हे अग्ने। त्वमुषद्भिः कृत्वा अजायथाः उत्पन्नोऽसि जनेर्लङि रूपम् उष दाहे उषन्ति हविर्दहन्ति ते उषन्तोऽग्निहोमकर्तारो यजमानाः। कीदृशस्त्वम् अकेतवे अज्ञानाय मर्याः मर्याय मनुष्याय केतुं ज्ञानं कृण्वन् कुर्वन् विभक्तिव्यत्ययः। नास्ति पेशः सुवर्णं यस्य स अपेशाः तस्मै अपेशसे मर्याय पेशः सुवर्णं कुर्वन् ॥ ३७ ॥

---

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति। तद्यथा। इत उत्तरमश्वस्य रक्षणे योद्धॄन् स्तुत्योपकरणानि च स्तूयन्ते प्रागाग्नेय इति श्रुतेः। केतुं कृण्वन् आग्नेयीयं गायत्री अनिरुक्ता अकेतवे न विद्यते केतुः प्रज्ञानं यस्य तस्मै। मर्या मर्यायेति विभक्तिव्यत्ययः। मनुष्याय केतु प्रज्ञानं कुर्वन् अपेशसे अविद्यमानसुवर्णाय मर्याय पेशः सुवर्णं कुर्वन् हे अग्ने त्वम् उषद्भिः जायमानः सन् समजायथाः। उत्पद्यसे उष दाहे उषद्भिः अग्निहोत्रादिकर्माणि कुर्वद्भिः 'जायमानः वसतेर्वा कृतसंप्रसारणस्य रूपमग्निं प्रति निवसद्भिर्जायमानः अजायथाः ॥ ३७ ॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तन्वा जय त्वᳪं स त्वा वर्मणो महिमा पिपर्तु ॥ ३८ ॥

(१) जीमूतस्येव । वर्म स्तूयते जीमूतो मेघः तस्येव भवति प्रतीकम् अनीकम् मुखमिति पर्यायः । यथा मेघस्य मुखं विद्युत्स्फुरितस्तनयित्नुधारानिकरैरसह्यं भवत्यन्तःसरणैः एवं हस्त्यश्वस्वपदातिमुखं निशिताश्वगम्भीरतूर्यनिनादशरधाराभिरसह्यम्भवति एवं कस्मिन्काले कस्य वेत्यत आह । यद्वर्मी यदा वर्मास्य विद्यते इति वर्मी । याति गच्छति समदाम् । संमाद्यन्ति सह वा माद्यन्ते आसु योद्धार इति समदः समद्‌"शब्दः संग्रामवचनः । समदां संग्रामाणम् उपस्थे उत्कण्ठे यत एवमतो ब्रवीमि । अनाविद्धया तन्वा जय त्वम् हे वर्मिन् अनाविद्धया अक्षतया अरिष्टया तन्वा त्वं जय । किञ्च स त्वा वर्मणो महिमा पिपर्तु पालयतु ॥ ३८ ॥

एवमग्रे स्तुत्यादवरक्षणे योधा युद्धोपकरणानि च स्तूयन्ते । भरद्वाजसुतपायुः संग्रामाङ्गानि प्रत्यृचं स्तौति त्रिष्टुब्भिः । वर्म

(१) अत्र वाराणसी० लि पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । जीमूतस्येव । वर्म स्तूयते त्रिष्टुभा जीमूतो मेघः यत् यदा वर्मी वर्मवान् समदां संग्रामाणाम् उपस्थे उत्सङ्गे याति सहमदं यान्ति येषु ताः संमदः संग्रामाः सह माद्यन्तीति समदः योधा वा तदा प्रतीकं सेनामुखं जीमूतस्य प्रतीकमिव भवति यथा मेघस्य मुखं विद्युत्स्तनयित्नुधारानिकरैरसह्यं भवति । एवं हस्त्यश्वरथपदातिमुखम् अस्त्रतूर्यनादशरजालैरसह्यं भवति यदा वर्मी अग्रसरो भवति अतो ब्रवीमि । हे वर्मिन् अनाविद्धया अक्षतया अरिष्टया तन्वा त्वं जय । किञ्च सः वर्मणो महिमा त्वां पिपर्तु पालयतु ॥ ३८ ॥

स्तूयते यत् यदा वर्मी कवचवान् समदां संग्रामाणामुपस्थे उत्सङ्गे याति तदा प्रतीकं सेनामुखं जीमूतस्य मेघस्येव भवति। सह माद्यन्ति योधा यासु ताः समदः संग्रामाः मदेः क्विप्। मेघस्य मुखं विद्युत्स्तनयित्नुधाराभिर्यथासह्यम् एवं हस्त्यश्वरथपादात्यस्त्रजालतूर्यनादशरौघैः सेनामुखमसह्यं भवतीत्यर्थः। अतोऽहं ब्रवीमि हे वर्मिन्! अनाविद्धया अक्षतया तन्वा शरीरेण त्वं जय शत्रून् हत्वा जय प्राप्नुहि। किञ्च स वर्मणःमहिमा त्वा त्वां पिपर्तु पालयतु ॥ ३८ ॥

धन्व॑ना गा धन्व॒नाजिं ज॑येम॒ धन्व॑ना ती॒व्राः स॒मदो॑ जयेम। धनुः॑ शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॒ना सर्वाः॑ प्र॒दिशो॑ जयेम ॥ ३९ ॥

(१)धन्वना गाः।धनुः स्तूयते त्रिष्टुभा धन्वना धनुषा गाः जयेम। धनुषा च आजिं मार्गं जयेम। धनुषा च तीव्राः पटवः उद्गूर्णायुधासः मदः संग्रामाञ्जयेम। धनुश्च शत्रोः अपकामङ्कृणोति अपनयति कामम्। कर्तृत्वविवक्षात्र धनुषः। धनुषा च सर्वाः प्रदिशः जयेम ॥ ३९ ॥

धनुः स्तूयते। धन्वना धनुषा कृत्वा वयं गाः धेनूः जयेम। धन्वना आजिं मार्गं जयेम अजन्ति गच्छन्ति यस्मिन्नसावाजिर्मार्गः। तीव्राः उग्राः समदः संग्रामान् धन्वना जयेम। धनुः शत्रोरपकामं

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई पु० नास्ति। तद्यथा। धन्वना गाः धनुः स्तुतिः त्रिष्टुप् धन्वना धनुषा गा. जयेम धन्वना आजिं मार्गं जयेम धन्वना तीव्राः उद्गूर्णायुधाः समदः संग्रामान् जयेम धनुः शत्रोः काममपकृणोति अपनयति, अपकाममित्येकं पदम्। यद्वा धनुः शत्रोरयं कामं कामाभावं करोतु। अत्र धनुषः कर्तृत्वं धन्वना सर्वाः प्रदिशश्च जयेम। ईदृग्धनुः प्रभावः ॥ ३९ ॥

मनोरथाभावं कृणोति करोति कामस्याभावोऽपकामम् अव्ययं विभक्त्यादिना (पा० २, १, ६,) अर्थाभावेऽव्ययीभावः । किञ्च धन्वना सर्वाः प्रदिशो जयेम । ईदृशो धनुः प्रभावः ॥ ३९ ॥

वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना । योषेव शिङ्क्ते वितताधि धन्वन् ज्या इयꣳ समने पारयन्ती ॥ ४० ॥

(१) वक्ष्यन्तीवेत् । ज्या अभिधेया । त्रिष्टुप् । या ज्या वक्ष्यन्ती इव वचनोत्सुकेव । योषित् इच्छब्दः पादपूरणार्थः । आगनीगन्ति आगच्छन्ति अत्यर्थमागच्छति वा कर्णं धनुष्कर्णमूलम् या च प्रियमिव सखायमिषुम् परिषस्वजाना आलिङ्गन्ती । योषेव शिङ्क्ते । शिजि अव्यक्ते शब्दे । यथा मुग्धा योषित्कामुकरञ्जनार्थमव्यक्तं कूजितङ्करोति एवमियमव्यक्तं शब्दं करोति । प्रसारिता च अधि उपरि धनुषि निबद्धा । सेयञ्ज्या समने संग्रामे पारयन्ती विजयं कुर्वन्ती संग्रामान् तारयन्ती स्तूयतेऽस्माभिरिति शेषः ॥ ४० ॥

ज्या स्तूयते । इयं धन्वन् धन्वनि धनुषि अधिवितता उपरि विस्तारिता सती शिङ्क्ते अव्यक्तं शब्दं कुरुते शिजि अव्यक्ते

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । वक्ष्यन्ती ज्याभिधेया त्रिष्टुप् या ज्या वक्ष्यन्ती इव वचनोत्सुकेव इत् पादपूरणः कर्णम् आगनीगन्ति । अत्यर्थमागच्छति किम्भूता प्रियं सखायम् इषुं परिषस्वजाना आलिङ्गती इयं ज्या अधिधन्वम् अधि उपरि धनुषि वितता प्रसारिता सती योषा इव शिङ्क्ते शिजि अव्यक्ते शब्दे यथा विदग्धा योषित् कामुकरञ्जनायाव्यक्तं कूजितं करोति । एवमियमव्यक्तं शब्दं करोति । कीदृशी समने संग्रामे पारयन्ती विजयं कुर्वन्ती .संग्रामानुत्तारयन्ती सास्माभिः स्तूयत इति शेषः ॥ ४० ॥

शब्दे अदादिः इदितो नुम् धातोरिति (पा० ७, १, ५८) नुम्। का इव योषेव यथा योषा कामिनी कामुकरञ्जनायाऽव्यक्तं वदति एवमियमपि। कीदृशी ज्या समने संग्रामे पारयन्ती पार तीर कर्मसमाप्तौ अदन्तः संग्रामादुत्तारयन्ती विजयं कुर्वतीत्यर्थः। इयं का या ज्या कर्णमागनीगन्ति आकृष्टा सती योद्धुः कर्णं प्रत्यत्यर्थमागच्छति यङ्लुकि गमः रूपम्। कीदृशी उत्प्रेक्ष्यते वक्ष्यन्तीव वक्तुमिच्छन्तीव अन्याऽपि वक्तुमिच्छन् कर्णे प्रत्यागच्छति। प्रियं सखायमिष्टं मित्रं बाणरूपं परिषस्वजाना आश्लिष्यन्ती स्वजेः शानचि शपः श्लौ सति द्वित्वम्। इत् पादपूरणार्थः॥ ४०॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे। अप शत्रून् विध्यताᳬ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान्॥ ४१॥

(१)ते आचरन्ती। धनुषः कोटी स्तूयेते। त्रिष्टुप्। ये इमे आर्त्नी आर्त्न्यौ धनुषः कोटी। समना इव समने इति वचनव्यत्ययः समान भर्तृगतमनस्के योषे इव यथा समानभर्तृगतमनस्के योषे पतिमागच्छन्त्यौ ते आचरन्ती आगच्छन्त्यौ धानुष्कम्। मातेव पुत्रं बिभृतामुपस्थे। यथा माता उपस्थ उत्सङ्गे पुत्रं धारयति एवं बिभृतां धारयतां शरम्। अपशत्रून् विध्यताम् व्यध ताड-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु० पु० नास्ति। तद्यथा। ते आचरन्ती। धनुषः कोटी स्तूयते त्रिष्टुप् ते इमे आर्त्नी आर्त्न्यौ धनुषः कोटी उपस्थे उत्सङ्गे माता पुत्रमिव शरं बिभृतां धारयतां शत्रूनपविध्यतां च कीदृश्यौ आचरन्ती आगच्छन्त्यौ धनुष्कं प्रति समना योषा इव वचनव्यत्ययः समानमनस्के समानभर्तृगतमनस्के योषे इव ते यथा कान्तमागच्छतः तथा संविदाने सुप्रमनुभवन्त्यौ अमित्रान् शत्रून् प्रति विष्फुरन्ती विस्फुरन्त्यौ॥ ४१॥

ने । अपविध्यतां च शत्रून् संविदाने । सुखमनुभवन्त्यौ । वि-
ष्फुरन्ती अमित्रान् । अमित्रान् शत्रून् विष्फुरन्त्यौ ॥ ४१ ॥

मधुःकोटी स्तूयते । ते प्रसिद्धे इमे आर्त्नी आर्त्न्यौ धनुःकोटी उपस्थे उत्सङ्गे मध्यभागे बिभृतां धारयतां शरमिति शेषः । तत्र दृष्टान्तः माता पुत्रमिव यथा जननी पुत्रमुत्सङ्गे बिभर्ति । शत्रून् अपविध्यतां ताडयतां च । कीदृश्यौ आर्त्न्यौ आचरन्ती चाचरन्त्यौ आगच्छन्त्यौ धानुष्कं प्रति तत्र दृष्टान्तः समना योषा इव वचनव्यत्ययः समना समानमेकपतिगतं मनो ययोस्ते समनसौ विभक्तेर्डादेशः समचित्ते योषा योषे स्त्रियौ यथा कान्तमागच्छतः । संविदाने संविदाते ते संविदाने समो गमीत्यादिना (पा०१,३,२९) शानच् परस्परं सङ्केतं कुर्वाणे । अमित्रान् शत्रून् प्रति विष्फुरन्ती टङ्कारं कुर्वाणे ॥ ४१ ॥

ब॒ह्वी॒नां पि॒ता ब॒हुर॑स्य पु॒त्रश्चि॒श्चाकृ॑णोति॒ सम॑नाव॒गत्य॑ । इ॒षु॒धिः सङ्काः॒ पृत॑नाश्च॒ सर्वाः॑ पृ॒ष्ठे निन॑द्धो जयति॒ प्रसू॑तः ॥ ४२ ॥

(१)बह्वीनामपि ताम् इषुधिरभिधेयः । त्रिष्टुप् । यः बह्वीना-

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । बह्वीनां पिता इषुधिरिति धेयः । त्रिष्टुप् बह्वीनाम् इषूणां पिता पालयिता तेन हि ताः पाल्यन्ते । अस्येषुधेः बहुः पुत्रः इषुकलापः पुत्रस्थानीयः महितेन इषुकलापेन त्रायते बहुवाहितं तदर्थं कुर्वन्तीति । यश्च इषुधिः समना संग्रामान् अवगत्य ज्ञात्वा चिश्चाकृणोति शब्दानुकरणम् स हि इषौ निष्क्रम्यमाणे चिश्चेति शब्दं करोति । स इषुधिः धनुष्केण पृष्ठे निनद्धो बद्धः प्रसूतोऽनुज्ञातश्च सन् सङ्काः सङ्काशं दधते अस्मिन् योधा इति सङ्कीर्यन्ते यास्मिन् योधा इति सङ्काः शत्रुदाकृतं सर्वाः पृतनाश्च स्पर्धनीयतमाः संग्रामभक्तीः जयति विपक्षातः कारकाणि भवन्तीतिपुधेः कर्तृत्वम् ॥ ४२ ॥

मिषूणां पिता पालयिता। तेन सहिताः पाल्यन्ते सहिताः संश्चिद्धाति। यस्य चास्य बहुः इषुकलापः पुत्रः पुत्रस्थानीयः। महितेन इषुकलापेन त्रायते। बहु वा तदर्थं हितं कुर्वन्ति। चिश्चाकृणोति। शब्दानुकरणमेतत् इषुर्निष्क्रम्यमाणः चिश्चेत्येवं शब्दं करोति। समनावगत्य। संमना संग्रामान् अवगत्य ज्ञात्वा। स इषुधिः संकाः संकासं धत्ते अस्मिन् योधा इति संकाः संकीर्यन्ते अस्मिन्नरय इति संकाः शत्रुसंकटं वा। पृतनाश्च सर्वाः पृतनाः स्पर्द्धनीयतमाः संग्रामभक्तीः सर्वाः। पृष्ठे निनद्धः धानुष्कस्य पृष्ठे बद्धः प्रसूतः धानुष्केणाभ्यनुज्ञातः सन् जयति अत्र इषुधेः कर्तृत्वम्। विवक्षातः कारकाणि भवन्तीति वैयाकरणाः॥ ४२॥

इषुधिः स्तूयते। ये इषुधिः तूणो बह्वीनामिषूणां पिता पालकः यतो बाणान् धरति। अस्येषुधेर्बहुः पुत्रः। बाणसमूहः पुत्रस्थानीयः पाल्यमानत्वात्। पुरून् बहून् त्रायते इति पुत्रः। स इषुधिः समना संग्रामान् अवगत्य ज्ञात्वा चिश्चाकृणोति चिश्चेति शब्दं करोति शब्दानुकरणमेतत् बाणे तूणान्निष्क्रम्यमाणे चिश्चेति शब्दो भवति। च पुनः स इषुधिर्धानुष्केन पृष्ठे निनद्धः बद्धोऽपि प्रसूतः अनुज्ञातः सन् सर्वाः पृतनाः जयति शत्रुसेनाः पराभवति। कीदृश्यः पृतनाः सङ्काः सङ्काः सचतेः सम्पूर्वाद्वा किरतेरिति (निरु० ९, १४) यास्कोक्तेः सचतेः किरतेर्वा रूपम् सचन्ते सम्बध्यन्ते सङ्कीर्यन्ते वा योधा यासु ताः सङ्काः। विवक्षातः कारकाणि भवन्तीति वचनादिषुधेः कर्तृत्वम्॥ ४२॥

रथे॑ तिष्ठ॑न्नयति वा॒जिनः॑ पु॒रो यत्र॑यत्र का॒मय॑ते सुषा॒र॒थिः। अ॒भीशू॑नां महि॒मानं॑ पनायत॒ मनः॑ प॒श्चाद॑नु॑यच्छन्ति र॒श्मयः॑॥ ४३॥

(१)रथे तिष्ठन् । जगत्या अर्द्धेन सारथिः स्तूयतेऽर्द्धेन रश्मयः । सुसारथिः रथे तिष्ठन् नयति वाजिनः । प्रापयत्यश्वान् पुरः पुरतोऽवस्थितान् । यत्र यत्र कामयते । तं वयं स्तुम इति शेषः । अभीशूनाम् प्रग्रहाणां महिमानं महाभाग्यं पनायत पूजयत हे जनाः । ये मनः अश्वसंबन्धि चित्तम् पश्चात्सन्तः अनुयच्छन्ति अनुगम्य गृह्णन्ति रश्मयः यन्तारः ॥ ४३ ॥

अर्धेन सारथिरर्धेन रश्मयः स्तूयन्ते । जगती इयम् । सुषारथिः सुसारथिः शोभनः सारथिः यत्र यत्र प्रदेशे कामयते इच्छति मयात्र गन्तव्यमिति तत्र तत्र पुरो वर्त्तमानान् वाजिनः नयति प्रापयति । कीदृशः रथे तिष्ठन् । तं स्तुम इति शेषः । इदानीं रश्मयः स्तूयन्ते हे जनाः ! अभीशूनां रश्मीनां महिमानं महाभाग्यं यूयं पनायत स्तुत ! ये रश्मयः पश्चाद्वर्त्तमानाः सन्तः मनोऽश्वचित्तमनुयच्छन्ति अनुगम्य गृह्णन्ति वशवर्त्तिनं कुर्वन्तीत्यर्थः । पन स्तुतौ गुपूधूपेत्यादिना (पा० ३, १, २८) आयप्रत्ययान्तात्पनेर्लोट् ॥ ४३ ॥

तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः । अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ १॥ रनपव्ययन्तः ॥ ४४ ॥

(२) तीव्रान् घोषान् । अश्वाः स्तुयन्ते त्रिष्टुभा । तीव्रान्

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मुद्रित पु० नास्ति । तद्यथा । रथे तिष्ठन् जगत्या अर्धेन सारथिः स्तूयते अर्धेन रश्मयः सुसारथिः रथे तिष्ठन् सन् पुरोऽग्रतोऽवस्थितान् वाजिनः यत्र यत्र कामयते तत्र तत्र नयति प्राप प्रापयति तं स्तुम इति शेषः हे जनाः अभिशूनां प्रग्रहाणां महिमानं पनायत महाभाग्यं पूजयन्तः रश्मयः पश्चात् सन्तो मनः अश्वचित्तम् अनुयच्छन्ति अनुगम्य गृह्णन्ति वशवर्त्तिनं कुर्वन्ति ॥ ४३ ॥

(२) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई मु-

जयजयेत्युग्रान् घोषान् शब्दान् कृण्वते कुर्वन्ति । वृषपाणयः । वृषा अश्वाः पाणौ येषां संग्रहीतृप्रभृतीनां योक्तॄणां ते तथोक्ताः। युक्ताः श्वसन्तः अश्वाः रथेभिः रथैः । सह वा जयन्तः पूजयन्तः रथिनः ॥ तीव्रानेव घोषान् हेषितादीन् कृण्वन्ति । अवक्रामन्तः प्रपदैः खुरैः अमित्रान् शत्रून् क्षिणन्ति क्षिण्वन्ति हिंसन्ति । अनपव्ययन्तः । व्यय क्षये । अपपूर्वादस्माच्छतृप्रत्ययः । अपव्ययन्तः नश्यन्तः न अपव्ययान्तोऽनपव्यन्तः न नश्यन्तः । अपरित्यजन्तो वा स्वामिनम् ॥ ४४ ॥

अश्वाः स्तूयन्ते । वृषाः अश्वाः प्राणौ हस्ते येषां ते वृषपाणयोऽश्ववाराः तीव्रान् घोषान् जय जयेति शब्दान् कृण्वते कुर्वन्ति । अश्वा अपि रथेभिः रथैः सह वाजयन्तः गच्छन्तः सन्तस्तीव्रान् घोषान् हेषाशब्दान् कुर्वन्ति शत्रून् क्षिणन्ति नाशयन्ति च । कीदृशाः अश्वाः प्रपदैः पादाग्रैः खुरैः अमित्रान् रिपून् अवक्रामन्तः आक्रामन्तः । अनपव्यन्तः व्यय क्षये अदन्तश्चुरादिः अपव्ययन्ति ते अपव्ययन्तः न अपव्ययन्तोऽनपव्ययन्तः अनश्यन्त । वज गतौ स्वार्थे णिच् वाजिनः ॥ ४४ ॥

रथवाहनꣳ हविरस्य नाम यत्रायुधं निहितमस्य वर्म । तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥ ४५ ॥

द्रित पु० नास्ति । तद्यथा । तीव्रान् घोषान् । अश्वाः स्तूयन्ते त्रिष्टुभा वृषपाणयः वृषाः अश्वाः पाणौ येषां ते योक्तारः अश्ववाराः तीव्रान् घोषान् जय जये ति शब्दान् कृण्वते कुर्वन्ति अश्वाः रथेभिः रथैः सह वा जयन्तः पूजयन्तः अर्थात् रथिनः पूजयन्तः तीव्रान् घोषान् हेषितानि कृण्वते प्रपदैः खुरैः अमित्रान् अवक्रामन्तः सन्तः शत्रुन् क्षिणन्ति क्षिण्वन्ति अनपव्ययन्तः व्यय क्षये अपपूर्वात् शतृप्रत्ययः न अपव्ययन्तो नश्यन्तः अपरित्यजन्तो वा स्वामिनम् ॥ ४४॥

(१)रथवाहणम् । रथस्तुतिः त्रिष्टुप् । यस्यास्यानसः रथवाहणं रथवोढ इति नाम । हविरिति नाम्नोऽर्द्धलोपः । हविर्द्धानमिति च द्वितीयं नाम । विमुच्य सयन्त्रकं रथवाहणं करोति अनस्तत्कर्मेति कात्यायनः । तस्मादनस एव पौरोडाशेषु यजूꣳषि श्रुतिः । यत्र यस्मिन् आयुधं निहितं स्थापितम् । अस्य योदुधुः वर्म च संनहनम् । तत्रानसि रथम् शर्म सुखम् उपसदेम उपसादयाम विश्वाहा सर्वदा वयम् सुमनस्यमानाः अनुकूलचित्ताः ॥ ४५ ॥

शकटद्वारा रथः स्तूयते । अस्यानसो रथवाहनं नाम रथं वहतीति रथवाहनम् वाजपेयेऽनसि रथस्यारोप्यमाणत्वात् । तथास्य हविः हविर्धानं नाम पृषोदरादित्वादुत्तरार्धलोपः । यत्रानसि अस्य योदृधुर्वर्म आयुधं च निहितं स्थापितम् तत्रानसि वयं रथमुपसदेम उपसादयामः । कीदृशं रथं शर्म. सुखकरम् । कीदृशा वयम् विश्वाहा सर्वदा सुमनस्यमानाः शोभनं मनो येषां ते सुमनसः असुमनसः सुमनसो भवन्ति सुमनस्यन्ते भृशादिभ्यो भुव्यच्वेरिति (पा० ३, १, १२) क्यङ् ततः शानच् अनुकूलचित्ता इत्यर्थः । तत्रत्यस्य संहितायां निपातस्य चेति (पा० ६, ३, १३६) दीर्घः ॥ ४५ ॥

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः श-

(१)अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । रथवाहणम् । रथस्तुतिस्त्रिष्टुप् । अस्यानसः रथवाहणं नाम रथवोढ इति नाम हविरिति च नाम हविर्नाम्नोऽर्धलोपः । हविर्द्धानमिति द्वितीयं नाम विमुच्य संयत् । कं रथं वाहनं करोति अनस्तत्कर्मेति कात्यायनः तस्मादनस एव पौरोडाशे यजूंषीति श्रुतिः यत्रानसि अस्य योदृधुः आयुधं वर्म च निहितं तत्रानसि विश्वाहा सर्वदा सुमनस्यमानाः अनाकुलचित्ताः वयं शर्म सुखं रथमुपसदेम उपसादयामः ॥ ४५ ॥

क्षीवन्तो गभीराः। चित्रसेना इषुबला अमृध्राः स-
तोवीरा उरवो व्रातसाहाः॥ ४६॥

(१)स्वादु संसदः। रथगोपान् स्तौति त्रिष्टुप्स्वादु सुखकरं संसदः संसदनं येषान्ते स्वादुसंसदः रथगोप्तारः पितरः पातारः। वयोधाः अन्नस्यायुषो वा धारयितारः। कृच्छ्रेश्रितः क्लेशाश्रयिणः शक्तीवन्तः बलवन्त आयुधवन्तो वा। गभीराः गम्भीरप्रज्ञाना वा गम्भीरबला वा। चित्रसेनाः विचित्रसेनाः इषुबलाः इषुषु विशेषतो बलं येषान्ते तथोक्ताः। अमृध्राः अमृदवः उग्रशासनः सतोवीराः। सतः विद्यमानस्य बलस्य विविधमीरयितारो वा। पृथुजघनोरस्का वा। उरुमनसो वा व्रातसाहाः। व्राताः गणास्तेषामभिभवितारः। य इत्थम्भूताः पुरु-

(१) अत्र वाराणसी॰ लि॰ पु॰ संमतोऽयं पाठक्रमः मुम्बईमु॰पु॰ नास्ति। तद्यथा। स्वादुषꣳसदः रथगोपान् स्तौति त्रिष्टुप् च एवंविधाः पुरुषास्तेऽस्माकं रथगोप्तारो भवन्त्विति शेषः कीदृशाः स्वादुसंसदः स्वादुसुखकरं संसदः ससदनं येषां ते स्वादुसंसदः पितरः पातारः वयोधाः अन्नस्यायुषो वा धारयितार. कृच्छ्रेश्रितः क्लेशाश्रयिणः कृच्छ्रेश्रित इति एकं पदम् कृच्छ्रे कष्टे श्रीयन्ते इति कृच्छ्रेश्रितः सप्तम्या अलुक् दुःखे श्रयणयोग्याः दुःखनाशकत्वादिति वा शक्तीवन्तः शक्तिर्विद्यते येषां ते शक्तिवन्तः अश्वरश्मिमतीत्यादिना शक्तिशब्दस्य वकारे दीर्घः बलवन्तः आयुधवन्तो वा गम्भीराः गम्भीरबलाश्च चित्रसेनाः इषुबलाः इषुभिर्बलं येषां ते अमृध्राः अमृदवः उग्रशासनाः सतः शोभनस्य यजमानस्य अश्वमेधयाजिनः संबन्धिनो वीराः सतोवीरा इत्येकं पदं षष्ठ्या अलुक् यद्वा सतो विद्यमानस्य बलस्य विविधमीरयितारो वा उरवः पृथुजघनोरस्काः उरुमनसो वा व्रातसाहाः व्रतान् सहते इति व्रातसहाः पचाद्यच् अभिमाति पृतनेत्यादिना सहस्य दीर्घः व्राता गणास्तेषामभिभवितारः॥ ४६॥

पास्तेऽस्माकं रथगोप्तारो भवन्त्विति शेषः ॥ ४६ ॥

रथगोपान् स्तौति । ईदृशा नरा अस्माकं रथं गोप्तारो भवन्त्विति शेषः । कीदृशाः स्वादुसंसदः स्वादु सुखं यथा तथा संसीदन्ति ते स्वादुसंसदः । पितरः पान्ति ते पितरः रक्षितारः । वयोधाः वयोऽन्नमायुर्वा दधति धारयन्ति वयोधाः । कृच्छ्रेश्रितः इत्येकं पदम् कृच्छ्रे कष्टे श्रीयन्ते सेवन्ते कृच्छ्रेश्रितः कर्मणि क्विप् अलुक् सप्तम्याः दुःखे सति आश्रयणयोग्याः दुःखनाशकत्वात् यद्वा सप्तमी द्वितीयार्थे कृच्छ्रं श्रयन्ति कृच्छ्रेश्रितः दुःखं प्राप्यापि स्वामिसेवनपराः । शक्तीवन्तः शक्तिः सामर्थ्यमायुधं वा अस्ति येषां ते । अश्वरश्मिमतीत्यादिप्रातिशाख्यसूत्रेण (३, ६, २) शक्तिशब्दस्य दीर्घः । गभीराः गम्भीरबला गम्भीरप्रज्ञाश्च । चित्रसेनाः चित्रा नानाविधा सेना येषां ते । इषुबलाः इषुभिर्बाणैर्बलं येषां ते । अमृध्राः मृध्राः मृदवो न भवन्त्यमृध्राः कठिनाज्ञा उग्रशासना वा । सतोवीराः इत्येकं पदम् सतोऽश्वमेधयाजिनो वीराः शूराः यद्वा सतो विद्यमानस्य बलस्य वीराः प्रेरकाः विविधमीरयन्तीति वीराः षष्ठ्या अलुक् । उरवः विशालाः पृथुजघनोरस्का इत्यर्थः । व्रातसाहाः व्रातान् शूरसमूहान् सहन्तेऽभिभवन्ति ते व्रातसहाः पचाद्यच् अभिमातिपृतनेत्यादिना (प्रातिशा० ३, ६, २७) सूत्रेण सहतेरुपधादीर्घः ॥ ४६ ॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा । पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥ ४७ ॥

(१) ब्राह्मणासः । जगती लिङ्गोक्तदेवता । ऋतावृध

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । ब्राह्मणासः जगती लिङ्गोक्तदेवताः ऋतावृधः प्रभृति प्रत्यक्षकृतो मन्त्राः ब्राह्मणास इत्यादिपरोक्षकृतः अत एवं व्याख्यायते । हे ऋतावृधः सत्यवृधः देवाः इत्यध्याहारः रक्ष रक्षतेति

इत्यादिः प्रत्यक्षभूतो मन्त्रः ब्राह्मणास इत्यादिः परोक्षकृतः । अत एवं व्याख्यायते । हे ऋतावृधः सत्यवृधो वा यज्ञवृधो वा देवा। इत्यध्याहारः सामर्थ्यात् रक्ष। रक्षत इति वचनव्यत्ययः। माकिः। मा च कश्चन नः अस्माकम् । अघशंसः अघानि पापानि यः शंसति प्रकाशयति सोऽघशंस ईशत ईष्टे इति वचनव्यत्ययः। भवत्प्रसादाच्च। ब्राह्मणासः ब्राह्मणाः पितरः सोम्यासः सोमसम्पादिनः । पान्त्वित्यत्रान्वयः शिवे कल्याणकारिण्यौ द्यावापृथिवी च अनेहसा अनुपहिंसिन्यौ अनपराधिन्यौ वा पाताम्। पूषा च नः अस्मान् पातु दुरितात् अशुभात् ॥ ४७ ॥

जगती लिङ्गोक्तदेवता। ब्राह्मणासः ब्राह्मणाः नोऽस्मान् पान्तु रक्षन्तु पातित्यस्यार्थवशाद्वचनव्यत्ययः कार्य्यः। पितरः च पान्तु। कीदृशाः सोम्यासः सोम्याः सोमसम्पादिनः सोमपानयोग्या वेत्युभयोर्विशेषणम्। द्यावापृथिवी द्यावाभूमी नः पाताम्। कीदृश्यौ शिवे कल्याणकारिण्यौ। अनेहसा अनेहसौ नास्ति एहोऽपराधो ययोस्ते अपराधनिवर्त्तिके। किञ्च पूषा सूर्य्यो नोऽस्मान् दुरितात् पातु। एवं परोक्षेणोक्त्वा प्रत्यक्षमाह हे ऋतावृधः। ऋतं सत्यं यज्ञं वा वर्धयन्ति ऋतवृधः देवाः संहितायामृतस्य दीर्घः रक्ष रक्षतास्मान् वचनव्यत्ययः। माकिः मा कश्चन अघशंसः पापी नोऽस्माकमीशत पेश्वर्य्यं मा करोतु वयं दुष्टवशा मा भूमेत्यर्थः॥ अघं पापं शंसति वक्ति प्रकाशयति वाघशंसः दुष्टः। ईशतेति वचनव्यत्ययः॥ ४७॥

वचनव्यत्ययः । माकिः मा कश्चित् नोऽस्माकम् अघशंसः अघानि पापानि शंसति प्रकाशयतीत्यघशसः ईशत इष्टेति वचनव्ययः भवत्प्रसादाच्च सोम्यासः सोमसंपादिनः ब्राह्मणाः पितरः नोऽस्मान् दुरितात् अशुभात् पान्तु द्यावापृथिवी च नः पातां किम्भूते शिवे कल्याणकारिण्यौ अनेहसा अनुपहिंसिन्यौ अनपराधिन्यां वा पूषा च नः दुरितात् पातु ॥ ४७॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता । यत्रा नरः सं च वि च द्रवन्ति तत्रा-स्मभ्यमिषवः शर्म यꣳसन् ॥ ४८ ॥

(१) सुपर्णं वस्ते । द्वाभ्यां त्रिष्टुबनुष्टुब्भ्यामिषुं स्तौति । या सुपर्णं वस्ते सुपर्णः पक्षी तद्विकारः सौपर्णमिति भवति । तत्र कृत्स्नवन्निगमः राजानमभिप्रेत्य । मृगो अस्या दन्तः य-स्याश्चास्या इषोः मृगो दन्तः फलम् मृगयतेर्मृगः । स हि वेध्य-म्मृगयते या च गोभिः सन्नद्धा । गोविकारैः श्लेष्मस्नायुभिः संनद्धा । पतति शत्रुबलं प्रति । प्रसूता प्रेरिता धनुष्मता सा इषुः यत्र नरः सञ्च विचन्द्रवन्ति । सगच्छन्ति च । विगच्छ-न्ति च तत्र अस्मभ्यम् इषवः इषुरिति सन्नतिः । शर्म शरणम् यंसन् यच्छत्विति सन्नतिः ॥ ४८ ॥

द्वाभ्यामिषुं स्तौति आद्या त्रिष्टुप् अन्यानुष्टुप् । या इषुः सु-पर्णं पक्षिपिच्छं वस्ते परिधत्ते वस परिधाने शोभनं पर्णं पिच्छं यस्य स सुपर्णः पक्षी तस्य विकारः सौपर्णम् । तत्र कृत्स्नवन्निगमा भवन्तीति (निरु० २, ५) यास्कोक्तेः सुपर्णशब्देन तत्पिच्छं गृह्यते बाणपुच्छे पिच्छस्यारोप्यमाणत्वात् किञ्च अस्या इषोः दन्तः फलं मृगः मृगयतेऽन्विष्यति रिपून् हन्तुमिति मृगः

(१)अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । सुपर्णं वस्ते द्वाभ्यां त्रिष्टुबनुष्टुब्भ्याम् इषुं स्तौ-ति या इषुः सुपर्णं वस्ते परिधत्ते सुपर्णः पक्षी तस्य विकारः सौपर्ण-मिति भवति तत्र कृत्स्नवन्निगमः राजमभिप्रेत्य अस्याः इषोः मृगो दन्तः फलं मृगो मृगयते स हि वेध्यं मृगयते या च गोभिः गोविकारैः श्लेष्मस्नायुभिः संनद्धा प्रसूता धनुष्मता प्रचोदिता सती पतति शत्रुबलं प्रति सा इषुः यत्र नरः संद्रवन्ति विद्रवन्ति च तत्र अस्म-भ्यम् इषवः इषुरिति संनतिः शर्म शरणं यंसत् यच्छतु ददातु ॥४८॥

मृग मार्गणे चुरादिरदन्तः पचाद्यच् मृगो मृगयतेरिति (निरु० ९, १९) यास्कः शल्यं हि वेध्यं मृगयते । किञ्च या इषुः गोभिः गोविकारैः स्नायुभिः सन्नद्धा बद्धा प्रसूता धनुष्मता प्रेरिता सती पतति शत्रुबलं प्रति गच्छति । किञ्च यत्र नरो योद्धारः सन्द्रवन्ति च सम्यक् गच्छन्ति विद्रवन्ति च विविधं प्रसरन्ति चौ समुच्चये तत्र रणे इषवः बाणाः अस्मभ्यं शर्म सुखं यंसन् यच्छन्तु यमु उपरमे लेटि तिप इलोपेऽडागमे सिब्बहुलं लेटीति (पा० ३, १, ३४) सिवागमे यंसदिति रूपम् सुखं ददतु ॥ ४८ ॥

ऋजी॑ते॒ परि॑ वृङ्ग्धि॒ नोऽश्मा॑ भवतु नस्त॒नूः। सोमो॒ अधि॑ब्रवीतु॒ नोऽदि॑ति॒: शर्म॑ यच्छतु ॥ ४९ ॥

(१) ऋजीते परि । हे ऋजीते ऋजुगामिनि । परिवृङ्ग्धि नः परिवर्जयास्मान् । अश्मा भवतु नस्तनूः अश्ममयी च भवतु नः अस्माकं तनूः शरीम् । सोमश्च अधिब्रवीतु आधिक्येन वदतु नोऽस्माञ्जीवनाय । अदितिश्च शर्म शरणम् यच्छतु ददातु ॥ ४९ ॥

ऋजुः सरला इतिर्यस्याः सा ऋजीतिः टिलोप आर्षः । हे ऋजीते ऋजुगामिनि ! नोऽस्मान् परिवृङ्ग्धि परिवर्जय अस्मासु मा पतेत्यर्थः । किञ्च नोऽस्माकं तनूः शरीरम् अश्मा पाषाणतुल्यदृढा भवतु। सोमः नोऽस्मानधिब्रवीतु अधिकान् वदतु । अदितिः देवमाता शर्म सुखं यच्छतु ददातु ॥ ४९ ॥

आज॑ङ्घन्ति॒ सान्वे॑षां ज॒घनाँ॒२॥ उप॑जिघ्नते । अ-

(१) अत्र वाराणसी० लि० पु० समतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । ऋजीते हे ऋजीते ऋजुः इतिर्गमनं यस्याः सा ऋजीतिः तत्संबोधनं हे ऋजुगामिनि, नोऽस्मान् परिवृङ्ग्धि परिवर्जय नोऽस्माकं तनूः अश्मा अश्ममयी भवतु सोमः नोऽस्मान् अधिब्रवीतु आधिक्येन वदतु अदितिश्च शर्म यच्छतु शरणं ददातु ॥ ४९ ॥

श्वाजनि प्रचेतसोऽश्वान् समत्सु चोदय ॥ ५० ॥

(१) आजङ्घन्ति । कशास्तुतिः । अनुष्टुप् येषामश्वानाम् आजङ्घन्ति अश्वारोहाः सानु सानूनि मांसोपचितान्यङ्गानि । येषामेषाञ्च जघनान् जघनानि उपजिघ्नते उपनिघ्नन्ति । अश्वाजनि अश्वाञ्जनयतीत्यश्वाजनी तस्याः सम्बोधनं हे अश्वाजनि । प्रचेतसः परिदृष्टकारिणः प्रकृष्टज्ञानान्वा । अश्वान् समत्सु सङ्ग्रामेषु चोदय प्रेरय ॥ ५० ॥

अनुष्टुप् । कशा स्तूयते अज गतौ क्षेपणे च । अश्वाः अज्यन्ते क्षिप्यन्ते यया सा अश्वाजनी हे अश्वाजनि कशे ! समत्सु संग्रामेषु त्वमश्वान् चोदय प्रेरय जयाय कीदृशानश्वान् प्रचेतसः प्रकृष्टं शूरं चेतो मनो येषां ते । हे कशे ! यया त्वयाऽश्ववारा एषामश्वानां सानु सानूनि सानुतुल्यानि मांसोपचिताङ्गानि आजङ्घन्ति वचनव्यत्ययः आघ्नन्ति ताडयन्ति जघनान् कटिभागान् उपजिघ्नते निघ्नन्ति । तुरङ्गारोहा ययाश्वान् वशयन्ति सा त्वमश्वान् प्रेरयेत्यर्थः ॥ ५० ॥

अहि॑रिव भो॒गैः पर्ये॑ति बा॒हुं ज्याया॑ हे॒तिं प॑रि॒बाध॑मानः । ह॒स्त॒घ्नो विश्वा॑ व॒युना॑नि वि॒द्वान् पुमा॒न् पुमा॑ᳬसं॒ परि॑ पातु वि॒श्वतः॑ ॥ ५१ ॥

---

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । आजङ्घन्ति कशास्तुतिः अनुष्टुप् एषामश्वानां सानु सानूनि समुच्छ्रितानि मांसोपचितान्यङ्गानि आजङ्घन्ति आघ्नन्ति अश्ववाराः जघनान् जघनानि च उपजिघ्नते उपनिघ्नन्ति हे अश्वाजनि अश्वानामजनी अज गतौ क्षेपणे च क्षेपणी तस्याः संबोधनम् हे अश्वाजनि हे कशे प्रचेतसः परिदृश्यकारिणः प्रज्ञानान् अश्वान् समत्सु ग्रामेषु चोदय प्रेरय जयाय ॥ ५० ॥

(१) अहिरिव । हस्तघ्नः स्तूयते त्रिष्टुप् । हस्ते एव स्थितो हन्ति यः स हस्तघ्नः खेटकः प्रकोष्ठादित्राणं वा । यः हस्तघ्नः अहिरिव सर्प इव भोगैः । शरीरावयवैः । पर्येति परिवेष्टयति बाहुम् । ज्याया हेतिं परिबाधमानः । ज्याया आयुधात्परित्रायमाणः । स हस्तघ्नः विश्वा विश्वानि सर्वाणि वयुनानि विद्वान् प्रजानन् परिदृष्टकारी वा । पुमान् शूरो क्लीबो वा । पुमांसमक्लीबं परिपातु विश्वतः सर्वतः ॥ ५१ ॥

हस्तघ्नः स्तूयते । सप्त त्रिष्टुभः हस्ते स्थितो हन्ति हस्तघ्नः खेटकः यद्वा हस्त हन्ति प्राप्नोति हस्तघ्नः प्रकोष्ठत्राणम् पुमांसं विश्वतः सर्वतः परिपातुः रक्षतु । किम्भूतो हस्तघ्नः विश्वा विश्वानि सर्वाणि वयुनानि ज्ञानानि विद्वान् जानन् । तथा पुमान् पुंस्त्वयुक्तः शूर इत्यर्थः । यो हस्तघ्नो भोगैः स्वशरीरावयवैः कृत्वा बाहु पर्य्येति हस्तं वेष्टयति क इव अहिरिव यथाहिः सर्पो भोगैः स्वदेहैः हस्तादिकं वेष्टयति । कीदृशः ज्यायाः हेतिं बाणं शत्रुप्रेरितम् परिबाधमानः निवर्त्तयन् खेटकपक्षे तु ज्याया हेतिं प्रहारं निवारयन् ज्याघातस्य निवारकत्वात् ॥ ५१ ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ५२ ॥

---

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । अहिरिव हस्तघ्नः स्तूयते त्रिष्टुप् हस्ते स्थितो हन्ति हस्तघ्नः खेटकः प्रकोष्ठादित्राणं वा यः अहिः सर्प इव भोगैः शरीरावयवैः बाहु पर्येति परिवेष्टयति किम्भूतः ज्यायाः हन्ति इषुं परिबाधमानः बाणाद्रक्षन् स हस्तघ्नः विश्वा सर्वाणि वयुनानि प्रज्ञानानि विद्वान् विप्रजानन् परिदृष्टकारी पुमान् शूरः अक्लीबः पुमासम् अक्लीवं मां विश्वतः सर्वतः परिपातु ॥ ५१ ॥

(१) वनस्पते वीड्वङ्गः । रथदुन्दुभिदेवत्यावृचौ त्रिष्टुभौ ऐन्द्रावान्त्योऽर्द्धर्चः । हे वनस्पते वानस्पत्य रथ । कृत्स्नवन्निगमः । वीड्वङ्गो हि भूयाः । वीडुशब्दो दृढवचनः । दृढाङ्गो भव । अस्मत्सखा सन् । प्रतरणः प्रतरन्त्यनेन सङ्ग्रामानिति . प्रतरणः सुवीरः साधुवीरः । यतश्च त्वम् गोभिः । श्लेष्मचर्मभिः सन्नद्धोऽसि अतस्त्वां ब्रवीमि । वीडयस्व संस्तम्भयस्वात्मानम् आस्थाता ते । संस्थाता च ते तव जयतु जेत्वानि जेतव्यानि॥५२॥

तिस्र ऋचो रथदेवताः । हे वनस्पते वनस्पतिविकार काष्ठमय रथ ! कृत्स्नवन्निगमः (निरु० २, ५) त्वं वीड्वङ्गः दृढाङ्गो भूयाः भव वीडूनि अङ्गानि यस्य । कीदृशः अस्मत्सखा अस्माकं मित्रभूतः प्रतरणः प्रतरति संग्रामपारं गच्छति प्रतरणः । सुवीरः शोभनो वीरो रथी यत्र । किञ्च हे रथ ! यतः त्वं गोभिः गोविकारैश्चर्मभिः सन्नद्धः यद्धोऽसि अतो वीडयस्व आत्मानं स्तम्भय । किञ्च ते तवास्थाता आरोढा रथी जेत्वानि जेतव्यानि रिपुधनानि जयतु हि पादपूरणः ॥ ५२ ॥

दि॒वः पृ॑थि॒व्याः पर्योज॒ उद्भृ॑तं॒ वन॒स्पति॑भ्यः॒ पर्याभृ॑त॒ꣳ सहः॑ । अ॒पामो॒ज्मानं॒ परि॒ गोभि॒रावृ॑ता॒मिन्द्र॑स्य॒ वज्र॑ꣳ ह॒विषा॒ रथं॑ यज ॥ ५३ ॥

---

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठमक्रः मुम्बईमु०पु० नास्ति । तद्यथा । वनस्पते रथदुन्दुभिदेवत्यौ तृचौ त्रिष्टुभौ इन्द्रदेवत्योऽर्धर्चः हे वनस्पते वानस्पत्य रथ कृत्स्नवन्निगमः वीड्वङ्गो भूयाः वीडुशब्दो दृढवचनः दृढाङ्गो भव अस्मत्सखा सन् प्रतरणः प्रतरन्त्यनेन संग्रामान् इति प्रतरणः सुवीरः साधुवीरः यतश्च त्वं गोभिः गोविकारैः श्लेष्मचर्मभिः संनद्धः असि अतः वीडयस्व संस्तम्भयस्व आत्मानं ते तव आस्थाता रथी जेत्वानि जेतव्यानि शत्रुधनानि जयतु हिः पादपूरणः ॥ ५२ ॥

(१) दिवः पृथिव्याः दिवः द्युलोकात् यत् ओजः परि सर्वतः उद्भृतम् । उद्धृतम् । यच्च पृथिव्याः पृथिवीलोकात् परि उद्भृतम् । यच्च वनस्पतिभ्यः । वनस्पतिसकाशात् परि सर्वतः आभृतम् आहृतम् सहः बलम् यच्च अपां सम्बन्धि ओज्मानम् ओजः परिमाणम् । तदेतच्चतुष्टयं रथभावमुपनीतम्। परिगोभिरावृतम् । परिसमन्तात् गोभिः गोविकारैः स्नायुश्लेष्मचर्मभिः आवृतमुपानिबद्धम् इन्द्रस्य वज्रम् । इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारेत्युपक्रम्य रथस्तृतीयं चेत्यभिधाय । रथेन च शरेण च राजन्यबन्धव इति श्रुतिः । तदभिप्रायमेतत् हविषा तमीदृशं रथं यज हे अध्वर्यो ॥ ५३ ॥

हे अध्वर्यो ! त्वं हविषा कृत्वा रथं यज । कीदृशं रथम् दिवः द्युलोकात् पृथिव्याः भूमेः सकाशात् पर्युद्भृतं समन्तादुद्धृतम् ओजः तेजः । तथा वनस्पतिभ्यो वृक्षेभ्यः पर्याभृतं समन्तादाहृतमानीतं सहः बलम् । तथा अपां जलानामोज्मानं तेजः सारभूतम् ओजः बलतेजसोरिति धातोः अन्येभ्योऽपि दृश्यन्ते इति (पा० ३, २, ७५) मनिन् ओजयति बलिनं करोतीति ओज्मा तम् । द्यावाभूमिवृक्षजलानां तेजश्चतुष्टयेन निर्मितमित्यर्थः । तथा गोभिः किरणैः पर्यावृतं वेष्टितम् तेजोनिर्मितत्वात् यद्वा गोभिः चर्मभिर्वेष्टितम् । तथा इन्द्रस्य वज्रमिन्द्रवज्राज्जातमित्यर्थः इन्द्रो यदा वृत्राय वज्रं

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । दिवः पृथिव्याः दिवः द्युलोकात् ओजः परि अद्भुतं सर्वतः उद्धृतं पृथिव्याः यत् ओजः परि अद्भुतं वनस्पतिभ्यः सकाशात् यत्सहः बलं पर्याभृतम् आहृतम् अपां संबन्धि यत्सहः पर्याहृतम् ओज्मानं परिमाणं तत्तेजश्चतुष्टयं रथभावमुपनीतं गोभिः गोविकारैः स्नायुश्लेष्मचर्मभिः परिसमन्तात् आवृतम् उपनिबद्धम् इन्द्रस्य वज्रम् इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारेत्युपक्रम्य रथस्तृतीयं चेत्यभिधाय रथेन च शरेण राजन्यबन्धव इति श्रुतिः तदभिप्रायमेतत् ईदृशं रथं हविषा यज । हे अध्वर्यो ॥ ५३ ॥

प्रजहार तदा वृत्रशरीरकाठिन्येन प्रतिहतं चतुर्धा जातम् यूपः स्फ्यः रथः शरश्चेति चतुःखण्डाः तत्र यूपस्फ्यौ विप्रैर्गृहीतौ रथशरौ नृपैरिति श्रुतिकथानुसन्धेया इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारेत्युपक्रम्य रथस्तृतीयमित्यभिधाय रथेन शरेण चेति राजन्यबन्धव इति श्रुतेः (१, २, ४, १—२) ईदृशं रथं यजेत्यर्थः ॥५३॥

इन्द्र॑स्य॒ वज्रो॑ म॒रुता॒मनी॑कं मि॒त्रस्य॒ गर्भो॒ वरु॑णस्य॒ नाभि॑ः । सेमां नो॑ ह॒व्यदा॑तिं जुषा॒णो देव॑ रथ॒ प्रति॑ ह॒व्या गृ॑भाय ॥ ५४ ॥

(१) इन्द्रस्य वज्रः । यस्त्वम् इन्द्रस्य वज्रः असि मरुतां च अनीकं मुखमसि । मित्रस्य च गर्भोऽसि । वरुणस्य च नाभिरसि । सः त्वम् इमाम् नः अस्माकम् हव्यदातिं हविषो दानम् जुषाणः सेवमानः । हे देव रथ प्रतिहव्या गृभाय प्रतिगृभाय प्रतिगृहाण हव्या हवींषि ॥ ५४ ॥

हे रथ ! हे देव ! स त्वं हव्या हवींषि प्रतिगृभाय प्रतिगृहाण । कीदृशः त्वम् इन्द्रस्य वज्रः वज्रोत्पन्नत्वात् । मरुतामनीकं मुखं मुख्यः देवानां जयप्रापकत्वात् । मित्रस्य देवस्य गर्भः गीर्य्यते गर्भः गृणातेर्भप्रत्ययः सूर्य्येण स्तूयमानः । वरुणस्य नाभिः नभ्यतेऽरिर्हिंस्यतेऽनेनेति नाभिः नभ हिंसायाम् इण्प्रत्ययः वरुणस्य हननसाधनम् । नोऽस्माकमिमां हव्यदातिं हविषो दानं जुषाणः सेवमानः । सेमामित्यत्र सोऽचि लोपे चेत्पादपूरणमिति (पा० ६, १. १३४) सन्धिः । गृभाय गृह्णातेर्हलः श्नः शानज्झावित्यनुवृत्तौ (पा० ३, १, ८३) छन्दसि शायजपीति (पा० ३, १८४) हौ परे श्नाप्रत्ययस्य शायजादेशः हस्य भश्च ॥ ५४ ॥

(१) अत्र वाराणसी० लि०पु० संमतोऽयं पाठक्रमः मुम्बई मु०पु० नास्ति । तद्यथा । इन्द्रस्य वज्रः हे देव हे रथ यः त्वम् इन्द्रस्य वज्रः मरुतां च अनीकं मुखं मित्रस्य गर्भः वरुणस्य नाभिरसि सः त्वं नोऽस्माकम् इमां हव्यदातिं हविषो दानं जुषाणः सेवमानः सन् हव्या हवींषि प्रतिगृभाय प्रतिगृहाण ॥ ५४ ॥

(१) दिवः पृथिव्याः दिवः द्युलोकात् यत् ओजः परि सर्वतः उद्भृतम् । उद्धृतम् । यच्च पृथिव्याः पृथिवीलोकात् परि उद्भृतम् । यच्च वनस्पतिभ्यः । वनस्पतिसकाशात् परि सर्वतः आभृतम् आहृतम् सहः बलम् यच्च अपां सम्बन्धि ओज्मानम् ओजः परिमाणम् । तदेतच्चतुष्टयं रथभावमुपनीतम्। परिगोभिरावृतम् । परिसमन्तात् गोभिः गोविकारैः स्नायुश्लेष्मचर्मभिः आवृतमुपनिबद्धम् इन्द्रस्य वज्रम् । इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारेत्युपक्रम्य रथस्तृतीयं चेत्यभिधाय । रथेन च शरेण च राजन्यबन्धव इति श्रुतिः । तदभिप्रायमेतत् हविषा तमीदृशं रथं यज हे अध्वर्यो ॥ ५३ ॥

हे अध्वर्यो ! त्वं हविषा कृत्वा रथं यज । कीदृशं रथम् दिवः द्युलोकात् पृथिव्याः भूमेः सकाशात् पर्युद्भृतं समन्तादुद्धृतम् ओजः तेजः । तथा वनस्पतिभ्यो वृक्षेभ्यः पर्य्याभृतं समन्तादाहृतमानीतं सहः बलम् । तथा अपां जलानामोज्मानं तेजः सारभूतम् ओजः बलतेजसोरिति धातोः अन्येभ्योऽपि दृश्यन्ते इति (पा० ३, २, ७५) मनिन् ओजयति बलिनं करोतीति ओज्मा तम् । द्यावाभूमिवृक्षजलानां तेजश्चतुष्टयेन निर्मितमित्यर्थः । तथा गोभिः किरणैः पर्यावृतं वेष्टितम् तेजोनिर्मितत्वात् यद्वा गोभिः चर्मभिर्वेष्टितम् । तथा इन्द्रस्य वज्रमिन्द्रवज्राज्जातमित्यर्थः इन्द्रो यदा वृत्राय वज्रं

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । दिवः पृथिव्याः दिवः द्युलोकात् ओजः परि अद्भुतं सर्वतः उद्धृतं पृथिव्याः यत् ओजः परि अद्भुतं वनस्पतिभ्यः सकाशात् यत्सहः बलं पर्याभृतम् आहृतम् अपां संबन्धि यत्सहः पर्याहृतम् ओज्मानं परिमाणं तत्तेजश्चतुष्टयं रथभावमुपनीतं गोभिः गोविकारैः स्नायुश्लेष्मचर्मभिः परिसमन्तात् आवृतम् उपनिबद्धम् इन्द्रस्य वज्रम् इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारेत्युपक्रम्य रथस्तृतीयं चेत्यभिधाय रथेन च शरेण राजन्यबन्धव इति श्रुतिः तदभिप्रायमेतत् ईदृशं रथं हविषा यज । हे अध्वर्यो ॥ ५३ ॥

प्रजहार तदा वृत्रशरीरकाठिन्येन प्रतिहतं चतुर्धा जातम् यूपः स्फ्यः रथः शरश्चेति चतुःखण्डाः तत्र यूपस्फ्यौ विप्रैर्गृहीतौ रथशरौ नृपैरिति श्रुतिकथानुसन्धेया इन्द्रो ह यत्र वृत्राय वज्रं प्रजहारेत्युपक्रम्य रथस्तृतीयमित्यभिधाय रथेन शरेण चेति राजन्यबन्धव इति श्रुतेः (१, २, ४, १—२) ईदृशं रथं यजेत्यर्थः ॥५३॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः । सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ ५४ ॥

(१) इन्द्रस्य वज्रः । यस्त्वम् इन्द्रस्य वज्रः असि मरुतां च अनीकं मुखमसि । मित्रस्य च गर्भोऽसि । वरुणस्य च नाभिरसि । सः त्वम् इमाम् नः अस्माकम् हव्यदातिं हविषो दानम् जुषाणः सेवमानः । हे देव रथ प्रतिहव्या गृभाय प्रतिगृभाय प्रतिगृहाण हव्या हवींषि ॥ ५४ ॥

हे रथ ! हे देव ! स त्वं हव्या हवींषि प्रतिगृभाय प्रतिगृहाण । कीदृशः त्वम् इन्द्रस्य वज्रः वज्रोत्पन्नत्वात् । मरुतामनीकं मुखं मुख्यः देवानां जयप्रापकत्वात् । मित्रस्य देवस्य गर्भः गीर्यते गर्भः गृणातेर्भप्रत्ययः सूर्येण स्तूयमानः । वरुणस्य नाभिः नभ्यतेऽरिर्हन्यतेऽनेनेति नाभिः नभ हिंसायाम् इण्प्रत्ययः वरुणस्य हननसाधनम् । नोऽस्माकमिमां हव्यदातिं हविषो दानं जुषाणः सेवमानः । सेमामित्यत्र सोऽचि लोपे चेत्पादपूरणमिति (पा० ६, १. १३४) सन्धिः । गृभाय गृह्णातेर्हलः श्नः शानज्झावित्यनुवृत्तौ (पा० ३, १, ८३) छन्दसि शायजपीति (पा० ३, १८४) हौ परे श्नाप्रत्ययस्य शायजादेशः हस्य भश्च ॥ ५४ ॥

(१) अत्र वाराणसी० लिंपु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति । तद्यथा । इन्द्रस्य वज्रः हे देव हे रथ यः त्वम् इन्द्रस्य वज्रः मरुतां च अनीकं मुखं मित्रस्य गर्भः वरुणस्य नाभिरसि सः त्वं नोऽस्माकम् इमां हव्यदातिं हविषो दानं जुषाणः सेवमानः सन् हव्या हवींषि प्रतिगृभाय प्रतिगृहाण ॥ ५४ ॥

ति। समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ५७ ॥

(१) आमूः । ऐन्द्री आअज। अज गतिक्षेपणयोः। आक्षिप। अमूः शत्रुसेनाः। प्रत्यावर्तय इमाः। प्रत्यावर्तय जितं जितमिति। इमाः अस्मदीयसेनाः किञ्च॥ केतुमत् प्रज्ञातवान् दुन्दुभिः वावदीति। लोडर्थे लट्। अत्यर्थं वदतु। जयप्रकाशकम्॥ किञ्च समश्वपर्णाश्चरन्ति नो नरः। अत्रापि लोडर्थे लट्। संचरन्तु अश्वपर्णाः अश्वपतनाः नो नरः अस्मदीया मनुष्या संग्रामेण। हे इन्द्र असमाकं रथिनः जयन्तु त्वत्प्रसादादिति शेषः॥ ५१ ॥

हे इन्द्र! अमूः शत्रुसेनाः त्वमा अज समन्तात्परिक्षिप अज गतिक्षेपणयोः। यतो दुन्दुभिः केतुमत् प्रज्ञावत् यथा वावदीति अत्यन्तं वदति अत इमाः अस्मत्सेनाः प्रत्यावर्त्तय जयं प्रापय्य प्रत्यानय। किञ्च नोऽस्माकं नरः योधाः सञ्चरन्ति कीदृशा नरः अश्वपर्णाः अश्वस्येव पर्णं पतनं येषां ते। किञ्च अस्माकं रथिनः रथस्थाः जयन्तु युद्धे जयं प्राप्नुवन्तु॥ ५७॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्व-

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बई पु० नास्ति। तद्यथा। आ अमूः अर्धर्च ऐन्द्र हे इन्द्र अमूः शत्रुसेना आ अज आक्षिप अज गतिक्षेपणयोः इमाः अस्मदीयसेनाः प्रत्यावर्तय जित जितमिति किञ्च दुन्दुभिः केतुमत् प्रज्ञावत् यथा वावदीति लोडर्थे लट् अत्यर्थं वदतु किञ्च अश्वपर्णाः अश्वपतनाः नोऽस्माकं नरो मनुष्याः संचरन्ति अत्रापि लोडर्थे लट् संचरन्तु हे इन्द्र अस्माकं रथिनः संग्रामं जयन्तु त्वत्प्रसादादित्यर्थः॥ ५७॥

दे॒व ऐ॒न्द्रोऽरु॒णो मा॑रु॒तः क॒ल्माष॑ ऐ॒न्द्रा॒ग्नः सं॑ꣳहि॒तो॒ऽधोरा॑मः सावि॒त्रो वा॑रु॒णः कृ॒ष्ण एक॑शितिपात् पे॒त्वः ॥ ५८ ॥

(१) आग्नेयः कृष्णग्रीव इति श्रुतिः । अ. अध्यायपरिसमाप्तेः । द्वयोरेकादशिन्योः पशुदेवतासम्बन्धविधात्री परतो द्वादशहविषो वेष्टैर्देवताः ॥ ५८ ॥

अश्वमेधे श्रुतिरस्ति द्वे त्वेवैते एकादशिन्यावालभेनेति (१३, ५, १, ३) तयोरेकादशिन्योः पशवस्तद्देवताश्च कण्डिकाद्वयेनोच्यन्ते तेनेमानि ब्राह्मणवाक्यानि द्रव्यदेवताप्रतिपादकानि न तु मन्त्राः। कृष्णा ग्रीवा यस्य स कृष्णग्रीवः पशुराग्नेयः अग्निदेवत्यः १, मेषी सारस्वती सरस्वतीदेवताका २, बभ्रुः पिङ्गलवर्णः पशुः सौम्यः सोमदेवत्यः ३, श्यामः कृष्णवर्णः पौष्णः पूषदेवत्यः ४, शिति श्याम पृष्ठं यस्य स शितिपृष्ठः बार्हस्पत्यः बृहस्पतिदेवत्यः ५, शिल्पो विचित्रवर्णो वैश्वदेवः विश्वदेवदेवत्यः ६, अरुणः रक्तः ऐन्द्रः इन्द्रदेवत्यः ७, कल्माषः कर्बुरो मारुतः मरुद्देवत्यः ८ संहितः दृढाङ्गः ऐन्द्राग्नः इन्द्राग्निदेवत्यः ९, अधोरामः अधोदेशे श्वेतः सावित्रः सवितृदेवत्यः १०, एकः शितिः श्वेतः पादो यस्य स एकशितिपात् एकपदे श्वेतोऽन्यत्र कृष्णः पेत्वः पतनशीलो वेगवान् पशुः वारुणः वरुणदेवत्यः ११, एवमेकादश जाताः ॥ ५८ ॥

अ॒ग्नयेऽनी॑कवते॒ रोहि॑ताञ्जिरन॒ड्वानधोरा॑मौ सावि॒त्रौ पौ॒ष्णौ र॑ज॒तना॑भी वैश्वदे॒वौ पि॒शङ्गौ॑ तूप॒रौ मा॑रु॒तः क॒ल्माष॑ आ॒ग्ने॒यः कृ॒ष्णो॒ऽजः सा॑रस्व॒ती मे॒षी वा॑रु॒णः पे॒त्वः ॥ ५९ ॥

(१) स्पष्टार्थः ॥ ५९ ॥

द्वितीयैकादशिनीपशुदेवानाह । रोहितो रक्तोऽञ्जिस्तिलको य-

स्य सोऽनड्वान् पुष्पभोऽनीकवतेऽग्नये आलभ्यः अनीकं मुखं सैन्यं वा यस्य सोऽनीकवान् तस्मै १, अधोरामौ अधोभागे श्वेतौ द्वौ पशू सावित्रौ सवितृदेवतौ २, ३, रजतवर्णावाभिर्ययोस्तौ रजतनाभी द्वौ पौष्णौ पूषदेवत्यौ ४, ५, पिशङ्गौ पीतौ तूपरौ निःशृङ्गौ वैश्वदेवौ विश्वदेवत्यौ ६, ७, कल्मापः कर्बुरो मारुतः ८, कृष्णः श्यामोऽजो मेषः आग्नेयः अग्निदेवत्यः ९, मेषी सारस्वती १०, पेत्वः वेगवान् वरुणदेवत्यः ११, पशुमेकादश ॥ ५९ ॥

अग्नयें गायत्राय त्रिवृते राथंन्तरायाष्टाकंपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जार्गतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां वैराजाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र औष्णिहाय त्रयस्त्रिꣳशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकंपालः ॥ ६० ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायाम्
ऊनत्रिंशोऽध्यायः ॥ २९ ॥

---

(१) अत्र वाराणसी० लि पु० संमतोऽयं पाठक्रमः मुम्बईमु० पु० नास्ति । तद्यथा । आग्नेयः कृष्णग्रीव इत्यादिश्रुतिः आ अध्यायपरिसमाप्तेः द्वयोरेकादशिन्योः पशुदेवतासंबन्धविधायिनी परतो द्वादशाह विषयो येष्टदेवताः ॥ ५८ ॥ ५९ ॥ ६० ॥

इति मन्त्रभाष्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

अग्नये ऽष्टाकपालः पुरोडाशः कार्यः कीदृशायाग्नये गायत्राय त्रिवृते स्तुताय रथान्तराय साम्ना स्तुताय त्रैष्टुभाय त्रिष्टुभा स्तुताय पञ्चदशाय पञ्चदशस्तोमस्तुताय बार्हताय बृहत्सामस्तुताय विश्वेभ्यो देवेभ्यः द्वादशकपालः पुरोडाशः कीदृशेभ्यः जागतेभ्यः जगत्या छन्दसा स्तुतेभ्यः सप्तदशेभ्यः सप्तदशस्तोमस्तुतेभ्यः वैरूपेभ्यः वैरूपसामस्तुतेभ्यः मित्रावरुणाभ्यां पयस्या पयसि श्रितः चरुः कीदृशाभ्यामानुष्टुभाभ्याम् अनुष्टुभा स्तुताभ्याम् एकविंशाभ्यामेकविंशस्तोमस्तुताभ्याम् वैराजाभ्यां वैराजसामस्तुताभ्याम् बृहस्पतये चरुः कीदृशाय पाङ्क्ताय पङ्क्तिच्छन्दसा स्तुताय त्रिणवाय त्रिणवस्तोमस्तुताय शाकराय शाकरसामस्तुताय सवित्रे द्वादशकपालः पुरोडाशः कीदृशाय सवित्रे औष्णिहाय उष्णिक्छन्दसा स्तुताय त्रयस्त्रिंशाय त्रयस्त्रिंशस्तोमस्तुताय रैवताय रैवतसामस्तुताय एवं छन्दःस्तोमसामसहितान् षट् देवानभिधाय चतुरः केवलानाह प्राजापत्यश्चरुः प्रजापतिदेवत्यश्चरुः कार्यः विष्णुपत्न्यै अदित्यै चरुरेव वैश्वानराय वैश्वानरगुणविशिष्टायाग्नये द्वादशकपालः पुरोडाशः अनुमत्यै देवतायै अष्टाकपालः पुरोडाशः कार्यः ॥ ६० ॥

इति उव्वटकृतौ मन्त्रभाष्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

अथाग्निषोमीयस्य पशुपुरोडाशमनुदिशामावेष्टीर्निर्वपतीत्युपक्रम्य तदाहुर्दशहविषमन्त्यामिष्टिं निर्वपेदिति श्रुत्या दशहविष्कावेष्टिसंज्ञेष्टिः कथिता तस्या देवता हवींषि चाह । इमान्यपि ब्राह्मणवाक्यानि न मन्त्राः । अग्नयेऽष्टाकपालः पुरोडाशः कार्यः अष्टसु कपालेषु संस्कृतोऽष्टाकपालः तद्धितार्थोत्तरपदसमाहारे चेति (पा० २, १, ५१) समासः अष्टनः कपाले हविषीति (पा० ६, ३, ४६ वा०

२) अष्टन्शब्दस्य दीर्घः । कीदृशायाग्नये गायत्राय गायत्र्या स्तुताय त्रिवृते त्रिवृत्स्तोमेन स्तुताय राथन्तराय रथन्तरसाम्ना स्तुताय १, इन्द्राय एकादशकपालः पुरोडाशः समासः पूर्ववत् । कीदृशाय इन्द्राय त्रैष्टुभाय त्रिष्टुभा स्तुताय पञ्चदशाय पञ्चदशस्तोमस्तुताय बार्हताय बृहत्सामस्तुताय २, विश्वेभ्यो देवेभ्यः द्वादशकपालः पुरोडाशः। कीदृशेभ्यः जागतेभ्यः जगत्या छन्दसा स्तुतेभ्यः सप्तदशेभ्यः सप्तदशस्तोमस्तुतेभ्यः वैरूपेभ्यः वैरूपसामस्तुतेभ्यः ३, मित्रावरुणाभ्यां पयस्या पयसि श्रितः चरुः । कीदृशाभ्यामानुष्टुभाभ्याम् अनुष्टुभा स्तुताभ्याम् एकविंशाभ्यामेकविंशस्तोमस्तुताभ्याम् वैराजाभ्यां वैराजसामस्तुताभ्याम् ४, बृहस्पतये चरुः । कीदृशाय पाङ्क्ताय पङ्क्तिच्छन्दसा स्तुताय त्रिणवाय त्रिणवस्तोमस्तुताय शाक्कराय शाक्करसामस्तुताय ५, सवित्रे द्वादशकपालः पुरोडाशः । कीदृशाय सवित्रे औष्णिहाय उष्णिक्छन्दसा स्तुताय त्रयस्त्रिंशाय त्रयस्त्रिंशस्तोमस्तुताय रैवताय रैवतसामस्तुताय ६, एवं छन्दःस्तोमसामसहितान् षट् देवानाभिधाय चतुरः केवलानाह प्राजापत्यश्चरुः प्रजापतिदेवत्यश्चरुः कार्य्यः ७, विष्णुपत्न्यै अदित्यै चरुरेव ८, वैश्वानराय वैश्वानरगुणविशिष्टायाग्नये द्वादशकपालः पुरोडाशः ९, अनुमत्यै देवतायै अष्टाकपालः पुरोडाशः कार्य्यः १०, दशाहविषोऽवेष्टेर्देवताहवींष्यपि अश्वमेधोपयोगित्वादुक्तानि समिद्धो अञ्जन्नाश्वमेधिकोऽध्याय इति कात्यायनोक्तेः (अनुक्रमण्याम्) ॥ ६० ॥

श्रीमन्महीधरकृते वेददीपे मनोहरे ।
शिष्टाश्वमेधमन्त्रोक्तिर्गतोऽध्यायोऽङ्कदृग्मितः ॥ २९ ॥

त्रिंशोऽध्यायः ।

देव॑ सवितः॒ प्रसु॑व य॒ज्ञं प्रसु॑व य॒ज्ञप॑तिं॒ भगा॑य । दि॒व्यो ग॑न्ध॒र्वः के॑त॒पूः केतं॑ नः पुनातु वा॒चस्पति॒र्वाचं॑ नः स्वदतु ॥ १ ॥

तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ २ ॥

(१)इत उत्तरं पुरुषमेधः द्वावध्यायौ नारायणः पुरुषोऽपश्यत् देव सवितः । तिस्रः सावित्रीराहवनीये जुहोति । देव सवितः । तत्सवितुर्वरेण्यम् । विश्वानि देव सवितरिति । तत्र द्वे व्याख्याते ॥ १ ॥ २ ॥

इत उत्तरं पुरुषमेधः । द्वावध्यायौ नारायणः पुरुषोऽपश्यत् । ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्वभूतान्यतिक्रम्य स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भः । अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति । अत्र यूपैकादशिनी भवति एकादशाग्नीषोमीयाः पशवो भवन्ति तेषां च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम् ॥ आज्येन सकृद्गृहीतेन देव सवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति । तत्र देव सवितः (११, ७) तत्सवितुः (३, ३५) द्वे व्याख्याते ॥ १ ॥ २ ॥

विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑सुव । यद्भ॒द्रं तन्न॒ आसु॑व ॥ ३ ॥

विश्वानि देव सवितरिति द्वे गायत्र्यौ विश्वानि सर्वाणि

(१) अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु०

हे देव सवितः दुरितानि असत्यानि। परासुव पराञ्चि गमय। यच्च भद्रं भन्दनीयं तत् नः अस्माकम् आसुव आगमय ॥ ३ ॥

हे देव सवितः! विश्वानि सर्वाणि दुरितानि पापानि परासुव दूरे गमय। यद्भद्रं कल्याणं तन्नोऽस्मान् प्रति आसुव आगमय ॥३॥

विभक्तारᳪं हवामहे वसोश्चित्रस्य राधसः। स-
वितारं नृचक्षसम् ॥ ४ ॥

(१)विभक्तारम्। कर्मानुरूपेण विभक्तारम्। हवामहे आह्वयामः। वसोः वासयितुः चित्रस्य चायनीयस्य राधसः धनस्य आयुषश्च। सवितारम्। नृचक्षसम् नृणां द्रष्टारम्। ये नरो यथा। द्रष्टव्यास्तांस्तथा पश्यति ॥ ४ ॥

वयं सवितारं हवामहे आह्वयामः किम्भूतं वसोः वासयितुश्चित्रस्य नानाविधस्य राधसः धनस्य विभक्तारं विभज्य दातारम् नृचक्षसं नृणां द्रष्टारं यथायोग्यम् ॥ ४ ॥

ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणं पाप्मने क्लीबमाक्रयाया अयोगूं कामाय पुँश्चलूमतिक्रुष्टाय

नास्ति। तद्यथा। इत उत्तरं पुरुषमेधो द्वाचत्वारी नारायणः पुरुषोऽपश्यत् देव सवितः हे सावित्र्यौ हे देव सवितः विश्वानि सर्वाणि दुरितानि असत्यानि पराशुव पराञ्चि गमय यच्च भद्रं भन्दनीयं तत् नः अस्माकम् आसुव आगमय ॥ १ ॥ २ ॥ ३ ॥

(१)अत्र वाराणसी० लि० पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति। तद्यथा। विभक्तारं वयं सवितारं हवामहे आह्वयामः किम्भूतं वसोः वासयितुः चित्रस्य चायनीयस्य राधसः अन्नस्य आयुषश्च विभक्तारं कर्मानुरूपेण नृचक्षसं नृणां द्रष्टारं ये यथा द्रष्टव्या मनुष्यास्तांस्तथा पश्यति ॥ ४ ॥

मागधम् ॥ ५ ॥

(१)अतः परं पुरुषमेधप्रकाः पशवः आ अध्यायसमाप्तेः । ततः प्रतियूपमेकैकमेकादशिनं नियुज्य ब्राह्मणादीनष्टचत्वारिंशत् संख्यान् पुरुषान् प्रकामोद्याय सदमित्यन्तानग्निष्ठे यूपे नियुनक्ति इतरेषु यूपेष्वेकादशैकादश पुरुषान् वर्णायानुरुधामित्यादीन्नियुनक्ति ॥ ब्रह्मणे ब्राह्मणम् तत्र ब्रह्मणे जुष्टं नियुनज्मीति अग्निष्ठे ब्राह्मणं प्रथमं नियुनक्ति । एवमग्रे सर्वेषां यूपे एव बन्धनम् चतुर्थ्यन्तं देवतापदं द्वितीयान्तं पुरुषपदं बोद्धव्यम् । क्षत्राय राजन्यं क्षत्रियम् २, मरुद्भ्यो वैश्यम् ३, तपसे शूद्रम् ४, तमसे तस्करं स्तेनम् ५, नारकाय वीरहणं नष्टाग्निं शूरं वा ६, पाप्मने क्लीबं नपुंसकम् ७, आक्रयायै अयोगूमयसो गन्तारम् ८, कामाय पुंश्चलूं व्यभिचारिणीम् ९, अतिक्रुष्टाय मागधं मगधदेशजं क्षत्रियायां वैश्यपुंसो जातं वा ॥१०॥५॥

नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभꣳ हसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ॥ ६ ॥

नृत्ताय सूतं ब्राह्मण्यां क्षत्रियाज्जातः सूतः ११, गीताय शैलूषं नटम् १२, धर्माय सभाचरं सभायां चरतीति तम् १३, नरिष्ठायै भीमलं भयङ्करम् १४, नर्माय रेभं शब्दकर्त्तारं वाचाटम् १५, हसाय कारिं करणविशिष्टम् १६, आनन्दाय स्त्रीषखं स्त्रियाः सखायम् १७, प्रमदे कुमारीपुत्रं कानीनम् १८, मेधायै रथकारं माहिष्येण करिण्यां जातम् १९, धैर्याय तक्षाणं सूत्रधारम् ॥ २० ॥ ६ ॥

---

(१)अत्र वाराणसी०लि०पु० संमतोऽयं पाठक्रमः मुम्बईमु०पु० नास्ति। तद्यथा । नामानि निघण्टुनिरुक्तव्याकरणेभ्योऽवगन्तव्यानि तान् वै मध्यमेऽहन्नालभत इत्युपक्रम्याष्टाचत्वारिꣳशतं मध्यमे यूप आलभते एकादशैकादशेतरेषु अष्टा उत्तमानालभते इत्याह पुरुष-पशून् ५-२२

- इत्युव्वटकृते मन्त्रभाष्ये त्रिंशोऽध्यायः ॥ ३० ॥

तपसे कौलालं मायायै कर्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्याया इषुकारꣳ हेत्यै धनुष्कारं कर्मणे ज्याकारं दिष्टाय रज्जुसर्जं मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥ ७ ॥

तपसे कौलालं कुलालापत्यम् २१, मायायै कर्मारं लोहकारम् २२, रूपाय मणिकारं रत्नकर्त्तारम् २३, शुभे शुभाय वपं बीजवप्तारम् २४, शरव्यायै इषुकारं बाणकर्त्तारम् २५, हेत्यै धनुष्कारं चापकारिणम् २६, कर्मणे ज्याकारं प्रत्यञ्चनकर्त्तारम् २७, दिष्टाय रज्जुसर्जं रज्जोः स्रष्टारं निर्मातारम् २८, मृत्यवे मृगयुं मृगग्राहम् २९, अन्तकाय श्वनिनं शुनो नेतारम् ॥ ७ ॥

नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यताया अकितवं पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ८ ॥

नदीभ्यः पौञ्जिष्ठं पुञ्जिष्ठोऽन्त्यजः पुल्कसस्तदपत्यम् ३१, ऋक्षीकाभ्यो नैषादं निषादपुत्रम् ३२, पुरुषव्याघ्राय दुर्मदमुन्मत्तम् ३३, गन्धर्वाप्सरोभ्यो व्रात्यं सावित्रीपतितम् ३४, प्रयुग्भ्यः उन्मत्तम् ३५, सर्पदेवजनेभ्यः अप्रतिपदं प्रतिपद्यते जानातीति प्रतिपत् अतथाविधं विकलमित्यर्थः ३६, अयेभ्यः कितवं द्यूतकारम् ३७, ईर्यतायै अकितवमद्यूतकृतम् ३८, पिशाचेभ्यः विदलकारीं वंशविदारिणीं वंशपात्रकारिणीम् ३९, यातुधानेभ्यः कण्टकीकारीं कण्टकी कर्म तत्कारिणीम् ४० ॥ ८ ॥

सन्धये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराध्या एदिधिषुःपतिं निष्कृत्यै पे-

शस्कारीᳬ संज्ञानाय स्मरकारीं प्रकामोद्यायोपसदं व॑र्णायानुरुधं बलायोपदाम् ॥ ९ ॥

सन्धये जारमुपपतिम् ४१, गेहाय उपपतिं व्यभिचारिणम् ४२, आर्त्यै परिवित्तम् ऊढे कनिष्ठेऽनूढम् ४३, निर्ऋत्यै परिविविदानम् अनूढे ज्येष्ठे ऊढवन्तम् ४४, आराध्यै देव्यै एदिधिषुः पतिम् ज्येष्ठायां पुत्र्यामनूढायामूढा एदिधिषुः तत्पतिम् ४५, निष्कृत्यै पेशस्कारीं रूपकर्मीम् ४६, संज्ञानाय स्मरकारीं कामदीतिकरीम् ४७, प्रकामोद्याय तत्संज्ञाय देवाय उपसीदतीत्युपसत् समीपस्थितस्तम् ४८, एतानग्निष्ठे नियुनक्ति ॥ अथ द्वितीये यूपे । वर्णाय अनुरुधम् अनुरुध्यतेऽनुसरतीत्यनुरुत् तम् १, बलाय उपदाम् उपददातीत्युपदास्तमुपायनदातारम् ॥ ९ ॥

उत्सादेभ्यः कुब्जं प्रमुदे वामनं द्वार्भ्यः स्रामᳬ स्वप्नायान्धमधर्माय बधिरं पवित्राय भिषजं प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया अभिप्रश्निनं मर्यादायै प्रश्नविवाकम् ॥ १० ॥

उत्सादेभ्यः कुब्जं वक्राङ्गम् ३, प्रमुदे वामनं ह्रस्वाङ्गम् ४, द्वार्भ्यः स्रामं सर्वदा जलक्लिन्ननेत्रम् ५, स्वप्नाय अन्धं नेत्रहीनम् ६, अधर्माय बधिरं कर्णेन्द्रियहीनम् ७, पवित्राय भिषजं वैद्यम् ८, प्रज्ञानाय नक्षत्रदर्शं नक्षत्राणि दर्शयति तम् गणकम् ९, आशिक्षायै प्रश्निनं प्रश्नवन्तम् शकुनादिप्रष्टारमित्यर्थः १०, उपशिक्षायै अभिप्रश्निनम् अभिप्रश्नवन्तम् ११ ॥ अथ तृतीये यूपे । मर्यादायै प्रश्नविवाकं कृतान् प्रश्नान् यो विविनक्ति ब्रूते स प्रश्नविवाकस्तम् १ ॥ १० ॥

अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वी॒र्यायाविपालं तेजसेऽजपालमिरायै कीनाशं कीलालाय सुराकारं भद्राय गृहपᳬ श्रेयसे वित्तधमाध्यक्ष्या-

यानुक्षत्तारम् ॥ ११ ॥

अर्मेभ्यो हस्तिपं गजपालकम् २, जवाय अश्वपं तुरगपालकम् ३, पुष्ट्यै गोपालं धेनुपालकम् ४, वीर्य्याय अविपालम् ५, तेजसे अजपालम् ६, इरायै कीनाशं कर्षुकम् कीनाशः कर्षुके यमे७, कीलालाय सुराकारं मद्यकृतम् ८, भद्राय गृहपं गेहपालकम् ९, श्रेयसे वित्तधं वित्तं दधातीति वित्तधस्तम् धनकर्त्तारम् १०, आध्यक्ष्याय अनुक्षत्तारं सारथ्यनुसारिणम् ११ ॥ ११ ॥

भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो लोकेभ्य उपसेक्तारमवऋत्यै वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय रजयित्रीम् ॥ १२ ॥

अथ चतुर्थे यूपे! भायै दार्वाहारं काष्ठानामाहर्तारम् १, प्रभायै अग्न्येधम् अग्निमेधयतीति तमग्नेर्धकम् २, ब्रध्नस्य विष्टपाय सूर्य्यलोकाय अभिषेक्तारम् ३, वर्षिष्ठाय नाकाय उत्कृष्टस्वर्गाय परिवेषणकर्त्तारम् ४, देवलोकाय पेशितारम् पेश अवयवे पिंशतीति पेशिता तम् प्रतिमाद्यवयवकर्त्तारम् ५, मनुष्यलोकाय प्रकरितारम् कृ विक्षेपे विक्षेप्तारम् ६, सर्वेभ्यो लोकेभ्यः उपसेक्तारमुपसेचनकर्त्तारम् ७, अवऋत्यै वधाय उपमन्थितारमुपमन्थनकर्तारम् ८, मेधाय वासःपल्पूलीम् वाससां प्रक्षालनकर्त्तारम् पल्पूल प्रक्षालनच्छेदनयोः ९, प्रकामाय रजयित्रीं वस्त्राणां रङ्गकारिणीं नारीम् १० ॥ १२ ॥

ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारं बलायानुचरं भूम्ने परिष्कन्दं प्रियाय प्रियवादिनमरिष्ट्या अश्वसादꣳ स्वर्गाय लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥१३॥

स्तेनहृदयं स्तेनस्येव हृदयं यस्य तम् ॥ ११ ॥ अथ पञ्चमे यूपे । वैरहत्याय पिशुनं परवृत्तसूचकम् १, विविक्त्यै क्षत्तारं प्रतीहारम् २, औपद्रष्ट्र्याय अनुक्षत्तारं प्रतिहारसेवकम् ३, बलाय अनुचरं सेवकम् ४, भूम्ने परिष्कन्दम् परितः स्कन्दति रेतः सिञ्चति तम् ५, प्रियाय प्रियवादिनं मधुरभाषिणम् ६, अरिष्ट्यै अश्वसादम् अश्वारोहम् ७, स्वर्गाय लोकाय भागदुघम् भागं दुग्धे भागदुघस्तम् विभागप्रदम् ८, वर्षिष्ठाय नाकाय परिवेष्टारम् ९ ॥ १३ ॥

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारꣳ शोकायाभिसर्त्तारं क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनं वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीं निर्ऋत्यै कोशकारीं यमायासूम् ॥ १४ ॥

मन्यवे अयस्तापमयस्तपं लोहतापकम १०, क्रोधाय निसरं नितरां सर्त्तारम् ११ ॥ अथ षष्ठे यूपे । योगाय योक्तारं योगकर्त्तारम् १, शोकाय अभिसर्त्तारं संमुखमागच्छन्तम् २, क्षेमाय विमोक्तारं विमोचनकरम् ३, उत्कूलनिकूलेभ्यः त्रिष्ठिनम् त्रिषु तिष्ठतीति त्रिष्ठी तम् विद्यादिषु स्थितं शीलवन्तमित्यर्थः ४, वपुषे मानस्कृतं पूजाया अभिमानस्य वा कर्त्तारम् सक् छान्दसः ५, शीलाय आञ्जनीकारीम् अञ्जनविद्याकर्त्रीम् ६, निर्ऋत्यै कोशकारीं खड्गाद्यावरणं कोशस्तत्कारिणीं स्त्रियम् ७, यमाय असूम् न सूते सा असूः ताम् वन्ध्याम् ८ ॥ १४ ॥

यमाय यमसूमथर्वभ्योऽवतोकाꣳ संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीं वत्सराय विजर्जराꣳ संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्धꣳ साध्येभ्यश्चर्मम्नम् ॥ १५ ॥

यमाय यमसूं युग्मप्रसवित्रीम् ९, अथर्वभ्योऽवतोकां निरपत्या-

म् १०, संवत्सराय पर्य्यायिणीम् पर्य्यायोऽनुक्रमस्तद्वतीमनुक्रमवतीम् ११ अथ सप्तमे यूपे । परिवत्सराय अविजाताम् अप्रसूताम् १, इदावत्सराय अतीत्वरीमत्यन्तं कुलटाम् पुंश्चली कुलटेत्वरी २, इद्वत्सराय अतिष्कद्वरीम् अतिस्कन्दति स्रवति इत्यतिस्कद्वरी स्कन्देर्घ्वन्तात् ङीब्रेफौ ३, वत्सराय विजर्जरां शिथिलशरीराम् ४, संवत्सराय पलिक्नीं श्वेतकेशाम् ५, ऋभुभ्यः अजिनसन्धं चर्मसन्धातारम् ६, साध्येभ्यः चर्मम्नं चर्माभ्यासकरम् ७ ॥ १५ ॥

सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो वैन्दं नड्वलाभ्यः शौष्कलं पाराय मार्गारमवाराय कैवर्त्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्णकं गुहाभ्यः किरातꣳ सानुभ्यो जम्भकं पर्वतेभ्यः किम्पूरुषम् ॥ १६ ॥

सरोभ्यो धैवरं कैवर्त्तापत्यम् ८, उपस्थावराभ्यः दाशम् दाशृ दाने दातारम् दाशो धीवरो वा ९, वैशन्ताभ्यो वैन्दं विन्दो निषादापत्यम् १०, नड्वलाभ्यः शौष्कलं मत्स्यजीविनम् शुष्कला मत्स्यास्तैर्जीवति तम् ११ ॥ अथाष्टमे यूपे । पाराय मार्गारम् मृगादेरपत्यं मार्गारस्तम् १, अवाराय कैवर्तम् २, तीर्थेभ्यः आन्दम् अदि बन्धने अन्दति आन्दस्तं बन्धनकर्त्तारम् ३. विषमेभ्यो मैनालम् अल् वारणे मीनानलति वारयति जालैरसौ मीनालस्तदपत्यम ४, स्वनेभ्यः पर्णकं भिल्लम् ५, गुहाभ्यः किरातम ६, सानुभ्यः जम्भकं जभि नाशने जम्भयतीति तम् हिंसकम् ७, पर्वतेभ्यः किम्पूरुषं कुत्सितनरम् ८ ॥ १६ ॥

बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोषाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्ध्या अपगल्भꣳ सꣳशराय प्रच्छिदम् ॥ १७ ॥

बीभत्सायै पौल्कसं पुल्कसापत्यम् ९, वर्णाय हिरण्यकारं स्वर्णनिष्पादकम् १०, तुलायै वाणिजं वणिगपत्यम् ११ ॥ अथ नवमे यूपे । पश्चादोषाय ग्लाविनं ग्लै हर्षक्षये अहृष्टम् १, विश्वेभ्यो भूतेभ्यः सिध्मलं सिध्माख्यरोगवन्तम् २, भूत्यै जागरणं जागरूकम् ३, अभूत्यै स्वपनं शयालुम् ४, आर्त्यै जनवादिनं जनान् वदति तम् ५, व्यृद्ध्यै अपगल्भम् ६, संशराय प्रच्छिदं प्रच्छेदनकर्त्तारम् ७ ॥ १७ ॥

अक्षराजाय कितवं कृताय़ादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातं क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥ १८ ॥

अक्षराजाय कितवं धूर्त्तम् ८, कृताय आदिनवदर्शम् आदिनवो दोषस्तं पश्यति तथाभूतम् ९, त्रेतायै कल्पिनं कल्पकम् १०, द्वापराय अधिकल्पिनम् अधिकल्पनाकर्त्तारम् ११ ॥ अथ दशमे यूपे । आस्कन्दाय सभास्थाणुं सभायां स्थिरम् १, मृत्यवे गोव्यच्छं गाः प्रति गमनशीलम् २, अन्तकाय गोघातं गवां हन्तारम् ३, क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति यः पुमान् गां विकृन्तन्तं छिन्दन्तं भिक्षमाणो याचमानः उपतिष्ठते तं याचितारं क्षुधे दैव्यै आलभेत ४, दुष्कृताय चरकाचार्य्यं चरकाणां गुरुम् ५, पाप्मने सैलगं सीलगो दुष्टस्तदपत्यम् ६ ॥ १८ ॥

प्रतिश्रुत्काया अर्त्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्यतोऽरण्याय दावपम् ॥ १९ ॥

प्रतिश्रुत्कायै अर्त्तनं दुःखिनम् ७, घोषाय भषं जल्पकम् ८, अ-

न्ताय बहुवादिनम् ९, अनन्ताय मूकं वाग्विकलम् १०, शब्दाय आडम्बराघातम् आडम्बरमाहन्ति तम् कोलाहलकर्त्तारम् ११ ॥ अथैकादशे यूपे। महसे वीणावादं वीणावादनकर्त्तारम् १, क्रोशाय तूणवध्मम् तूणवं वाद्यविशेषं धमति तथाभूतम् २, अवरस्पराय शङ्खध्मं शङ्खवादकम् ३, वनाय वनपं वनपालकम् ४, अन्यतोऽरण्याय दावपं वनवह्निपम् ५ ॥ १९ ॥

नर्माय पुँश्चलूँ हसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥ २० ॥

नर्माय पुंश्चलूं दुष्टां नारीम् ६, हसाय कारिं करणशीलम् ७, यादसे शाबल्याम् शबलः कर्बूरवर्णः तदपत्यभूतां स्त्रियम् ८, ग्रामण्यं ग्रामनेतारम् ९, गणकं ज्योतिर्विदम् १० अभिक्रोशकं निन्दकम् ११, तान् त्रीन्महसे जुष्टं नियुनज्मीति एकादशे यूपे आलभते ॥ एवं प्रतियूपमेकादशस्वेकादशसु नियुक्तेषु येऽधिका अवशिष्टास्तान् समाप्तिपर्यन्तान् द्वितीयोच्छ्रिते यूपे नियुनक्ति तांश्च वीणावादं पाणिघ्नमित्यादीन् रात्र्यै कृष्णं पिङ्गाक्षमित्यन्तांश्चतुर्दश ततोऽथैतानष्टौ विरूपानित्यष्टौ च मागधादींश्चतुरः एवं षड्विंशतिं द्वितीये यूपे पूर्वोक्ता एकादश एवं सप्तत्रिंशत्। तानेवाह। वीणावादम् पाणिघ्नं हस्ततालवादकम् तूणवध्मम् तान् त्रीन् नृत्ताय आलभते ३, आनन्दाय तलवम् वा गतिगन्धनयोः गन्धनं हिंसा तलं हस्तादितलं याति वाद्यमुखं हन्ति स तलवस्तम् वाद्यवादकम् ४ ॥ २० ॥

अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वँशनर्त्तिनं दिवे खलतिँ सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमह्ने शुक्लं पिङ्गाक्षँ रात्र्यै कृष्णं पिङ्गाक्षम् ॥ २१ ॥

अग्नये पीवानं स्थूलम् ५, पृथिव्यै पीठसर्पिणं पीठनासनेन स-

पंति गच्छति पीठसर्पी तं पङ्गुम् ६, धायवे चाण्डालं चण्डालकर्माणम् ७, अन्तरिक्षाय वंशनर्त्तिनम् वंशेन नर्त्तनशीलम् ८, दिवे खलतिमलोमशिरस्कं खल्वाटमित्यर्थः सूर्याय हर्यक्षं हरितनेत्रम १०, नक्षत्रेभ्यः किर्मिरं कर्बुरवर्णम् ११, चन्द्रमसे किलासं सिध्मरोगवन्तम् १२, अह्ने शुक्लवर्णं पिङ्गाक्षम् १३, रात्र्यै कृष्णवर्णं पिङ्गाक्षम् ॥ १४ ॥ २१ ॥

अथैतानष्टौ विरूपानालभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुक्लं चातिकृष्णं चातिकुल्वं चातिलोमशं च । अशूद्रा अब्राह्मणास्ते प्राजापत्याः । मागधः पुंश्चली कितवः क्लीबोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां त्रिंशोऽध्यायः ॥ ३० ॥

तत एतान् वक्ष्यमाणानष्टौ विरूपान् परस्परं विरुद्धरूपान् पशूनालभते । तानाह । अतिदीर्घम् अतिह्रस्वम् अतिस्थूलम् अतिकृशम् अतिशुक्लम् अतिकृष्णम् अतिकुल्वं रोमरहितम् अतिलोमशं सर्वाङ्गव्यापिरोमाणम् । ते अष्टौ अशूद्राः अब्राह्मणाः शूद्रब्राह्मणव्यतिरिक्ताः पशवो भवन्ति । तेऽष्टावपि प्राजापत्याः प्रजापतिदेवताः अष्टा उत्तमानालभत इत्युपक्रम्य ते वै प्राजापत्या भवन्तीति (१३, ६, २, ७—८) श्रुतेः। अत्र जातिनियमात् पूर्वेषु जातेरनियमः। वीणावादादयश्चतुर्दश अतिदीर्घादयोऽष्टौ एवं द्वाविंशतिः शेषाः । तथा मागधः पुंश्चली कितवः क्लीबः एते चत्वारोऽपि शूद्रब्राह्मणव्यतिरिक्ताः प्रजापतिदेवताः पूर्वैः सहैते षड्विंशतिः ते सर्वे द्वितीययूपे नियोज्याः ॥ सर्वेषां नियोगानन्तरं तान्नियुक्तान् पुरुषान् सहस्रशीर्षा पुरुष इति (३१, १–१६) षोडशर्चेनानुवाकेन दक्षिणत उपविष्टो होतृवदभि-

द्यौति । होतृवदिति प्रथमोत्तमयोस्त्रिर्वचनम् ऋगन्तानां प्रणवेन सन्धानं च। यथा सहस्रशीर्षा पुरुषः—०ङ्कुलो३म् पुरुष एवेदᳫं रोहतो३म् । एवमभिष्टौति । तत आलम्भनक्रमेण यथादेवतं प्रोक्षणादि । ब्राह्मणादीनां पर्य्यग्निकरणानन्तरमिदं ब्रह्मणे इदं क्षत्रायेत्येवं सर्वेषां यथास्वस्वदेवतोद्देशेन त्यागः । ततः सर्वान् ब्राह्मणादीन् यूपेभ्यो विमुच्योत्सृजति । तत एकादशिनैः पशुभिः संज्ञपनादिप्रधानयागान्तं वनस्पतियागं कृत्वा प्राक् स्विष्टकृतः अध्वर्युराज्यं संस्कृत्य सकृद्गृहीतमाज्यं गृहीत्वा ओम् पुरुषदेवताभ्यो ब्रह्मादिभ्यः आहवनीये जुहोति ओम् ब्रह्मणे स्वाहा १, क्षत्राय स्वाहा २, मरुद्भ्यः ३, तपसे ४, तमसे ५, इत्याद्यध्यायान्तं सर्वदेवताभ्यः चतुरशीत्युत्तरशतसंख्याकाभ्यः तावतीर्घृताहुतीर्हुत्वा स्विष्टकृदादि उदवसानीयान्तं कर्म कृत्वान्ते यजमानः अयं ते योनिरिति मन्त्रेणात्मन्यग्नीन् समारोप्याद्भ्यः सम्भृत इति (३१, १७) षड्चेनानुवाकेन सूर्य्यमुपस्थाय पश्चादनवलोकयन्नरण्यं गत्वा संन्यसेत् गार्हपत्येऽधरारणिमनुप्रहृत्याहवनीय उत्तरारणिमात्मन्नग्नी समारोप्यारण्यं व्रजेदिति शङ्खायनोक्तेः । यदि पुरुषमेधानन्तरं ग्रामवासेच्छा तर्ह्युदसानीयान्ते सायमाहुती हुत्वारण्योरग्नी समारोप्योत्तरनारायणेनार्कमुपस्थाय देवयजनमादीप्य गृहं व्रजेत् गृहे आगत्य निर्मथ्याग्निं स्थापयेत् यथेच्छं यज्ञानपि कुर्य्यात् । अयमपि पक्षोऽस्ति । तत् पुरुषमेधानन्तरं सन्न्यास एव ॥ २२ ॥

श्रीमन्महीधरकृते वेददीपे मनोरमे।
त्रिंशेऽध्याये प्रकथिताः पशवो नरमेधिके ॥ ३० ॥

अथैकविंशोऽध्यायः ॥ २१ ॥

ओं नमः श्रीगणेशाम्बिकाभ्याम् ।

इमं मे।प्रथमेनानुवाकेनैष्टिकं हौत्रं प्रथमे वारुण्यौ गायत्रीत्रिष्टुभौ। वारुणस्य हविषो याज्यानुवाक्ये । हे वरुण त्वं मे मम इमं हवमाह्वानं श्रुधि शृणु च अपरम् अद्य मृडय सुखय । कालविलम्बं मा कृथाः। यतः। अहम् अवस्युः आत्मनो ऽवनं पालनमिच्छन् त्वाम्। आचके आचक इति कान्तिकर्मा कामये ॥ १ ॥

तत्त्वा यामि। व्याख्यातम् ॥ २ ॥

त्वं नः । अग्निवारुण्यौ अग्नीवरुणयोः स्विष्टकृतोर्याज्यानुवाक्ये त्रिष्टुभौ। हे अग्ने त्वं नोऽस्मान् प्रति वरुणस्य देवस्य हेडः क्रोधं अवयासिसीष्ठाः। यसु उपक्षये। अस्य अवपूर्वस्य ण्यन्तस्य लिङि रूपम् अवगमय। कीदृशस्त्वं विद्वान् यजिष्ठः यष्टृतमः वह्नितमः वोढृतमो हविषां शोशुचानः देदीप्यमानः । किञ्च अस्मत् अस्मत्तः विश्वा विश्वानि द्वेषांसि दौर्भाग्यानि प्रमुमुग्धि मुञ्च ॥ ३ ॥

स त्वं नः । हे अग्ने स त्वम् ऊती ऊत्या अवनेन नोऽस्माकम् अवमः अवितृतमः पालयितृतमो भव अस्या उषसः व्युष्टौ व्युष्टिकाले अस्मिन्नेवाह्नीति भावः। नेदिष्ठः अन्तिकतमश्च भव। रराणः रममाणः। रा दाने हविर्ददद्वा नोऽस्माकं वरुणम्।अवयक्ष्व अवगत्य यज। अवपूर्वो यजिर्नाशनार्थः । इह तु धात्वन्तरयोगात् स्वार्थमेव वक्ति ततः मृडीकं सुखकरं हविः वीहि भक्षय नोऽस्माकं सुहवः स्वाह्वानः एधि भव ॥ ४ ॥

महीमू षु। आदित्यस्य चरोर्याज्यानुवाक्ये त्रिष्टुभौ । वयम् अवसे अवनाय तर्पणाय वा अदितिं हुवेम आह्वयाम। कीदृशी मही महतीम्। ऊषु पादपूरणौ । सुव्रतानां साधुव्रतानां मातरं निर्मात्रीम् ऋतस्य यज्ञस्य पत्नीं जायां पालयित्रीं वा। तुविक्षत्रां बहुक्षत्त्राणाम्। अजरन्तीं जरारहिताम् उरूचीं बहुव्यञ्जनां सुशर्माणं कल्याणाश्रयां सुप्रणीतिं सुप्रणेत्रीम् ॥ ५ ॥

सुत्रामाणम्। दैवीं यज्ञमयीं नावं स्वस्तये वयम् आरुहेम । किम्भूतां पृथिवीं सुत्रामाणम्। लुप्तोपमानमेतत्। पृथिवीमिव सा-

धुपालयित्रीं द्यामनेहसम् । द्यामिव वाहयित्रीं जीवनहेतुभूतां च सुशर्माणम् । अदितिम् अदीनां सुप्रणीतिं साधु प्रणेत्रीं स्वरित्रां साधुकेन्दुवालाम् । अरित्रशब्दः केन्दुवालवचनः । अनागसम नपराधाम् । अस्रवन्तीम् । उदकैरपूर्यमाणाम् । अनवच्छिन्नकर्मदायिनीमित्यर्थः ॥ ६ ॥

सुनावम् । गायत्री तद्वै सर्व एव यज्ञो नौः स्वर्ग्येति श्रुतेरुपकल्पना । कल्याणीं नावं स्वस्तये आरुहेयम् अस्रवन्तीम् । अनागसं सर्वेष्टदामित्यर्थः । शतारित्रां ऋग्यजुःसामाभिप्रायम् ॥ ७ ॥

आ नः । मैत्रावरुण्याः पयस्याया याज्यानुवाक्ये गायत्रीत्रिष्टुभौ । हे मित्रावरुणौ घृतैः अक्षारोदकैः नोऽस्माकं गव्यूतिं गवि पृथिव्याम् ऊतिमवनहेतुभूतं क्षेत्रं गोप्रचारम् । आ उक्षतं आसिञ्चतं किं च हे सुक्रतू सुकर्म्माणौ मध्वा मधुस्वादोदकेन रजांसि लोकान् आ उक्षतम ॥ ८ ॥

प्र बाहवा । हे मित्रावरुणौ हे युवानौ नोऽस्माकं जीवसे चिरजीवनाय बाहवा बाहू प्रसिसृतम् । अन्तर्भाविणयर्थः । प्रसारयतं बाहुप्रसारणं जीवनप्रतिपक्षनिराकरणायेत्यर्थः । ततः नोऽस्माकं गव्यूतिं क्षेत्रं घृतेन जलेन आ उक्षतं भवत्सिक्तक्षेत्रनिष्पन्नधान्यैर्यज्विनं मा मां जने जनपदे आ श्रवयतं प्रकथयतम् । इत्थमदात् इत्थमयाक्षीदिति । मे मम इमा हवा इमानि आह्वानानि श्रुतं शृणुतं श्रुत्वा च पूर्वोक्तं कुरुतमित्यर्थः ॥ ९ ॥

शं नः । वाजे वाजेऽवत वाजिनस्य । याज्यानुवाक्ये व्याख्याते ॥ १० ॥ ११ ॥

समिद्धो अग्निः । एकादश प्रयाजयाज्याः । अनराशंसाः इन्द्राय वयोधसे अनुष्टुभः समिधा प्रयाजदेवतया समिद्धः दीप्तः सुशमिद्धश्च प्रयाजघृतेन वरेण्यः वरणीयः सम्भजनीयः अग्निः गायत्री छन्दः त्र्यविः त्र्योऽवयोऽनुचरत्वेन यस्य स त्र्यविर्गौः । एते त्रयः इन्द्रे इन्द्रियं वीर्यं वयः सत्त्वमन्नं वा आयुर्वा दधुः निदधुः प्रयच्छन्तु ॥ १२ ॥

तनूनपात् शुचिव्रतः उज्ज्वलकर्मा तनूनाम् । अपान्नपात् नप्ता अग्निः गौर्वा तनुः तस्या नप्ता घृतं तनूपाः सरस्वती च उष्णिहा विभक्तिव्यत्ययः उष्णिक् छन्दः । दित्यं हविर्वहतीति दित्यवाड् गौः ।

एते चत्वारः इन्द्रियं वयश्च इन्द्रे दधुः ॥ १३ ॥

इडाभिः । इडाभिः प्रयाजदेवतया सह ईड्यः स्तोतव्यः अग्निः अमर्त्यः अमरणधर्मा सोमो देवश्च अनुष्टुप्छन्दः पञ्च अवयो यस्य स पञ्चाविर्गौः एते इन्द्रियं वयश्च इन्द्रे दधुः ॥ १४ ॥

सुबर्हिः शोभनं बर्हिः प्रयाजदेवतास्तीर्णं बर्हिर्यस्य स स्तीर्णबर्हिः अमर्त्यः पूषण्वान् पूष्णा युक्तः अग्निः बृहती छन्दः त्रयो वत्सा अनुचरा यस्य स त्रिवत्सो गौः एते इन्द्रियं वयश्च इन्द्रे दधुः ॥१५॥

दुरो देवीः । द्वारो देव्यः छान्दसं सम्प्रसारणं प्रयाजदेवताः महीः महत्यः दिशश्च ब्रह्मा देवः बृहस्पतिश्च पाङ्क्तिच्छन्दः । तुर्यवाड् गौः एते इह यज्ञावयवे इन्द्रशरीरावयवे वा इन्द्रियं वयश्च दधुः ॥१६

उषे यह्वी । उषे इति द्विवचनसामर्थ्यात्सहचरितत्वाच्च द्वितीया रात्रिर्गृह्यते । उषाः रात्रिश्च कीदृश्यौ यह्वी महत्यौ सुपेशसा साधुरूपे अमर्त्यौः विश्वेदेवाश्च त्रिष्टुप् छन्दः । पष्ठं भारं वहतीति पष्ठवाट् गौः एते इह इन्द्रयज्ञयोः इन्द्रियं वयश्च दधुः ॥ १७ ॥

दैव्या होतारा । दैव्यौ होतारौ अयं चाग्निरसौ च मध्यमः । कीदृशौ भिषजौ इन्द्रेण सयुजौ संयुक्तौ समानकार्यौ युजौ परस्परेणचावियुक्तौ जगतीच्छन्दः । अनः शकटं वहतीति अनड्वान् गौः । एते इन्द्रे इन्द्रियं वयश्च दधुः ॥ १८ ॥

तिस्र इडा । इडा सरस्वती भारतीति तिस्रो देव्यः मरुतः विशः इन्द्रस्य प्रजाः विराट् छन्दः । धेनुर्दोग्ध्री गौः नकारश्चार्थे एते इह इन्द्रे इन्द्रियं वयश्च दधुः ॥ १९ ॥

त्वष्टा तुरीयः अद्भुतः । अद्भुतो महान् तुरीयः तूर्णमापन्नः त्वष्टा पुष्टिवर्द्धनौ इन्द्राग्नी च द्विपदा छन्दः उक्षा सेक्ता गौश्च नश्चार्थे एते इन्द्रे इन्द्रियं वयश्च दधुः ॥ २० ॥

शमिता नः । शमयितेति प्राप्ते शमिता मन्त्रे इति छान्दसः प्रयोगः । नोऽस्माकं शमिता वनस्पतिः भगं धनं प्रसुवन् सविता च ककुप् छन्दः वशा वन्ध्या गौः वेहद् वेहति त्यजति गर्भं सा वेहद् गौः इह इन्द्रे इन्द्रियं वयश्च दधुः ॥ २१ ॥

स्वाहा यज्ञम् । सुक्षत्रो वरुणः स्वाहा स्वाहाकृतिभिः यज्ञं भेषजं करत् करोतु अतिछन्दाः छन्दः बृहत् ऋषभश्च गौः इन्द्रे इन्द्रियं वयश्च दधुः ॥ २२ ॥

वसन्तेन। वपापुरोडाशपशूनां याज्यानुवाक्या अनुष्टुभः। वायोधसस्य यशोः। इन्द्रश्च वयोधा देवता। वसन्तेन ऋतुना सहिता वसवो देवाः त्रिवृता स्तोमेन स्तुताः सन्तः रथन्तरेण च पृष्ठेन सहायेन। इन्द्रे तेजसा सह हविर्वपाख्यं वयश्च दधुः। यद्वा वसन्तेन ऋतुना स्तुताः त्रिवृता स्तोमेन च स्तुताः रथन्तरेण पृष्ठेन च स्तुताः सन्तो वसवो देवाः स्वकीयेन तेजसा इन्द्रे हविर्वयश्च दधुः एवमुत्तरेष्वपि योज्यम्॥ २३॥

ग्रीष्मेण। ग्रीष्मेण ऋतुना सह रुद्राः देवाः पञ्चदशेन स्तोमेन स्तुताः सन्तः। पञ्चदशेनेति विभक्तिव्यत्ययः। बृहती पृष्ठेन सह इन्द्रे यशसा सह बलं हविर्वयश्च दधुः॥ २४॥

वर्षाभिः। ऋतुना सह आदित्या देवाः सप्तदशेन स्तोमेन स्तुताः सन्तः। द्वौ विभक्तिव्यत्ययौ वैरूपेण पृष्ठेन सह इन्द्रे विशा ओजसा च सहितं हविर्वयश्च दधुः॥ २५॥

शारदेन ऋतुना सह ऋभवो देवाः एकविंशेन स्तोमेन स्तुताः सन्तः विभक्तिव्यत्ययः। वैराजेन पृष्ठेन श्रिया च सह इन्द्रे श्रियं हविर्वयश्च दधुः॥ २६॥

हेमन्तेन ऋतुना सह मरुतो देवाः त्रिणवेन स्तोमेन स्तुताः सन्तः। शक्वरीरिति योनिनिर्देशः। शाक्वरस्य विभक्तिव्यत्ययः। शाक्वरेण पृष्ठेन सह इन्द्रे बलेन सह सहः हविः वयश्च दधुः॥ २७॥

शैशिरेण ऋतुना सह अमृता देवाः त्रयस्त्रिंशेन स्तोमेन स्तुताः सन्तः रेवतीरिति रैवतस्य योनिनिर्देशः। रैवतेन पृष्ठेन सह इन्द्रे सत्येन सह क्षत्रं हविः वयश्च दधुः॥ २८॥

होता यक्षत्। द्वादशाप्रियस्तनूनपान्नाराशंसयुक्ताः। त्रैष्टुभम्श्विसरस्वतीन्द्रदैवत्यं दैव्यो होता समिधा प्रयाजदेवतया सह इडस्पदे इडा गौः तस्याः पदे आहवनीयः स्थाप्यते तदभिप्रायं गोः पदेऽवस्थितम् आहवनीयमग्निं तथा अश्विनौ इन्द्रं सरस्वतीं च यक्षत् यजतु अजो धूम्रो न। नकारः समुच्चयार्थः। प्रायः अजो धूम्रो मेषश्च गोधूमैः कुवलैश्च सहितः भेषजमत्र संपद्यते शष्पैः अङ्कुरितव्रीहिभिः सहितो रजः मधु च संपद्यते तेज इन्द्रियं च इन्द्रस्य यजमानस्य वा संपद्यते अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा इज्यमानाः सन्तः पयः सोमः। सोमामिति विभक्तिव्यत्ययः। परिस्रुता सह

घृतं मधु च व्यन्तु पिबन्तु हे मनुष्यहोतः त्वमपि आज्यस्य यज आज्यं देहि तेन वा यज ॥ २९ ॥

होतायक्षत्तनूनपात् । तनूनपातमिति विभक्तिव्यत्ययः । अश्विनेन्द्रायेति व्यवहितं यत्पठ्यते तदिह कृतविभक्तिव्यत्ययं योज्यतेऽर्थसंबन्धात् । होता तनूनपातं प्रयाजदेवतां सरस्वतीम् अश्विनौ इन्द्रं च यजतु । अविर्मेषश्च । नभार्थो मधुमता रसवता यथा यज्ञमार्गेण भरन् आत्मानं हरन् भेषजम् इन्द्राय यजमानाय वा करोति यदरैः उपवाकाभिः इन्द्रयवैः तोक्मभिः अङ्कुरितयवैः वीर्यं भेषजं करोति मेष एव इन्द्राय यजमानाय वा अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा इज्यमानाः पयःप्रभृतीनि व्यन्तु । हे मनुष्यहोतः त्वमपि आज्यस्य यज ॥ ३० ॥

होता यक्षन्नराशंसं न । होता नराशंसं च यजतु । कीदृशं पतिम् अधिपतिं जगतः । यशो हि नराशंसः स आहुतिपरिणामद्वारेण जगद्विभर्ति सुरया सहितं नग्नहुं किण्वं च होता यजतु मेषः इन्द्रस्य भेषजं करोत्विति शेषः । सरस्वती इन्द्रस्य भेषजं करोत्विति शेषः । सरस्वती इन्द्रस्य भिषक् भवतु अश्विनोः रथो न रथश्च इन्द्रस्य भिषक् भवतु । किंभूतो रथः चन्द्रो चन्द्रं सुवर्णमस्यास्तीति सुवर्णखचितः । ननु अश्विनो रथस्य कथं भिषक्त्वं शृणु ।

आयुधं वाहनं वापि श्रुतौ यस्येह दृश्यते ॥

तमेव तद्स्तुतं विद्यात्तस्यात्मा बहुधा हि सः ।

इति वपा इन्द्रस्य वीर्यं कुर्वन्त्विति शेषः । वपा इति बहुवचनोपदेशात्त्रिपशुविषयः बदरैः उपवाकाभिः तोक्मभिः इन्द्रस्य भेषजं भवत्विति शेषः । अश्विसरस्वतीन्द्राः पयआदीनि व्यन्तु । हे होतराज्यस्य यज ॥ ३१ ॥

होता यक्षदिडेडितः । होता यजतु । इडा प्रयाजदेवतया ईडितः स्तुतः सन् । किं कुर्वन् आजुह्वानः सरस्वतीम् । सरस्वतीमाह्वयन् । अश्विनेन्द्रायेत्युपरिष्टात्प्रैषस्य पठ्यते तदेतद् पदद्वयमिह कृतविभक्तिव्यत्ययं सम्बध्यते । उक्तं च ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य तद् ।

अर्थतो ह्यसमानानामानन्तर्यस्य कारणमिति ॥

अश्विनौ इन्द्रं च । किञ्च इन्द्रं बलेन वर्द्धयन् ऋषभेण गवा च

इन्द्रियमिन्द्रस्य वर्द्धयन् मधु मासरं च उपादायेति शेषः । यवैः कर्कन्धुभिर्लाजैश्च भेषजमिन्द्रस्य वर्द्धयन् अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयः प्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतराज्यस्य यज ॥ ३२ ॥

होता यक्षद् । बर्हिरूर्णम्म्रदाः होता यजतु प्रकृता देवताः । बर्हिश्च प्रयाजदेवता ऊर्णम्म्रदाः ऊर्णा म्रद इति प्राप्ते ऊर्ण म्रदा इति छान्दसो लिङ्गविपर्ययः । ऊर्णेव मृदुर्भिषग्भवतु इन्द्राय । भिषग्वैद्य उक्तः । नासत्या भिषजाश्विना । नासत्या नासिकाप्रभवावश्विनौ भिषजौ भवतामिन्द्रस्य । अश्वा वडवा शिशुमती धेनुश्च भिषगिन्द्रस्य भवतु । इत्थम्भूता हि सा दक्षिणापद्यते । कस्मात्पुनरेवमाशास्यते इत्यत आह यतः सरस्वती भिषक् स्वयमेव दुहे दोग्धि इन्द्राय भेषजम् । अतो यूयमपि भिषजौ भवथेति । अश्विसरस्वतीन्द्राश्च दैव्येन होत्रेज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हे मनुष्यहोतराज्यस्य यज ॥ ३३ ॥

होता यक्षद् दुरो दिशः । अत्र नकाराश्चार्थाः । होता दुरः द्वारः यजतु । छान्दसं संप्रसारणम् । किम्भूताः द्वारः दिशः कवष्यः । लुप्तोपमानमेतत् दिश इव सशुषिराः व्यचस्वतीश्च व्यञ्जनवत्यो गमनवत्यः अश्विभ्यां च या यज्ञगृहद्वारः अधिष्ठिता दिश इव बभूवुः । इन्द्रश्च या अधिष्ठाय रोदसी द्यावापृथिव्यौ दुघे । हकारस्य धकारः दुग्धवान् सरस्वती धेनुर्भूत्वा । अश्विनौ च या द्वारः अधिष्ठाय इन्द्राय भेषजं शुक्रं शुक्लं ज्योतिः इन्द्रियं च दुहे अश्वादयः पयआदीनि व्यन्तु हे होतस्त्वमपि यज ॥ ३४ ॥

होता यक्षत्सुपेशसा । होता सुपेशसा सुरूपे उपे यजतु । उपे इति द्विवचननिर्देशात् रात्रिश्चोषाश्च गृह्येते । यौ अश्विनौ सरस्वत्या सहितौ नक्तं रात्रौ दिवा अहनि च इन्द्रे त्विषिं दीप्तिं भेषजं च समञ्जाते संश्लेषयतः तौ च होता यजतु । यश्च श्येनः पत्ररूपः रजसा ज्योतिषा । रजःशब्दो ज्योतिर्वचनः । हृदा हृदयेन श्रिया च सह मासरमुपादाय इन्द्रे समनक्ति तं च होता यजतु । नकाराश्चार्थाः । दैव्येन होत्रेज्यमाना अश्वादयः पयआदीनि व्यन्तु होतर्यज ॥ ३५ ॥

होता यक्षद्दैव्या । दैव्यौ होतारौ अयं चाग्निरसौ च मध्यमः अ-

श्विनौ भिषजौ इन्द्रं च होता यजतु जागृवि स्वकार्यसिद्धावप्रमत्ता जागरणशीला । विभक्तिलोपश्छान्दसः । जागरणशीलावश्विनौ । अपरं जागृवि सरस्वती भिषक् दिवा नक्तं च भेषजैरोषधैः शूषं बलम् इन्द्रियं च सीसेन दुहे दोग्धि इन्द्रार्थं तां च दैव्यो होता यजतु अश्व्यादयः पयआदीनि व्यन्तु होतर्यज ॥ ३६ ॥

होता यक्षत्तिस्रो देवीः । नकारश्चकारार्थः । होता तिस्रो देवीर्यक्ष्यमाणा यजतु याः इन्द्रे भेषजं कुर्वन्ति त्रयः पशवः त्रिधातवः आश्विनो धूम्रः सारस्वतो मेषः ऐन्द्रः ऋषभः इति त्रयः पशवः प्रधानाङ्गोपयङ्गभिः त्रिधातुः पशुः । अपसः अपश्विनः इति प्राप्ते छान्दसो विनो लोपः । अपः कर्म कर्मवन्तः अग्नयो वा त्रयस्त्रिधातवः रूपं हिरण्ययं हिरण्मयम् । इन्द्रे कुर्वन्ति तांश्च पशून् होता यजतु ये च अश्विनौ इडा भारती इन्द्रे हिरण्मयं रूपं कुर्वन्ति तांश्च यजतु । या सरस्वती वाचा प्रशीलक्षणया इन्द्राय महः महत्त्वं पूजाम् । इन्द्रियं च दुहे दोग्धि तां च होता यजतु । एवं दैव्येन होत्रा इज्यमाना अश्विसरस्वतीन्द्राः पयआदीनि व्यन्तु । हे होतः त्वम् आज्यस्य यज ॥ ३७ ॥

होता यक्षत्सुरेतसम् । होता त्वष्टारं यजतु । किम्भूतं सुरेतसं शोभनं रेतः उदकलक्षणं यस्य वृष्टिद्वारा । यद्वा पुंसां रेतसः कारणभूतम् ऋषभं वर्षितारं नर्यापसं नरेभ्यो हितं नर्यम् अपः कर्म यस्य स नर्यापाः तं तथा इन्द्रम् अश्विनौ सरस्वती भिषजं च यजतु नकाराश्चार्थाः । केन यजतु ओजः जूतिर्जवः इन्द्रियं च ओजआदिप्रदः रभसा सोमो दक्षः भिषक् यो वृषः ईदृशेनो वृकेन यजतु । सुरायां वृकलोमानि क्षिप्यन्ते इत्यतो वृकेन याग उच्यते । तथा श्रिया सह पयो भेषजं मासरम् । उपादाय सुरया च यज । श्रीयशः इन्द्रे यजमाने या ते इज्यमानाः पयः आदीनि व्यन्तु हे होतर्यज ॥ ३८ ॥

होता यक्षद्वनस्पतिम् । शतक्रतुं बहुकर्माणं शमितारं वनस्पतिं होता यजतु । भीमं भयानकं मन्युं क्रोधात्मानं राजानम् । आरण्यानां पशूनां स्वामिनं व्याघ्रं च यजतु । नकारश्चार्थे । नमसा हविषा अश्विनौ च यजतु या सरस्वती भिषक् इन्द्राय भामं क्रोधम् । इन्द्रियं च दुहे दोग्धि तां च दैव्यो होता यजतु । ते इज्यमा-

नाः पयआदीनि घ्यन्तु। हे मनुष्यहोतस्त्वमपि आज्यस्य यज ॥३९॥

होता यक्षदग्निꣳस्वाहा। होता अग्निं प्रयाजदेवताम्। आहवनीयं वा यजतु। स्वाहा सु आह शोभनमाह यजमानः आज्यस्य स्तोकानां सु आह। स्तोका विप्लुषः मेदसां च या सम्बद्धानां पृथक् पृथक् शोभनमाह श्च्यमाणाश्च याः आज्येनाभिघार्यन्ते तदभिप्रायमेतत्। अश्विभ्यां छागं शोभनमाह। छागमेषऋषभशब्दाः पशुवचनाः। सरस्वत्यै च मेषं सु आह इन्द्राय ऋषभं सु आह। किंभूतम् ऋषभम्। इन्द्रियात्मकं सामानाधिकरण्यात्सम्बन्धः। अग्निं च भेषजं सु आह आज्यभागौ सु आहेत्यर्थः। नकाराश्चार्थे। इन्द्रियम्। इन्द्रियात्मकं सोमं सु आह इन्द्रं सुत्रामाणं सवितारं वरुणं भिषजां पतिं पशुपुरोडाशदेवताः। सु आह। प्रियं पाथः अन्नं भेषजं च पशुदेवतानां वनस्पतिं सु आह। देवा आज्यपाः प्रयाजानुयाजा वै देवा आज्यपाः शोभनमाह यजमानः देवा आज्यपाः इज्यमाना देवता उत्तमे प्रयाजे स्मर्यन्ते इत्यतो विभक्तिव्यत्ययोऽत्र न कृतः। श्रुतिस्तु। देवा ह वा ऊचुर्हन्त विजितमेवानुसर्वं यज्ञꣳसꣳस्थापयेत्युपक्रम्य तत उत्तमे प्रयाजे स्वाहाकारेणैव सर्वं यज्ञꣳसꣳस्थापयन्नित्याह। अतः स्वाहकाराः समाप्तिवचनाः समाप्तिवचनत्वाच्च स्वाहाकाराणां देवतापदस्य चतुर्थ्या भवितव्येति स्वाहा देवेभ्यः आज्यपेभ्य इत्ययं प्रकारः। जुषाणः सेवमानोऽग्निः भेषजम्। औषधमिन्द्रस्य यजमानस्य वा करोतु अश्विसरस्वतीन्द्राश्च दैव्येन होत्रा इज्यमानाः पयःप्रभृतीनि व्यन्तु हे मनुष्य होतः त्वमपि आज्यस्य यज ॥ ४० ॥

होता यक्षदश्विनौ। छागस्य प्रयो वपानां प्रैषाः यथालिङ्गम्। दैव्यो होता अश्विनौ यजतु इज्यमानौ च तौ अश्विनौ छागस्य वपाया मेदसः हविः जुषेताम्। स्नेहप्रकृतिर्मेदः। हे होतः त्वं च यज। होता यजतु सरस्वतीं सा च इज्यमाना मेषस्य वपाया मेदसो हविः जुषताम्। होता इन्द्रं यजतु स च इज्यमानः ऋषभस्य वपाया मेदसो हविर्जुषताम् ॥ ४१ ॥

होता यक्षदश्विनौ सरस्वतीम्। ग्रहाणां प्रैषः। अश्विनौ सरस्वतीं च सुत्रामाणमिन्द्रं च दैव्यो होता यजतु। एवं होतारमुक्त्वाध्वर्यूनाह हे अध्वर्यवः ये इमे सोमा वो युष्माकं वर्त्तन्ते। कीदृ-

शाः सुरामाणः सुरमणीयाः सुरावन्तो वा सुरामया वा छागैर्मेषैः ऋषभैश्च सुताः अभिषुताः समर्थीकृताः । नकाराः सर्वे समुच्चयार्थाः शष्पैः तोक्मभिः लाजैश्च महस्वन्तः महाभाग्ययुक्ताः महातर्पणीयाः मासरेण परिष्कृताः अलङ्कृताः । सम्पर्युपेभ्यः करोतौ भूषणे इति सुट् । शुक्राः शोचिष्मतः पयस्वन्तः पयसा संयुक्ताः अमृताः अमृतकल्पाः प्रस्थिताः होमाभिमुखीकृताः मधुश्चुतः मधुस्रवाः मधुक्षरणाः तान् ईदृशान् सोमान् अश्विनौ सरस्वती सुत्रामा वृत्रहा इन्द्रश्च जुषन्तां जुषित्वा च सोम्यं सोममयं मधु पिबन्तु मदन्तु तृप्यन्तु व्यन्तु भक्षयन्तु । हे मनुष्यहोतः यज ॥ ४२ ॥

होता यक्षदश्विनौ छागस्य हविषः । प्रैषः होता अश्विनौ यजतु यौ छागस्य हविषः आत्ताम् । अद् भक्षणे । अभक्षयताम् । अद्य अस्मिन् घावि मेदः उद्भृतम् । उदरमध्यतो वपालक्षणं मेदः उद्धृतं तदपि यौ आत्ताम् । हृग्रहोर्भः छन्दसीति भः । कथम् उद्धृतं द्वेषोभ्यः असुररक्षोभ्यः यज्ञद्वेष्टृभ्यो वा पुरा पूर्वं पौरुषेय्या गृभः पुरुषार्थं गृह्यत इति पौरुषेयी गृप् तस्याः पूर्वमिडाया इत्यर्थः । नहि वपाया यागे इडा विद्यते । यावेवं वपाहविषः आत्तां ताविदानीं नूनं निश्चयेन घस्तां भक्षयताम् । अश्वानां स्वमंशमिति शेषः । विशेषणैर्विशेष्यस्याध्याहारः । किम्भूतानामश्वानां घासे अज्राणां घासे घासे यान्यज्राणि स्युः घासे यैरज्जरितं यवसप्रथमानां यवसानामश्वानां यानि प्रथमानि संस्कृतत्वात् । एतद्वै परमन्नाद्यं यन्मांसमिति श्रुतिः । सुमत्क्षराणां सुमत्स्वयमित्यर्थः । स्वयमेव यानि क्षरन्ति शतरुद्रियाणां बहुश्रुतीनाम् । रुद्र इति हि स्तोतृनामसु पठितम् । रुद्रस्य स्तोतुरिमा रुद्रियाः स्तुतयः शतं रुद्रिया येषाम् । अग्निष्वात्तानाम् । अग्निना साधुपाकार्थमास्वादितानाम् । अग्निना सुशृतानामित्यर्थः । पीवोपवसनानां पीवःशब्दः स्थूलवचनः सान्तः । उपवसने पीव इति प्रातिशाख्यसूत्रेण उपवसने परे पीवःशब्दस्य विसर्गलोपः । पीवोभिः स्थूलैः उपोषितं यैः पीवसां स्थूलानाम् । उपवसनं समीपस्थितिर्येषामिति वा । किञ्च पार्श्वतः श्रवत्तानां श्रोणितोऽवत्तानां शितामतो ऽवत्तानां शितामशब्देन यकृद्वा शिताम योनिर्वा शिताम मेदो वा शिताम इति व्याख्याभेदाः । उत्सादतः उत्सादनप्रदेशात् छेदनप्रदेशादवत्तानाम् । एवमङ्गादङ्गा-

त् अवत्तानाम् । अवदानानामदां घस्तामिति एवं क्षितावदानौ अश्विनौ करतः कुरुतां तृप्तिमिति शेषः । हविश्च जुषेताम् । पुनर्वचनमादरार्थम् । हे मनुष्यहोतः त्वमपि यज ॥ ४३ ॥

होता यक्षत्सरस्वतीं मेषस्य । होता सरस्वतीं यजतु या हविष.आवयत् आङ्पूर्वस्य वेतेः खादनार्थस्य लेटि भूतार्थाभिधायिन एतद्रूपम् । यक्षत् करत् लोडर्थे लेट् जुषतामेकवचनम् ॥ ४४ ॥

होता यक्षदिन्द्रमृषभस्य । तुल्यव्याख्यानम् ॥ ४५ ॥

होता यक्षद्वनस्पतिमभि । वनस्पतिप्रैषः । वनस्पतिं यूपं होता यजतु हि यस्मात् यूपः अभ्यधित । स्थाघ्वोरिच्चेति दधातेर्लुङोत्वम् । अभिधारितवान् पशुधारणद्वारा यज्ञमिति शेषः । कया रशनया किम्भूतया पिष्टतमया सुरूपतमया पिष्टशब्दो रूपवाची रभिष्ठया आलब्धतमया अतिशयेन नियमनकारिण्या प्रार्थयामि च वनस्पतिं यत्र देशे अश्विनोः छागस्य हविषश्च प्रिया प्रियाणि धामानि स्थानानि यत्र च सरस्वत्याः इन्द्रस्य एताः पशुदेवताः अथाज्यभागौ अग्नेः सोमस्य । अथ पशुपुरोडाशदेवताः यत्र इन्द्रस्य सुत्राम्णः सवितुः वरुणस्य यत्र वनस्पतेः प्रियाणि पाथांसि पाथःशब्दोऽन्नवचनः । वनस्पतिः पशोरेवाङ्गम् । अथ प्रयाजानुयाजाः यत्र देवानाम् । आज्यपानाम् । अथ स्विष्टकृत् अग्नेर्होतुर्यत्र स्थानानि वनस्पतिर्देवः तत्र तेषु स्थानेषु तान् पशून् प्रस्तुत्येव प्रस्तुत्य च उपस्तुत्येव अतिशयार्थं पुनर्वचनम् । उपावस्रक्षत् उपावसृजतु वनस्पतिर्देवः रभीयस इव कृत्वी । रभ राभस्ये सरभसांश्च पशून् कृत्वा एवं करत् करोतु हविश्च जुषतां हे मनुष्यहोतः त्वमपि यज॥४६

होता यक्षदग्निᳪस्विष्टकृतम् । स्विष्टकृत्प्रैषः दैव्यो होता अग्निं स्विष्टकृतं यजतु । कथमित्यत आह योऽग्निः अश्विनोः छागस्य हविषः प्रियाणि धामानि जन्मानि अवदानानीत्यर्थः । अयाट् अयाक्षीत् इष्टवान् एवमग्रेऽपि सरस्वत्याः इन्द्रस्य सुत्राम्णः सवितुः वरुणस्येति पशुपुरोडाशदेवताः वनस्पतेः प्रियाणि पाथांस्यन्नानि अयाट् वनस्पतिः प्रधानाङ्गदेवानामाज्यपानाम् । प्रयाजानुयाजा आज्यपाः । अग्नेर्होतुः स्विष्टकृतः स्वयमेव प्रियाणि धामानि यक्षत् इष्टवान् स्वं महिमानं स्वां विभूतिं यक्षत् । किञ्च आयजतामेज्या इषः । आ इज्याः अभियष्टव्याः यागार्हाः इषः प्रजाः आयजतम् ।

मायजन्तामिति वचनव्यत्ययः । इया अन्नेन तासां स्थितिरुत्पत्तिश्चेति इषः प्रजा उक्ताः । यागशीला यागार्हाश्च प्रजा भवन्त्वित्यर्थः । स जातवेदाः अध्वरा अध्वराम् कृणोतु करोतु हविर्जुषतां च । हे मनुष्यहोतर्यज ॥ ४७ ॥

देवं बर्हिः । एकादशानुयाजप्रैषाः अश्विसरस्वतीन्द्रदेवत्याः । व्यवहितपदप्रायाः । शोभना देवा यस्य तत्सुदेवम् । ईदृशं यत् देवं बर्हिः अनुयाजदेवता तेन बर्हिषा सह सरस्वती अश्विनौ च तेजः चक्षुरिन्द्रियं च इन्द्रे अक्ष्योः अक्ष्णोः दधुः नकारश्चार्थः । एषमप्रेऽपि वसुवने वसुवननाय धनलाभाय वसुधेयस्य वसुनिधानाय च अश्विसरस्वतीन्द्राः पिबन्तु त्वमपि यज ॥ ४८ ॥

देवीर्द्वारः । या यज्ञगृहद्वारो देव्यः ताभिः अश्विना भिषजौ सरस्वती च प्राणमिन्द्रियं वीर्यं च नसि नासिकायाम् इन्द्रे दधुः । द्वारः द्वार्भिरिति विभक्तिव्यत्ययः । वसुवने इति व्याख्यातम् ॥ ४९ ॥

देवी उषासौ । नक्तोषासाविति प्राप्ते छान्दसः प्रातिपदिकलोपः । यौ देव्यौ नक्तोषासौ ताभ्यां नक्तोषासाभ्यां सुत्रामा शोभनत्राणौ अश्विनौ सरस्वती च बलं वाचमिन्द्रियं च आस्ये इन्द्रे दधुः वसु० ॥ ५० ॥

देवी जोष्ट्री । ये जोषयित्र्यौ देव्यौ द्यावापृथिव्यौ अहोरात्रे वा शस्यं च समा चेति कात्यक्यः । ताभ्यां जोष्ट्रीभ्यां सरस्वती अश्विनौ च इन्द्रमवर्द्धयन् कथमवर्द्धयन् यतः श्रोत्रमिन्द्रियं च कर्णयोः दधुः वसु० ॥ ५१ ॥

देवी ऊर्जाहुती । जोष्ट्र्योस्तुल्यदेवताविकल्पः । ये देव्यौ ऊर्जाहुत्यौ दुघे दुग्धे सुदुघा सुदोहने । उपरितनार्द्धर्चे आहुतीशब्दः श्रूयते स इह कृतविभक्तिव्यत्ययः क्रियते कृतपूर्वसवर्णा तृतीयैव । ताभ्याम् । ऊर्जाहुतीभ्यां सरस्वती अश्विनौ भिषजौ च भवतः अवन्ति । वचनव्यत्ययः । इन्द्रमिति शेषः । कथं कृत्वा शुक्रं शुक्रं ज्योतिः पयोलक्षणमिन्द्रियं च स्तनयोः इन्द्रे पयः दधुः । विभक्तिव्यत्ययः । वसु० ॥ ५२ ॥

देवा देवानाम् । यौ देवानां होतारौ देवौ ताभ्यां होतृभ्यां वषट्कारैश्च अश्विनौ भिषजौ सरस्वती च इन्द्रम् इन्द्रे इति विभक्तिव्यत्ययः । त्विषिं दीप्तिं मतिम् । इन्द्रियं च हृदये दधुः वसु० ॥ ५३ ॥

देवीस्तिस्रः । यास्तिस्रो देव्यः सरस्वतीडाभारत्यः । तिस्रो

देवीः। अत्र विभक्तिव्यत्ययोऽध्याहारश्च वाक्यवशात्। तिसृभिर्देवीभिः सरस्वतीडाभारतीभिः अश्विनौ सरस्वती च शूषं बलमिन्द्रियं च मध्ये नाभ्याम्। इन्द्राय विभक्तिव्यत्ययः इन्द्रे दधुः वसु० ॥ ५४ ॥

देव इन्द्रः। इदि परमैश्वर्ये। इन्द्रः परमैश्वर्यवान् यः देवो नराशंसः। नरा अस्मिन् आसीनाः शंसन्तीति त्रिवरूथः त्रिगृहः सदोहविर्धानाग्नीध्रैः त्रिलोक्या वा त्रिगृहः। यस्य च रथः सरस्वत्यां अश्विभ्यां च ईयते ऊह्यते नीयते स यज्ञः रेतः अमृतं रूपं च अनिग्नं जन्म इन्द्रियाणि च इन्द्राय इन्द्रे इन्द्रस्य वा। विभक्तिव्यत्ययः। दधातु। कीदृशो यज्ञः त्वष्टा त्वक्षतिः करोत्यर्थः जगतः कर्त्ता वसु० ॥ ५५ ॥

देवो देवैः। यो देवो वनस्पतिः यूपः देवैः हिरण्यपर्णः यस्य देवा हिरण्मयानि पर्णानि। रूपकोऽत्रालङ्कारः। यश्च अश्विभ्यां सरस्वत्या च। सुपिप्पलः सुफलः। अश्विनौ सरस्वती च यस्य वनस्पतेः फलानीत्यर्थः। यः इन्द्राय इन्द्रार्थं मधु मधुराणि फलानि पच्यते फलति स वनस्पतिर्नोऽस्माकम्। ओजः भामं क्रोधम्। इन्द्रियाणि च दधत् दधातु। नौ चार्थौ। कीदृशः जूतिः वेगवान्। जूतिर्जवतेः। ऋषभः पूज्यः ऋषभशब्दः पूजावचनः। न इति अस्मदो द्वयोश्चेति बहुवचनम्। वसु० ॥ ५६ ॥

देवं बर्हिः। यस्मात् वारितीनाम्। उदकवतीनां वारिप्रभवाणां वा वरतराणां वा ओषधीनां सम्बन्धि देवं दीप्यमानं बर्हिः ऊर्णम्रदाः। ऊर्णेव मृदु हे इन्द्र तस्मात् ते तव सदः स्थानं स्योनं सुखरूपम्। किञ्च हे इन्द्र तस्मिन् सदसि ईशायै ईशनाय ऐश्वर्याय अश्विसरस्वत्यः बर्हिषा मन्युं क्रोधं राजानं त्वाम्। इन्द्रियं च दधुः। यद्वा। हे इन्द्र तव ईशनाय मन्युं राजानं दीप्यमानम्। इन्द्रियम् अश्विसरस्वत्यः बर्हिषा दधुः। वसु० ॥ ५७ ॥

देवो अग्निः। यो देवो अग्निः स्विष्टकृत् शोभनमिष्टं कर्त्तव्यमित्ययमधिकारो यस्य सः देवान् यक्षत् इष्टवान्। कथं यथायथं यथास्वं यो यथा यष्टव्यः तथेत्यर्थः। एवं सामान्यत उक्त्वा विशेषमाह होतारौ अयं चाग्निरसौ च मध्यमो वायुः होतृमैत्रावरुणौ वा इन्द्रं च अश्विनौ च वाचा एत्या वाचं सरस्वतीम्। अग्निं सोमं च य-

क्षदिति सम्बन्धः । स्विष्टकृच्च स्विष्टः शोभनमिष्टः इन्द्रः सुनाम च इष्टः सविता इष्टः वरुणो भिषक् इष्टः आज्यपाः देवाः प्रयाजानुयाजा इष्टाः अग्निः अग्निना स्विष्टः । अथेदानीं होता स्विष्टकृत् ददातु । ददात्यर्थे दधातिः नकाराश्चार्थाः । वसु० ॥ ५८ ॥

अग्निमद्य । सूक्तवाकप्रैषः अयं यजमानः अद्य होतारमग्निम् । अवृणीत वृतवान् । किं कुर्वन् पक्तीः पक्तव्यानि वस्तूनि पचन् इति सामान्यवचनम् । अथ विशेषः पुरोडाशान् पचन् अश्विभ्याम् । अश्विनोरर्थे छागं बध्नन् यूपे इति शेषः । सरस्वत्यै मेषं च इन्द्राय ऋषभं च बध्नन् । अन्यच्च अश्विभ्यां सरस्वत्यै इन्द्राय सुत्राम्णे सुन्वन् अग्निं होतारमवृणीतेति सम्बन्धः ॥ ५९ ॥

सूपस्था अद्य । साधु यज्ञमुपतिष्ठते । इति सूपस्थाः । अद्य वनस्पतिर्देवः अश्विभ्यां छागेन सरस्वत्यै मेषेण इन्द्राय ऋषभेण सूपस्था अभवत् । कथमेवमवगम्यत इत्यत आह अश्विप्रभृतयः तान् छागादीन् मेदस्तः वपायामारभ्य अक्षन् भक्षितवन्तः पचता पचतानि । पचतेः भृमृदृशियजिपर्विपच्यमितमिनमिहर्यर्भ्योऽतच् । भूतेऽपि दृश्यन्त इति वचनाद् भूते द्रष्टव्यः । विभक्तेराकारः । पक्वानि अवदानानि प्रति अगृभीषत प्रतिगृहीतवन्तः पुरोडाशैः अवीवृधन्त च । किञ्च अश्विनौ सरस्वती इन्द्रश्च सुत्रामा सुरासोमान् अपुः पीतवन्तः सोमाश्च तान् सुरामयान् सोमान् ॥ ६० ॥

त्वामद्य । दैव्या होता अग्निरुच्यते । हे ऋषे मन्त्राणां द्रष्टः हे आर्षेय यजमानार्षेयैर्व्रियस इत्येवं सम्बोध्यते । हे ऋषीणां ऋत्विजां नपात् पुत्र अयं यजमानः बहुभ्यः सङ्गतेभ्यो देवेभ्यः त्वामेव अद्य आ अवृणीत वृतवान् । किमर्थम् । एष मे मह्यं देवेषु वारि वरणीयं वसु धनम् आयक्ष्यते आदास्यति दातुं समर्थ इति हे देव ता तानि या यानि दानानि देवा अदुः दत्तवन्तः तानि अस्मै यजमानाय दातव्यानि तानि अस्मै आशास्स्व च इच्छ आगुरस्व च । गुरी उद्यमने । उद्यच्छ च दानाय । आकारचकारौ भिन्नक्रमौ । हे होतः त्वम् इषितः प्रेषितोऽसि भद्रवाच्याय भन्दनीयाय वचनीयं भद्रं वचनं त्वां ब्रूया इति । अथ मानुषो होता सूक्तवाकाय साधुवचनाय प्रेषितः । कथं सूक्ता सूक्तानि साधुवचनानि ब्रूहि वदेति ॥ ६१ ॥ इति समाप्ता सौत्रामणी ।

इति मन्त्रभाष्ये एकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ॥ २२ ॥

अथाश्वमेधश्चतुर्भिरध्यायैः । तं च प्रजापतिरपश्यत् । तेजोऽसि । सौवर्णं निष्कं प्रतिमुञ्चन् वाचयति । त्वं तेजः असि शुक्रं चाग्नेः । अग्निर्ह वा अपोऽभिदध्यावित्युपक्रम्य तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवदिति श्रुतिः । अमृतं च अग्निप्रभवत्वात् दानेनामृतत्वप्रदानाच्च हिरण्यदा अमृतत्वं भजन्त इत्युक्तेः । आयुष्पा आयुषो गोपायिता अतः प्रार्थये मे मम आयुः पाहि यज्ञसमाप्त्यर्थमायुः प्रार्थ्यते । रशनामादत्ते देवस्य त्वेति व्याख्यातम् ॥ १ ॥

इमामगृभ्णन् । त्रिष्टुप् रशनादेवत्या । विदथेषु यज्ञेषु ये कव्या कवयः विश्वस्रष्टारो वा आद्ये ये सर्गे प्रजापतिप्रभृतयः एते सृष्टि यज्ञादसृजन्तेति ऋतस्य यज्ञस्य पूर्वे प्रथमे आयुषि यज्ञारम्भे इत्यर्थः । या इमां रशनाम् दर्भमयीम् अगृभ्णन् गृहीतवन्तः सा रशना नोऽस्माकम् अस्मिन् सुते यज्ञे आबभूव आभृता उत्पन्ना । कीदृशी ऋतस्य सामन् संमनने यज्ञप्रारम्भे सरं यज्ञप्रसरम् आरती शब्दायमाना ॥ २ ॥

अभ्यादधाम्यश्वम् । अभिधा असि । हे अश्व यः त्वमभिधा अभिधातव्योऽसि भुवनमाश्रयश्चासि यन्ता यमनेन कर्त्ता चासि धर्त्ता धारयिता चासि स त्वमेवंप्रभावः स्वाहाकृतः साधुहुतः सन् सप्रथसं सर्वतः तिर्यगूर्ध्वमधश्च सता पेद्वर्येण पृथुं वैश्वानरमग्निं गच्छ ॥ ३ ॥

स्वगा त्वा । हे अश्व देवेभ्यः प्रजापतये च त्वां स्वगा करोमि स्वगाशब्दो डाजन्तः । स्वयं गामिनमित्यर्थः । ब्रह्माणमामन्त्रयते । ब्रह्मन्नश्वम् हे ब्रह्मन् देवेभ्योऽर्थाय प्रजापतये च अश्वं भन्त्स्यामि बधातेरूपम् । अश्वस्य बन्धनं करिष्यामि तेन बन्धेन अहं राध्यासं राधिं प्राप्नुयाम् । राधिः कर्मसमाप्तिः । ब्रह्मा प्रसौति तं बधान यमिच्छसि तमश्वं बधान तस्य बन्धनं कुरु । किमर्थं देवेभ्यः प्रजापतये च । तेन बन्धेन राध्नुहि यज्ञसमाप्तिं प्राप्नुहीत्यर्थः ॥ ४ ॥

प्रोक्षत्यश्वम् प्रजापतये जुष्टम् । प्रजापतेर्वल्लभं त्वां प्रोक्षामीति । ऋजवः प्रोक्षणमन्त्राः । यजमानं वाचयति । यो अर्वन्तम् । गायत्री ।

अर्थेनाश्वस्तुतिः यः पुरुषः अर्वन्तम्। अर्वन्शब्दोऽश्ववचनः। जिघांसति हन्तुमिच्छति वरुणः तम्। अभ्यमीति हिनस्ति। अम् हिंसायाम्। तुरुस्तुशम्यमः सार्वधातुके इति ईकारप्रत्ययः लटि। मृतं श्वानं चतुरक्षं हत्वाधस्पदमश्वस्योपप्लावयति। यद्यपि शुनश्चतुर्नेत्रता नास्ति तथापि यस्य नेत्रसमीपे पुण्ड्रे स्तः स चतुरक्ष उच्यते तं हत्वाऽश्वपादेषु मुञ्चति। परो मर्तः। योऽश्वं जिघांसति स मर्तो मनुष्यः परः पराभूतः अधस्पदं नीतः श्वा च परः पराकृतः ॥ ५ ॥

दशाश्वस्तोकीया जुहोति। अग्नये स्वाहेति ऋजवो होममन्त्राः ॥६॥

अश्वस्य रूपाणि जुहोति। हिङ्काराय स्वाहेति। एकोनपञ्चाशत् अश्वस्य चेष्टितानि क्रियाश्चात्राभिधीयन्ते ॥ ७ ॥

विवृत्ताय दीप्यमानाय। वृत् दीप्तौ। यते स्वाहा यतीति यन् तस्मै। स्पष्टमन्यत् ॥ ८ ॥

अथ सावित्रीणामिष्टीनां तत्सवितुरित्यादिकाः षट् याज्यानुवाक्याः सावित्र्यः। आद्या व्याख्याता ॥ ९ ॥

हिरण्यपाणिमहं सवितारमुपह्वये आह्वयामि। किमर्थम्। ऊतये अवनाय। किम्भूतं हिरण्यपाणिं हिरण्मयौ पाणी यस्य तं यतः सः सविता चेत्ता सर्वार्थदृक् महती च देवता पदं स्थानं च ज्ञानकर्मसमुच्चयकारिणम् ॥ १० ॥

देवस्य चेततः। चेततः विजानतः सवितुर्देवस्य मही महतीं सुमतिं कल्याणीं मतिं प्रवृणामहे प्रार्थयामः। किम्भूतां मतिं सत्वराधसम्। अनश्वरधनां सत्यसाधयित्रीं वा ॥ ११ ॥

सुष्टुतिम्। सवितुर्देवाय देवस्येति विभक्तिव्यत्ययः। सुष्टुतिं शोभनां स्तुतिं राति दानं च प्र ईमहे याचामः। किम्भूतस्य सवितुः सुमतीवृधः शोभनां मतिं वर्द्धयतीति सुमतीवृत् तस्य सुमतीविदे मतीविद इति विभक्तिव्यत्ययः। मतिं सर्वेषां वेत्तीति दीर्घः संहितायाम् ॥ १२ ॥

रातिं सत्पतिम्। रा दाने। रातिनिमित्तत्वाद्रातिशब्देन सवितैवोक्तः। रातिं दानरूपम्। यद्वा राति ददातीति रातिः ऊतियूतीति कर्त्रर्थे तिप्रत्ययः। सत्पतिं सतां पालयितारं सवितारं उपह्वये आह्वयामि महे पूजयामि च किमर्थं देववीतये देवतर्पणाय। किंस-

वितारम्। आसवम्। आभिमुख्येन सौति प्रसौति कर्मण्यनुजानातीति आसवः तम् ॥ १३ ॥

देवस्य सवितुः। आशयम्। आशारूपं विश्वदेव्यं सर्वेभ्यो हितं सवितुर्देवस्य मतिं धिया स्वकीयया प्रज्ञया भगं भजनीयं धनं मनामहे याचामः। द्विकर्मा चायं धातुः तेन मतिशब्दे भगशब्दे च द्वितीया ॥ १४ ॥

अग्निᳪंस्तोमेन। तिस्र आग्नेय्यो गायत्र्यः। हे अध्वर्यो अग्निं स्तोमेन स्तुत्या बोधय अवगतार्थं कुरु। किं कुर्वन् समिधानः संदीपयन्। किम्भूतमग्निम्। अमर्त्यम्। अमरणधर्माणं स च बोधितः सन् नोऽस्माकं हवींषि देवेषु दधत् दधातु धारयतु स ह्यस्याधिकार इति ॥ १५ ॥

स हव्यवाट्। य एवंविधः सोऽग्निः धिया प्रज्ञया सम्मृण्वति सङ्गच्छते देवैः सह हविषा तर्पणाय। कीदृशः हव्यवाट् हविषां वोढा अमर्त्यः उशिक् मेधावी दूतः देवानां चनोहितः। चन इत्यन्ननाम। चनसे हितः हविर्भूतस्यान्नस्य भक्षणार्थं निहितः ॥ १६ ॥

अग्निं दूतम्। हव्यवाहं हविषां वोढारं देवानां दूतं यमग्निं पुरो दधे पुरतः स्थापयामि तमुपगम्य ब्रुवे ब्रवीमि। किं ब्रवीमि इह यज्ञगृहे यागाय देवान् आसादयात् आसादय ॥ १७ ॥

अजीजनो हि। पावमानी। सौमी कृतिरनुष्टुप्। हे पवमान सोम हि यस्मात् त्वं सूर्यम् अजीजनः जनितवानसि जनयसि वा। शश्मना कर्मणा पयः अपः विधारे विधारयसि। केन हेतुना गोजीरया। जीवेयुरिति गोभिर्हि यज्ञस्तायते प्राणिनश्च जीवन्ति। किं कुर्वन् पुरन्ध्या पुरं बहु दधातीति पुरन्धिः तया बहुधारयिव्या धारया रंहमाणः गच्छन् दशापवित्रात् द्रोणकलशं प्रति तस्मात् त्वां स्तुम इति शेषः ॥ १८ ॥

अध्वर्युयजमानौ दक्षिणेऽश्वकर्णे जपतः विभूर्मात्रा। अश्व उच्यते। त्वं मात्रा मातुः सकाशात् विभूरसि विभवसि। पित्रा पितुः प्रभूरसि प्रभवसि। इयं वै माताऽसौ द्यौः पितेति श्रुतिः। अथ एवं नामक्रियाभिः स्तौति। अश्वः महाशनः त्वमसि हयोऽसि। हि गतौ। तस्य हयः। अत्योऽसि अत सातत्यगमने। मयोऽसि मय इति सुखनाम। सुखरूपोऽसि। अर्वासि ऋ गतौ अस्य अर्वा।

सतिरसि सरणोऽसि वाजी येजनवानसि धृषा सेक्तासि नृमणाः नृणां मनुष्याणां मनो यत्र स नृमणाः असि ययुर्नामासि ययुः एवं नामासि ययुर्यानशीलः अनेकगतिसूचनार्थं पुनः पुनर्गत्युक्तिः । शिशुः एवंनामासि शिशुः शंसनीयो भवति अपारमार्थिको वा नामशब्दः । यस्त्वमीदृशः तं त्वां ब्रवीमि आदित्यानां देवानां पत्वा पतनं मार्गम् । अन्विहि येन यथा आदित्याः पतन्ति गच्छन्ति तमनुगच्छ । रक्षिणोऽस्यादिशति देवा आशापलाः हे दिक्पालाः देवाः देवेभ्यः मेधाय यज्ञाय प्रोक्षितमेतमश्वं रक्षत । चतस्रो धृतीर्जुहोति इह रन्तिः । अथाश्व उच्यते । इह रमणम् । इह रमताम् । इह धृतिः इह स्वधृतिः साधुधृतिः इह यज्ञे अश्व तव क्रीडादय इत्यर्थः॥१९॥

औदूग्रभणानि जुहोति । काय स्वाहा प्रजापतये कस्मै प्रजापतये कतमस्मै प्राजापत्याय स्वाहाधिमाधीताय । पूर्वे स्वाहाकारान्तास्त्विस्र आहुतयः प्राजापत्याः । आधिमाध्यानं चतुर्थी चात्र कर्त्तव्या । आध्यै स्वाहा आधीताय स्वाहा मनः मनसे इति विभक्तिव्यत्ययः । प्रजापतये स्वाहा चित्तं विज्ञाताय चित्तायेति विभक्तिव्यत्ययः । आदित्यै मह्यै । मह पूजायाम् । पूज्यायै अदित्यै सुमृडीकायै । 'मृड सुखने । सुखयित्र्यै सरस्वत्यै पावकायै पावयित्र्यै बृहत्यै महत्यै पूष्णे प्रपथ्याय । प्रगतः पन्थाः प्रपन्थाः तत्र भवः प्रपथ्यः तस्मै नरन्धिषाय नरान् दधातीति नरन्धिषः तस्मै त्वष्ट्रे तुरीपाय तूर्णं पाति रक्षतीति तुरीपः पुरुरूपाय बहुरूपाय विष्णवे निभूयपाय नीचैर्भूत्वा यः पाति स निभूयपः । शिपिविष्टाय शिपिं पशुं यज्ञस्य वेष्टयति साधुकरोति स शिपिविष्टः ॥ २० ॥

विश्वो देवस्येति व्याख्यातम् ॥ २१ ॥

जपति । आ ब्रह्मन् । हे ब्रह्मन् राष्ट्रे ब्राह्मणः ब्रह्मवर्चसी यज्ञाध्ययनशीलः आजायतां राजन्यः राष्ट्रे ईदृशः आजायतां कीदृशः शूरः इषव्यः इषुणा विध्यतीति इषव्यः इषौ कुशलो वा अतिव्याधी अतिक्षिप्तं विध्यतीति महारथश्च धेनुर्दोग्ध्री राष्ट्रे आजायतामिति सर्वत्र संबन्धः । अनड्वान् वोढा सप्तिरश्वः आशुः शीघ्रः योषा स्त्री पुरन्धिः पुरं शरीरं रूपादि गुणसंयुतं दधातीति पुरन्धिः । रथेष्ठाः रथे तिष्ठतीति रथेष्ठाः । युवस्युः पुरुषो जिष्णुर्जयनशील आजायताम् । युवा आ अस्येति पदच्छेदः । अस्य यज-

मानस्य सभेयो युवा वीरः पुत्रः आजायतां गुणचरित्रैः सभामर्हतीति सभेयः। किञ्च नोऽस्माकं राष्ट्रे पर्जन्यो निकामे वर्षतु प्रार्थनायामवश्यं भवतीति निकामः। अभ्यासो वीप्सार्थः। अस्माकमोषधयः फलवत्योऽतिशयेन फलयुक्ताः पच्यन्ताम्। नः योगक्षेमः कल्पतां क्लृप्तो भवतु। योगो द्रव्यादीनां संयोगः। क्षेमस्तेषामेव परिपालनं योगश्च क्षेमश्चेति द्वन्द्वः तत्र नपुंसकलिङ्गता स्याद् द्विवचनं वा तत्र छान्दसो विसर्गो द्रष्टव्यः॥ २२॥

आज्यसक्तुधानालाजानामेकैकं जुहोति। प्राणाय स्वाहेति प्रतिमन्त्रं सर्वरात्रमावर्त्तम्॥ २३॥

व्युष्ट्या इति। व्युष्टायां स्वर्गायेत्युदिते प्राणाय स्वाहा इत्यारभ्य द्वादशभिः कण्डिकासंमितैरनुवाकैर्देवता उक्ताः आज्यादिद्रविभिरेते सर्वे एव यागाः महतो यज्ञस्य लोककालाग्न्यादिवपुषोऽवयविनोऽवयवभूताः। यथा देवदत्तस्यावयवाः शिरःपाण्यादयोऽवयवभूताः। सोऽयमश्वमेधः प्रजापतेरवयविनोऽवयवभूतः प्रजापतिश्चात्मनः। सोऽयमात्मा शाखाप्रशाखागतः स्तूयते हूयते च ज्ञानकर्मसमुच्चयकारिभिर्यजमानैः। एकस्मै स्वाहा द्वाभ्यां स्वाहेति प्रकारप्रदर्शनम्। त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहेति आ एकशतात्। रात्रिर्वै व्युष्टिरहः स्वर्गोऽहोरात्रे एव तत्प्रीणातीति श्रुतिः॥ २४-३४॥

इति मन्त्रभाष्ये द्वाविंशोऽध्यायः॥ २२॥

अथ त्रयोविंशोऽध्यायः॥ २३॥

हिरण्यगर्भः सम। महिम्नः पुरोरुक् व्याख्यातम्॥ १॥

उपयामगृहीतोऽसि। प्रजापतये जुष्टमभिरुचितं त्वां गृह्णामि। सादयति एष ते तव योनिः स्थानं सूर्यस्ते तव महिमा महाभाग्यं शक्तिः दीपस्येव प्रभा। जुहोति। यस्ते ऽहन्। यः ते तव अहनि संवत्सरे च महिमा संबभूव संभूतः उत्पन्नः अहनि संवत्सरे च निमित्तभूते सर्वाण्येव भूतानि संपद्यन्ते। निमित्तसप्तम्यश्चैताः चर्मणि द्वीपिनं हन्तीतिवत्। यः ते वायौ अन्तरिक्षे च महिमा संभूतः यः

ते सूर्ये दिवि च महिमा संभूतः तस्मै ते तव महिम्ने प्रजापतयेच देवेभ्यश्च स्वाहा ॥ २ ॥

द्वितीयं गृह्णाति तस्य पुरोरुक् । यः प्राणतः । त्रिष्टुप् । कायी प्राजापत्या वा । यः कः प्रजापतिः प्राणतः प्राणनं कुर्वतः निमिषतः निमेषणं कुर्वतः क्रियावत इत्यर्थः । ईदृशस्य जगतः एक इत एक एव महित्वा स्वकीयेन महाभाग्येन राजा बभूव यश्च अस्य द्विपदः चतुष्पदश्च प्राणिजातस्य ईशे इष्टे तस्मै कस्मै प्रजापतये देवाय ह-विषा विधेम हविर्देद्मः विदधातिर्दानकर्म्मा । हविरिति विभक्ति-व्यत्ययः ॥ ३ ॥

उपयामगृहीतोऽसि । प्रजापतये जुष्टं त्वां गृह्णामि । सादयति एष ते योनिः चन्द्रमाः ते महिमा । जुहोति । यस्ते रात्रौ संवत्सरे पृथिव्यामग्नौ नक्षत्रेषु चन्द्रमसि च महिमा संबभूव तस्मै ते तव म-हिम्ने प्रजापतये देवेभ्यश्च स्वाहा ॥ ४ ॥

अश्वं युनक्ति युञ्जन्ति ब्रध्नम् । गायत्री । अश्वोऽत्रादित्यवत् स्तूयते । उत्तरोऽर्धर्चः प्रथमं व्याख्यायते । यस्य भासा दिवि रोच-ना रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि रोचन्ते दीप्यन्ते तं ब्रध्नं परिवृढम् आदित्यं रथे युञ्जन्ति कीदृशम् अरुषम् अरोषणं च-रन्तं वैदिककर्मसिध्यर्थं गच्छन्तं के युञ्जन्ति परितस्थुषः विभक्ति-व्यत्ययः । सर्वतः स्थिता ऋत्विग्यजमानाः ॥ ५ ॥

इतरांश्च युनक्ति । युञ्जन्त्यस्य । गायत्री । हरी हरणौ वेगवन्तौ अश्वौ रथे युञ्जन्ति । कीदृशौ अस्याश्वमेधिकस्याश्वस्य काम्या काम्यौ कामसंपादिनौ । न ह्येको रथं वोढुं शक्तः । विपक्षसा । वि-विधाः पक्षसः पक्षाः ययोस्तौ विपक्षसौ विविधपक्षावस्थितौ यद्वा विरिति शकुनिनाम वेतेर्गतिकर्मणः । वेः शकुनेरिव पक्षौ य योस्तौ । शोणा शोणौ । शोणशब्दोऽत्र वर्णवचनः । रक्तो वर्णः धूम्रमासः शोण इत्युच्यते धृष्णू प्रसहता नृवाहसा नृणां मनुष्याणां वोढारौ ॥६

अपो यात्वावगाढेषु वाचयति । यद्वातः । बृहती अश्वदेवत्या । यत् यस्मात् वातः वातवेगोऽश्वः अपः प्रति अगनीगन् अत्यर्थं गतः । प्रियां च इन्द्रस्य तन्वं शरीरम् अगनीगन् अतो ब्रवीमि एत मश्वं हे स्तोतः अध्वर्यो अनेन पथा येन गतः । पुनरश्वमावर्त्तयासि आनय नोऽस्माकम् ॥ ७ ॥

आगतमश्वं महिषी वावाता परिवृक्ताज्येनाभ्यञ्जयन्ति वसवस्त्वेति प्रति मन्त्रम्। वसवः त्वा अञ्जन्तु निगदव्याख्यातम्। सौवर्णान् मणीन् एकशतमश्वकेशरपुच्छेषु प्रवयन्ति पत्न्यः। भूर्भुवः स्वः। व्याख्यातम् अश्वाय रात्रिहुतशेषं प्रयच्छति। लाजीन् शाचीन् योऽयं लाजीनां समूहः लाजीनित्युक्तः। योऽयं सक्तूनां समूहः शाचीनित्युक्तः। सक्तवो ह्यतितरां शच्या कर्मणा निष्पाद्यन्ते इति शाचीनित्युक्ताः। यश्चायं यव्ये यवमयः समूह उक्तो धानाः यश्च गव्ये गोविकारसमूह उक्तो गव्ये इति। हे देवाः एतत् अन्नमद्धि अन्नं भक्षयत हे प्रजापते एतदन्नम् अद्धि येभ्योऽश्वः प्रोक्षितः तद्देवत्वात् एतद्देवत्योऽश्व इति ॥ ८ ॥

ब्रह्मा पृच्छति होतारं यूयमभितः कश्वित्। चतस्रोऽनुष्टुभः प्रश्नप्रतिप्रश्नरूपाः। कः पुनः एकाकी असहायश्चरति गच्छति कः स्वित्। उपादपूरणः। को विनष्टः सन् पुनर्जायते किं पुनर्हिमस्य शीतस्य भेषजं किं महत् आवपनम्। आ उप्यते निक्षिप्यतेऽस्मिन्निति आवपनम् ॥ ९ ॥

होता प्रत्याह। सूर्यः एकाकी चरति भूमिरयं लोकः स्पष्टमन्यत् ॥ १० ॥

होता ब्रह्माणं पृच्छति कास्विदासीत् का पुनः पूर्वचितिः आसीत् किं पुनः बृहत् महत् वयः पक्षी। पुनरासीत् पिलिप्पिला का च पिशङ्गिला ॥ ११ ॥

ब्रह्मा प्रश्नान्व्याकरोति। द्यौरासीत् पूर्वचितिः। आसीत् द्युग्रहणेनात्र वृष्टिर्लक्ष्यते। वृष्टिः पूर्वचितिः पूर्वं चिन्त्यत इति पूर्वचितिः। सा हि पूर्वं सर्वैः प्राणिभिश्चिन्त्यते। अश्वो बृहद्वयः। अश्वशब्देनाश्वमेधो लक्ष्यते वयसा इव हि अनेनाश्वमेधेन स्वर्गलोकमारोहन्ति अघतीरयविः पृथिव्युच्यते। सा पिलिप्पिला वृष्ट्या हि पृथिवी क्लियमाना पिलिप्पिला भवति। श्रीरिति श्रुत्या पृथिव्युक्तैव। रात्रिः पिशङ्गिला पिशमिति रूपनाम। रात्रिर्हि सर्वाणि रूपाणि गिलति अदृश्यानि करोति ॥ १२ ॥

प्रोक्षत्यश्वं कण्डिकाचतुष्टयेन। वायुष्ट्वा वायुः पचतैः पाकैः त्वाम्। अवतु वायुना हि अग्निसंयोगात् द्रव्याणि पच्यन्ते असिता ग्रीवा यस्य धूमसंयोगात् स असितग्रीवो वह्निः छागैः त्वामवतु

कृष्णग्रीवादिभिः पर्यायैः अश्वाङ्गेष्वालभ्यमानेषु अश्वायोपकुर्वन्ति । अश्वेनोपकारेण न्यग्रोधः चमसैः अवतु सोमसम्बन्धेन शल्मलिः स्वकीयया वृद्ध्या त्वामवतु स्यः सः एषः राध्यः रथे साधुः वृषासेका चतुर्भिः पद्भिः पादैः आ इत् अगन् आगन् चतुर्ग्रहणं किं तस्मादश्वस्त्रिभिस्तिष्ठति अथ सर्वैः पड्भिः सममायुत इति श्रुतिः । ब्रह्मा परिवृढः अकृष्णश्च न विद्यते कृष्णमस्येत्यकृष्णः चन्द्रमाः स च नोऽस्माकमश्वमवतु । अग्नये नमः अग्निं नमस्करोत्यविघ्नाय ॥ १३ ॥

संशितः । तिस्रोऽनुष्टुब्विराट्त्रिष्टुभः । प्रोक्षणे एव अश्वदेवत्याः । संपूर्वः श्यतिः शोभने वर्तते । रथो यथा रश्मिना संशितो दर्शनीयोः भवति । हयोऽश्वो यथा रश्मिना संशितः एवमयमप्सुजाः अप्सु जातः अप्सुजा वा अश्व इति श्रुतिः । अप्सु अद्भिः संशितः । किम्भूतोऽप्सुजाः ब्रह्मा बिभर्तीति ब्रह्मा परिवृढो वा । सोमपुरोगमः सोमसंस्कारं पुरस्कृत्य स्वर्गलोकं गच्छतीति सोमपुरोगमः । सोमसंस्कारार्था हि पशवः स यत्पशुमालभते रसमेवास्मिन्नेतद्दधातीति श्रुतिः ॥ १४ ॥

किञ्च । स्वयं वाजिन् । हे वाजिन् स्वयमेव तन्वं शरीरं कल्पयस्व स्वाराज्यं तवास्तीत्यर्थः । अथ स्वयमेव यजस्व । न तेऽन्यो यष्टास्तीति भावः । स्वयं च जुषस्व । अभिरुचितं स्थानं कुरुष्व । कथमिति चेत् ते तव महिमा अन्येन महिम्ना न संनशे संनश्यते न व्याप्यते नशिरदर्शनार्थः । वेदे तु व्याप्त्यर्थो हि भवति ॥ १५ ॥

न वै । यत् संज्ञप्यसे एतत् त्वं न म्रियसे नच रिष्यसि विनश्यसि विशस्यमानः । वै उ पादपूरणौ । किमिति यतः सुगेभिः साधुगमनैः देवयानैः पथिभिः देवान् इत् प्रति एषि गच्छसि । किञ्च सुकृतः साधुकारिणः यत्र आसते यत्र च ते ययुः गताः सविता देवानाम् अग्निः पशुः आसीत् तेन ते अयजन्त सोऽग्निः तत्र साधनभावमुपगतः सन् एतं पृथ्वीलोकम् अयजन्त यस्मिन् लोके अग्निः अपः पिब । वायुः पशुः सूर्यः पशुः व्याख्यातमन्यत् ॥ १७ ॥

परिपश्व्ये हुत्वा प्राणाय स्वाहेति तिस्रोऽवराः । स्पष्टा मन्त्राः । घाचयति पत्नीर्नयन् । अम्बे । अनुष्टुप् । अश्वस्य स्तुतिः । पत्न्यः परस्परमामन्त्रयते । हे अम्बे । आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बाले-

ऽम्बिके पूर्वे इति अम्बे इत्यस्य प्रकृतिभावः । हे अम्बिके हे अम्बालिके कश्चन मां न नयति अश्वं प्रति न प्रापयति मदगमनेन च अश्वकः कुत्सितोऽश्वोऽश्वकः । अकुत्सितोऽपि ईर्ष्यया कुत्स्यते । काम्पीलवासिनीं सुभद्रिकाम् । कुत्सिता सुभद्रा सुभद्रिका इयमपीर्ष्यया कुत्स्यते तां परिगृह्य ससस्ति शेते । सस् स्वप्ने ह्रादिः । मया न गम्यते चेदश्वोऽन्यां गृहीत्वा शेते इति मया गम्यते ननु कश्चिन्नयतीत्यर्थः । काम्पीलनगरे हि सुभगाः सुरूपा विदग्धा विनीताश्च स्त्रियो भवन्ति ॥ १८ ॥

पत्न्यः तिस्रः परियन्ति अश्वम् । गणानां त्वा । स्त्रीगणानां मध्ये युगपत् गणपतिं त्वां हवामहे आह्वयामः । एवमेव प्रियाणां मनुष्याणां मध्ये प्रियपतिं भर्त्तारं त्वां हवामहे । एवमेव निधीनां मध्ये निधिपतिं त्वां हवामहे । किमिति हे वसो अश्व मम पतिस्त्वं भूयाः इति । महिषी अश्वमुपसंविशति । आहमजानि । हे अश्व अहं गर्भधं गर्भस्य धारयितृ रेतः आ आकृष्य अजानि क्षिपामि अज गतिक्षेपणयोः । त्वं च गर्भधं रेतः आकृष्य अजासि क्षिपसि ॥ १९॥

ता उभौ । यौ आवाम् कृतसंकेतौ त्वं चाहं च तौ उभौ चतुरः पदः पादान् द्वौ तावकौ द्वौ मामकौ संप्रसारयाव । एवं हि संवेशप्रकार इति भावः । अधीवासेन प्रच्छादयति । स्वर्गे लोके एष वै स्वर्गो लोको यत्र पशुं संज्ञपयन्ति प्रोर्णुवाथाम् । आच्छादनं कुरुतमित्यध्वर्युराह अश्वशिश्नमुपस्थे कुरुते । वृषा वाजी वृषा सेक्ता रेतोधा । रेतसो धारयिता वाजी अश्वः रेतो दधातु ॥ २० ॥

उत्सक्थ्याः गायत्र्याऽश्वं यजमानोऽभिमन्त्रयते हे वृषन् सेक्तः उद्गते सक्थिनी यस्याः सा उत्सक्थी तस्या महिष्याः अवगुदम् अवाचीनं गुदं रेतो धेहि सिञ्च । कथमिति चेत् अञ्जिम् अनक्ति व्यनक्ति पुंस्त्वमिति अञ्जिः पुंप्रजननमुक्तं तं संचारय योऽञ्जिः स्त्रीणां जीवभोजनः यस्मिन्सति स्त्रियो जीवन्ति भोगांश्च लभन्ते । जीवयतीति जीवः भोजयतीति भोजनः जीवश्चासौ भोजनश्च ॥ २१ ॥

इत उत्तरं दशानुष्टुभोऽभिमेथिन्यो द्वितीयोपरिष्टाद्बृहती । अत्र यो यत्र भण्यते स तत्र देवतात्वमुपगच्छति । अध्वर्युः कुमारीमभिमेथति । यकासकौ । अव्ययसर्वनाम्नामकच् प्राक् टेः । अकच्प्रत्ययोऽत्र कुत्सायाम् । अङ्गुल्या प्रदर्शयन्नाह या असौ शकुन्तिका ।

अल्पे कन्प्रत्ययः अल्पीयसी पक्षिणीव । आहलगिति प्रकारवचनम् हले हले इति ब्रुवती वञ्चति त्वरितं गच्छति चपलेत्यर्थः । तस्याः गभे पसः आहन्ति । गभे इत्याद्यन्तविपर्ययः । पस इति पसतेः स्पृशतिकर्मणः । हन्तिर्गत्यर्थः । भगे शिश्नम् आगच्छति अन्तर्भूतण्यर्थो वा भगे शिश्नमाहन्ति आगमयति प्रवेशयतीत्यर्थः । अथ तदाधारका योनिः निगल्गलीति नितरां गल्गलीति अत्यर्थं शुक्रं मुञ्चति । यद्वा शब्दानुकरणम् । निगल्गलीति गिरतेर्वा । निगिरति शिश्नं योनिः रेतः सम्भृता ॥ २२ ॥

अध्वर्युं प्रत्याह कुमारी । यकोऽसकौ । यः असौ शकुन्तक इव आहलक् इति तं शकुन्तकं विवक्षतः असाधुवक्तुमिच्छतः ते तव मुखमिव पश्यामि अतः हे अध्वर्यो त्वं नोऽस्मान् मा अभिभाषथाः ॥ २३ ॥

ब्रह्मा महिषीमभिमेथति । माता च ते । हे महिषि यदा तव माता तव पिता च वृक्षस्य वार्क्षस्येति तद्धितलोपः । वृक्षविकारस्य मञ्चकस्य अग्रम् उपरितनभागं रोहतः मैथुनार्थमेकपर्यङ्कमारोहत इत्यश्लीलाभिप्रायं वचनम् । तदा प्रतिलामि । तिल स्नेहने स्निह्याम्यहमनेन कर्मणेति वदन् ते तव पिता गभे भगे मुष्टिं मुष्ट्याकारं शिश्नम् । अतंसयत् अक्षिपत् एवं तवोत्पत्तिः ॥ २४ ॥

महिषी प्रत्याह । माता च ते । हे ब्रह्मन् ते माता पिता च वृक्षस्य पर्यङ्कस्य अग्रे यदा क्रीडतः तदा त्वमुत्पन्नः तुल्योत्पत्तिरावयोः । यश्चोभयोर्दोषो न तमेकश्चोदयितुमर्हति । एवमपि सति यदसाधु वदितुमिच्छत इव ते मुखं लक्षये तत् त्वं बहु मा वदः ॥ २५ ॥

उद्गाता वावातामभिमेथति । ऊर्ध्वामेनाम् । कश्चित्पुरुषमाह । एनां वावाताम् । ऊर्ध्वाम् । उच्छ्रापय उच्छ्रितां कुरु । कथमिव गिरौ भारं हरन्निव । यथा गिरौ भारं मध्ये निगृह्य हरेत् एवमेनां मध्ये निगृह्य ऊर्ध्वामुच्छ्रापय । अथ यथार्थे । तथा उच्छ्रापय यथा अस्याः मध्यं योनिप्रदेशः एधतां वृद्धिं यायात् । अथैनां निगृह्णीयाः शीते वाते पुनन् पावा खली च । पावा हि धान्यं वाते शुद्धं कुर्वन् ग्रहणमोक्षौ झटिति करोति तथेत्यर्थः ॥ २६ ॥

वावाता उद्गातारं प्रत्याह ऊर्ध्वमेनं भवतोऽप्येतदेव पनमुद्गातारम् । ऊर्ध्वम् उच्छ्रयतात् उच्छय अत्र स्त्री पुरुषायते । गिरौ भारं हरन्निव । अथैवं क्रियमाणस्यास्य मध्यं प्रजननम् । एजतु चलतु अथैनं निगृहीप्य शीते वाते पुनन् इव ॥ २७ ॥

होता परिवृक्तामभिमेथति । यदस्याः । यत् यदा अंहुभेद्याः । अल्पयोनेः । अंहुः हन्तव्यः भेद्यप्रदेशः प्रजननं यस्याः सा अंहुभेदी ईदृश्याः अस्याः । परिवृक्तायाः कृधु ह्रस्वं कृध्विति ह्रस्वनाम स्थूलं च शिश्नम् । उपातसत् उपसङ्गच्छेत् । अथ तदा अल्पत्वाद्योनेः स्थूलत्वाद्य पुंप्रजननस्य मुष्कौ वृषणौ इत् एवम् अस्याः प्रजननस्योपरि एजतः कम्पेते । कथमिव गोशफे गोष्पदे उदकपूर्णे शकुलौ मत्स्याविव ॥ २८ ॥

परिवृक्ता प्रत्याह यद्देवासः । होतृप्रमुखान् सर्वानेव ऋत्विजः परिवदति । यदा एते देवासः शिश्नदेवाः शिश्नैर्दीव्यन्तीति । शिश्नक्रीडिनः ललामगुम् । ललाममिति सुखनाम । ललामं सुखं कर्तुं गच्छतीति ललामगुः शिश्नम् । यद्वा ललामं पौण्ड्रमभिधीयते तद्गच्छति प्राप्नोतीति शिश्नं योनिं प्रविशत्पौण्ड्रं भवति प्रविष्टीमिनं प्रविश्य विष्टभ्य वा विष्टभ्य च आविषुः आलिङ्गनचुम्बनादिभिर्निगृह्णीयुर्नारीम् अथ तदा नारीसक्थ्ना देदिश्यते सक्थिकृतेन कुटिलगमनेन अतिदिश्यते लक्ष्यते नहि तस्याः किञ्चिदव्याप्तं भवति पुरुषेणान्यत्र सक्थ्न इति भावः । कथमिव अक्षिभुवः सत्यस्य यथा द्विप्रकारं सत्यम् । अक्षिप्रभवम् । अनक्षिप्रभवं च यथा अक्षिप्रभवं प्रत्यक्षम् । अक्षिभिर्गृह्यते तत्र सर्वं व्याप्तं स्यात् । अनक्षिप्रभवं श्रोत्रग्राह्यं तत्तु सापेक्षं वक्तुराप्ततामपेक्षते । अतो विशिनष्टि सत्यस्याक्षिभुवो यथा । अवितथात्वं तथेति ॥ २९ ॥

क्षत्ता पालागलीमभिमेथयति । यद्धरिणः । यदा हरिणो मृगः यवं सस्यम् अत्ति भक्षयति अथ तदा क्षेत्री पशु पशुमिति प्राप्ते विभक्तिलोपः । पशुं पुष्टं न मन्यते किन्तु अन्यथैवावगच्छति मम क्षेत्रं भक्षितमिति यथा एवं शूद्रा यत् यस्य भर्तुः जाया यदा अर्यजारा । अर्यः वैश्यः जारो यस्याः सा अर्यजारा भवेत् तदा स शूद्रः क्षेत्री पोपाय न धनायति न वाञ्छति पुष्टैतां धनमिव नमन्यते परस्योपभोग्यत्वात् ॥ ३० ॥

पालागली प्रत्याह । यद्धरिणो यवम् । अत्ति न पुष्टं बहु मन्यते श्रेष्ठीति यदुक्तं भवतोऽप्येतदेवमिति सोल्लुण्ठनमाह । इयांस्तु विशेषः । शूद्रः यत् अर्यायै अर्याया वैश्याया जारः तदा क्षेत्री वैश्यः आत्मनः पोषं नानुमन्यते न हि सा तस्य पोष्या किन्तु शूद्रः उत्कृष्टा वैश्येति । समासमश्लीलभाषणम् ॥ ३१ ॥

ऋत्विजो यजमानश्च सुरभिमतीम् । ऋचमन्ततोऽन्वाहुर्वाचमेव पुनते । दधिक्राव्णः । अनुष्टुप् । अश्वदेवत्या दधत् क्रामतीति दधिक्रावा अश्वः तस्य संस्कारार्थमश्लीलभाषणमकारिषम् । अकार्ष्म कृतवन्तः । वचनव्यत्ययः । किम्भूतस्य दधिक्राव्णः । जिष्णोः जेतुः अश्वस्य अश्नव्यापिनः वाजिनः । ओविजी भयचलनयोः । वेजनवतः वेगवतः तत्र नोऽस्माकं मुखा मुखानि सुरभीणि । निकारलोपश्छान्दसः । करत् करोतु यज्ञम् । इत्यध्याहारः । अश्लीलभाषणेन हि दुर्गन्धीनि मुखानि भवन्ति पापहेतुत्वात् । किञ्च नोऽस्माकमायूंषि प्रतारिषत् प्रवर्द्धयतु च बहुवचनं बालयौवनवृद्धवयोऽपेक्षम् ॥ ३२ ॥

तिस्रः पत्न्योऽसिपथान्कल्पयन्ति । गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्त्या सह बृहती उष्णिहा सह ककुप् च सूचीभिः त्वां शम्यन्तु शमनम् अङ्गानामवभेदने वर्त्मदर्शनं तत्सूचीभिः क्रियते तेन यथा असिः प्रवर्त्तते ॥ ३३ ॥

द्विपदाः । याः द्विपदाः याः चतुष्पदाः त्रिपदाः षट्पदाश्च याः विच्छन्दाः विगतः छन्दो याभ्यः विषमाक्षराः विषमपदाः छन्दोलक्षणेनानभिसंबद्धाः याश्च सच्छन्दाः अन्यूनातिरिक्ताक्षराः छन्दोजातयः ताः सर्वाः सूचीभिः त्वां शम्यन्तु ॥ ३४ ॥

महानाम्न्यः । महानाम्न्यः ऋचः शाक्वर्य इति भण्यन्ते रेवत्यः ऋच रैवतं हि तासु साम भवति विश्वाः सर्वाः आशाः दिशः प्रभूवरीः प्रभूततमाः मैघीः मेघमया विद्युतः याश्च वाचः ताः सर्वाः सूचीभिः त्वां शम्यन्तु शमनेन हविः कुर्वन्तु ॥ ३५ ॥

नार्यस्ते । तव यजमानस्य पत्न्यो नार्यः नृणामपत्यानि नार्यः मनीषया मनस इच्छया पर्यालोचनेन लोम रोमाणि विचिन्वन्तु पृथक् कुर्वन्तु देवानां पत्नीभूता दिशः सूचीभिः त्वां शम्यन्तु ॥३६॥

रजता हरिणी सीसा । रजतसुवर्णसीसमय्यः सूच्यः युजः सहयोजनाः कर्मभिः सीमालक्षणैः युज्यन्ते ताः वाजिनो वेजनवतोऽश्वस्य त्वचि रोमसु सिमाः । सिमाशब्दः सीमपर्यायो मर्यादावचनः सीमाः कुर्वाणाः शम्यन्तु हविः कुर्वन्तु किं भूताः शम्यन्तीः हविः कुर्वाणाः अश्वम् ॥ ३७ ॥

कुविदङ्गेति व्याख्यातम् ॥ ३८ ॥

अश्वं विशास्ति अनुवाकेन पड्चेन । तत्राद्या गायत्री पञ्चानुष्टुभः । कस्त्वा । कः प्रजापतिः त्वाम् । आच्छ्यति छो छेदने आच्छिनत्ति । कः त्वां विशास्ति त्वचा वियोजयति कश्च ते तव गात्राणि शरीराणि शम्यति शमनेन हविः करोति कविर्मेधावी कः ते शमिता । उपादपूरणः । यद्वा प्रश्नरूपोऽयं मन्त्रः कः मनुष्यः त्वाम् आच्छ्यति न कश्चिदपीति भावः । एवमग्रेऽपि ॥ ३९ ॥

यस्मिन् पक्षे कः प्रजापतिरिति व्याख्यातं तस्मिन्पक्षे प्रतार्यते ऋतुथा ऋतावृतौ काले काले ते तव पर्वाणि विशासतु त्वां शम्यन्तु च शमनेन हविः कुर्वन्तु अथ यदा तु कः मनुष्यः त्वां विशयितुं समर्थ इति पूर्वऋचो व्याख्यानं तदा ऋतवो देवास्ते शमितार इति व्याख्येयम् ॥ ४० ॥

अर्धमासाः । हे अश्व अर्धमासाः मासाश्च शम्यन्तः शमनेन हविर्भावमापादयन्तः ते तव परूंषि पर्वाणि आच्छ्यन्तु आच्छिन्दन्तु । किञ्च अहोरात्राणि मरुतश्च ते तव विलिष्टं दुर्दिलष्टं सूदयन्तु । षूद क्षरणे पठ्यते इह तु सन्धानार्थः वाक्ययोगात् सन्दधतु ॥ ४१ ॥

दैव्या अध्वर्यवः । अश्विप्रभृतयः त्वाम् । आच्छ्यन्तु विशासतु च । चकारो भिन्नक्रमः । किञ्च ते तव गात्राणि गात्रेषु पर्वशः सिमाः मर्यादाः कृण्वन्तु कुर्वन्तु किंसिमाः शम्यन्तीः ॥ ४२ ॥

द्यौस्ते । द्यौः पृथिवी अन्तरिक्षं वायुश्च ते तव छिद्रं पृणातु पूरयतु सूर्यस्तु नक्षत्रैः सह ते तव साधुया साधुलोकं कृणोतु । साधुया द्वितीयार्थे छान्दसः ॥ ४३ ॥

शं ते । हे अश्व ते तव परेभ्यः अवरेभ्यश्च गात्रेभ्यः शम् अस्तु अस्थभ्योऽस्थिभ्यो मज्जभ्यश्च शम् । अस्तु तव तन्वै शरीराय षष्ठ्यर्थे चतुर्थी । तन्वाः शम् अस्तु । उपादपूरणः ॥ ४४ ॥

इत उत्तरं ब्रह्मोद्यमष्टादशर्चम्। ब्रह्मोद्यं नाम उत्तरप्रत्युत्तरैः परस्परं सम्वादः तत्र आद्याश्चतस्रोऽनुष्टुभः। कास्विदासीदित्याद्याश्चतस्रश्च त्रिष्टुभोऽन्या दश। होताध्वर्युं पृच्छति कः स्विदेकाकी। तं प्रत्याह सूर्य एकाकी। अग्रे व्याख्याते ॥ ४५ ॥ ४६ ॥

अध्वर्युर्होतारं पृच्छति किंस्वित् किञ्च सूर्यसमं ज्योतिः समुद्रसमं सरः किं पृथिव्यै पृथिव्याः सकाशात् वर्षीयः महत्तरं किं कस्य मात्रापरिमाणं न विद्यते ॥ ४७ ॥

तं प्रत्याह। ब्रह्म सूर्यसमं ज्योतिः। ब्रह्म त्रयीलक्षणं परं वा। द्यौः समुद्रसमं सरः पृथिव्यै इन्द्रो वर्षीयान्महत्तरः गोस्तु मात्रा नास्ति गवा हि यज्ञो धार्यते स जगतः कारणं भवतीति भावः पृथिवी वा गौः ॥ ४८ ॥

ब्रह्मोद्गातारं पृच्छति। पृच्छामि त्वा हे देवसख उद्गातः त्वां चितये ज्ञानाय पृच्छामि। चिती संज्ञाने। यदि त्वम् अत्र पृष्टः सन् मनसा प्रश्नविवेचनाय जगन्थ सूक्ष्मार्थान् जानासि। प्रश्नमाह विष्णुर्यज्ञः येषु त्रिषु पदेषु गार्हपत्याहवनीयदक्षिणाग्निषु आ इष्टः यज्ञे रूपम्। तेषु विश्वं भुवनं भूतजातम्। आविवेश आविष्टम्। उत नेति प्रश्ने प्लुतः ॥ ४९ ॥

प्रत्याह। अपि तेषु। येषु। त्रिषु पदेषु गार्हपत्यादिषु भुवनमाविवेश तेषु अहमस्मि। अपिशब्दात् त्वं च यत्पुनरुक्तं त्वया यदि त्वमत्र मनसा जगन्थेति। अत्र ब्रूमः। पृथिवीम्। उत अपि द्याम्। अस्य दिवः पृष्ठं च सद्यस्तत्क्षणमेव एकेनाङ्गेन मनसा पर्येमि परिगच्छामि किमुत भूतजातान्याविष्टानीति ॥ ५० ॥

उद्गाता ब्रह्माणं पृच्छति। केषु केषु अन्तर्मध्ये पुरुष आविवेश आविष्टः कानि च अन्तर्मध्ये पुरुषे अर्पितानि हे ब्रह्मन् एतत्त्वाम्। उपवल्हामसि। वल्ह प्राधान्ये इह स्वाह्वानपूर्वे संहर्षे वर्त्तते। उपपूर्वः उपसंगम्याहूय बाहू उत्क्षिप्य पृच्छामः अत्र प्रश्ने नोऽस्माकं किंस्वित् प्रतिवोचासि प्रतिब्रवीषि ॥ ५१ ॥

प्रत्याह। पञ्चस्वन्तः पञ्चसु मध्ये पुरुषः आविवेश पञ्च प्राणाः किञ्च तानि प्राणाधीनानि करणानि अन्तः पुरुषेऽर्पितानि प्राणानामात्मनश्च परस्परापेक्षासिद्धिः नचात्मानमन्तरेण प्राणाः व्यायन्ते न प्राणानन्तरेणात्मेति च श्रुतिः त्वाम् एतत्प्रतिमन्वानः प्रतिजा-

नानः। अत्र प्रश्नोत्तरे अस्मि अधस्थितः त्वं च मायया बुद्ध्या मत् मत्तः उत्तरः उद्गततरो न भवसि ॥ ५२ ॥

होताध्वर्युं पृच्छति। कास्विदासीत् ॥ ५३ ॥

प्रत्याह। द्यौरासीत् व्याख्याता ॥ ५४ ॥

अध्वर्युर्होतारं पृच्छति। का ईमरे। ईमिति चकारार्थे। अरे इत्यामन्त्रितविषयः। उभावपि निपातौ। अरे होतः का च पिशङ्गिला का च कुरु पिशङ्गिला कश्च आस्कन्दम् अर्षति कश्च पन्थां पन्थानं विसर्पति ॥ ५५ ॥

प्रत्याह। अजारे अरे अध्वर्यो अजा पिशङ्गिला अजा नित्या रात्रिः। सा हि पिशं रूपं गिलति भक्षयति। स हि तस्याः स्वभावः श्वावित् सेधा कुरु पिशङ्गिलां कृत्वा कृत्वा उपलभ्योपलभ्य पिशं रूपं गिलति खादति सा कुरु पिशङ्गिला सा हि किल शतं मूलानां श्वो भक्षणाय स्वकुक्षौ स्थापयति शतं च भक्षयति कुक्षिणं स हि तस्याः स्वभावः। शशः आस्कन्दम् आस्कन्द्यास्कन्द्य मूत्रयन् अर्षति गच्छति स हि तस्य स्वभावः। अहिः स्वकीयं पन्थानं विसर्पति विकुर्वन् गच्छति ॥ ५६ ॥

ब्रह्मोद्गातारं पृच्छति कत्यस्य। अस्य यज्ञस्य कति विष्ठाः कतिप्रकारमन्नं विशेषेण तिष्ठति यज्ञो यासु ता विष्ठाः अन्नानि कति चाक्षराणि कति होमाः समिद्धः समिधः कतिधा यज्ञस्य विदथा वेदनेन हेतुना त्वां पृच्छं पृच्छामि। अत्र यज्ञे कति होतारः ऋतुशः ऋतुयाजान् यजन्ति ॥ ५७ ॥

प्रत्याह। षडस्य रससंख्ययोपजिहीर्षुः प्रश्नं व्याकरोति। षट् अस्य यज्ञस्य विष्ठाः सर्वान्नानां षड्रसात्मकत्वात् शतम् अक्षराणि छन्दसामुद्धारेणोपसंजिहीर्षुराह चतुर्दशछन्दांसि। गायत्रीप्रभृतीनि चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि अतिधृतिस्तु षट्सप्तत्या भवति। एतैः प्रायशो यज्ञस्तायते। तत्र गायत्री चातिधृतिश्च शतमेकम् उष्णिक् धृतिश्च शतमेकम् अनुष्टुप्। अत्यष्टिशतमेकम्। एवमन्येष्वपि छन्दस्सु आरोहावरोहाभ्यां शतमेवेत्यभिप्रायेण शतमक्षराणीत्युक्तम्। अशीतिर्होमाः। एकविंशतिरश्वमेधे यूपाः तत्र अग्निष्ठे अश्वतूपरगोमृगान्नियुनक्ति इतरेषु षोडश षोडश पशून्। तत्र विंशतियूपेष्वतष्टोऽशीतयो भवन्ति तदभिप्रायमेतत्। कतिधा

समिद्ध इति यदुक्तम् । अत्र ब्रूमः । ह स्फुटं तिस्र समिधः याभिः समिद्भिः संदीप्तः यज्ञः तास्तिस्रः अद्वस्तुएरगोमृगाः प्राजापत्याः पशवः यज्ञस्य विदथा आवेदनेन ते प्रब्रवीमि । सप्त होतारो वषट्कर्त्तारः ऋतुशः ऋतुयागेषु यजन्ति ॥ ५८ ॥

उद्गाता ब्रह्माणं पृच्छति को अस्य । अस्य भुवनस्य नाभिं कः वेद जानाति । द्यावापृथिवी अन्तरिक्षं च को वेद । बृहतो महतः सूर्यस्य जनित्रं जन्म को वेद । चन्द्रमसम् । विभक्तिव्यत्ययः । चन्द्रमसो यतोजाः । यतो जन्म तच्च को वेद ॥ ५९ ॥

प्रत्याह । वेदाहम् । अस्य भुवनस्य नाभिं नहनं बन्धनं परं ब्रह्म अहं वेद जानामि द्यावापृथिवी अन्तरिक्षं च ब्रह्मणो विकारभूतं वेद बृहतः सूर्यस्य जन्म परमात्मनः अथो अपि च चन्द्रमसो जन्म परमात्मनः यज्ञाद्वेति च वेद ॥ ६० ॥

अध्वर्यु यजमानः पृच्छति । पृच्छामि त्वा । पृथिव्याःपरम् अन्तं त्वां पृच्छामि । यत्र भुवनस्य नाभिः तं च पृच्छामि । वृष्णः सेक्तुरश्वस्य रेतः पृच्छामि वाचः परमं व्योम व्यवस्थानं पृच्छामि ॥६१॥

प्रत्याह इयं वेदिः । पृथिव्याः परः अन्तः इयं वेदिः । सर्वपृथ्वीरूपा वेदिरित्यर्थः । अयं यज्ञो भुवनस्य नाभिः नहनं यज्ञाद्धि प्रजाः प्रजायन्त इति श्रुतेः । अयं सोमश्चन्द्रमा लता सोमो वा वृष्णोऽश्वस्य रेतः । अयं ब्रह्मा ऋत्विक् वाचः परमं व्योम स्थानं त्रिवेदसंयोगात् ब्रह्मोद्यं समाप्तम् ॥ ६२ ॥

सुभूः स्वयम्भूः महिम्नः पुरोऽनुवाक्या अनुष्टुप् प्राजापत्या। सुभूः साधु भवनः स्वयम्भूः स्वेच्छया गृहीतशरीरः प्रथमः अनादिनिधनः पुरुषः महति अर्णवे महतोऽर्णवस्य अन्तर्मध्ये ऋत्वियं प्राप्तकालं गर्भं दधे । ह इति निपातः पुराकल्पद्योतनार्थः । यतो गर्भात् प्रजापतिः अनन्योपमः जातः ॥ ६३ ॥

प्रैषः । होता यक्षत् । सोमस्य महिम्नो ग्रहस्य संबन्धिनं प्रजापतिं देव्यो होता यजतु । स च प्रजापतिरीज्यमानः सन् जुषतां प्रीत्या परिगृह्णातु सोमं पिबतु च हे होतः त्वमपि यज ॥ ६४ ॥

प्रजापते न । इयं याज्या व्याख्यातो मन्त्रः ॥ ६५ ॥

इति मन्त्रभाष्ये त्रयोविंशोऽध्यायः ॥ २३ ॥